THE

VEDÂRTHAYATNA

OR

AN ATTEMPT TO INTERPRET THE VEDAS.

MARÂṬHÎ AND ENGLISH TRANSLATIONS,

TOGETHER WITH A SANSKRIT PARAPHRASE,

OF THE

ṚIGVEDA SAM̃HITÂ

WITH THE

ORIGINAL SAM̃HITÂ AND PADA TEXTS,

AND NOTES IN MARÂṬHÎ

VOL. IV.

MAṆḌ II,III.

(Hymns 192–296.)

(Registered under Act XXV of 1867).

Bombay:

PRINTED AT THE "NIRṆAYA-SÂGAR" PRESS.

June 1881.

वेदार्थयत्न.

ऋग्वेदसंहिता,

पदांसहित

व

तिचें मराठी आणि इंग्रजी

भाषांतर,

संस्कृत व्याख्या आणि मराठी टीका.

भाग ४.

मंडल दुसरें व तिसरें.

(सूक्त १९२–२९६).

मुंबईंत

"निर्णयसागर" छापखान्यांत छापिलें.

शके १८०३.

जून १८८१ इ०.

माझे

सर्व आर्य बंधु व भगिनी

यांस

हें भाषांतर

सादर समर्पण केलें आहे.

भाषांतरकर्ता.

सूक्तम् १—१९२.

त्वमग्ने द्युभिरित्यादिकं द्वितीयं मण्डलम् । त्वमग्ने द्युभिरिति सूक्तस्य मण्डलद्रष्टा गृत्समद ऋषिः । स च पूर्वमाङ्गिरसकुले शुनहोत्रस्य पुत्रः सन् यज्ञकालेऽसुरैर्गृहीत इन्द्रेण मोचितः । पश्चात्तद्वचनेनैव भृगुकुले शुनकपुत्रो गृत्समदनामाभूत् । अग्निर्देवता । जगती छन्दः ।

त्वम॑ग्ने द्युभि॒स्त्वमा॑शुशु॒क्षणि॒स्त्वम॒द्भ्यस्त्वमश्म॑न॒स्परि॑ ।
त्वं वने॑भ्य॒स्त्वमोष॑धीभ्य॒स्त्वं नृ॒णां नृ॑पते जायसे॒ शुचि॑ः ॥ १ ॥

त्वम् । अ॒ग्ने॒ । द्युऽभि॑ः । त्वम् । आ॒शु॒शु॒क्षणि॑ः । त्वम् । अ॒त्ऽभ्यः ।
त्वम् । अश्म॑नः । परि॑ ।
त्वम् । वने॑भ्यः । त्वम् । ओष॑धीभ्यः । त्वम् । नृ॒णाम् । नृ॒ऽप॒ते॒ । जा॒यसे॒ । शुचि॑ः ॥ १ ॥

भाषायाम्.

शर्तार्चिना प्रथमं मण्डलं व्याख्यातम् । अथ गार्त्समदं द्वितीयं मण्डलं व्याख्यायते ॥

१. हे अग्ने, त्वं द्युभिः (=अहभिः=प्रत्यहं)—त्वम् अद्भ्यः (=उदकानां सकाशात्) त्वम् अश्मनः परि (=मेघरूपात्पाषाणात्) आशुशुक्षणिः (=अतिशयेन दीप्तिमान्) [जायसे] । त्वं वनेभ्यः (=अरण्येभ्यस्)—त्वम् ओषधीभ्यः [सकाशात्]—हे नृणां नृपते (=नृणां प्रभो), त्वं शुचिः (=प्रकाशयुक्तो) जायसे (=उत्पद्यसे) ॥

सूक्त १—१९२.

ऋषि– अंगिरस्कुळांतील शुनहोत्राचा पुत्र गृत्समद, कीं ज्याला भृगुकुळांतील शुनकानें दत्तक घेतला होता, तो. देवता– अग्नि. वृत्त– जगती.

१. हे अग्नी, तूं प्रतिदिनीं, तूं उदकांपासून, तूं पाषाणापासून, तूं वनांपासून, तूं ओषधींपासून, हे मनुष्यांच्या राजा [अग्नी], तूं अत्यंत देदीप्यमान [आणि] पवित्र असा उत्पन्न होत असतोस.

Hymn 1—192.

To *Agni.* By *Gṛitsamada,* the son of *S'unahotra* of the family of the *Angirases,* afterwards adopted by *S'unaka* of the family of the *Bhṛigus.*

1. Thou, o Agni, [art] daily [born], thou [art born] resplendent, thou [born] of the waters, thou of the rock; thou art born brilliant of the forests, thou of the plants, thou, o Lord of men!

---

१. हें दुसरें मंडळ गृत्समद या नांवाच्या प्रसिद्ध ऋषीचें आहे. म्हणजे त्यानें केलेलें आहे. अथवा यांतील जीं सूक्तें तीं गृत्समदाच्या कुळांत सांपडलेलीं आहेत.

गृत्समद याविषयीं प्राचीन संस्कृतविद्याग्रंथांत मोठी प्रसिद्धि आहे; अगदीं प्राचीन जे कितीएक महर्षि त्यांपैकीं गृत्समद आहे. जसे वामदेव, अंगिरा, वसिष्ठ, विश्वामित्र तसाच गृत्समद. तर महर्षि गृत्समदाच्या वेळीं आर्यलोकांची स्थिति कशी होती, तें त्याचें मंडळ वाचल्यानें समजण्यासारिखें आहे.

'उदकांपासून.' म्हणजे मेघोदकें पडतात तेव्हां वीज पडते तद्रूपानें. 'पाषाणापासून,' म्हणजे मेघरूप पाषाणापासून, विद्युद्रूपानेंच; अथवा घर्षणानें दोन दगडांपासून उत्पन्न होतो तद्रूपानें. 'ओषधींपासून,' म्हणजे दोन लांकडें एकमेकावर घासल्यानें आग पडते तद्रूपानें.

हें सगळें सूक्त ग्रहयज्ञ म्हणून नव ग्रहांप्रीत्यर्थ एक कर्म करितात त्यांत म्हणत असतात.

तवा॑ग्ने हो॒त्रं तव॑ पो॒त्रमृ॒त्वियं॒ तव॑ ने॒ष्ट्रं त्वम॒ग्निदृ॑ताय॒तः ।
तव॑ प्रशा॒स्त्रं त्वम॑ध्वरीयसि ब्र॒ह्मा चासि॑ गृ॒हप॑तिश्च नो॒ दमे॑ ॥२॥

तव॑ । अ॒ग्ने॒ । हो॒त्रम् । तव॑ । पो॒त्रम् । ऋ॒त्विय॑म् । तव॑ । ने॒ष्ट्रम् । त्वम् । अ॒ग्नित् । ऋ॒त॒ऽय॒तः ।

तव॑ । प्र॒ऽशा॒स्त्रम् । त्वम् । अ॒ध्व॒रि॒ऽय॒सि॒ । ब्र॒ह्मा । च॒ । असि॑ । गृ॒हऽप॑तिः । च॒ । नः॒ । दमे॑ ॥ २ ॥

त्वम॑ग्न॒ इन्द्रो॑ वृष॒भः स॒ताम॑सि॒ त्वं विष्णु॑रुरुगा॒यो न॑म॒स्यः॑ ।
त्वं ब्र॒ह्मा र॑यि॒विद्ब्र॑ह्मणस्पते॒ त्वं वि॑धर्तः सचसे॒ पुर॑ंध्या ॥ ३ ॥

त्वम् । अ॒ग्ने॒ । इन्द्रः॑ । वृ॒ष॒भः । स॒ताम् । अ॒सि॒ । त्वम् । विष्णुः॑ । उ॒रु॒ऽगा॒यः । न॒म॒स्यः॑ ।

त्वम् । ब्र॒ह्मा । र॒यि॒ऽवित् । ब्र॒ह्म॒णः॒ । प॒ते॒ । त्वम् । वि॒ध॒र्त॒रिति॑ वि॒ऽध॒र्तः॒ । स॒च॒से॒ । पुर॑म्ऽध्या ॥ ३ ॥

भाषायाम्.

२. हे अग्ने, होत्रं तव (=होतृकर्म यदस्ति तत्तवैव भवति=त्वं होतासि) । तव पोत्रं (=पोतृकर्म यदस्ति तत्तवैव=त्वं पोता भवसि) । तव ऋत्वियम् (=ऋत्विजः कर्म यदस्ति तत्तवैव=त्वम् ऋत्विग्भवसि) । तव नेष्ट्रं (=नेष्टुः कर्म यदस्ति तत्तवैवास्ति=त्वं नेष्टा भवसि) । त्वम् अग्नित् (=अग्नीध्रो भवसि) । ऋतायतः (=ऋतं यज्ञं कामयमानस्य तव प्रशास्त्रं =प्रशास्तुः कर्म तव भवति =त्वमेव प्रशास्ता भवसि) । त्वम् अध्वरीयसि (=अध्वर्युर्भवसि) । ब्रह्मा चासि (=त्वं ब्रह्मा भवसि) । नो दमे (=अस्माकं गृहे) [त्वं] गृहपतिश्चासि (=गृहपतिर्भवसि= त्वमेव गृहस्य पतिर्भवसि) ॥

३. हे अग्ने, त्वं सतां वृषभ इन्द्रोसि (=सतां सज्जनानां पतिरिन्द्रो भवसि) । त्वम् उरुगायः (=पृथुक्रमो) नमस्यः (=नमनार्हो) विष्णुर् [भवसि] । हे ब्रह्मणस्पते (=स्तोत्रपते) [अग्ने], त्वं रयिवित् (=धनस्य लम्भयिता) ब्रह्मा [भवसि] । हे विधर्तः (=विविधानां जनानां धारक) [अग्ने], त्वं पुरंध्या (=महत्या बुद्ध्या) सचसे (=सह वर्तसे=महाप्रज्ञावानसि) ॥

२. हे अग्नी, तूं होता आहेस; तूं पोता; तूं ऋत्विज्; तूं नेष्टा; तूं अग्नीध्र; तूं यज्ञकामीं प्रशास्ता होस; तूं अध्वर्यूचें काम करितोस; तूं ब्रह्मा आहेस; आणि तूं आमच्या घरीं घरधनी आहेस.

2. Thine, o Agni, is the office of Hotâ; thine the office of Potâ; thine the office of Ṛitvij; thou art the Agnídhra; thou art the Pras'âstâ desirous of sacrificing; thou dost the work of the Advaryu, and thou art the Brahmâ, and thou art the host in our house.

३. हे अग्नी, तूं सज्जनांचा प्रभु इंद्र आहेस. तूं लांब पावलांचा नमस्कारार्ह विष्णु [होस]. हे ब्रह्मणस्पति [अग्नी], तूं धनाचा लाभ करून देणारा ब्रह्मा [होस], हे उद्धारक [अग्नी], तूं महाप्रज्ञेनें युक्त आहेस.

3. Thou, o Agni, art Indra the Lord of the good. Thou [art] Vishṇu of long steps, worthy of being honoured. Thou, o lord of prayer, art Brahmâ the giver of wealth. Thou art endowed with great wisdom, o protector!

---

२. 'अग्नि प्रगट झाला आणि त्यानें हवि स्वीकारिलें म्हणजे होता, पोता, ऋत्विज्, नेष्टा, अग्नीध्र, प्रशास्ता, अध्वर्यु आणि ब्रह्मा या नांवांचे जे यज्ञसंपादक पुरोहित, त्यांचीं आणि घरधनी जो यजमान त्याचीं सर्व कर्में यथायोग्य साधिलीं असें होतें', असा भावार्थ.

'होता' या पुरोहिताविषयीं* सू. १ मं. १ आणि सू. १२ मं. १ आणि टिपा पहा.

'पोता.' सू. ७६ मं. ४ आणि टीप पहा. 'नेष्टा.' सू. १५ मं. ९.

'अग्नीध्र' म्हणजे अग्नि पेटविणें हें ज्याचें काम असे असा एक पुरोहित.

'प्रशास्ता.' म्हणजे ज्याला मैत्रावरुण असें म्हणत तो पुरोहित असें सायण म्हणतात. सू. ९४ मं. ६ पहा. प्रशास्ता हा, होता या नांवाच्या ऋत्विजाचा एक हस्तक होय.

'घरधनी '=' गृहपतिः.' म्हणजे जो घरचा धनी अतिथीस आदरातिथ्य करणारा तो. अग्नि आमच्या घरीं घरधनी आहे, म्हणजे देव जे अतिथि आणि पाहुणे त्यांचें आदरातिथ्य करण्याचें काम तो करितो, अथवा त्यांस तो हवि खाऊं घालितो.

३. 'इंद्र, विष्णु इत्यादिक जे ते अग्नीहून भिन्न नाहींत' असा भावार्थ.

त्वम॑ग्ने॒ राजा॒ वरु॑णो धृ॒तव्र॑त॒स्त्वं मि॒त्रो भ॑वसि द॒स्म ईड्यः॑ ।
त्वम॑र्य॒मा सत्प॑ति॒र्यस्य॑ सं॒भुजं॒ त्वमंशो॑ वि॒दथे॑ देव भाज॒युः ॥ ४ ॥

त्वम् । अ॒ग्ने॒ । राजा॑ । वरु॑णः । धृ॒तऽव्र॑तः । त्वम् । मि॒त्रः । भ॒व॒सि॒ । द॒स्मः । ईड्यः॑ ।

त्वम् । अ॒र्य॒मा । सत्ऽप॑तिः । यस्य॑ । स॒म्ऽभुज॑म् । त्वम् । अंशः॑ । वि॒दथे॑ । दे॒व॒ । भा॒ज॒युः ॥ ४ ॥

त्वम॑ग्ने॒ त्वष्टा॑ विध॒ते सु॒वीर्यं॒ तव॒ ग्नावो॑ मित्रमहः सजा॒त्य॑म् ।
त्वमा॑शु॒हेमा॑ ररि॒षे स्वश्व्यं॒ त्वं न॒रां शर्धो॑ असि पु॒रू॒व॒सुः॥५॥१७

त्वम् । अ॒ग्ने॒ । त्वष्टा॑ । वि॒ध॒ते । सु॒ऽवीर्य॑म् । तव॑ । ग्नावः॑ । मि॒त्र॒ऽम॒हः॒। स॒ऽजा॒त्य॑म् ।

त्वम् । आ॒शु॒ऽहेमा॑ । र॒रि॒षे॒ । सु॒ऽअश्व्य॑म् । त्वम् । न॒राम् । शर्धः॑ । असि॒ । पु॒रु॒ऽव॒सुः ॥ ५ ॥ १७ ॥

भाषायाम्.

४. हे अग्ने, त्वं धृतव्रतः (=सर्वैरपि कृतशासनो) राजा वरुणो [भवसि] । त्वं दस्मः (=पराक्रमी) ईड्यः (=स्तुत्यश्च) मित्रः (=एतन्नामको देवो) भवसि । यस्य संभुजं (=?यस्य धनं सुभोग्यं भवति) [स] सत्पतिः (=सज्जनानां पालकः) अर्यमा त्वं [भवसि] । त्वं विदथे भाजयुः (=यज्ञे दानशीलः) अंशः (=एतन्नामको देवो) [भवसि] ॥

५. हे अग्ने, त्वं विधते सुवीर्यं (=परिचरते यजमानाय शोभनवीररूपसंततिं) [प्रयच्छन्] त्वष्टा [भवसि] । हे ग्नावः (=ग्नावन्=देवस्त्रीयुक्त) मित्रमहः (=अनुकूलदीप्तिमन्) [त्वष्ट्रा सह देवस्त्रीभिश्च सह] सजात्यं (=समानजातित्वं=बन्धुत्वं) तव [भवति] । त्वम् आशुहेमा (=आशु प्रेरयिता सन्) स्वश्व्यं (=शोभनाश्वरूपं धनं) ररिषे (=प्रयच्छसि) । त्वं पुरूवसु (=बहुधनः सन्) नरां शर्धः (=मनुष्याणां बलरूपः) असि ॥

ग्नावो याः स्तुतिवाचः सन्ति तास्तव स्वभूताः । हे मित्रमहः हितकारितेजः सजात्यमस्माकं बान्धवं भजस इत्यर्थः । इति सायणः ॥

४. हे अग्नी, तूं ज्याची आज्ञा [लोक] धारण करितात असा वरुण आहेस. तूं पराक्रमी [आणि] स्तुत्य मित्र आहेस. तूं सज्जनांचा प्रभु कीं ज्याचें धन सुभोग्य होय असा अर्यमा [आहेस]. हे प्रकाशमान [अग्नी], तूं यज्ञांत उदार अंश आहेस.

५. हे अग्नी, तूं उपासकाला वीर पुत्र देणारा त्वष्टा होस. हे पत्नीसहित आणि अनुकूलदीप्तिमान् [अग्नी], बंधुत्व हें तुझें [आहे]. तूं उत्तम घोड्यांनीं भरलेली संपत्ति सत्वर देत असतोस. अत्यंत धनवान् असा जो तूं तो मनुष्यांचें बळ आहेस.

4. Thou, o Agni, art king Varuṇa whose law is obeyed. Thou art Mitra victorious and praiseworthy. Thou art Aryamâ the lord of the good, whose gift is enjoyable. Thou, o bright one, art liberal Aṁs'a in the sacrifice.

5. Thou, o Agni, art Tvashṭâ giving brave progeny to the worshipper. Thine is relationship, o Agni of friendly splendor and accompanied by the wives! Thou the swift one givest wealth filled with good horses. Thou the affluent one art the strength of men.

या मंत्रांत ब्रह्मा म्हणजे कोण तें स्पष्ट समजण्यास मार्ग नाहीं. विष्णु म्हणजे कोण, तें सू. २२ मं. १६ आणि टीप पहा. विष्णूबरोबर ब्रह्मा हें नांव येथें आलें आहे त्यावरून ब्रह्मा, विष्णु, महेश्वर या त्रिमूर्तींपैकीं ब्रह्मा असेल असें प्रथमदृष्ट्या दिसतें. परंतु वैदिक काळीं या ब्रह्मदेवाविषयीं प्रख्याति नाहीं.

'लांब पावलांचा' = 'उरुगायः' सू. १५४ मं. १,३ इत्यादि पहा.

---

४. अग्नि म्हणजे वरुण, मित्र, अर्यमा आणि अंश हे जे देव तद्रूपच होय, असें या मंत्रांत सांगितलें आहे. अर्यमा याविषयीं सू. २६ मं. ४ पहा.

अंश हा एक आदित्य आहे. त्याविषयीं निर्देश मित्र, अर्यमा, भग, वरुण, दक्ष इत्यादिक दुसऱ्या आदित्यांबरोबर होत असतो. ऋ. २.२७.१ यांत 'शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः' असें म्हटलें आहे तें पहा. शिवाय ऋ. ५.४२.५ पहा.

५. 'पुत्रादिक संततीची उत्पत्ति करणारा जो त्वष्टा तोहि अग्नीची एक विभूतिच होय, कारण त्याचें आणि अग्नीचें मोठें बंधुत्व आहे.' इत्यादि या मंत्राचें तात्पर्य दिसतें. पहिला, तिसरा

त्वम॑ग्ने रु॒द्रो असु॑रो म॒हो दि॒वस्त्वं शर्धो॒ मारु॑तं पृ॒क्ष ई॑शिषे ।
त्वं वातै॑ररु॒णैर्या॑सि शं॒ग॒यस्त्वं पू॒षा वि॑ध॒तः पा॑सि॒ नु त्मना॑ ॥ ६ ॥

त्वम् । अ॒ग्ने॒ । रु॒द्रः । असु॑रः । म॒हः । दि॒वः । त्वम् । शर्धः॑ । मारु॑तम् । पृ॒क्षः । ई॒शि॒षे॒ ।
त्वम् । वातैः॑ । अ॒रु॒णैः । या॒सि॒ । श॒म्ऽग॒यः । त्वम् । पू॒षा । वि॒ध॒तः । पा॒सि॒ । नु । त्मना॑ ॥ ६ ॥

त्वम॑ग्ने द्रविणो॒दा अ॑रं॒कृते॒ त्वं दे॒वः स॑वि॒ता र॑त्न॒धा अ॑सि ।
त्वं भगो॑ नृपते॒ वस्व॑ ईशिषे॒ त्वं पा॒युर्दमे॒ यस्तेऽवि॑धत् ॥ ७ ॥

त्वम् । अ॒ग्ने॒ । द्र॒वि॒णः॒ऽदाः । अ॒र॒म्ऽकृते॑ । त्वम् । दे॒वः । स॒वि॒ता । र॒त्न॒ऽधाः । अ॒सि॒ ।
त्वम् । भगः॑ । नृ॒ऽप॒ते॒ । वस्वः॑ । ई॒शि॒षे॒ । त्वम् । पा॒युः । दमे॑ । यः । ते॒ । अवि॑धत् ॥ ७ ॥

भाषायाम्.

६. हे अग्ने, त्वं महो दिवः असुरः (=महतो द्युलोकस्य बलवान्देवो) रुद्रो [नाम] [भवसि] । त्वं मारुतं शर्धः (=मारुतो गणो) [भवसि] । [अपि च] पृक्षः ईशिषे (=अन्नस्य प्रभुरसि) । त्वं शंगयः (=सुखस्य निवासभूतः सन्) अरुणैः वातैः (="वायुसदृशैररुणैररुणवर्णैरश्वैः) यासि (=प्राप्नोषि यागगृहम्") । त्वं पूषा [नाम देवः सन्] विधतः (=परिचरणवत उपासकान्) त्मना नु पासि (=स्वयमेव क्षिप्रं रक्षसि) ॥

७. हे अग्ने, त्वम् अलंकृते (=त्वाम् अलंकुर्वते सेवमानाय यजमानाय) द्रविणोदाः (=धनस्य दाता) [भवसि] । त्वं देवः (=दीप्तिमान्) रत्नधाः (=रमणीयानां धनानां मणिमुक्तादीनां धारयिता दाता) सविता [नाम देवः] असि । हे नृपते (=नराणां प्रभो), त्वं भगो [नाम देवः सन्] वस्वः ईशिषे (=धनस्य राजा भवसि) । यो [यजमानो] दमे (=स्वगृहे) ते अविधत् (=त्वां पर्यचरत्) [तस्य] त्वं पायुः (=पालको) [भवसि] ।

६. हे अग्नी, तूं महाद्युलोकाचा बळवान् देव जो रुद्र तो आहेस. तूं मरुद्गण [आहेस]. तूं अन्नाचा प्रभु आहेस. तूं सुखाचें गृह होत्साता आरक्त वर्णाच्या वातांनीं गमन करितोस. तूं पूषा [होत्साता] उपासकांला स्वतः रक्षितोस.

७. हे अग्नी, तूं पूजा करणाराला धनदाता आहेस. तूं देदीप्यमान [आणि] उत्तम संपत्ति देणारा सविता होस. हे नृपती [अग्नी], तूं भग [होत्साता] धनाचा प्रभु आहेस. तूं, जो तुला [आपल्या] घरीं भजतो त्याचा रक्षक आहेस.

6. Thou, o Agni art Rudra the god of the vast heaven. Thou art the troop of Maruts. Thou art the lord of food. Thou the source of happiness goest with ruddy winds. Thou [being] Pûshâ dost thyself protect the worshippers.

7. Thou, o Agni, art the giver of wealth to the worshipper. Thou art brilliant Savitâ the giver of excellent wealth. Thou, o king of men, art Bhaga and the master of wealth. Thou art the protector [of him] who worships thee in [his] house.

आणि चौथा हे चरण स्पष्टार्थ आहेत, परंतु दुसऱ्यांत 'ग्नावः' या शब्दाचा अर्थ किंवा उद्देश येथें बरोबर समजत नसल्यामुळें तेवढा पाद दुर्बोध आहे. 'ग्नावः' हें 'ग्नावत्' शब्दाचें संबोधनीं एकवचन घेतलें तर अग्नीला येथें तसें विशेषण देण्याचें प्रयोजन समजत नाहीं, आणि 'ग्नावः' हें रूप सर्वानुदात्त असावें तसें नाहीं. 'ग्नावः' म्हणजे 'स्तुतिवचनें' असा सायणाप्रमाणें अर्थ केला तर त्याला या स्थळच्या सायणोक्तीशिवाय दुसरें कांहीं प्रमाण दिसत नाहीं.

---

६. 'यांत रुद्र आणि मरुद्गण आणि पूषा हे जे देव, ते केवळ अग्नीच्या विभूति होत' असा अभिप्राय आहे.

'रुद्र' आणि पूषा हे कोण होत त्याविषयीं सू. ४३ मं. १ पहा.

'आरक्त वर्णाच्या वातांनीं'= 'अरुणैर्वातैः.' याचा अर्थ सायणाचार्य, वायूप्रमाणें चपळ असे जे आरक्त वर्णाचे घोडे त्यांच्या योगानें असा करितात.

७. 'द्रविणोदा' म्हणजे धन देणारा एक देव. तो आणि सविता आणि भग हे जे देव ते अग्निरूपच होत असा भावार्थ.

त्वाम॑ग्ने दम॒ आ वि॒श्पतिं॒ विश॒स्त्वां राजा॑नं सुवि॒दत्र॑मृञ्जते ।
त्वं विश्वा॑नि स्वनीक पत्यसे॒ त्वं स॒हस्रा॑णि श॒ता द॒श प्रति॑ ॥८॥

त्वाम् । अ॒ग्ने॒ । दमे॑ । आ । वि॒श्पति॑म् । विशः॑ । त्वाम् । राजा॑नम् । सु॒ऽवि॒दत्र॑म् । ऋ॒ञ्ज॒ते ।
त्वम् । विश्वा॑नि । सु॒ऽअ॒नी॒क॒ । प॒त्य॒से॒ । त्वम् । स॒हस्रा॑णि । श॒ता । दश॑ । प्रति॑ ॥ ८ ॥

त्वाम॑ग्ने पि॒तर॑मि॒ष्टिभि॒र्नर॒स्त्वां भ्रा॒त्राय॒ शम्या॑ तनू॒रुच॑म् ।
त्वं पु॒त्रो भ॑वसि॒ यस्तेऽवि॑ध॒त्त्वं सखा॑ सु॒शेवः॑ पास्या॒धृषः॑ ॥ ९ ॥

त्वाम् । अ॒ग्ने॒ । पि॒तर॑म् । इ॒ष्टिऽभिः॑ । नरः॑ । त्वाम् । भ्रा॒त्राय॑ । शम्या॑ । त॒नू॒ऽरुच॑म् ।
त्वम् । पु॒त्रः । भ॒व॒सि॒ । यः । ते॒ । अवि॑धत् । त्वम् । सखा॑ । सु॒ऽशेवः॑ । पा॒सि॒ । आ॒ऽधृषः॑ ॥ ९ ॥

भाषायाम्.

८. हे अग्ने, विश्पतिं (=जनानां पालकं) त्वां विशः (=जना) दमे आ (=स्वस्वगृहेषु) [ऋञ्जते] । सुविदत्रं (=सुधनं=शोभनदातारं) राजानं त्वाम् ऋञ्जते (=प्रसाधयन्ति=सेवया स्ववशमानयन्ति) । हे स्वनीक (=सुतेजस्क), त्वं विश्वानि [वस्तूनि] पत्यसे (=तेषाम् ईश्वरो भवसि)—त्वं सहस्राणि शता दश प्रति [पत्यसे] (=अनेकसहस्राणाम् अनेकशतानाम् अनेकदशसंख्याकानां वस्तूनाम् ईश्वरो भवसि) ॥

९. हे अग्ने, पितरं (=पितृवत्पालकं) त्वां नरः इष्टिभिः (=यागैः) [ऋञ्जते =प्रसाधयन्ति] तनूरुचं (=शरीरेण शोभमानं) त्वां भ्रात्राय (=भ्रातृत्वाय=तव भ्रातृत्वसंपादनाय) शम्या (=यज्ञादिरूपेण कर्मणा.) [ऋञ्जते=प्रसाधयन्ति=स्ववशमानयन्ति] । यस्ते अविधत् (=यस्त्वां पर्यचरत्) त्वं [तस्य] पुत्रो भवसि । त्वं सुशेवः सखा (=सुखकारी सखा सन्) [परिचरन्तम्] आधृषः पासि (=शत्रोः सकाशाद्रक्षसि) ॥

'धन देणारा=' 'द्रविणोदाः.' सू. १५ मं. १० पहा.

भग सू. १४ मं. ३ यावरील टीप पहा.

८. हे अग्नी, लोकांचा प्रभु असा जो महा उदार राजा तूं, त्या तुला लोक–तुला लोक आपल्या घरीं भजून वश करितात. हे सुतेजस्क अग्नी, तूं सकल वस्तूंचा स्वामी आहेस–तूं हजारो, शेकडो आणि दशावधि वस्तूंचा [स्वामी आहेस].

९. हे अग्नी, तुज पित्याला लोक यागांनीं [वश करितात], शरीरानें प्रकाशणाऱ्या तुला बंधुत्व [संपादण्या]साठीं यज्ञकर्मानें [वश करितात]. जो तुला भजतो त्याचा तूं पुत्र होतोस. तूं सुखदायक मित्र [होत्साता] शत्रूपासून संरक्षण करितोस.

8. Thee o Agni, the lord of men, the people [propitiate] in their houses,—propitiate thee the bounteous king. Thou art the master of all things, o thou of excellent brightness, thou [art the master of] thousands, of hundreds, of tens.

9. Thee the father, o Agni, men [propitiate] with sacrifices, thee they [propitiate] with worship for making thee a brother, thou who shinest with thy body. Thou becomest a son to him who has worshipped thee. Thou the beneficent friend preservest [thy friend] from his enemy.

---

८. 'अग्नीला लोक आपआपल्या घरीं भजून प्रसन्न करितात; आणि तो सकल वस्तूंचा स्वामी असल्यामुळें उदार राजाप्रमाणें सेवकांचे मनोरथ पूर्ण करितो' असें तात्पर्य.

९. 'अग्नि लोकांचा बाप, बंधु, पुत्र आणि मित्र होय' असा भावार्थ.

'यागांनीं'='इ॒ष्टिभिः'. या ठिकाणीं 'इष्टि' शब्दाचा अर्थ इच्छा, प्रार्थना असा होतो, कारण कीं यागवाचक शब्द असता तर इ॒ष्टिभिः हा स्वर झाला असता असें कितीएक पाश्चात्त्य विद्वान् म्हणतात. परंतु ऋग्वेद २. १८.१ यांतहि 'इ॒ष्टिभिः' याचा अर्थ सायणांनीं यागांनीं असा केलाच आहे. शिवाय ऋ.७.९३.८ आणि त्याजवरील सायणभाष्य पहा.

त्वमग्न ऋभुराके नमस्य१स्त्वं वाजस्य क्षुमतो राय ईशिषे ।
त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिः॥१०॥१८

त्वम् । अग्ने । ऋभुः । आके । नमस्यः । त्वम् । वाजस्य । क्षुऽमतः । रायः । ईशिषे ।

त्वम् । वि । भासि । अनु । धक्षि । दावने । त्वम् । विऽशिक्षुः । असि । यज्ञम् । आऽतनिः ॥ १० ॥ १८ ॥

त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा ।
त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती ॥११॥

त्वम् । अग्ने । अदितिः । देव । दाशुषे । त्वम् । होत्रा । भारती । वर्धसे । गिरा ।

त्वम् । इळा । शतऽहिमा । असि । दक्षसे । त्वम् । वृत्रऽहा । वसुऽपते । सरस्वती ॥ ११ ॥

भाषायाम्.

१०. हे अग्ने, ऋभुः (=दीप्तस्) त्वम् आके नमस्यः (=समीपे नमस्कार्यः=प्रत्यक्षम् उपास्यो भवसि) । त्वं वाजस्य (=बलस्य) [तथा] क्षुमतो रायः (=अन्नवतो धनस्य) ईशिषे (=स्वामी भवसि) । त्वं दावने (=हविर्दत्तवते यजमानाय=तद्धितार्थं) वि भासि (=विशेषेण दीप्यसे) अनु धक्षि (=अनुकूलं यथा तथा काष्ठादिकं दहसि च) । त्वं विशिक्षुः (=विशेषेण दानशीलः) असि [तथा] यज्ञम् आतनिः (=यज्ञस्य विस्तारयिता=पूरयिता) [भवसि] ॥

११. हे देव (=द्योतमान) अग्ने, त्वं दाशुषे (=हविर्दत्तवते यजमानाय) अदितिः (=एतन्नाम्नी देवानां माता) [भवसि] । त्वं होत्रा भारती [च] [भवसि] [अपि च तथा भूत्वा] गिरा वर्धसे (=स्तुत्या प्रवृद्धो भवसि) त्वं दक्षसे (=बलाय=बलदानाय) शतहिमा इळा (=शतसंवत्सरा=अपरिमितकाला) इळा [नाम देवी] असि । हे वसुपते (=धनस्य स्वामिन्), त्वं वृत्रहा (=वृत्रस्य हन्ता) [तथा] सरस्वती [नाम देवी] [असि] ॥

१०. हे अग्नी, तूं तेजस्वी [असून] प्रत्यक्ष पूजनीय [आहेस]. तूं बळाचा आणि अन्नानें भरलेल्या संपत्तीचा स्वामी आहेस. तूं हविर्दात्यासाठीं प्रकाशतोस [आणि] त्याचें कल्याण होई अशा रीतीनें पेटत असतोस. तूं उदार आहेस [आणि] यज्ञाची पूर्ति करणारा [आहेस].

10. Thou, o Agni, art brilliant, thou canst be present for being honoured. Thou art the master of strength and of wealth accompanied by food. Thou shinest and burnest for the benefit of the sacrificer. Thou art liberal, the perfector of the sacrificial rite.

११. हे देदीप्यमान अग्नी, तूं हविर्दात्याला अदिति [आहेस]. तूं होत्रा [आणि] भारती [असून] स्तुतीच्या योगेंकरून उत्कर्ष पावतोस. तूं बळ [प्राप्त करून देण्या]साठीं शतवर्षा इळा आहेस. हे धनाच्या प्रभू, तूं वृत्रघ्न [आणि] सरस्वती आहेस.

11. Thou, o resplendent Agni, Art Aditi to the sacrificer. Thou [as] Hotrâ [and] Bhâratî art honoured with praise. Thou art Iḷâ of a hundred years for [granting] strength. Thou, o lord of wealth, art the killer of Vṛitra, [thou art] Sarasvatî.

---

१०. 'इतर देवांची उपासना करणें झाल्यास ते प्रत्यक्ष दिसत नाहींत, पण अग्नि डोळ्यासमोर असून उपासना ग्रहण करितो; तो सर्व धनाचा आणि बळाचा धनी आहे. यास्तव तो उपासकाचें कल्याण करून त्याचा यज्ञ सफळ करितो' असें तात्पर्य.

११. अदिति. सू. ७२ मं. ९ आणि टीप पहा.

होत्रा, भारती, इळा आणि सरस्वती यांविषयीं सू. १४२ मं. ९ पहा. शिवाय सू. २२ मं. १०; सू. १४२ मं. ९; सू. १३ मं. ९; सू. ४० मं. ४; सू. ८९ मं. ३ आणि तेथील टिपा पहा.

'शतवर्षा'= 'शतहिमा.' म्हणजे शंभर वर्षांची. याचा अर्थ अपरिमित काळाची, अथवा अनादि, 'नित्य' असा आहे. अत्यंत प्राचीनकाळीं शंभर वर्षांचें वय म्हटलें ह्मणजे फार मोठें असें समजत म्हणून 'शतहिमा' हें विशेषण येथें दिलें आहे. वेदाच्या वेळीं मनुष्याचें आयुष्य दहा हजार वर्षांपर्यंत असूं शकेल असें लोक कल्पूं लागले नव्हते.

त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ संदृशि श्रियः ।
त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः ॥ १२ ॥

त्वम् । अग्ने । सुऽभृतः । उत्ऽतमम् । वयः । तव । स्पार्हे । वर्णे । आ । सम्ऽदृशि । श्रियः ।
त्वम् । वाजः । प्रऽतरणः । बृहन् । असि । त्वम् । रयिः । बहुलः । विश्वतः । पृथुः ॥ १२ ॥

त्वामग्न आदित्यास आस्यं१ त्वां जिह्वां शुचयश्चक्रिरे कवे ।
त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदन्त्याहुतम् ॥ १३ ॥

त्वाम् । अग्ने । आदित्यासः । आस्यम् । त्वाम् । जिह्वाम् । शुचयः । चक्रिरे । कवे ।
त्वाम् । रातिऽसाचः । अध्वरेषु । सश्चिरे । त्वे इति । देवाः । हविः । अदन्ति । आऽहुतम् ॥ १३ ॥

भाषायाम्.

१२. हे अग्ने, सुभृतः (=सुष्ठु पोषितस्) त्वम् उत्तमं वयः (=श्रेष्ठम् अन्नं) [भवसि]। स्पार्हे (=स्पृहणीये) संदृशि (=सम्यग्दर्शनीये) तव वर्णे आ (=कान्तौ) श्रियः (=सकलान्यैश्वर्याणि) [वर्तन्ते]। त्वं प्रतरणः (=प्रकर्षेण तारयिता) बृहन् (=महान्) वाजः (=अश्वः) असि। त्वं बहुलः (=महान्) विश्वतः पृथुः (=सर्वतो विस्तीर्णो) रयिः (=धनं) भवसि॥

१३. हे अग्ने, आदित्यासः (=अदितेः पुत्रा इन्द्रादयो देवास्) त्वाम् आस्यं [चक्रिरे] (=भक्षणपानादये स्वकीयं मुखं कृतवन्तः)। हे कवे (=मेधाविन्नग्ने), शुचयः (=दीप्ता देवास्) त्वां जिह्वां चक्रिरे (=आस्वादनसाधनं कृतवन्तः)। रातिषाचः (=हविर्दानसेवकाः=हविर्दानं कामयमाना देवास्) त्वाम् अध्वरेषु सश्चिरे (=त्वां यज्ञेषु सेवन्ते=हविर्भक्षणाय यज्ञान्प्रति त्वया सह आगच्छन्ति)। त्वे (=त्वयि) आहुतं (=दत्तं) हविर्देवा अदन्ति (=भक्षयन्ति)॥

१२. हे अग्नी, तूं सुपुष्ट होत्साता श्रेष्ठ अन्न [आहेस]. तुझ्या रमणीय [आणि] मनोरम रूपाच्या ठायीं [सर्व] ऐश्वर्यें [आहेत]. तूं उत्तम रक्षण करणारा महा अश्व आहेस. तूं मोठी आणि चोहींकडून विशाळ संपत्ति आहेस.

१३. हे अग्नी, अदितीचे जे पुत्र ते तुला [आपलें] तोंड करिते झाले. हे मेधावी अग्नी, देदीप्यमान [देव] तुला आपली जिव्हा करिते झाले. दानसेवक [देव] तुजबरोबर यज्ञांत येतात. तुझ्या ठायीं अर्पण केलेलें हवि देव भक्षितात.

12. Thou, o Agni [being] well-nourished [art] the [giver of] excellent food. In thy excellent and delightful appearance are [all] beauties. Thou art a great charger, saving from danger. Thou art a great treasure extensive on all sides.

13. Thee, o Agni, the sons of Aditi have made their mouth. Thee, o sage, the bright gods have made their tongue. Thee the sacrifice-loving [gods] follow in the sacrifices. In thee the offering that is given the gods consume.

---

१२. 'अश्व'='वाजः.' ऋ. ५. ८४.२ आणि ३.३०.११ आणि त्यांजवरील सायणभाष्य पहा.

१३. 'अग्नि देवांचें मुख होय, आणि जेथें जेथें अग्नि जातो तेथें तेथें त्याच्या तोंडानें हवि भक्षण करण्याकरितां देव जात असतात,' असें अग्नीचें स्वरूप पूर्वीं पुष्कळ ठिकाणीं वर्णिलेंच आहे.

त्वे अ॑ग्ने विश्वे॑ अमृता॑सो अद्रुह॑ आसा दे॒वा ह॒विर॑द॒न्त्याहु॑तम् ।
त्वया॑ मर्ता॑सः स्वदन्त आसु॒तिं त्वं गर्भो॑ वी॒रुधा॑ जज्ञिषे॒ शुचि॑ः॥१४॥

त्वे इति॑ । अ॒ग्ने । विश्वे॑ । अ॒मृता॑सः । अ॒द्रुह॑ः । आ॒सा । दे॒वाः । ह॒विः ।
अ॒द॒न्ति॒ । आऽहु॑तम् ।

त्वया॑ । मर्ता॑सः । स्व॒द॒न्ते॒ । आ॒ऽसु॒तिम् । त्वम् । गर्भ॑ः । वी॒रुधा॑म् ।
ज॒ज्ञि॒षे॒ । शुचि॑ः ॥ १४ ॥

त्वं तान्त्सं च॒ प्रति॑ चासि म॒ज्मनाग्ने॑ सुजात॒ प्र च॑ देव रिच्यसे ।
पृक्षो यद॑त्र॑ महि॒ना वि ते॒ भुव॒दनु॒ द्यावा॑पृथि॒वी रोद॑सी उ॒भे॥१५॥

त्वम् । तान् । सम् । च॒ । प्रति॑ । च॒ । अ॒सि॒ । म॒ज्मना॑ । अग्ने॑ । सु॒ऽ-
जा॒त॒ । प्र । च॒ । दे॒व॒ । रि॒च्य॒से॒ ।

पृक्षः । यत् । अत्र॑ । म॒हि॒ना । वि । ते॒ । भुव॑त् । अनु॑ । द्यावा॑पृथि॒वी
इति॑ । रोद॑सी॒ इति॑ । उ॒भे इति॑ ॥ १५ ॥

भाषायाम्.

१४. हे अग्ने, त्वे आहुतं (=त्वयि दत्तं) हविः अमृतासः (=अमरणधर्माणः) अद्रुहः (=अद्रोग्धारो) विश्वे देवाः आसा अदन्ति (=अन्तिके प्रत्यक्षं भक्षयन्ति)। त्वया [साधनभूतेन] मर्तासः (=मरणधर्माणो मनुष्या) आसुतिं स्वदन्ते (=अन्नम् आस्वादयन्ति)। त्वं वीरुधां (=लतादीनां) शुचिर्गर्भः (=दीप्तः पुत्रो) जज्ञिषे (=जातोसि)॥

१५. त्वं मज्मना (=बलेन) तान् सं च [असि] प्रतिचासि (=संहतसर्वदेव-समश्चासि तेषां प्रत्येकेन सह समश्चासि)। [नैतावदेव अपि तु] हे सुजात देव (=सुष्ठुजात द्योतमान) अग्ने, प्र च रिच्यसे (=तेभ्योधिकोपि भवसि) यद् (=यस्मा-त्कारणात्) अत्र (=? " अस्मिन्यज्ञे ") ते महिना (=तव महिम्ना) पृक्षः (=अ-न्नम्) अनु द्यावापृथिवी रोदसी उभे (=द्यावापृथिवीरूपावुभावपि लोकावनुलक्ष्य) वि भुवत् (=प्रादुर्भवति=व्याप्तं भवति)॥

१४. हे अग्नी, तुझ्याठायीं अर्पण केलेलें हवि अमर आणि द्वेष न करणारे असे जे सर्व देव ते प्रत्यक्ष भक्षण करितात. तुझ्या योगानें मर्त्य अन्नाचा स्वाद घेतात, तूं वनस्पतींचा देदीप्यमान बाळ उत्पन्न झाला आहेस.

१५. तूं आपल्या प्रभावाच्या योगेंकरून केव्हां त्या सर्वांची बरोबरी करितोस, आणि केव्हां त्यांतून प्रत्येकाची बरोबरी करितोस; हे सुजात, हे देदीप्यमान अग्नी, तूं त्या सर्वांहून अधिकहि आहेस. कारण कीं, तुझ्या महिम्याच्या योगेंकरून येथें अन्न द्युलोक आणि पृथिवी या उभय लोकांस व्यापून पसरत असतें.

14. In Thee, o Agni, the oblation that is offered all the immortal and unhating gods actually consume. Through thee the mortals relish their food. Thou art born the brilliant child of plants.

15. Thou art both equal to them all and through thy power equal to each of them; thou art also, o well-born resplendent Agni, even greater: in-as-much as through thy greatness the food here spreads along earth and heaven, along both the worlds.

---

१४. 'स्वाद घेतात.' म्हणजे मनुष्यें जें अन्न खातात तें अग्नीच्या योगानें शिजतें.

'वनस्पतींचा बाळ'='गर्भो वीरुधाम्.' म्हणजे 'दावानळरूपानें अरण्यामध्यें वृक्षांपासून अग्नि उत्पन्न होतो' असा अभिप्राय.

१५. भावार्थः 'हे अग्नी, तूं सर्व देवांची मिळून बरोबरी करितोस, आणि त्यांतून प्रत्येक देव घेतला तरी त्या प्रत्येकाशीं तूं बरोबर आहेस; आणि इतकेंच नव्हे पण त्या सर्वांपेक्षांहि तूं अधिक आहेस. कारण कीं, या यज्ञांत तुला अर्पण केलेलें अन्न द्युलोक आणि पृथिवी या उभयलोकांस व्यापून जिकडे तिकडे पसरत असतें आणि तेणेंकरून सर्व देवांस पोंहचतें, तें तुझ्याच पराक्रमानें पोंहचतें,' असा या कठिण मंत्राचा भावार्थ दिसतो.

ये स्तोतृभ्यो गोअंग्राममश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्मांश्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥
॥ १६ ॥ १९ ॥

ये । स्तोतृऽभ्यः । गोऽअंग्राम् । अश्वऽपेशसम् । अग्ने । रातिम् । उपऽसृजन्ति । सूरयः ।
अस्मान् । च । तान् । च । प्र । हि । नेषि । वस्यः । आ । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १६ ॥ १९ ॥

भाषायाम्.

१६. हे अग्ने, ये सूरयः (=यजमानाः) स्तोतृभ्यः (=अस्मादृग्भ्यो) गोअग्रां (=गावोऽग्रगामिन्यो यस्यास्तादृशीं=गोप्रमुखाम्) अश्वपेशसम् (=अश्वप्राधान्यां) रातिम् उपसृजन्ति (=दक्षिणां ददते) तांश्च [यजमानान्] अस्मांश्च [स्तोतॄन्] वस्य आ प्र हि नेषि (=श्रेष्ठं सुखं स्वर्गादिकं प्रति नय)। सुवीराः (=सुष्ठुवीर्योपेतपुत्रपौत्रादिसमवेता) [वयं] विदथे (=यज्ञे) बृहत् [स्तोत्रं] वदेम (=यथा वदेम तथा कुरु)॥

अस्माकं प्रेरयितॄन् यजमानान् तेषां च स्तोतॄन् अस्मान् श्रेष्ठं सुखं प्रापय शौर्योपेतपुत्रपौत्रादिभिः सहिता महन्मन्त्रजातं यथा वदेम तथा तादृशान् पुत्रपौत्रादीन् अस्मभ्यम् उभयेभ्यो देहीत्यभिप्रायः ।

१६. हे अग्नी, जे यजमान स्तोत्यांला गाईंनीं भरलेली आणि अश्वाढ्य दक्षिणा देतात, त्यांला आणि त्याप्रमाणें आम्हांलाहि तूं उत्तम कल्याणाप्रत ने. उत्तम वीर्यवान् पुत्रांस घेऊन आम्ही यज्ञांत मोठें स्तोत्र गाऊं असें कर.

16. Lead, o Agni, both those sacrificers, who give to the poets a gift conspicuous by cows and excellent horses, both these and us the poets, to the highest good; may we, accompanied by sons who are excellent heroes, chant a great hymn in the sacrifice.

---

१६. यांत वरप्रार्थना आहे:—'स्तोत्रें रचून यज्ञ करण्याच्या कामीं आम्हांसारख्या ऋत्विक् जनांस लावून यज्ञसमाप्तीनंतर पुष्कळ गाई, घोडे इत्यादि दक्षिणा देणारे जे यजमान, त्यांस आणि त्याप्रमाणें स्तोते (म्हणजे ऋत्विक्) जे आम्ही त्या आम्हांसहि उत्तम सुखाप्रत ने आणि आम्हांला शूर पुत्रपौत्र दे, म्हणजे आम्ही त्यांस घेऊन यज्ञांत मोठमोठीं स्तोत्रें गाऊं.'

या ऋचेवरून असें उघड होतें कीं, वेदकाळीहि यजमानांनीं देव प्रसन्न करण्याच्या कामीं ऋत्विजांस लावावें आणि त्यांस पुष्कळ गाई, घोडे इत्यादि दक्षिणा द्यावी आणि तिजबद्दल ऋत्विजांनीं यजमानाचें देव जेणेंकरून कल्याण करितील अशी देवापाशीं प्रार्थना करावी अशी चाल असे.

सूक्तम् २—१९३.

मण्डलद्रष्टा गृत्समद ऋषिः। अग्निर्देवता। जगती छन्दः॥

यज्ञेन वर्धत जातवेदसमग्निं यजध्वं हविषा तना गिरा।
समिधानं सुप्रयसं स्वर्णरं द्युक्षं होतारं वृजनेषु धूर्षदम्॥ १॥

यज्ञेन। वर्धत। जातऽवेदसम्। अग्निम्। यजध्वम्। हविषा। तना। गिरा।
समऽइधानम्। सुऽप्रयसम्। स्वःऽनरम्। द्युक्षम्। होतारम्। वृजनेषु। धूःऽसदम्॥ १॥

अभि त्वा नक्तीरुषसो ववाशिरेऽग्ने वत्सं न स्वसरेषु धेनवः।
दिव इवेदरतिर्मानुषा युगा क्षपो भासि पुरुवार संयतः॥ २॥

अभि। त्वा। नक्तीः। उषसः। ववाशिरे। अग्ने। वत्सम्। न। स्वसरेषु। धेनवः।
दिवःऽइव। इत्। अरतिः। मानुषा। युगा। आ। क्षपः। भासि। पुरुऽवार। समऽयतः॥ २॥

भाषायाम्.

१. [हे यजमानाः], जातवेदसं (=सर्वस्य वस्तुजातस्य वेदितारम्) अग्निं यज्ञेन वर्धत (=वर्धयत)। समिधानं (=सम्यग्दीप्तं) सुप्रयसं (=शोभनहविरन्नवन्तं) स्वर्णरं (=दिव्यशूरं) द्युक्षं होतारं (=स्वर्गनिवासिनं होमसंपादकं) वृजनेषु धूर्षदं (=बलेषु संग्रामेषु रथस्य धुरि निषण्णः कश्चित् शौर्येण रथं निर्वाहयति तद्वत् निर्वाहकम्) [अग्निं] हविषा तना गिरा (=हविर्दानेन अखण्डितया स्तुत्या च) यजध्वं (=पूजयत)॥

२. हे अग्ने, स्वसरेषु धेनवो वत्सं न (=गोष्ठेषु वत्सं प्रति गावो यथा शब्दायन्ते=शब्दायमाना धावन्ति तद्वत्) नक्तीरुषसः (=रात्र्यश्चोषसश्च=प्रातःकालाः सायंकालाश्च) ववाशिरे (=शब्दायन्ते=शब्दायमानाः सत्य आगच्छन्ति)। हे पुरुवार (=बहुभिर्वरणीय), दिव इव इत् अरतिः (=द्युलोकस्य दूत इव) [त्वं] मानुषा युगा (=सर्वेषु मानुषेषु युगेषु=सर्वेष्वपि जनेषु) क्षपः (=रात्रीः=रात्रिकालेषु) संयत आ भासि (=नियतः प्रकाशसे=नित्यं दीप्यसे)॥

सूक्त २—१९३.

ऋषि–गृत्समद. देवता–अग्नि. वृत्त–जगती.

१. सर्वज्ञ अग्नीला यज्ञानें वाढवा, हवीनें [आणि] अखंड वाणीनें पूजा: चांगला पेटलेला, उत्तमान्नवान्, दिव्य वीर, द्युलोकनिवासी होता, आणि संग्रामांत धुरंधर [अशा अग्नीला पूजा].

२. हे अग्नी, गाई गोठ्यांत वत्साप्रत [हंबरडत येतात] तशा रात्री आणि उषा तुजप्रत हंबरडत येतात. द्युलोकाचा दूतच जणुं असा जो तूं तो, हे बहुजनप्रिय [अग्नी], नित्य मानवलोकीं रात्रीं प्रकाशत असतोस.

HYMN. 2—193.

To *Agni*. By *Gṛitsamada*. Metre, *Jagatī*.

1. Honour with sacrifice all-knowing Agni. Worship with oblation [and] unbroken hymn well-kindled Agni, who receives excellent food, the divine hero, the celestial invoker, Agni brave in battles.

2. Towards thee, o Agni, the Nights and the Dawns run fondly lowing even as cows [run fondly lowing] to [their] calves in the cow-folds. Nothing less than a messenger of heaven thou, o beloved of many, daily shinest in the nights among human races.

---

१. 'उत्तमान्नवान्' = 'सुप्रयसम्.' म्हणजे ज्याला उत्तम हविरन्न उपासक लोक अर्पण करितात असा.

२. 'गाई जशा आपल्या वत्साप्रत हंबरडा फोडीत गोठ्यांत येतात तशा उषा आणि रात्री ह्या अग्नीजवळ यज्ञमंडपांत येत असतात. कारण देदीप्यमान प्रकाशवंत द्युलोकाचा दूतच जणुं असा जो अग्नि तो मनुष्यलोकीं नित्य रात्रीं प्रकाशत असतो.'

उषःकाळीं आणि सायंकाळीं अग्नीला हवि देत, म्हणून उषा आणि रात्र ह्या येतांच अग्नीला खावयास मिळावयाचें; तेणेंकरून गाई आल्या म्हणजे वत्साला जसा हर्ष होतो तसा उषा आणि रात्र ह्या आल्या म्हणजे अग्नीला हर्ष होतो. आणि तसा हर्ष व्हावा म्हणून त्या अग्नीजवळ हंबरडा जणुं फोडीत येत असतात, असें तात्पर्य.

'हंबरडत येत असतात'=' ववाशिरे.' ऋ.९.९४.२ आणि सायणभाष्य पहा.

तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योररतिं न्येरिरे।
रथमिव वेद्यं शुक्रशोचिषमग्निं मित्रं न क्षितिषु प्रशंस्यम् ॥ ३ ॥

तम् । देवाः । बुध्ने । रजसः । सुऽदंससम् । दिवःपृथिव्योः । अरतिम् । नि । एरिरे ।
रथम्ऽइव । वेद्यम् । शुक्रऽशोचिषम् । अग्निम् । मित्रम् । न । क्षितिषु । प्रऽशंस्यम् ॥ ३ ॥

तमुक्षमाणं रजसि स्व आ दमे चन्द्रमिव सुरुचं ह्वार आ दधुः।
पृश्न्याः पतरं चितयन्तमक्षभिः पाथो न पायुं जनसी उभे अनु॥४॥

तम् । उक्षमाणम् । रजसि । स्वे । आ । दमे । चन्द्रम्ऽइव । सुऽरुचम् । ह्वारे । आ । दधुः ।
पृश्न्याः । पतरम् । चितयन्तम् । अक्षऽभिः । पाथः । न । पायुम् । जनसी इति । उभे इति । अनु ॥ ४ ॥

भाषायाम्.

३. तं (=पूर्वोक्तं) सुदंससं (=शोभनकर्माणं=पराक्रमवन्तम्) [अग्निं] देवा रजसो बुध्ने दिवः पृथिव्योररतिं नि एरिरे (=अस्मिन् भूतले द्यावापृथिव्योर्दूतं कृत्वा नियोजितवन्तः=प्रेषितवन्तः)। वेद्यं रथमिव (=प्रख्यातं रथमिव) शुक्रशोचिषं (=दीप्ततेजस्कम्) [अथवा] मित्रं न (=मित्रवत्) प्रशंस्यं (=प्रकर्षेण स्तुत्यम्) अग्निं क्षितिषु (=मनुष्येषु) [नि एरिरे=प्रेरितवन्तः] ॥

४. तं (=पूर्वोक्तं) रजसि उक्षमाणम् (=अन्तरिक्षे वर्धमानं) सुरुचं (=शोभनदीप्तिमन्तम्) [अग्निं] ह्वारे चन्द्रम् इव (=निर्जने स्थले सुवर्णमिव) स्वे आ दमे (=तस्य स्वकीये यागमण्डपरूपे गृहे) आ दधुः (=देवा अस्थापयन्)। पृश्न्याः पतरम् (=? अन्तरिक्षस्य पक्षिणम्) अक्षभिः (=नेत्रैर्ज्वालारूपैर्) उभे जनसी अनु चितयन्तं (=द्यावापृथिव्यौ प्रकाशयन्तम्) [एतादृशं] [तम् आदधुः] ॥

पाथो न पायुम् इति नो बोधातीतम्। अन्नवाचकः पाथःशब्दो हि पाथ इत्याद्युदात्तो भवति। पाथः पथो मार्गान् छन्दोवशाद्दीर्घत्वम् इति यत् केचित्पाश्चात्त्या वदन्ति तन्न युज्यते। दीर्घाभावेपि छन्दोनिर्वाहात् ॥

सायणस्त्विममेवं व्याचष्टे। तं स्तुत्यतरं रजस्यन्तरिक्ष आ उक्षमाणं सर्वतः सि-

३. त्या महापराक्रमी [अग्नी]-ला देव भूतलावर द्यावापृथिवींचा दूत [करून] पाठविते झाले. प्रसिद्ध रथाप्रमाणें, देदीप्यमान वर्णाच्या [अग्नीला पाठविते झाले],– एकाद्या मित्राप्रमाणें स्तुत्य अग्नीला [या] लोकीं [पाठविते झाले].

४. आकाशांत वाढणारा [आणि] कांतिमान् असा जो [अग्नि] त्याला एकांतीं सुवर्णाला [लपवून ठेविल्या]प्रमाणें त्याच्या स्वताहाच्या घरीं ठेविते झाले; अंतरिक्षांतील पक्षी आणि उभय लोकांला आपल्या डोळ्यांनीं प्रकाशविणारा असा जो [अग्नि] त्याला स्थापिते झाले.

3. Him of wonderful achievements the gods have sent on the surface of this world as the messenger of heaven and earth: [have sent] [Agni] of brilliant effulgence like a well-known chariot, [sent] unto human beings Agni the praiseworthy one like a friend.

4. Him who grows in the firmament and who is of brilliant splendor [the gods] have placed in his own house like gold in a secret place; the bird of the sky that brightens both the worlds with its eyes.

---

४. वर तिसऱ्या मंत्रांत देवांनीं अग्नीला पृथ्वीवर पाठविलें असें सांगितलें. त्यालाच अनुसरून पुढें म्हणतो, ‘ आकाशांत वैद्युतरूपानें वर्धमान आणि सोन्याप्रमाणें चकचकीत, आणि पृक्षीरूप अंतरिक्षांत फिरणारा आणि आपल्या ज्वालारूप डोळ्यांनीं द्युलोक आणि पृथिवी या दोन्हीं लोकांस लकलकीत प्रकाशविणारा असा जो अग्नि त्याला देव, एकाद्या निर्जनस्थळीं सोनें ठेविल्याप्रमाणें, यागमंडपरूप त्याच्या गृहीं स्थापिते झाले.’

असा साधारण भावार्थ दिसतो; पण ‘ पाथो न पायुम् ’ ही जी उपमा मुळांत आहे त्याचा अर्थ समजत नाहीं त्यामुळें त्याचें भाषांतर केलें नाहीं. एकंदरींत हा मंत्र कठिण आहे.

स होता विश्वं परि भूत्वध्वरं तमु हव्यैर्मनुष ऋञ्जते गिरा ।
हिरिशिप्रो वृधसानासु जर्भुरद्द्यौर्न स्तृभिश्चितयद्रोदसी अनु ५॥२०

सः । होता । विश्वम् । परि । भूतु । अध्वरम् । तम् । ऊं इति ।
हव्यैः । मनुषः । ऋञ्जते । गिरा ।
हिरिऽशिप्रः । वृधसानासु । जर्भुरत् । द्यौः । न । स्तृऽभिः । चितयत् ।
रोदसी इति । अनु ॥ ५ ॥ २० ॥

स नो रेवत्समिधानः स्वस्तये संददस्वान्रयिमस्मासु दीदिहि ।
आ नः कृणुष्व सुविताय रोदसी अग्ने हव्या मनुषो देव वीतये॥६॥

सः । नः । रेवत् । सम्ऽइधानः । स्वस्तये । सम्ऽददस्वान् । रयिम् ।
अस्मासु । दीदिहि ।
आ । नः । कृणुष्व । सुवितार्य । रोदसी इति । अग्ने । हव्या । मनुषः । देव । वीतये ॥ ६ ॥

श्वन्तं वृष्टिजलं रजसि पृथिव्यां वेद्यां घृतादिनासिच्यमानं वा । स्वे स्वकीये द्वारे विजने दमे यागगृह आदधुः । आदधते । कीदृशं तम् । चन्द्रमिव सुरुचम् ! चन्द्रमिति हिरण्यनाम । हिरण्यमिव शोभनदीप्तिम् । पश्चात्प्रवृद्धावस्थायां पृश्न्याः पतरम् । द्युलोकस्यान्तरिक्षस्य गन्तारम् । अक्षभिः स्वकीयैर्ज्वालारूपैरवयवैश्चितयन्तं चेतयमानम् । पाथो न पायुम् । उदकमिव रक्षकम् । उभे जनसी सर्वस्य जनयित्र्यौ द्यावापृथिव्यावतु व्याप्तम् । भूम्यां होमाधारत्वेन स्थित्वा हविःप्रापणाय द्युलोकगामिनमिति भावः । एवंरूपमग्निमादधते । इति ॥

भाषायाम्.

५. होता (=होमसंपादकः) सः [अग्निर्] विश्वम् अध्वरं परि भूतु (=सर्वं यज्ञं संरक्षणाय परितो भवतु=परिवेष्टयतु)। तम् उ (=तमेव) मनुषः (=मनुष्या) हव्यैः गिरा (=स्तुत्या) [च] ऋञ्जते (=प्रसाधयन्ति=स्ववशं कुर्वन्ति)। हिरिशिप्रः (= हिरण्योष्णीषो) वृधसानासु जर्भुरत् (=ओषधीः पुनःपुनर्दहन्) [स] द्यौः स्तृभिर्न रोदसी अनु चितयत् (=अन्तरिक्षं यथा नक्षत्रैर्ज्ञापितं भवति सप्रकाशं भवति तथा ज्वालाभिर्विस्फुलिङ्गैश्च द्यावापृथिव्यौ ज्ञापयति प्रकाशयति=सप्रकाशं करोति)॥

५. तो होता सर्व यज्ञाला वेष्टून राहो. त्यालाच मनुष्यें हव्यांनीं [आणि] स्तुतीनें वश करितात. सोन्याचें मंदिल घालणारा आणि ओषधींमध्यें विहार करणारा असा [जो अग्नि तो] नक्षत्रांनीं आकाश लकलकीत दिसतें त्याप्रमाणें द्यावापृथिवींला लकलकीत करितो.

५. May that invoker surround all sacrifice [for protecting it]. Him [all] men make their own with oblations [and] praise. Wearing a gold head-dress [and] crackling among the trees he brightens the heaven and the earth even as the sky [is bright] with the stars.

६. असा जो तूं तो हे अग्नी, आम्हांकडून पेटविला होत्साता आम्हांला कल्याणासाठीं धन देऊन आम्हांस संपत्ति मिळे अशा रीतीनें प्रकाश. हे देदीप्यमान अग्नी, आमच्या कल्याणासाठीं द्यावापृथिवींस [मज] मनुष्याचीं हव्यें भक्षण्याकरितां इकडे घेऊन ये.

6. Therefore, being kindled by us, give us for our good wealth, and shine thou, so that we may obtain prosperity. Bring hither for our weal Heaven and Earth that they may, o brilliant Agni, eat the offerings of [this] man.

---

५. ‘ वेष्टून राहो.’ म्हणजे यज्ञाचें संरक्षण करण्याकरितां पाहरेकऱ्यासारिखा पाहरा करो. ऋ. १.१.४ पहा.

‘ लकलकीत करितो ’=‘ चितयत्.’ म्हणजे आपल्या ज्वालांनीं आणि ठिणग्यांनीं असें सायण म्हणतात तें खरें दिसतें.

दा नो अग्ने बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि।
प्राची द्यावापृथिवी ब्रह्मणा कृधि स्व१र्ण शुक्रमुषसो वि दिद्युतः ॥ ७ ॥

दाः । नः । अग्ने । बृहतः । दाः । सहस्रिणः । दुरः । न । वाजम् । श्रुत्यै । अप । वृधि ।
प्राची इति । द्यावापृथिवी इति । ब्रह्मणा । कृधि । स्वः । न । शुक्रम् । उषसः । वि । दिद्युतुः ॥ ७ ॥

---

६. स [त्वम्] (अतः कारणात् त्वं) समिधानः (=अस्माभिः सम्यगिध्यमानः सन्) नः स्वस्तये रेवत् संददस्वान् (=अस्माकं क्षेमाय धनं प्रयच्छन्) अस्मासु रयिं दीदिहि (=अस्मासु मध्ये धनं दीप्यस्व=धनवद्दीप्यस्व=वयं धनं यथा लभेमहि तथा दीप्यस्व) । [अपिच] सुविताय (=सुहिताय=वयं सुहितं यथा लभेमहि तथा) हे देव अग्ने (=दीप्तिमन्नग्ने), मनुषो हव्या वीतये (=मनुष्यस्य मम हव्यानि भक्षयितुं) रोदसी (=द्यावापृथिव्यौ) आ कृणुष्व (=आभिमुख्यौ कुरु= अत्रानय) ॥

संददस्वान् सम्यक्प्रयच्छन्निति सायणः । पाश्चात्यो ग्रास्मन्नामकः पण्डितस्तु संददस्वान् संस्थापितः निर्गतः हततेजस्क इति ॥

भाषायाम्.

७. हे अग्ने, नो बृहतो [रयीन्] दाः (=अस्मभ्यं महान्ति धनानि देहि) सहस्रिणो [रयीन्] दाः (=सहस्रसंख्योपेतान् धनविशेषान् देहि) । दुरो न वाजं श्रुत्यै अप वृधि (=द्वाराणीव कीर्त्यै अन्नम् अपावृणु=अन्नपूर्णकोषस्य द्वाराण्युद्धाट्येव अन्न यथाकामं लम्भय येन वयं कीर्तिमन्तः स्याम) । [अपि च] ब्रह्मणा (=अस्माकं स्तोत्रेण द्वारा) द्यावापृथिवी (=द्यावापृथिव्यौ) प्राची कृधि (=प्राच्यौ=अनुकूले कुरु) [तथैव] उषसः (=प्रातःकालाः) शुक्रं स्वर्न (=तेजस्वी सूर्य इव) [प्राक्= अनुकूलं यथा तथा] वि दिद्युतुः (=विद्योतन्ताम्) ॥

७. हे अग्नी, आम्हांला मोठ्या [संपत्ति] दे. सहस्र [संपत्ति] दे. [आमची] कीर्ति व्हावी म्हणून अन्न [आमच्या पुढें] दरवाजा उघडल्याप्रमाणें उघडें कर. [आमच्या] स्तोत्रेंकरून द्यावापृथिवी आम्हांस अनुकूळ कर. तेजस्वी सूर्याप्रमाणें उषा प्रकाशोत.

7. Give us, o Agni, great riches, give us a thousand riches. Open [to us] food like a door for the sake of renown. Through [our] hymn make Heaven and Earth favourable [to us]; may the Ushases shine like the brilliant sun, [favourable unto us].

---

७. 'आम्हांला मोठ्या आणि हजारो संपत्ति दे आणि अन्न दे म्हणजे आमची कीर्ति होईल. आणि द्यावापृथिवी आणि उषा ह्या आम्हांस अनुकूळ अशा रीतीनें येतील असें कर.'

स ईधान उषसो राम्या अनु स्वर्१ण दीदेदरुषेण भानुना ।
होत्राभिरग्निर्मनुषः स्वध्वरो राजा विशामतिथिश्चारुरायवे ॥८॥

सः । इधानः । उषसः । राम्याः । अनु । स्वः । न । दीदेत् । अरुषेण । भानुना ।
होत्राभिः । अग्निः । मनुषः । सुऽअध्वरः । राजा । विशाम् । अतिथिः । चारुः । आयवे ॥ ८ ॥

एवा नो अग्ने अमृतेषु पूर्व्य धीष्पीपाय बृहद्दिवेषु मानुषा ।
दुहाना धेनुर्वृजनेषु कारवे त्मना शतिनं पुरुरूपमिषणि ॥ ९ ॥

एव । नः । अग्ने । अमृतेषु । पूर्व्य । धीः । पीपाय । बृहत्ऽदिवेषु । मानुषा ।
दुहाना । धेनुः । वृजनेषु । कारवे । त्मना । शतिनम् । पुरुऽरूपम् । इषणि ॥ ९ ॥

भाषायाम्.

८. स राम्या उषसः अनु इधानः (=रात्रीश्चोषसश्चानुसृत्य समिध्यमानः=प्रतिरजन्याः पश्चात् प्रत्युषसश्च पश्चात् समिद्धः) स्वर्न (=सूर्य इव) अरुषेण भानुना (=रोचमानेन तेजसा) दीदेत् (=दीप्यताम्)। मनुषो होत्राभिः (=मनुष्यस्य यज्ञैः) स्वध्वरः (=सुयज्ञो) विशां राजा (=जनानां प्रभुः) [एतादृशः] अग्निर् आयवे (=यजमानाय) चारुरतिथिः (=प्रियोऽतिथिर्) [भवति] ॥

९. बृहद्दिवेषु (=प्रभूतद्युतिषु) अमृतेषु (=मरणरहितेषु) [देवेषु मध्ये] हे पूर्व्य (=प्रथम) अग्ने, एवा नो मानुषा धीः पीपाय (=एवमस्माकं मनुष्यसंबन्धिनी स्तुतिः=मनुष्यैरस्माभिः कृतस्तुतिरूपा धेनुः पीना बभूव=पयःपीनधेनुवत् पयोदानसमर्था बभूव)। [सा] धेनुर् वृजनेषु (=यज्ञेषु) इषणि (=एषणायां सत्यां=पयोदोहने सति) त्मना (=आत्मनैव) कारवे (=स्तोत्रकर्त्रे) शतिनं (=शतसंख्योपेतं) पुरुरूपं (=गवाश्वादिरूपेण नानारूपं) [वाजं=धनं] दुहाना (=दोग्ध्री=दात्री) [भवतु] ॥

हे अमर्त्याग्ने, मर्त्यानामस्माकं स्तुत्या प्रीतः सन्नस्मभ्यमनेकसंख्यमनेकरूपं धनं देहीत्यर्थः ॥

८. तो [अग्नि] प्रत्येक रात्रीच्या आणि प्रत्येक उषेच्या मागून पेटविला होत्साता सूर्याप्रमाणें लकलकीत तेजानें प्रकाशो. मनुष्याच्या हवींनीं शोभनयज्ञ [आणि] जनांचा राजा असा जो अग्नि तो उपासकाचा प्रिय अतिथि होय.

९. हे महादीप्तिमंत अमरांमध्यें प्रथम अग्नी, या प्रकारेंकरून आम्हां मनुष्यांची स्तुति तीच कोणीएक धेनु पूर्ण झाली आहे. ती धेनु यज्ञांमध्यें दोहन होतांच उपासकासाठीं आपोआप शेकडो प्रकारचें आणि अनेकरूपी [अन्न] देओ.

8. He, kindled after every night and every Ushas—may he shine like the sun with brilliant splendor. Agni, the lord of good sacrifices through the offerings of man, and king of the people, is the beloved guest of the worshipper.

9. Thus o Agni, first among the resplendent immortals, has our human worship been fattened; may it [like a] milch-cow being pressed yield of its own accord in the sacrifices, for the sake of the praiser, a hundred-fold food of many forms.

---

८. 'प्रत्येक रात्रीच्या' इ०='राम्याः' इ०. म्हणजे रात्र आणि उषा ह्या प्रत्यहीं निघून जातांच अग्नीला प्रतिदिवसीं उषःकाळ होतांच पेटवून देवांस हवि अर्पण करीत असत.

९. यांत स्तोत्यानें केलेली जी स्तुतिरूप आणि कर्मरूप सेवा, तिला धेनूचें रूप दिलें आहे. आणि कवि म्हणतो, या स्तुतिरूप गाईला आम्हीं पुष्ट केलें आहे, तर ती आम्हांस अनेक प्रकारचें अन्नादिक धन देओ.

वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अति ।
अस्माकं द्युम्नमधि पञ्च कृष्टिषूच्चा स्व१र्ण शुशुचीत दुष्टरम्॥१०॥

वयम् । अग्ने । अर्वता । वा । सुऽवीर्यम् । ब्रह्मणा । वा । चितयेम । जनान् । अति ।

अस्माकम् । द्युम्नम् । अधि । पञ्च । कृष्टिषु । उच्चा । स्वः । न । शुशुचीत । दुस्तरम् ॥ १० ॥

स नो बोधि सहस्य प्रशंस्यो यस्मिन्त्सुजाता इषयन्त सूरयः ।
यमग्ने यज्ञमुपयन्ति वाजिनो नित्ये तोके दीदिवांसं स्वे दमे॥११॥

सः । नः । बोधि । सहस्य । प्रऽशंस्यः । यस्मिन् । सुऽजाताः । इषयन्त । सूरयः ।

यम् । अग्ने । यज्ञम् । उपऽयन्ति । वाजिनः । नित्ये । तोके । दीदिऽवांसम् । स्वे । दमे ॥ ११ ॥

भाषायाम्.

१०. हे अग्ने, वयम् अर्वता (=अश्वेन=त्वया दत्तेनाश्वसमूहेन) सुवीर्यं वा (=सुवीर्येण वा=शोभनवीर्योपेतैः पुत्रपौत्रादिभिश्च) ब्रह्मणा वा (=अस्माकं श्रेष्ठेन स्तोत्रेण च) जनान् अति चितयेम (=इतरजनान् अतिक्रम्य ज्ञायेमहि)। अस्माकं द्युम्नं (=धनं) दुस्तरम् (=अन्यैरप्राप्यं सत्) अधि पञ्च कृष्टिषु (=पञ्च जनेषु मध्ये) स्वर्ण उच्चा शुशुचीत (=सूर्य इव उच्चैर्भृशं दीप्यताम्) ॥

अधिः सप्तमीद्योतनार्थः ॥

११. हे सहस्य (=बलवन्नग्ने), यस्मिन् [त्वयि] सुजाताः सूरयः (=सुजन्मानो यजमाना) इषयन्त (=प्राप्तुमिच्छन्ति) [अपि च] हे अग्ने, यज्ञं (=यज्ञियं) यं [त्वां] वाजिन उपयन्ति (=उपासका हविर्भिः सेवन्ते)—नित्ये तोके [इव] स्वे दमे दीदिवांसम् (=औरसस्य पुत्रस्य गृह इव स्वकीये सवनस्थानरूपे गृहे दीप्यमानं) [त्वाम् उपयन्ति] स प्रशंस्यः (=प्रकर्षेण स्तवनीयस्त्वं) नः बोधि (=अस्माकं भव) ॥

१०. हे अग्नी, आम्ही अश्वांच्या योगानें आणि उत्तम वीर्यवान् संपत्तीच्या योगानें आणि स्तोत्राच्या योगानें इतर जनांपेक्षां अधिक आहों अशी आमची प्रसिद्धि होओ. आमचें वैभव पंच जनांमध्यें सूर्याप्रमाणें अप्राप्य होत्सातें उच्चस्थलीं प्रकाशो.

10. May we, o Agni, through horses and through brave sons and through piety be known beyond [other] people. May our prosperity, unattainable like the sun, shine high among the five races.

११. हे प्रबळ [अग्नी], ज्या तुझी प्राप्ति होण्याविषयीं सुजात उपासक इच्छा करितात, [आणि] हे अग्नी, ज्या तुज पूज्याला यजमानलोक हवि देऊन भजतात– औरस पुत्राच्या घरीं प्रकाशल्याप्रमाणें आपल्या स्वताहाच्या घरीं प्रकाशणाऱ्या तुजला [भजतात]– तो अत्यंत स्तुत्य तूं आमचा हो.

11. O Victorious Agni, be thou ours, thou the praiseworthy one, to reach whom well born worshippers strive, whom pious men serve with oblations, thou worthy of oblations, thou who shinest in thine own home as in the house of thine own son.

---

१०. ‘ स्तोत्राच्या योगानें ’=‘ ब्रह्मणा.’ म्हणजे आम्ही इतर जनांपेक्षां अधिक भक्तिमान् आहों अशी आमची ख्याति होओ.

११. ‘ आमचा हो ’=‘ नः बोधि.’ सू. ७६ मं. ४ आणि त्याजवरील टीप पहा.

‘ आपल्या स्वताहाच्या घरीं ’=‘ स्वे दमे.’ अग्नीचें ‘ स्वताहाचें घर ’ म्हणजे जेथें त्याला पेटवितात आणि पूजितात तें स्थळ, अथवा ती खोली. जसा एकादा बाप वेगळा राहत असून आपल्या औरस पुत्राचे घरीं जाऊन तेथें प्रीतीनें विराजमान होत असतो (म्हणजे आदरानें दिलेल्या आसनावर बसून पूजादिक ग्रहण करितो) त्याप्रमाणें अग्नि हा उपासकाला आपला पुत्र मानून त्याच्या घरीं स्वीकारिलेल्या स्थानीं विराजत असतो.

‘ औरस पुत्राचे घरीं ’=‘नित्ये तोके.’ ‘ तोके ’ या सप्तमीचा जो हा येथें अर्थ केला आहे, तो वेदांत केव्हां केव्हां येत असतो, व याचीं उदाहरणें पूर्वींहि आलीं आहेत.

उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरयश्च शर्मणि ।
वस्वो रायः पुरुश्चन्द्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः
॥ १२ ॥

उभयासः । जातऽवेदः । स्याम । ते । स्तोतारः । अग्ने । सूरयः । च । शर्मणि ।
वस्वः । रायः । पुरुऽचन्द्रस्य । भूयसः । प्रजाऽवतः । सुऽअपत्यस्य । शग्धि । नः ॥ १२ ॥

ये स्तोतृभ्यो गोअंग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥
॥ १३ ॥ २१ ॥

ये । स्तोतृऽभ्यः । गोऽअंग्राम् । अश्वऽपेशसम् । अग्ने । रातिम् । उपऽसृजन्ति । सूरयः ।
अस्मान् । च । तान् । च । प्र । हि । नेषि । वस्यः । आ । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १३ ॥ २१ ॥

भाषायाम्.

१२. हे जातवेदः (=जातानां सर्वेषां वेदितर्) अग्ने, ते (=तव) स्तोतारः (=स्तोत्रकृतः) सूरयश्च (=यजमाना) [इत्येते] उभयासः (=उभये) [वयं] शर्मणि स्याम (=सुखे भवेम)। वस्वः (=श्रेष्ठस्य) पुरुश्चन्द्रस्य (=अतिशयेनाह्लादकस्य) भूयसः (=प्रभूतस्य) प्रजावतः (=प्रजायुक्तस्य) स्वपत्यस्य (=सुपुत्रस्य) रायः (=धनस्य=एतादृशं धनं) नः (=अस्मभ्यं) शग्धि (=देहि)॥

प्रजावतः भृत्याद्युपेतस्य स्वपत्यस्य शोभनपुत्रस्येति सायणः ॥

१३. हे अग्ने, ये सूरयः (=यजमानाः) स्तोतृभ्यो (=अस्मादृग्भ्यो) गोअग्रां (=गावोऽग्रगामिन्यो यस्यास्तादृशीं=गोप्रमुखाम्) अश्वपेशसम् (=अश्वप्राधान्यां) रातिम् उपसृजन्ति (=दक्षिणां ददते) तांश्च [यजमानान्] अस्मांश्च [स्तोतॄन्] वस्य आ प्र हि नेषि (=श्रेष्ठं सुखं स्वर्गादिकं प्रति नय)। सुवीराः (=सुष्ठुवीर्योपेतपुत्रपौत्रादिसमवेता) [वयं] विदथे (=यज्ञे) बृहत् [स्तोत्रं] वदेम (=यथा वदेम तथा कुरु)॥

१२. हे सर्वज्ञ अग्नी, तुझे स्तोते आणि यजमान असे आम्ही उभयतां सुखी असूं असें कर. [आणि] कल्याणकारक, अतिशय आह्लादकारक, विपुळ, प्रजायुक्त आणि चांगल्या अपत्यांनीं भरलेली संपत्ति आम्हांला दे.

१३. हे अग्नी, जे यजमान स्तोत्यांला गाईंनीं भरलेली आणि अश्वाढ्य दक्षिणा देतात, त्यांला आणि त्याप्रमाणें आम्हांलाहि तूं उत्तम कल्याणाप्रत ने. उत्तम वीर्यवान् पुत्रांस घेऊन आम्ही यज्ञांत मोठें स्तोत्र गाऊं असें कर.

12. May we both, thy praisers and thy sacrificers, be happy, o all-knowing Agni! Give us prosperity that is wholesome, exceedingly delightful, plentiful, accompanied by children, and full of good sons.

13. Lead, o Agni, both those sacrificers who give to the poets a gift conspicuous by cows and excellent horses, both these and us the poets, to the highest good; may we, accompanied by sons who are excellent heroes, chant a great hymn in the sacrifice.

१२. 'प्रजायुक्त'='प्रजावतः'. म्हणजे चाकर नोकर इत्यादिक जींत आहेत अशी, असें सायण म्हणतात.

१३. पूर्वींच्या सूक्ताच्या शेवटच्या मंत्रावरची टीप पहा.

सूक्तम् ३–१९४.

गृत्समद ऋषिः। आप्रीसूक्तमिदम्। प्रथमा समिद्धाग्निदेवताका। द्वितीया नराशंसदेवताका। तृतीया इड्नामकाग्निदेवताका। चतुर्थ्या बर्हिर्देवता। पञ्चम्या द्वारो देव्यः। षष्ठ्या उषासानक्तौ। सप्तम्या दैव्यौ होतारौ। अष्टम्यास्तिस्रो देव्यः। नवम्यास्त्वष्टा। दशम्या वनस्पतिः। एकादश्याः स्वाहा॥ त्रिष्टुप् छन्दः। सप्तमी तु जगती॥

समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ् विश्वानि भुवनान्यस्थात्।
होता पावकः प्रदिवः सुमेधा देवो देवान्यजत्वग्निरर्हन्॥ १॥

सम्ऽइद्धः। अग्निः। निऽहितः। पृथिव्याम्। प्रत्यङ्। विश्वानि। भुवनानि। अस्थात्।
होता। पावकः। प्रऽदिवः। सुऽमेधाः। देवः। देवान्। यजतु। अग्निः। अर्हन्॥ १॥

नराशंसः प्रति धामान्यञ्जन् तिस्रो दिवः प्रति मह्ना स्वर्चिः।
घृतप्रुषा मनसा हव्यमुन्दन्मूर्धन्यज्ञस्य समनक्तु देवान्॥ २॥

नराशंसः। प्रति। धामानि। अञ्जन्। तिस्रः। दिवः। प्रति। मह्ना। सुऽअर्चिः।
घृतऽप्रुषा। मनसा। हव्यम्। उन्दन्। मूर्धन्। यज्ञस्य। सम्। अनक्तु। देवान्॥ २॥

भाषायाम्.

१. पृथिव्यां निहितः (=वेदिलक्षणायां भूमौ स्थापितः) समिद्धोऽग्निः (=सम्यग्दीप्त एतन्नामकोऽग्निर्) विश्वानि भुवनानि प्रत्यङ् अस्थात् (=सर्वाणि भूतजातानि=तेषाम् अभिमुखः संस्तिष्ठति)। होता (=देवानामाह्वाता) पावकः (=शोधकः) प्रदिवः (=पुरातनः) सुमेधाः (=शोभनप्रज्ञो) देवः (=द्योतमानः) अर्हन् (=यागयोग्यः) [एतादृशोऽयम्] अग्निर्देवान् यजतु (=पूजयतु)॥

२. स्वर्चिः (=शोभनज्वालः) प्रति धामानि तिस्रो दिवः प्रति च मह्ना अञ्जन् (=त्रीणि स्वकीयानि स्थानानि प्रत्येकं त्रींश्च द्युलोकान् प्रत्येकं व्यक्तीकुर्वन् अलं-

सूक्त ३–१९४.

ऋषि–गृत्समद. देवता–आप्रिय अग्नि (म्हणजे हें सूक्त आप्रीसूक्त आहे). देवता आहेत त्या ह्या:–१समिद्ध अग्नि;२नराशंस; ३ इड्; ४ बर्हि:; ५ द्वारो देवी; ६ उषा आणि रात्र; ७ दोन दिव्य होते; ८ सरस्वती, इळा आणि भारती ह्या तिघी देवी; ९ त्वष्टा; १० वनस्पति (म्ह० यूप); ११ स्वाहा). वृत्त–सातवी ऋचा जगती आहे, ती शिवाय करून सर्व ऋचा त्रिष्टुप् छंदाच्या आहेत.

१. पृथिवीवर स्थापिलेला समिद्ध अग्नि सकळ भूतांसंमुख उभा राहिला आहे. तो देवांला बोलाविणारा, शुद्धिकारक, पुरातन, सुप्रज्ञ, देदीप्यमान [आणि] [याग]योग्य अग्नि देवांला पूजो.

२. सुज्वाल नराशंस आपल्या मोठेपणानें आपलीं धामें आणि तीन द्युलोक शोभविणारा होत्साता, घृत गळविणाऱ्या स्तोत्रानें हवि भिजवून यज्ञाच्या आरंभीं देवांला अलंकृत करो.

Hymn 3–194.

To *Âpriya Agni* (i. e. V. 1 to *Samiddha Agni*; V. 2 to *Narâs'aṁsa*; V. 3 to *Iḍ*; V. 4 to *Barhis*; V. 5 to the *Doors*; V. 6 to *Ushas* and *Night*; V. 7 to the *two divine invokers*; V. 8 to the three Goddesses, *Sarasvatî*, *Iḷâ* and *Bhâratî*; V. 9 to *Tvashṭâ*; V. 10 to the *Vanaspati* or sacrificial post; and V. 11 to *Svâhâ*). Metre *Trishṭubh*, except in verse 7 where it is *Jagatî*.

1. [*Well*]-*kindled* Agni, established on the earth, is overlooking all beings. Invoking, purifying, ancient, wise, resplendent [and] worthy Agni—may he worship the gods!

2. May *Narâs'm̃nsa* of excellent splendor, adorning with his greatness each of his seats and the three heavens, sprinkle the oblation with a hymn that shall make gat showers to rain, honour the gods at the commencement of the sacrifice.

---

१. हें एक आप्रीसूक्त आहे. सू. १८८ मं. १. पहा.

२. सू. १३ मं. ३ पहा.
' आपलीं धामें '=' धामानि.' म्हणजे

ई॒ळि॒तो अ॑ग्ने॒ मन॑सा नो॒ अर्ह॑न्दे॒वान्य॑क्षि॒ मानु॑षा॒त्पूर्वो॑ अ॒द्य ।
स आ व॑ह म॒रुतां॒ शर्धो॒ अच्यु॑त॒मिन्द्रं॑ नरो बर्हि॒षदं॑ यजध्वम् ३

ई॒ळि॒तः । अ॒ग्ने॒ । मन॑सा । नः॒ । अर्ह॑न् । दे॒वान् । य॒क्षि॒ । मानु॑षात् । पूर्वः॑ । अ॒द्य ।

सः । आ । व॒ह॒ । म॒रुता॑म् । शर्धः॑ । अच्यु॑तम् । इन्द्र॑म् । न॒रः॒ । ब॒र्हि॒ऽसद॑म् । य॒ज॒ध्व॒म् ॥ ३ ॥

दे॑व॒ ब॒र्हि॒र्वर्ध॑मानं सु॒वीरं॑ स्ती॒र्णं रा॒ये सु॒भरं॒ वेद्य॑स्याम् ।
घृ॒तेना॒क्तं व॑सवः सीदते॒दं विश्वे॑ देवा आदित्या य॒ज्ञिया॑सः ॥४॥

दे॑व । ब॒र्हिः॒ । वर्ध॑मानम् । सु॒ऽवीर॑म् । स्ती॒र्णम् । रा॒ये । सु॒ऽभर॑म् । वेदी॒ इति॑ । अ॒स्याम् ।

घृ॒तेन॑ । अ॒क्तम् । व॒स॒वः॒ । सी॒द॒त॒ । इ॒दम् । विश्वे॑ । दे॒वाः॒ । आ॒दि॒त्याः॒ । य॒ज्ञिया॑सः ॥ ४ ॥

कुर्वन्) घृतप्रुषा (=घृतवन्मेघवृष्टेः सेचनकारकेण) मनसा (=स्तोत्रेण) हव्यम् उन्दन् (=हविः क्लेदयन् स्निग्धीकुर्वन् सन्) यज्ञस्य मूर्धन् (=यागस्यादौ) देवान् सम् अनक्तु (=व्यक्तीकरोतु=पूजया अलंकरोतु) ॥

भाषायाम्.

३. हे अग्ने, अर्हन् (=यागयोग्यस्) [तथा च] मानुषात् (=मनुष्यसंबधिनो होतुः) पूर्वः (=पूर्वभूतस्) [त्वं] नो मनसा ईळितः (=अस्माकं स्तोत्रेण स्तुतः सन्) अद्य देवान् यक्षि (=अस्मिन् दिने देवान् पूजय) । सः (=पूर्वोक्तप्रकारस्) [त्वम्] अच्युतं (=स्थिरं) मरुतां शर्धः (=मारुतं गणम्) आ वह (=अत्रानय) । हे नरः (=ऋत्विजः), बर्हिषदं (=कुशेषु निषण्णम्) इन्द्रं यजध्वं (=पूजयत)॥

४. हे देव (=दीप्तिमद्) बर्हिः, वर्धमानं (=प्रवृद्धं) सुवीरं (=शोभनवीरसंपादकं) सुभरं (= सुपूर्णम्) अस्यां वेदी (=अस्यां वेद्यां) स्तीर्णम् (=आस्तीर्णं) [त्वं] राये [भव] (=धनसंपादकं भव) । हे वसवः (=एतन्नामका देवा), हे विश्वे देवा, हे आदित्याः (=अदितेः पुत्रा एतन्नामका देवाः), यज्ञियासः (=यज्ञार्हा) यूयं घृतेन अक्तं (=स्निग्धीकृतम्) इदं [बर्हिः] सीदत (=निषीदत) ॥

३. हे अग्नी, [याग]योग्य [आणि] मानवी [होत्या]पेक्षां प्राचीन असा जो तूं, तो आमच्या स्तोत्रानें स्तविला होत्साता आज देवांला पूज. [आणि] आमच्या स्तोत्रानें स्तविला होत्साता मरुतांच्या दृढ गणाला घेऊन ये.—हे ऋत्विजांनो, दर्भांवर बसलेल्या इन्द्राला तुम्ही पूजा.

3. Worthy of worship [and] more ancient than the human [invoker], do thou, o Agni, *praised* by our hymn, worship the gods to-day. And bring thou hither the firm troop of the Maruts.—Worship, o friends, Indra seated on the grass.

४. हे तेजस्वी दर्भ हो, प्रवृद्ध, चांगल्या वीरांची प्राप्ति करून देणारे, सुपूर्ण, [आणि] या वेदीवर आंथरलेले असे जे तुम्ही, ते [आम्हांला] धनप्रद [व्हा]. हे वसू हो, हे विश्वे देव हो, हे आदित्य हो, यज्ञार्ह असे जे तुम्ही ते तुपानें भिजविलेल्या या दर्भांवर बसा.

4. O bright *Barhis*, be thou the giver of wealth, thou that art tall, the giver of good heroes, well-burdened, and spread on this altar.—Sit, o Vasus, o Vis′ve Devâs, o sons of Aditi, you, who are worthy of sacrifice, on this grass that is softened with clarified butter.

स्थानें, राहण्याचीं ठिकाणें; पृथिवी, अंतरिक्ष, द्यू इत्यादिक.

‘ तीन द्यूलोक ’ = ‘ तिस्रो दिवः’. सू. ३५. मं. ६. पहा.

‘ घृत गळविणाऱ्या स्तोत्रानें हवि भिजवून देवांला अलंकृत करो ’=‘ घृतप्रुषा मनसा हव्यम् उन्दन् देवान् समनक्तु.’ म्हणजे ज्या स्तोत्राच्या योगानें देव प्रसन्न होऊन घृताप्रमाणें पुष्टिकारक मेघवृष्टि करितील असें स्तोत्र म्हणून त्याजबरोबर देवांला हवि देऊन त्यांला सुप्रसन्न करो.

---

३. सू. १८८ मं. ३ पहा.

४. सू. १८८ मं. ४ पहा.

वि श्रयन्तामुर्विया हूयमाना द्वारो देवीः सुप्रायणा नमोभिः ।
व्यचस्वतीर्वि प्रथन्तामजुर्या वर्णं पुनाना यशसं सुवीरम्॥५॥२२॥

वि । श्रयन्ताम् । उर्विया । हूयमानाः । द्वारः । देवीः । सुप्रऽअयनाः । नमःऽभिः ।
व्यचस्वतीः । वि । प्रथन्ताम् । अजुर्याः । वर्णम् । पुनानाः । यशसम् । सुऽवीरम् ॥ ५ ॥ २२ ॥

साध्वपांसि सनता न उक्षिते उषासानक्ता वय्येव रण्विते ।
तन्तुं ततं संवयन्ती समीची यज्ञस्य पेशः सुदुघे पयस्वती ॥ ६ ॥

साधु । अपांसि । सनता । नः । उक्षिते इति । उषसानक्ता । वय्याऽइव । रण्विते इति ।
तन्तुम् । ततम् । संवयन्ती इति सम्ऽवयन्ती । समीची इति सम्ऽईची । यज्ञस्य । पेशः । सुदुघे इति सुऽदुघे । पयस्वती इति ॥६॥

भाषायाम्.

५. सुप्रायणाः (=शोभनगमनसाधना) द्वारो देवीः (=देव्यो द्वारः=देदीप्यमाना द्वारो) नमोभिर्हूयमानाः (=अस्माकं स्तोत्रैराहूयमानाः सत्य) उर्विया वि श्रयन्तां (=विस्तृतं यथा तथा विवृतापिधाना भवन्तु) । व्यचस्वतीः (=व्यचस्वत्यः=व्याप्तिमत्यः=महत्यः) अजुर्याः (=अहिंस्या) [अपि च] यशसं सुवीरं वर्णं पुनानाः (=यशोयुक्तं शोभनवीर्योपेतपुत्रयुक्तं वर्णं कान्तिं वैभवं संपादयित्र्यस्ता) वि प्रथन्तां (=विशेषेणोद्घाट्यन्ताम्) ॥

६. उक्षिते (=प्रवृद्धे महत्यौ) वय्येव रण्विते (=वानकुशले इव प्रख्याते) ततं तन्तुं संवयन्ती (=यज्ञावयवरूपं विस्तृतं तन्तुं सम्यक् वयन्त्यौ) समीची (=समीच्यौ =परस्परं संगते) यज्ञस्य पेशः सुदुघे (=यज्ञस्य रूपं सुष्टु ददत्यौ=उत्पादयित्र्यौ) पयस्वती (=पयस्वत्यौ दुग्धयुक्ते) [एतादृश्यौ] उषासानक्ता (=उषाश्च रात्रिश्च= अहोरात्ररूपे देव्यौ) नः (=अस्माकं) साधु अपांसि (=साधूनि कर्माणि) सनता (=सातत्येन सततं) [सफलीकुरुताम्] ॥

वय्येव रण्विते इति यज्ञस्य पेशः सुदुघे इति च दुर्बोधकल्पम् । सायणस्त्वेवं व्या-

५. ज्यांच्या मधून जावयाला चांगला मार्ग आहे अशा ज्या द्वारो देवी त्या स्तोत्रांनीं बोलाविल्या होत्सात्या रुंद उघडोत. ज्या लांबरुंद, ज्या अक्षय, ज्या यशोयुक्त [आणि] चांगल्या वीरांनीं युक्त असें वैभव देणाऱ्या, त्या द्वारो देवी उघडोत.

5. May the brilliant *Doors*, that afford a good passage, open wide, [being] invoked by [our] hymns. May they, extensive, [and] indestructible [and] givers of a glory full of renown and of good progeny, throw themselves wide open.

६. महान्, विणण्याच्या कामीं कुशळ असल्याप्रमाणें ज्यांची ख्याति आहे, ताणलेला तंतु विणणाऱ्या, एकमेकांस लागलेल्या, यज्ञाचें रूप उत्पन्न करणाऱ्या, आणि दुग्धपूर्ण, अशा ज्या उषा आणि रात्र, त्या आमचीं चांगलीं कर्में नित्य [सफल करोत].

6. The great *Ushas* and *Night*, renowned as skilful weavers, weavers of the thread that is stretched, closely united each to the other, yielders of the form of the sacrifice, and full of milk– [may] they ever [promote] our good works.

५. सू. १३ मं. ६, सू.१८८ मं. ५.

६. सू. १८८ मं. ६ पहा. ही ऋचा कांहींशी कठिण आहे. ‘ विणण्याच्या कामीं कुशळ असल्याप्रमाणें ज्यांची ख्याति आहे ’ (=‘ वय्येव रण्विते’). हें भाषांतर निरूपायासाठीं सायणांनीं शब्दनिर्वचनास अनुसरून भाष्य केलें आहे त्याप्रमाणें आम्हीं केलें आहे. ‘ ताणलेला तंतु विणणाऱ्या ’ (=‘ तन्तुं ततं संवयन्ती’), म्हणजे यज्ञरूप वस्त्र विणणाऱ्या, यज्ञाला संपादणाऱ्या.

‘ यज्ञाचें रूप उत्पन्न करणाऱ्या ’= ‘ यज्ञस्य पेशः सुदुघी.’ हा अर्थ होईल तितका अक्षरार्थ आहे. पण यज्ञाचें रूप म्हणजे कोणता पदार्थ समजावयाचा आहे ? ‘ यज्ञाला संपादणाऱ्या ’ इतकें तात्पर्य आहे. ऋ. ७.४२.१ यांत ‘पेशः’ शब्दाचा असाच प्रयोग केला आहे तो पहा.

‘दुग्धपूर्ण ’=‘ पयस्वती.’ म्हणजे ज्यांच्या कासेंत पुष्कळ दूध आहे अशा. येथें ‘ उषासानक्ता ’ यांस गाई असें कल्पिलें आहे.

दैव्या होतारा प्रथमा विदुष्टर ऋजु यक्षतः समृचा वपुष्टरा ।
देवान्यजन्तावृतुथा समञ्जतो नाभा पृथिव्या अधि सानुषु त्रिषु ७

दैव्या । होतारा । प्रथमा । विदुःऽतरा । ऋजु । यक्षतः । सम् । ऋचा । वपुःऽतरा ।
देवान् । यजन्तौ । ऋतुऽथा । सम् । अञ्जतः । नाभा । पृथिव्याः । अधि । सानुषु । त्रिषु ॥ ७ ॥

सरस्वती साधयन्ती धियं न इळा देवी भारती विश्वतूर्तिः ।
तिस्रो देवीः स्वधया बर्हिरेदमच्छिद्रं पान्तु शरणं निषद्य ॥ ८ ॥

सरस्वती । साधयन्ती । धियम् । नः । इळा । देवी । भारती । विश्वऽतूर्तिः ।
तिस्रः । देवीः । स्वधया । बर्हिः । आ । इदम् । अच्छिद्रम् । पान्तु । शरणम् । निऽसद्य ॥ ८ ॥

चष्टे । वय्या इव वानकुशले इव रण्विते शब्दिते स्तुते परस्परं गच्छन्त्यौ वा ततं विस्तृतं तन्तुं तन्तुस्थानीयं यज्ञावयवं संवयन्ती सम्यक् चित्रं सह वा वयन्त्यावुत्पादयित्र्यौ समीची सम्यक् प्रवृत्तिके परस्परानुकूले । किमर्थं संवयन्ती । यज्ञस्यानुष्ठीयमानस्य पेशो रूपं निर्मातुमिति शेषः । यज्ञं निर्वर्तयितुं तदवयवानुक्रमेणानुष्ठापयित्र्यावित्यर्थः । अहोरात्राभ्यां हि यज्ञास्तन्यन्ते । सुदुघे सुष्ठु फलस्य दोग्ध्र्यौ पयस्वती उदकवत्यौ । अहोरात्राभ्यां खलु वृष्टिर्जायते । एवं महानुभावे अहोरात्रदेवते अस्मद्यज्ञं निर्वहतामित्यर्थः । इति ॥

भाषायाम्.

७. दैव्या (=दिवि भवौ) प्रथमा (=मनुष्यहोतृभ्यः पूर्वं जातौ) विदुष्टरा (=विदुष्टरौ=विद्वत्तरौ) वपुष्टरा (=वपुष्टरौ=प्रकृष्टवपुषौ) होतारा (=होतारौ देवानामाह्वातारौ) ऋचा (=मन्त्रेण) ऋजु (=अविकलं यथा तथा) यक्षतः (=पूजयताम्) । देवान् ऋतुथा (=यथायोग्यकालं) यजन्तौ (=पूजयन्तौ) [तौ] [तान् देवान्] पृथिव्या नाभा (=नाभौ=उत्तरवेद्यां) त्रिषु सानुषु अधि (=त्रिषु शिखरेषु) सम् अञ्जतः (=समाङ्क्ताम्=अलंकुरुताम्=हविर्भिः संतर्पयताम्) ॥

पृथिव्या नाभा नाभावुत्तरवेद्यामधि उपरि त्रिषु सानुषु समुच्छ्रितेषु प्रदेशेषु गार्हपत्यादिषु । इति सायणः ॥

७. दिव्य, आदि, अत्यंत विद्वान् आणि अत्यंत सुंदर असे जे दोघे होते ते स्तोत्रानें नीट यजन करोत. योग्यकाळीं देवांचें यजन करणारे ते पृथिवीच्या नाभींत तीन शिखरांवर [त्यांस] विराजवोत.

7. *The two divine Invokers*, primeval, most learned [and] most handsome,—may they perform the sacrifice with the hymn properly. Honouring the gods at the proper time, may they adorn them in the navel of the earth, on the three summits.

८. आमचें स्तोत्र सिद्ध करणारी **सरस्वती**, देदीप्यमान **इळा**, [आणि] विश्वगामिनी **भारती** ह्या तिघी देवी येऊन या कुशांवर बसून आपल्या बळानें [आमचें] घर छिद्ररहित राही असें रक्षोत.

8. *Sarasvatî*, the accomplisher of our hymn, divine *Iḷâ*, and *Bhâratî* that pervades all—may the three goddesses come and sit on this grass and protect [our] house so that it may be free from holes.

---

७. सू. १८८ मं. ७ पहा.

'पृथिवीच्या नाभींत.' म्हणजे उत्तरवेदि म्हणून जी यज्ञमंडपांत जागा असते तिजवर, आणि 'तीन शिखरांवर' म्हणजे गार्हपत्यादिक जों स्थानें त्यांजवर, असें सायण म्हणतात.

८. सू. १८८ मं. ८ पहा.

पिशङ्गरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः ।
प्रजां त्वष्टा वि ष्यतु नाभिमस्मे अथा देवानामप्येतु पाथः ॥ ९ ॥

पिशङ्गऽरूपः । सुऽभरः । वयःऽधाः । श्रुष्टी । वीरः । जायते । देवऽकामः ।

प्रऽजाम् । त्वष्टा । वि । स्यतु । नाभिम् । अस्मे इति । अथ । देवानाम् । अपि । एतु । पाथः ॥ ९ ॥

वनस्पतिरवसृजन्नुप स्थादग्निर्हविः सूदयाति प्र धीभिः ।
त्रिधा समक्तं नयतु प्रजानन्देवेभ्यो दैव्यः शमितोप हव्यम् ॥ १० ॥

वनस्पतिः । अवऽसृजन् । उप । स्थात् । अग्निः । हविः । सूदयाति । प्र । धीभिः ।

त्रिधा । सम्ऽअक्तम् । नयतु । प्रऽजानन् । देवेभ्यः । दैव्यः । शमिता । उप । हव्यम् ॥ १० ॥

---

८. नो धियं साधयन्ती (=अस्माकं स्तोत्रं संपादयित्री) सरस्वती देवी (=द्योतमाना) इळा [नामिका] विश्वतूर्तिर्भारती [च] (=विश्वव्यापिनी भारती नाम देवी च) [एतास्] तिस्रो देवीः (=देव्यः) आ[गम्य] इदं बर्हिर्निषद्य (=एतेषु दर्भेषूपविश्य) स्वधया (=स्वकीयेन बलेन) शरणम् (=अस्माकं गृहम्) अच्छिद्रं (=छिद्ररहितं यथा तथा) पान्तु (=पालयन्तु) ॥

भाषायाम्.

९. पिशङ्गरूपः (=सुवर्णवर्णः) सुभरः (=सुयज्ञः=शोभनस्य यज्ञस्य कर्ता) वयोधाः (=अन्नस्य दाता) वीरः (=वीर्योपेतो) देवकामः (=देवान् कामयमानः) [एतादृशः पुत्रस्] [त्वष्टुरनुग्रहात्] जायते (=जायताम् अस्माकम्) । त्वष्टा नाभिं (=बन्धकां=संततिमूलभूतां प्रजां=पुत्रादिरूपाम्) अस्मे (=अस्मभ्यं) वि ष्यतु (=वितरतु) । अथ (=अनन्तरं=पुत्रादिप्रजाप्राप्त्यनन्तरं) देवानां पाथः (=देवानामर्थेस्माभिर्दत्तं हवीरूपमन्नम्) अपि एतु (=तान् देवान् प्रति गच्छतु) ॥

प्राप्तप्रजा वयं देवेभ्यो हविर्दास्यामः । तच्च त्वष्टा तान् प्रति प्रापयतु । इति भावः॥

१०. अवसृजन् (=हविः पशुरूपं प्रयच्छन्) वनस्पतिः (=यूपरूपो वृक्ष) उप स्थात् (=अस्मत्समीपे तिष्ठतु) । [तत्] हविरग्निर्धीभिः (=स्वप्रज्ञाभिः=स्वकी-

९. सुवर्णकांतीचा, चांगला यज्ञ करणारा, अन्नदाता, वीर [आणि] देवप्रिय [असा पुत्र त्वष्ट्याच्या कृपेनें] लवकर जन्मो. त्वष्टा आम्हांला वंश चालविणारी प्रजा देओ. आणि मग देवांचें अन्न [देवांप्रत] वर जाओ.

१०. [हवि] संपादणारा वनस्पति [आम्हां]जवळ उभा राहो. अग्नि [आपल्या] कौशल्यानें [तें] हवि शिजवो. दिव्य शमिता प्रज्ञावान् [अग्नि] तीन प्रकारांनीं तयार केलेलें हव्य देवांजवळ नेओ.

9. [Through *Tvashṭâ's* kindness] may a son be quickly born [to us] that shall be of golden colour, perform good sacrifices, give food, that shall be a hero and that shall love the gods. May *Tvashṭâ* grant us posterity that shall continue the race and then may the food of the gods go unto [them].

10. May the *Lord of the forest* yielding [the oblation] stand by. May Agni with [his] skill cook [that] oblation. May wise [Agni] the divine preparer carry to the gods the offering composed in the three ways.

---

९. सू. १८८ मं. ९ पहा.

यांत देवांची प्रीति करणारा, देवांप्रीत्यर्थ यज्ञ करणारा, कांतिमान् आणि (विशेषेंकरून) शूर पुत्र देण्याविषयीं जी प्रार्थना आहे तिजकडे लक्ष्य देण्यासारिखें आहे. त्वष्टा प्रजा उत्पन्न करितो असें त्याचें वर्णन वेदांत प्रसिद्ध आहे. म्हणूनच त्याणें वीर पुत्र आणि प्रजा द्यावी असें येथें प्रार्थिलें आहे.

१०. 'यूपाला बांधलेला जो यज्ञपशु त्यापासून मांस मिळावयाचें; तें मांस अग्नि शिजवो आणि देवांप्रत प्रविष्ट करो' असा भावार्थ.

'[हवि] संपादणारा'= 'अवसृजन्.' यूपाला पशु बांधल्यामुळें मांसलाभ होतो म्हणून त्याला हवि संपादणारा असें नांव दिलें आहे.

'शमिता'= 'शमिता.' शमिता म्हणजे हवि तयार करणारा एक मनुष्य यज्ञांत असतो. अग्नीला दिव्य शमिता म्हणण्याचें कारण असें कीं तो तें शिजवून देवांकारणें तयार करीत असतो.

'तीन प्रकारांनीं'= 'त्रिधा.' म्हणजे सायणांच्या म्हणण्याप्रमाणें उपस्तरण, अवदान, आणि अभिघारण या तीन प्रकारांनीं. उपस्तरण म्हणजे ज्या पात्रांत

घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम्॥११॥२३

घृतम् । मिमिक्षे । घृतम् । अस्य । योनिः । घृते । श्रितः । घृतम् । ऊं इति । अस्य । धाम ।
अनुऽस्वधम् । आ । वह । मादयस्व । स्वाहाऽकृतम् । वृषभ । वक्षि । हव्यम् ॥ ११ ॥ २३ ॥

येन कौशलेन) सूदयाति (=क्षारयतु=पचतु) । [अपि च] प्रजानन् (=प्रकर्षेण जानन्=प्रज्ञावान्) दैव्यः (=दिव्यः) शमिता (=हविषः संस्कर्ता) त्रिधा (=त्रिभिः प्रकारैः) समक्तं (=सम्यक् सिक्तं) हव्यं देवेभ्य उप नयतु (=देवानां समीपं नयतु)॥

यूपबद्धपशोर्लब्धं मांसमग्निः पचतु । तच्च स देवान् प्रति वहत्विति भावः ॥

त्रिधा त्रिप्रकारमुपस्तरणावदानाभिघारणैः समक्तं सम्यक् सिक्तं हव्यं हविः प्रजानन् विद्वान् नयनप्रकाराभिज्ञः सन् देवेभ्य उपनयतु । समीपं प्रापयतु । इति सायणः ॥

भाषायाम्.

११. घृतं मिमिक्षे (=सिञ्चितमस्ति) घृतम् अस्य योनिः (=अग्नेरुत्पत्तिस्थानं) [भवति] । घृते श्रितः (=कृताश्रयो) [भवति] । उ (=उत=अपि च) घृतम् अस्य धाम (=तेजो) [भवति] ।—हे वृषभ (=प्रभो) [अग्ने], अनुस्वधं (=प्रति स्वधां=सर्वेष्वपि हव्येषु दीयमानेषु) [देवान्] आ वह (=अत्रानय) [अपि च] मादयस्व (=प्रीणय) [ततस्त्वं] स्वाहाकृतं हव्यं (=स्वाहेति शब्देन सह दत्तं हविर्) वक्षि (=वह) ॥

अनुस्वधम् अनु नित्यक्रमम् यथा प्रतिदिनं तथेति पाश्चात्याः ॥

हवि घालावयाचें त्यांत प्रथम तूप शिंपडणें, अवदान म्हणजे त्यावर हवि ठेवणें, आणि अभिघारण म्हणजे तें ठेविल्यानंतर त्यावर जें तूप शिंपडणें तें.

११. घृत शिंपडलें आहे. घृत हें याचें उत्पत्तिस्थान आहे. घृतामध्यें हा राहत असतो. घृत हें याचें तेज आहे.–हे प्रभू [अग्नी], [देवांला] प्रत्येक हवीच्या वेळीं तूं घेऊन ये [आणि] आनंदित कर; **स्वाहा** म्हणून दिलेलें हव्य घेऊन जा.

11. Clarified butter is sprinkled; clarified butter is his origin; he lives in clarified butter; clarified butter is his strength.—Bring [the gods] at every offering, [and] gratify [them]. Carry o hero [Agni], the offering given with the exclamation *svâhâ*.

---

११. अग्नीवर घृत शिंपडून ऋषि म्हणतो: 'घृतानें प्रदीप्त होऊन अग्नि देवांला येथें आणो आणि त्यांजकडून हव्य भक्षण करवो. आणि आम्हीं "स्वाहा"! म्हणून दिलेलें हव्य देवांप्रत पोंहचतें करो.' ही ऋचा स्वाहाविषयीं आहे. सू. १८८ मं. ११ पहा.

अन्नप्राशन म्हणून जो विधि करितात, त्यांत या मंत्राचा पाठ म्हणतात. त्याचें कारण इतकेंच दिसतें कीं, यांत 'घृत' (तूप) हा शब्द आला आहे. पण अन्नप्राशनविधीशीं दुसरा कोणताहि संबंध या ऋचेचा नाहीं.

त्याप्रमाणें अंत्येष्टीमध्यें अस्थिसंचयनश्राद्ध म्हणून जें करितात त्यांतहि हा मंत्र म्हणत असतात; परंतु त्याचें तरी कारण इतकेंच आहे कीं, यांत 'घृत' शब्द आला आहे.

सूक्तम् ४-१९५.

भार्गवः सोमाहुतिनामक ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ।

हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सुप्रयसम् ।
मित्र इव यो दिधिषाय्यो भूद्देव आदेवे जने जातवेदाः ॥ १ ॥

हुवे । वः । सुऽद्योत्मानम् । सुऽवृक्तिम् । विशाम् । अग्निम् । अतिथिम् । सुऽप्रयसम् ।

मित्रःऽइव । यः । दिधिषाय्यः । भूत् । देवः । आऽदेवे । जने । जातऽवेदाः ॥ १ ॥

इमं विधन्तो अपां सधस्थे द्वितादधुर्भृगवो विक्ष्वा१योः ।
एष विश्वान्यभ्यस्तु भूमा देवानामग्निररतिर्जीराश्वः ॥ २ ॥

इमम् । विधन्तः । अपाम् । सधऽस्थे । द्विता । अदधुः । भृगवः । विक्षु । आयोः ।

एष । विश्वानि । अभि । अस्तु । भूम । देवानाम् । अग्निः । अरतिः । जीरऽअश्वः ॥ २ ॥

भाषायाम्.

१. [हे यजमानाः], वः (=युष्मदर्थं) सुद्योत्मानं (=शोभनदीप्तिमन्तं) सुवृक्तिं (=शोभनस्तुतिं) सुप्रयसं (=शोभनहविर्लक्षणान्नं) विशाम् अतिथिं (=जनानां प्राघूर्णिकं) हुवे (=आह्वयामि)। जातवेदाः (=जातानां वेदिता=सर्वज्ञो) देवः (=द्योतमानो) यो मित्र इव (=सखेव) आदेवे जने (=देवानां संमुखभूते देवान् कामयमाने जने) दिधिषाय्यः (=धारणीयः=सेव्यो) भूत् (=अभूत्)॥

२. इमम् [अग्निं] विधन्तः (=परिचरन्तो) भृगवः (=एतन्नामका अस्माकं पूर्वे) अपां सधस्थे (=अन्तरिक्षस्थानाम् उदकानां स्थले=आकाशे) आयोर्विक्षु (=यजमानरूपस्य मनुष्यस्य लोके=यजमानजनेषु) [इति] द्विता (=द्वयोः स्थलयोर्) अदधुः (=दधुः=स्थापितवन्तः)। एष (=सोयं) जीराश्वः (=वेगवदश्वो) देवानाम् अरतिः (=देवानां दूतः) अग्निर्विश्वानि भूम (=विश्वानि भूमानि=सर्वाणि भूतजातानि) अभि अस्तु (=अभि भवतु=सर्वत्र जेता भवतु)॥

सूक्त ४–१९५.

ऋषि–भृगुकुळांतील **सोमाहुति** नांवाचा पुरुष. देवता–**अग्नि.** वृत्त–त्रिष्टुप्.

१. [हे यजमान हो], ज्याची कांति चांगली आहे, ज्याविषयीं चांगलें स्तोत्र लोक गातात, ज्याला चांगलें अन्न प्राप्त होतें असा जो लोकांचा अतिथि अग्नि त्याला मी तुम्हांसाठीं बोलावितों. जो देदीप्यमान सर्वज्ञ [अग्नि] देवभाविक जनामध्यें मित्रासारिखा सेव्य झाला आहे.

२. याला भजून [आमचे पूर्वज] भृगु आपो [देवीं]च्या स्थानीं, [आणि] उपासकलोकीं, याप्रमाणें दोन ठिकाणीं स्थापन करिते झाले. तो जो हा देवांचा शीघ्राश्व दूत अग्नि त्याचा सर्व भुवनांमध्यें विजय होओ.

Hymn 4–195.

To *Agni* By *Somâhuti* a descendant of *Bhṛigu*. Metre—*Trishṭubh.*

1. I invoke for you, Agni of excellent brilliance, in whose honour good hymns are sung, who is the guest of the people, to whom good food is given; who, brilliant [and] all-knowing, has become among pious men worthy of being served like a friend.

2. Him the Bhṛigus worshipping established in two places, in the bosom of the waters [and] among the people of the worshipper. May this same Agni, the messenger of the gods, having swift horses, conquer all beings.

---

१. 'देवभाविक जनामध्यें'='आ-देवे जने.' सायणाचार्य 'देवपर्यंत जे जन त्यांमध्यें म्हणजे मनुष्यांपासून देवांपर्यंत' असा अर्थ करितात.

२. सू. ६० मं. १; सू. ५८ मं. ६; सू. १२७ मं. ७; सू. १४३ मं. ४ आणि त्याजवरील टिपा पाहा.

अग्निं देवासो मानुषीषु विक्षु प्रियं धुः क्षेष्यन्तो न मित्रम् ।
स दीदयदुशतीरूर्म्या आ दक्षाय्यो यो दास्वते दम आ ॥ ३ ॥

अग्निम् । देवासः । मानुषीषु । विक्षु । प्रियम् । धुः । क्षेष्यन्तः । न । मित्रम् ।
सः । दीदयत् । उशतीः । ऊर्म्याः । आ । दक्षाय्यः । यः । दास्वते । दमे । आ ॥ ३ ॥

अस्य रण्वा स्वस्येव पुष्टिः संदृष्टिरस्य हियानस्य दक्षोः ।
वि यो भरिभ्रदोषधीषु जिह्वामत्यो न रथ्यो दोधवीति वारान् ॥ ४ ॥

अस्य । रण्वा । स्वस्यऽइव । पुष्टिः । सम्ऽदृष्टिः । अस्य । हियानस्य । धक्षोः ।
वि । यः । भरिभ्रत् । ओषधीषु । जिह्वाम् । अत्यः । न । रथ्यः । दोधवीति । वारान् ॥ ४ ॥

भाषायाम्.

३. देवासः (=देवाः) [स्वर्गे] क्षेष्यन्तः (=निवत्स्यन्तः=सुखेन निवसितुम् इच्छन्तः) प्रियं मित्रं न (=प्रीणयितारं सखायम् इव) अग्निं मानुषीषु विक्षु धुः (=मनुष्यसंबन्धिनीषु प्रजासु स्थापितवन्तः) । यो[ग्निर्] दास्वते दमे आ (=हविर्दत्तवते यजमानाय तस्य गृहे=यजमानस्य गृहे तदर्थं) दक्षाय्यः (=समर्धयिता संवर्धको) [भवति] स उशतीरूर्म्याः (=कामयमानाः सर्वा रात्रीः=कामयमानासु सर्वासु रात्रिषु) आ दीदयत् (=सर्वतो दीप्यते) ॥

४. अस्य [अग्नेः] पुष्टिः (=शरीरवृद्धिः=पुष्टशरीरावस्था) स्वस्य (=धनस्य) [पुष्टिर्] इव (=वृद्धिरिव) रण्वा (=रमणीया) [भवति] । हियानस्य धक्षोरस्य (=उपासकैः प्रपद्यमानस्य=हविरादिभिः परिचरितस्य दग्धुमिच्छोः=दहनोद्युक्तस्य तस्य) संदृष्टिः (=संदर्शनं) [रण्वा भवति] । यो[ग्निर्] ओषधीषु (=काष्ठेषु) जिह्वां वि भरिभ्रत् (=ज्वालासमूहं विशेषेण विहरति=कम्पयति) । [अग्निर्] अत्यो न रथ्यः (=रथस्याश्व इव) वारान् दोधवीति (=स यथा पुच्छबालान् भृशं कम्पयति तथा यं ज्वालालक्षणान् बालान् भृशं कम्पयति) ॥

३. अग्नीला [स्वर्गीं] राहाणारे देव प्रिय मित्राला ठेविल्या प्रमाणें मनुष्यलोकीं ठेविते झाले. जो उपासकाच्या घरीं उपासकाची समृद्धि करणारा, तो [अग्नि] सकल प्रिय रात्रीं प्रकाशमान असो.

४. याची [वृद्धि] धनाच्या वृद्धीप्रमाणें आनंदकारक [होय]. याची उपासना होऊन हा जाळूं लागला म्हणजे याचें दर्शन [आनंदकारक होय]. जो [अग्नि] झाडांमध्यें यथेच्छ आपली जिह्वा फिरवीत असतो. तो रथाच्या घोड्याप्रमाणें आपलें पुच्छ हालवीत असतो.

3. The gods living happily [in heaven] established among the human races Agni as a dear friend. May he shine all dear nights, who is the prosperer to the worshipper in his house.

4. His well-nourished condition is beautiful like the thriving condition of wealth; [beautiful is] his appearance when he is served [with fuel] and when he is burning. He shakes about [his] tongue among the trees. He shakes [his] flames as a chariot-horse shakes his tail.

---

३. '[स्वर्गीं] राहणारे'= 'क्षेष्यन्तः.' सायण '[स्वर्गीं] जाणारे' असा अर्थ करितात. पण 'क्षि' धातूचा अर्थ 'जाणें' असा होतो अशाविषयीं त्यांनीं प्रमाण काय घेतलें असेल तें समजत नाहीं.

'प्रिय रात्रीं'= 'उशतीरूर्म्याः.' 'प्रिय' (उशती) हें रात्रींला विशेषण दिलें याचें तात्पर्य इतकेंच दिसतें कीं, रात्रींला येथें आई किंवा प्रीति करणाऱ्या स्त्रिया अशा मानिल्या आहेत.

४. 'अग्नीची उपासना समिधादिकांनीं केली आणि तो पेटूं लागला आणि पाहिजे तें जाळण्यास जणुं तयार झालेला असला म्हणजे, त्याची कांति फार आनंदकारक दिसते, आणि तो जेव्हां आपल्या ज्वाळा इकडे तिकडे हालवूं लागतो तेव्हां एकादा घोडा जसा आपलें शेपूट हालवितो त्याप्रमाणें दिसूं लागतो.'

आ यन्मे अभ्वं वनदः पनन्तोशिग्भ्यो नामिमीत वर्णम् ।
स चित्रेण चिकिते रंसु भासा जुजुर्वाँ यो मुहुरा युवा भूत्५॥२४

आ । यत् । मे । अभ्वम् । वनदः । पनन्त । उशिक्ऽभ्यः । न । अमिमीत । वर्णम् ।
सः । चित्रेण । चिकिते । रम्ऽसु । भासा । जुजुर्वान् । यः । मुहुः । आ । युवा । भूत् ॥ ५ ॥ २४ ॥

आ यो वना तातृषाणो न भाति वार्ण पथा रथ्येव स्वानीत् ।
कृष्णाध्वा तपू रण्वश्चिकेत द्यौरिव स्मयमानो नभोभिः ॥ ६ ॥

आ । यः । वना । ततृषाणः । न । भाति । वाः । न । पथा । रथ्याऽइव । स्वानीत् ।
कृष्णऽअध्वा । तपुः । रण्वः । चिकेत । द्यौःऽइव । स्मयमानः । नभःऽभिः ॥ ६ ॥

भाषायाम्.

५. यत् (=यदा) मे (=मम) वनदः (=? स्तोतारः) [अस्माग्नेः] अभ्वं (=महत्त्वम्) आ पनन्त (=स्तुवन्ति) [तदा] उशिग्भ्यो न (=तस्य रूपं कामयमानेभ्य इव तेभ्यः स्तोतृभ्यो) वर्णं (=स्वकीयं तेजस्वि रूपम्) अमिमीत (=निरममीत= आविर्भावितवान्)। स चित्रेण भासा (=हिरण्यादिनानावर्णया दीप्त्या) रंसु (=रमणीयं यथा तथा) चिकिते (=शोभते)। यो[ग्नि]र्जुजुर्वान् (=जीर्णः सन्) मुहुरा (=पुनःपुनरपि) युवा भूत् (=तरुणो भवति)॥

सायण इमामेवं व्याचष्टे। यत् यस्याभ्वं महत्त्वं मे मम संबन्धिनो वनदो वनन्तः संभक्तारः। यद्वा वनदोऽवनदो भृशं शब्दयन्तः स्तोतारः॥ अवशब्दो भृशार्थवाची तत्पूर्वान्नदेः क्विप्। अवाप्योरित्यकारलोपः॥ आपनन्त। समन्तात् स्तुवन्ति। सोऽग्निरुशिग्भ्योऽस्मदीयं रूपं कामयमानेभ्य ऋत्विग्भ्यो वर्णं स्वसदृशं रूपं नामिमीत। नशब्दश्चार्थे॥ निर्मिमीते च। स च रंसु रमणीयेष्वाज्यादिहविःषु निमित्तेषु चित्रेण भासा हिरण्यकनकादिनानावर्णया दीप्त्या चिकिते। विज्ञायते। किंच योऽग्निर्जुजुर्वान् जीर्णः सन् ज्वालोपशमे स एव मुहुः पुनःपुनरा युवा सर्वतो मिश्रयिता तरुणो वा भूत्। आभवति पुनराज्यादिसंयोगात्। इति॥

५. जेव्हां माझे स्तोते याचें महत्त्व वर्णितात तेव्हां तो आपल्या प्रभेचा त्या उत्सुक जनांप्रत आविर्भाव करितो. तो सुंदर दीप्तीनें रमणीय रीतीनें प्रकाशतो. जो म्हातारा होऊन पुनः पुनः तरूण होतो.

5. When my poets praise [his] greatness, he manifests [his] splendour to the anxious [poets]. He shines agreeably with bright lustre, when he having become old becomes young again and again.

६. तो अग्नि अत्यंत तृषाक्रांत जणुं होत्साता काष्ठांला जाळून टाकितो. पाणी मार्गानें जाऊं लागलें म्हणजे त्याप्रमाणें [अथवा] रथाच्या चाकांप्रमाणें तो नाद करीत असतो. कृष्णमार्ग, देदीप्यमान आणि आल्हादकारी असा जो अग्नि तो, द्यु जसा नक्षत्रांनीं शोभतो, तसा प्रकाशतो.

6. And he burns the woods oppressed, as it were, by thirst. He rattles like water along a stream, like the wheels of a chariot. He who leaves a black path behind him, who is resplendent, and who is delightful, shines like the sky that smiles with the stars.

---

५. ह्या ऋचेचा पूर्वार्ध कठिण आहे. त्यांत ‘ वनदः ’ आणि ‘ उशिग्भ्यो न ’ इतके शब्द कठिण आहेत. ‘ वनदः ’ हें पद पुनः वेदांत आलेलें आढळत नाहीं आणि ‘ उशिग्भ्यो न’ यांतील ‘न’ शब्दाचें सामर्थ्य काय आहे तें नीट कळत नाहीं. साधारण तात्पर्य असें दिसतें कीं, ‘ जेव्हां स्तोते जन अग्नीला समिधा, हवि इत्यादि देऊन भजतात, तेव्हां तो आपलें तेजस्वी रूप त्यांस दाखवितो; म्हणजे पेटून पुष्कळ प्रकाश पाडितो. आणि नित्य म्हातारा होऊन म्हणजे जळून रक्षामय झाल्यावर पुनः तरूण होत असतो. म्हणजे पुनः पेटल्यावर पूर्वींप्रमाणें तेजस्वी दिसतो.’

स यो व्यस्थादभि दक्षदुर्वीं पशुर्नैति स्वयुरगोपाः ।
अग्निः शोचिष्माँ अतसान्युष्णन्कृष्णव्यथिरस्वदयन्न भूम ॥ ७ ॥
सः । यः । वि । अस्थात् । अभि । धक्षत् । उर्वीम् । पशुः । न । एति । स्वऽयुः । अगोपाः ।
अग्निः । शोचिष्मान् । अतसानि । उष्णन् । कृष्णऽव्यथिः । अस्वदयत् । न । भूम ॥ ७ ॥
नू ते पूर्वस्यावसो अधीतौ तृतीये विदथे मन्म शंसि ।
अस्मे अग्ने संयद्वीरं बृहन्तं क्षुमन्तं वाजं स्वपत्यं रयिं दाः ॥ ८ ॥
नु । ते । पूर्वस्य । अवसः । अधिऽइतौ । तृतीये । विदथे । मन्म । शंसि ।
अस्मे इति । अग्ने । संयत्ऽवीरम् । बृहन्तम् । क्षुऽमन्तम् । वाजम् । सुऽअपत्यम् । रयिम् । दाः ॥ ८ ॥

---

६. यो[ग्निस्] तातृषाणो न (=भृशं तृषापीडित इव) वना आ भाति (=वनान्याभाति =काष्ठानि दहति)। वार्न पथा (=पथा गच्छदुदकमिव) [अथवा] रथ्येव (=रथाङ्गानि चक्राणीव) स्वानीत् (=ध्वनिं करोति)। कृष्णाध्वा (=कृष्णमार्गस्) तपुः (=तापको) रण्वः (=रमणीयः) [एतादृशोग्निर्] नभोभिः (=नक्षत्रैः) स्मयमानो द्यौरिव (=प्रकाशमानो द्युलोक इव) चिकेत (=प्रकाशते)॥

भाषायाम्.

७. यो वि अस्थात् (=विविधं तिष्ठति) [तथा] उर्वीम् अभि धक्षत् (=पृथिवीम् आभिमुख्येन दहति) स स्वयुः (=स्वैरी) अगोपाः (=गोपरहितः) पशुर्न (=पशुरिव) एति (=यथेच्छं गच्छति)। शोचिष्मान् (=प्रकृष्टदीप्तिर्) अतसानि उष्णन् (=शुष्कानि काष्ठानि दहन्) कृष्णव्यथिः (=कृष्णाध्वा) अग्निर्भूम अस्वदयत् न (=पृथिवीम् आस्वादयतीव)॥

८. ते पूर्वस्य अवसः (=त्वया कृतस्य प्राचीनस्य प्रसादस्य=त्वदीयानां प्राचीनप्रसादानाम्) अधीतौ (=स्मरणे सति तत्स्मृत्या) तृतीये विदथे (=सवने) नु (=इदानीम्) [इदं] मन्म शंसि (=स्तोत्रम् अशंसि=अस्माभिरवादि)। [अतः का-

७. जो इकडे तिकडे पसरतो [आणि] पृथिवीला जाळून टाकितो, तो एकाद्या स्वैर आणि राखणा बरोबर नसलेल्या पशूप्रमाणें फिरत असतो. [तो] देदीप्यमान अग्नि शुष्क काष्ठांस जाळणारा होत्साता आणि आपल्या मागें काळा मार्ग ठेवणारा होत्साता पृथिवीचा स्वाद जणुं घेत असतो.

८. तुझ्या पूर्व प्रसादाची आठवण करून तृतीय सवनाच्या ठायीं हें स्तोत्र आम्हीं आतां म्हटलें आहे. तर हे अग्नी, वीर्यसंपन्न संततीनें भरलेली, मोठी, [आणि] यशःसंपन्न अशी संपत्ति, [आणि] सुपुत्रांनीं युक्त असें धन तूं आम्हांस दे.

7. He who spreads about and burns the wide earth, goes unrestrained like an animal without a keeper. Brilliant Agni burning the dry woods, and leaving a black path behind him, seems to taste the earth.

8. In remembrance of thy former favours [this] hymn has now been chanted in the third worship [of the day]. Give unto us, o Agni, prosperity [that shall be] accompanied uninterruptedly by brave progeny [and shall be] great [and] full of renown, [and] wealth accompanied by good children.

---

७. 'पृथिवीचा स्वाद जणुं घेत असतो '= 'अस्वदयत् न भूम.' याचा अभिप्राय असा दिसतो कीं, पृथिवीवर असलेले जे सर्व पदार्थ ते कसे लागतात, तें पाहण्याकरितां अग्नि त्यांस भाजून त्यांचा स्वादच जणुं घेतो असें दिसतें.

८. 'तृतीय सवनाच्या ठायीं '= 'तृतीये विदथे.' म्हणजे संध्याकाळच्या वेळीं जी तिसऱ्या खेपेची उपासना तींत.

'पूर्व प्रसादाची आठवण करून '= 'पूर्वसावसोधीतौ.' म्हणजे तूं यापूर्वीं प्रसन्न होऊन कल्याण करीत आला आहेस, त्यापेक्षां आतां पुढेंहि करिशील असें ध्यानांत ठेवून.

त्वया यथा गृत्समदासो अग्ने गुहा वन्वन्त उपराँ अभि ष्युः ।
सुवीरासो अभिमातिषाहः स्मत्सूरिभ्यो गृणते तद्वयो धाः॥९॥२५

त्वया । यथा । गृत्सऽमदासः । अग्ने । गुहा । वन्वन्तः । उपरान् । अभि ।
स्युरिति स्युः ।
सुऽवीरासः । अभिमातिऽसहः । स्मत् । सूरिऽभ्यः । गृणते । तत् ।
वयः । धाः ॥ ९ ॥ २९ ॥

रणात्] हे अग्ने, अस्मे (=अस्मभ्यं) संयद्वीरं (=सततं वीरोपेतं) बृहन्तं (=महान्तं) क्षुमन्तं (=कीर्तिमन्तं) वाजम् (=अन्नादिसंपदं) स्वपत्यं रयिं (=शोभनपुत्राद्यपत्ययुक्तं धनं) [च] दाः (=देहि) ॥

भाषायाम्.

९. हे अग्ने, त्वया [सहायेन] (=त्वत्प्रसादात्) सुवीरासः (=शोभनवीर्ययुक्तपुत्रादिसंपन्ना) अभिमातिषाहः (=वैरिणां सोढारः जेतारो) गृत्समदा गुहा उपरान् (=गुहायां वर्तमानान् शत्रून्=गुप्तशत्रून्) वन्वन्तः (=हिंसन्तस्) [तान्] यथा अभि स्युः (=अभि भवेयुस्) तत् (=तथा) स्मत् सूरिभ्यो गृणते (=यजनकर्तृभ्यस्तेभ्यो गृत्समदेभ्यस्तेषां कवये च मह्यं) वयो धाः (=अन्नं देहि) ॥

यथा गृत्समदाः सुवीरभूतपुत्रा जयशालिनश्च सन्तः स्वशत्रूनभिभवेयुस्तथा तेभ्यस्तैर्नियुक्ताय मह्यं स्तोत्रे च धनं देहीति भावः ॥

९. हे अग्नी, गृत्समदांनीं तुझ्या प्रसादेंकरून सुवीरयुक्त आणि वैरिनाशक होऊन गुप्तशत्रूंचा पराभव करावा आणि [त्यांचा] नाश करावा म्हणून तूं [त्या] यजमानांला आणि ह्या स्तोत्याला संपत्ति दे.

9. Give, o Agni, such wealth both to the sacrificers and to their poet, that the Gritsamadas, blessed with warlike sons and endowed with powers to vanquish the foe, may attack their secret enemies and destroy them.

---

९. उपसंहारः– 'याप्रमाणें आम्हीं गृत्समदांनीं तुझें स्तोत्र केलें आहे, तर आम्हांला असे शूर पुत्र, बळ आणि संपत्ति द्या कीं, आम्ही आपल्या शत्रूंवर हल्ला करून त्यांस संहारून टाकूं.'

'गुप्तशत्रु'='गुहा उपराः' या सर्व ऋचेंत हीं दोनच पदें कठिण आहेत; सायणाचार्य एक प्रकारचें 'धन' अथवा 'पापीजन' असा अनिश्चित अर्थ करितात. 'उपर' शब्द ऋग्वेदांत इतर बऱ्याच ठिकाणीं आला आहे पण ते ते सर्व मंत्र काढून पाहतांहि प्रस्तुत ठिकाणीं काय अर्थ आहे याचा निर्णय करण्यास साधनें मिळत नाहींत; यामुळें असलेली अडचण, गुहा शब्दाचें सामर्थ्य येथें काय आहे तें उघड नसल्यामुळें कांहींशी वाढली आहे. गुहा म्हणजे 'गुहेंत,' 'एकांतीं,' 'अन्तः,' हा अर्थ तर उघड आहे.

'नाश करावा'='वन्वन्तः' ऋ. ५. २९. ९ इत्यादि आणि त्याजवरील सायणभाष्य पहा.

सूक्तम् ५-१९६.

सोमाहुतिर्ऋषिः । अग्निर्देवता । अनुष्टुप् छन्दः ॥

होताजनिष्ट चेतनः पिता पितृभ्य ऊतये ।
प्रयक्षञ्जेन्यं वसु शकेम वाजिनो यमम् ॥ १ ॥
होता । अजनिष्ट । चेतनः । पिता । पितृऽभ्यः । ऊतये ।
प्रऽयक्षन् । जेन्यम् । वसु । शकेम । वाजिनः । यमम् ॥ १ ॥
आ यस्मिन्त्सप्त रश्मयस्तता यज्ञस्य नेतरि ।
मनुष्वद्दैव्यमष्टमं पोता विश्वं तदिन्वति ॥ २ ॥
आ । यस्मिन् । सप्त । रश्मयः । तताः । यज्ञस्य । नेतरि ।
मनुष्वत् । दैव्यम् । अष्टमम् । पोता । विश्वम् । तत् । इन्वति ॥ २ ॥
दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेरु तत् ।
परि विश्वानि काव्या नेमिश्चक्रमिवाभवत् ॥ ३ ॥
दधन्वे । वा । यत् । ईम् । अनु । वोचत् । ब्रह्माणि । वेः । ऊं इति ।
तत् ।
परि । विश्वानि । काव्या । नेमिः । चक्रम्ऽइव । अभवत् ॥ ३ ॥

भाषायाम्.

१. [अग्निश्] चेतनो होता (=सजीवो देवानामाह्वाता) [तथा] जेन्यं (=श्रेष्ठं) वसु (=धनं) प्रयक्षन् (=प्रयच्छन्) ऊतये (=रक्षणाय) पितृभ्यः पिता (=पितृभूतेभ्यो यजमानेभ्यः पितेव) अजनिष्ट (=उत्पन्नः) । वाजिनः (=हविर्लक्षणान्नवन्तः=हविर्ददतो) [वयं] [तं] यमं (=नियन्तुम्=अत्रावस्थानाय नियन्तुम्) शकेम (=शक्ता भूयास्म) ॥

२. यस्मिन् यज्ञस्य नेतरि (=नायके) [अग्नौ] सप्त रश्मयः (=? सप्त होत्रकास्) तताः (=विस्तृतास्) तत् (=स) पोता [भूत्वा] दैव्यं (=? देवसंबन्धि =अष्टमर्त्विक्संबन्धि) विश्वं (=सकलं कर्म) इन्वति (=संपादयति) ॥

३. [अध्वर्युर्] यद् ईं (= यद्धविर्) दधन्वे वा (=अवसृजति वा) [ब्रह्मा वा] ब्रह्माणि अनु वोचत् (=ब्रह्मा नामर्त्विग् यानि स्तोत्राण्यनुवक्ति) तत् [सर्वम्]

सूक्त ५–१९६.

ऋषि–सोमाहुति. देवता–अग्नि. वृत्त–अनुष्टुभ्.

१. [अग्नि हा] सचेतन होता [आणि] पितरांच्या संरक्षणासाठीं पिता [आणि] श्रेष्ठ धन देणारा उत्पन्न झाला आहे. आम्हां हविर्दायकांच्या हातून [त्याचा] अटकाव होओ.

२. ज्या यज्ञनायकाच्या ठायीं सात रश्मि पसरिले आहेत, तो पोता आठवें सकळ दिव्य कर्म मनुष्याप्रमाणें संपादितो.

३. [अध्वर्यु] जो [आहुति] ओतितो, अथवा [ब्रह्मा] स्तोत्रें म्हणतो तें सर्व हा जाणतो. वाटेच्या पोटीं जसें चक्र असतें त्याप्रमाणें सर्व ऋत्विक्कर्में याच्या आंत आहेत.

Hymn 5–196.

To *Agni*. By *Somâhuti*. Metre —*Anushṭubh*.

1. He is born a living invoker, a father to the fathers for protection, giving excellent wealth. May we, offering oblations, be able to detain [him].

2. He [as] Potâ performs like a man the whole divine eighth office, he the leader of the sacrifice in whom the seven rays are stretched.

3. He knows the pouring out [of the libation] [by the Adhvaryu] and the chanting of the hymns [by the Brahmâ]. He embraces all powers [within himself] even as the filly [does] the wheel.

---

१. ' पितरांच्या संरक्षणासाठीं'='पितृभ्य ऊतये.' येथें पितर म्हणजे यजमान असें सायण म्हणतात असें दिसतें खरें.

२. पूर्वींच्या मंत्रांत अग्नि हा होत्याचें कर्म संपादितो असें सांगितलें. आतां यांत म्हणतो कीं, अग्नि पोत्याचेंहि कर्म संपादीत असतो.

यांत सप्तरश्मि म्हणजे मैत्रावरुण इत्यादि जे सात होत्रक अथवा अप्रधान ऋत्विक् ते होत, आणि आठवें कर्म म्हणजे आठव्या ऋत्विजाचें काम असें विवक्षित दिसतें. तात्पर्य म्हटलें म्हणजे अग्नि हा एकटा सर्व ऋत्विजांचें काम करितो इतकेंच आहे.

३. ' अग्नि अध्वर्यूचें आणि ब्रह्मा या नांवाच्या ऋत्विजाचें काम जाणतो ' असा भावार्थ आहे.

साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि ।
विद्वाँ अस्य व्रता ध्रुवा वया इवानु रोहते ॥ ४ ॥
साकम् । हि । शुचिना । शुचिः । प्रऽशास्ता । क्रतुना । अजनि ।
विद्वान् । अस्य । व्रता । ध्रुवा । वयाःऽइव । अनु । रोहते ॥ ४ ॥
ता अस्य वर्णमायुवो नेष्टुः सचन्त धेनवः ।
कुवित्तिसृभ्य आ वरं स्वसारो या इदं ययुः ॥ ५ ॥
ताः । अस्य । वर्णम् । आयुवः । नेष्टुः । सचन्त । धेनवः ।
कुवित् । तिसृऽभ्यः । आ । वरम् । स्वसारः । याः । इदम् । ययुः॥५॥

[अग्निर्] वेः उ (=जानात्येव) । विश्वानि काव्या (=कविकर्माणि=मेधाव्यृत्विक्कर्माणि =अध्वर्युब्रह्मादीनां कर्माणि) नेमिश्चक्रमिव परि अभवत् (=नेमिर्बहिर्वलयश्चक्रं यथा वेष्टयति तथा वेष्टयति =स्वायत्तानि धारयति) ॥

अग्निर्यथा होतृकर्म पोतृकर्म च जानाति स तथाध्वर्युकर्म ब्रह्मणश्च कर्माण्यपि जानातीति भावः ॥

भाषायाम्.

४. शुचिना क्रतुना साकं (=शोधकेन कर्मणा सह) [अग्निः] शुचिः प्रशास्ता (=शुद्धः प्रशास्तृनामकर्त्विग्) अजनि (=उत्पन्नः) । अस्य [अग्नेर्] ध्रुवा व्रता (=ध्रुवाणि व्रतानि =अविनाशीनि कर्माणि) विद्वान् (=जानन्) [उपासको] वया इव (=शाखा इव) अनु रोहते (=उदेति) ॥

सर्वकर्मज्ञोग्निर्वृक्ष इव भाति । यो यजमानस्तु तस्यानुग्रहेण तानि कर्माणि जानाति स तस्य शाखेव भाति न स्वतन्त्रवृक्ष इवेति भावः । उपासकानां कर्मज्ञानमग्नेः सकाशाज्जायत इत्यभिप्रायः ॥

५. या आयुवः (=गन्त्र्यः=कर्मकर्त्र्यो) धेनवः (=धेनुवत् प्रीणयित्र्यः) स्वस्वारः (= स्वसृभूता) [?अङ्गुल्यः] कुविद् (=बहुकृत्वस्) तिसृभ्यः (=?) आ वरं (=तिसृणामपेक्षया सम्यग् यथा तथा) इदं (=?) [प्रति] ययुः (=जग्मुस्) ता अस्य [अग्निलक्षणस्य] नेष्टुः (=एतन्नामकर्त्विजो) वर्णं (=कान्ति) सचन्त (=सचन्ते =सेवन्ते =कामयन्ते) ॥

अग्निर्नेष्टृकर्माभिज्ञतमोपि भवतीत्यभिप्राये स्पष्टे सत्यपि अस्पष्टार्था सायणेनैवं व्याख्यातेयमृक् । या वक्ष्यमाणलक्षणा या अङ्गुलय इदमनुष्ठीयमानं कर्म ययुः ।

४. पवित्र कर्माबरोबर [हा] पवित्र प्रशास्ता जन्मला आहे. याचीं अनादि कर्मे जाणणारा उपासक [वृक्षाच्या] शाखेप्रमाणें याची शाखा होय.

५. ज्या चपळ आणि धेनूसारिख्या बहिणी पुष्कळ वेळ तिघींपेक्षां चांगल्या रीतीनें ह्याप्रत जातात त्या या नेष्ट्याच्या कांतीला भुलून राहतात.

4. With the secret rite he was born the secret Pras'âstâ. The worshipper, who knows his immemorial rites is an off-shoot from him as is a branch from a tree.

5. Those active sisters who like milch-cows frequently come better than the three to this, wait upon the beauty of this Neshṭâ.

---

४. 'अग्नि हा प्रशास्ता या नांवाचा जो ऋत्विज् त्याचेंहि काम जाणतो. सर्व कामें तो जाणतो. आणि जो यजमान अग्नीप्रमाणें यज्ञ करण्याचें कौशल जाणतो तो अग्निरूप वृक्षाची शाखा होय; म्हणजे कोणत्याहि ऋत्विजास कितीहि ज्ञान असलें तरी तें अग्नीच्या ज्ञानापेक्षां उणें होय. इतर विद्वान ऋत्विज हे अग्निरूप विद्वान् आणि वृक्षाच्या शाखा होत.'

'अनादि कर्मे'='ध्रुवा व्रता.' म्हणजे यज्ञ कसा करावा, देवांस संतृप्त कसें करावें इत्यादि जीं कर्मे अग्नि अनादि काळापासून जाणत आला आहे व पुढेंहि कधीं विसरणार नाहीं तीं.

५. ही एक ऋचा फार कठिण आहे. भाषांतर अक्षरशः केलें आहे. पण अग्नि हा 'नेष्टा' नांवाच्या ऋत्विजाचें काम फार चांगलें जाणतो, इतक्या अभिप्रायापेक्षां दुसरा एकंदर अर्थ समजत नाहीं. नेष्टा म्हणून जो ऋत्विज् त्याचें काम यजमानपत्नीला यज्ञमंडपांत आणणें आणि सुरा तयार करणें हें असे. तेव्हां हें काम अग्निरूप नेष्टा चांगल्या रीतीनें करितो अशा अर्थाला अनुलक्षून ऋचा लाविली पाहिजे असें दिसतें. परंतु बहिणी म्हणजे कोण आणि त्या 'धेनु' कशा, 'तिघी' कोण आणि 'ह्याप्रत' यांतील 'हें' (इदम्) तें काय, तें समजत नाहीं. भाषेखालीं पहा.

यदी मातुरुप स्वसा घृतं भरन्त्यस्थित ।
तासामध्वर्युरागतौ यवो वृष्टीव मोदते ॥ ६ ॥
यदि । मातुः । उप । स्वसा । घृतम् । भरन्ती । अस्थित ।
तासाम् । अध्वर्युः । आऽगतौ । यवः । वृष्टीऽइव । मोदते ॥ ६ ॥
स्वः स्वाय धायसे कृणुतामृत्विगृत्विजम् ।
स्तोमं यज्ञं चादरं वनेमा ररिमा वयम् ॥ ७ ॥
स्वः । स्वाय । धायसे । कृणुताम् । ऋत्विक् । ऋत्विजम् ।
स्तोमम् । यज्ञम् । च । आत् । अरम् । वनेम । ररिम । वयम् ॥७॥
यथा विद्वाँ अरं करद्विश्वेभ्यो यजतेभ्यः ।
अयमग्ने त्वे अपि यं यज्ञं चकृमा वयम् ॥ ८ ॥ २६ ॥
यथा । विद्वान् । अरम् । करत् । विश्वेभ्यः । यजतेभ्यः ।
अयम् । अग्ने । त्वे इति । अपि । यम् । यज्ञम् । चकृम । वयम्॥८॥२६

प्राप्नुवन्ति । अनुतिष्ठन्ति । ता आयुवो गन्त्र्यो व्याप्ता धेनवः प्रीणयित्र्यः स्वसारः स्वयं सारिण्योऽङ्गुलयो नेष्टुर्हविर्याचितुर्भक्षयितुः शोधयितुः पोषयितुर्नेतुर्वास्याग्नेः । यद्वैतन्नामकऋत्विग्रूपस्य तिसृभ्य आ गार्हपत्यादिमूर्तीनामपि वरं वर्णं कुवित् बहुकृत्वः सचन्त । सेवन्ते । परिचरन्ति । इति ॥

भाषायाम्.

६. यदि (=यदा) घृतं भरन्ती (=आनयन्ती) मातुः स्वसा (=वेदिलक्षणा या मातुः स्वसृभूता जुहूः=स्वसारो जुहूपभृद्ध्रुवा) उप अस्थित (=उपतिष्ठेदग्निम्=उपतिष्ठन्ति) [तदा] तासां [स्वसृणाम्] आगतौ (=आगमने) यवो वृष्टीव (=धान्यं वृष्ट्या यथा मोदते तथा) मोदते (=हृष्यति) ॥

७. [अग्निलक्षण] ऋत्विक् स्वाय धायसे स्वः (=स्वकीयाय भरणाय स्वयमेव) ऋत्विजं कृणुताम् (=आर्त्विज्यं करोतु) । आत् (=अनन्तरं) वयं स्तोमं यज्ञं च (=स्तोत्रं हविश्च) अरम् (=अलं) वनेम ररिम (=संभजेमहि ददीमहि च) ॥

८. यथा विद्वान् विश्वेभ्यो यजतेभ्यः (=सर्वेभ्यः पूज्येभ्यो देवेभ्यः) अरं करत् (=पर्याप्तं कुर्यात्=पर्याप्तं यथा तथा हविर्दद्यात् तथा) यम् [इमं] यज्ञं वयं चकृम [सः] अयं [यज्ञो] हे अग्ने, त्वयि अपि (=त्वयि) भवतु (=त्वया स्वीकृतो भवतु) ॥

६. जेव्हां आईच्या बहिणी तूप घेऊन येतात, तेव्हां त्यांच्या येण्यानें [अग्निरूप] अध्वर्यूला, पिकाला वृष्टीच्या योगानें होतो, तसा आनंद होतो.

७. [अग्निरूप] ऋत्विज् आपल्या स्वताहाच्या भरणासाठीं स्वत: ऋत्विजाचें काम करो. नंतर आम्ही पुष्कळ स्तोत्र करूं आणि यज्ञ करूं.

८. विद्वान् [अग्नी]नें सकळ पूज्य [देवां]प्रीत्यर्थ यजन करावें म्हणून हा जो यज्ञ आम्हीं केला आहे तो, हे अग्नी, तुला प्रविष्ट होओ.

6. When [his] mother's sisters bearing clarified butter come, [Agni] the Adhvaryu rejoices at their approach, as the crops [rejoice] at [the approach of] rain.

7. Let [Agni] a priest for his own nourishment himself perform the duties of a priest. May we then offer in plenty a hymn and a sacrifice.

8. May this sacrifice which we have performed, that Agni the wise one may offer oblations to all the worshipful gods, reach thee, o Agni !

---

६. जुहू इत्यादिक ज्या पळ्या त्या येथें अग्निरूप अध्वर्यूच्या मावशा कल्पिल्या आहेत. जिजवर अग्नि पेटतो ती वेदि त्याची आई. त्या मावशा तूप घेऊन आल्या म्हणजे त्याला फार आनंद होतो असें तात्पर्य.

७. 'अग्नि हा उत्तम ऋत्विज् आहे, यास्तव आपलें आपणच आर्त्विज्य करो; म्हणजे, दुसरे ऋत्विज् नकोत, ऋत्विजाचें काम त्याणें आपलें आपणच करावें. मग आम्ही त्याला पुष्कळ स्तोत्र अर्पण करूं आणि हवि देऊं.'

८. उपसंहार. 'ही उपासना अग्नीची केली आहे तर ती तो ग्रहण करो आणि सकळ देवांप्रीत्यर्थ आमच्या करितां यजन करो.'

या सर्व सूक्ताचें तात्पर्य असें दिसतें कीं होता, नेष्टा, पोता, प्रशास्ता इत्यादिक जे ऋत्विज् त्या सर्वांचें काम अग्नि उत्तम रीतीनें जाणतो.

सूक्तम् ६–१९७.

सोमाहुतिर्ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

इमां मे अग्ने समिधमिमामुपसदं वनेः ।
इमा उ षु श्रुधी गिरः ॥ १ ॥

इमाम् । मे । अग्ने । सम्ऽइधम् । इमाम् । उपऽसदम् । वनेरिति वनेः ।
इमाः । ऊं इति । सु । श्रुधि । गिरः ॥ १ ॥

अया ते अग्ने विधेमोर्जो नपादश्वमिष्टे ।
एना सूक्तेन सुजात ॥ २ ॥

अया । ते । अग्ने । विधेम । ऊर्जः । नपात् । अश्वम्ऽइष्टे ।
एना । सुऽउक्तेन सुऽजात ॥ २ ॥

तं त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः ।
सपर्येम सपर्यवः ॥ ३ ॥

तम् । त्वा । गीःऽभिः । गिर्वणसम् । द्रविणस्युम् । द्रविणःऽदः ।
सपर्येम । सपर्यवः ॥ ३ ॥

भाषायाम्.

१. हे अग्ने, इमां मे समिधं [तथा] इमाम् उपसदम् (=उपासनां) वनेः (=स्वीकुरु)। उ (=उत=अपि च) इमा गिरः (=स्तुतीः) सु (=सुष्ठु यथा तथा) श्रुधि (=शृणु) ॥

२. हे अग्ने, अया (=अनया) [आहुत्या] ते विधेम (=त्वां परिचरेम)। हे ऊर्जो नपात् (=बलस्य पुत्र), हे अश्वमिष्टे (=अश्वकामिन्), हे सुजात (=सुष्ठु जात), एना सूक्तेन (=अनेन स्तोत्रेण) [ते विधेम=त्वां परिचरेम] ॥

३. तं त्वा (=तादृशं त्वां) गिर्वणसं (=स्तुतिकामिनं) गीर्भिः (=स्तुतिभिः), हे द्रविणोदः (=धनद), द्रविणस्युं (=हविर्लक्षणधनेच्छुं) [त्वां] सपर्यवः (=स्तुतिकरणेच्छवो) [वयं] सपर्येम (=त्वां परिचरेम) ॥

सूक्त ६–१९७.

ऋषि–सोमाहुति. देवता–अग्नि. वृत्त–गायत्री.

१. हे अग्नी, तूं माझी ही समिध [आणि] ही माझी उपासना ग्रहण करून घे. आणि ह्या स्तुति चांगल्या प्रकारें ऐक.

२. हे अग्नी, या [आहुती]नें आम्हांस तुला भजूं दे. हे बळाच्या पुत्रा, हे अश्वकामी, हे सुजात [अग्नी], या सूक्तानें [आम्हांस तुला भजूं दे].

३. तर तुज स्तोत्रकामीला स्तोत्रांनीं, हे धनदात्या, तुज धनेच्छूला आम्हां भजकांस भजूं दे.

HYMN 6–197.

To *Agni*. By *Somâhuti*. Metre—*Gâyatrî*.

1. Accept, o Agni, this my fuel [and] this my worship. And hear thou well these prayers.

2. With this [oblation] o Agni, let us worship thee. O son of strength, o lover of horses, o well-born [Agni], [let us worship thee] with this hymn.

3. Let us, then, worship thee, the lover of praises, with praises, thee the seeker of food, o giver of food—we who desire to worship.

---

१. ‘ ही. ’ म्हणजे तुला अर्पण करितों आहें ती.

३. ‘ भजूं दे ’=‘ सपर्येम. ’ म्हणजे आम्ही भजतों, त्या भजनाकडेस चित्त दे, तें भजन स्वीकारून घे.

‘ तुज धनेच्छूला’=‘त्वा द्रविणस्युम्.’ म्हणजे आम्हीं जशी धनाची इच्छा करितों तसा तूंहि हवि हेंच धन आम्हांकडून मिळावें अशी इच्छा करितोस, तर असा जो तूं त्या तुला.

स बोधि सूरिर्मघवा वसुपते वसुदावन् ।
युयोध्य१स्मद्द्वेषांसि ॥ ४ ॥

सः । बोधि । सूरिः । मघऽवा । वसुऽपते । वसुऽदावन् ।
युयोधि । अस्मत् । द्वेषांसि ॥ ४ ॥

स नो वृष्टिं दिवस्परि स नो वाजमनर्वाणम् ।
स नः सहस्रिणीरिषः ॥ ५ ॥

सः । नः । वृष्टिम् । दिवः । परि । सः । नः । वाजम् । अनर्वाणम् ।
सः । नः । सहस्रिणीः । इषः ॥ ५ ॥

ईळानायावस्यवे यविष्ठ दूत नो गिरा ।
यजिष्ठ होतरा गहि ॥ ६ ॥

ईळानाय । अवस्यवे । यविष्ठ । दूत । नः । गिरा ।
यजिष्ठ । होतः । आ । गहि ॥ ६ ॥

अन्तर्ह्यग्न ईयसे विद्वाञ्जन्मोभया कवे ।
दूतो जन्येव मित्र्यः ॥ ७ ॥

अन्तः । हि । अग्ने । ईयसे । विद्वान् । जन्म । उभया । कवे ।
दूतः । जन्याऽइव । मित्र्यः ॥ ७ ॥

भाषायाम्.

४. हे वसुपते (=धनस्य प्रभो), हे वसुदावन् (=धनदातः), स सूरिः (=तादृशो विद्वान्=अतः कारणात् त्वं विद्वान्) मघवा (=धनवान्=धनदाता) बोधि (=भव)। द्वेषांसि (=द्वेष्टॄन्) अस्मत् (=अस्मत्सकाशात्) युयोधि (=पृथक्कुरु)॥

५. स [त्वं] नः (=अपि च त्वमस्मदर्थं) दिवस्परि (=द्युलोकसकाशाद्) वृष्टिं (=मेघवृष्टिं) [कुरु]। स [त्वं] नः (=अपि च त्वमस्मदर्थम्) अनर्वाणम् (=अविनाशि) वाजं (=बलं) [देहि]। स [त्वं] नः (=अपि च त्वमस्मभ्यं) सहस्रिणीरिषः (=सहस्रप्रकाराण्यन्नानि) [देहि]॥

६. हे यविष्ठ (=अतिशयेन युवन्) [देवानां] दूत, हे यजिष्ठ होतः (=यजनकर्मणि कुशलतम देवानामाह्वातः), नो गिरा (=अस्माकं स्तुत्या) त्वम् ईळानाय (=स्तुवते) अवस्यवे (=रक्षणेच्छवे) [मह्यम्] आ गहि (=आगच्छ)॥

४. तर हे धनपती, हे धनदात्या, विद्वान् असा जो तूं तो संपत्ति देणारा हो. द्वेष्ट्यांला आम्हांपासून दूर कर.

५. आणि आम्हांकरितां द्युलोकापासून वृष्टि [कर], आणि अविनाशि बल [दे], आणि हजारो प्रकारचें अन्न [दे].

६. हे तरुणतम दूता, हे अत्यंत यजनकुशल होत्या, आमच्या स्तुतीच्या योगानें तूं स्तुति करणाऱ्या रक्षणेच्छूप्रत ये.

७. हे अग्नी, हे प्रज्ञावान्, प्रज्ञावान् असा जो तूं तो जनांला हितकारक [आणि] मित्रांला हितकारक अशा दूताप्रमाणें उभय लोकांच्या मध्यें जातोयेतोस.

4. Be thou, therefore, who knowest, a giver of wealth [to us]. Remove the haters from us.

5. And do thou send us rain from heaven, and do thou [give] us strength indestructible; and do thou [give] us thousands of foods.

6. O most youthful messenger, o invoker most skilful in sacrificing, come thou to the praying worshipper desirous of help.

7. O wise Agni, thou the knowing one dost go between the two races, like a messenger favourable to the people, favourable to his friends.

---

७. ‘ अग्नि हा देवांकडून मनुष्यांप्रत आणि मनुष्यांकडून देवांप्रत जाणारा येणारा दूत आहे. ’

स विद्वाँ आ च॑ पिप्रयो यक्षि॑ चिकित्व आनुषक् ।
आ चास्मिन्त्सत्सि बर्हिषि ॥ ८ ॥ २७ ॥

सः । विद्वान् । आ । च । पिप्रयः । यक्षि॑ । चिकित्वः । आनुषक् ।
आ । च । अस्मिन् । सत्सि । बर्हिषि ॥ ८ ॥ २७ ॥

७. हे अग्ने, हे कवे (=प्रज्ञावन्), विद्वान् (=जानंस्त्वं) मित्र्यो जन्येव दूतः (=मित्रेभ्यो हितो जनेभ्यश्च हितो दूत इव) उभया जन्म (=उभयानि जन्मानि=देवान् मनुष्यांश्चेत्युभयलोकान्) अन्तः (=तयोर्मध्ये) ईयसे (=गच्छसि=तेषां सकाशाद् एतान् प्रति एतेषां सकाशात्तान्प्रति च गच्छसि) ॥

भाषायाम्.

८. स [त्वम्] (=अतस्त्वं) विद्वान् (=जानन् सन्) [देवान्] आ च पिप्रयः (=आप्रीणय = प्रीणयित्वा आनय च) हे चिकित्वः आनुषक् यक्षि (=हे ज्ञातवन् अनन्तरं तान्पूजय) आ चास्मिन् सत्सि बर्हिषि (=अपि चैतस्मिन् बर्हिषि निषीद) ॥

सूक्तम् ७—१९८.

सोमाहुतिर्ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

श्रेष्ठं॑ यविष्ठ भारताग्ने॑ द्युमन्तमा भ॑र ।
वसो॑ पुरुस्पृहं॑ रयिम् ॥ १ ॥

श्रेष्ठ॑म् । यविष्ठ । भारत । अग्ने॑ । द्युऽमन्त॑म् । आ । भर ।
वसो इति॑ । पुरुऽस्पृह॑म् । रयिम् ॥ १ ॥

भाषायाम्.

१. हे यविष्ठ (=अतिशयेन युवन्), हे भारत (=? " हविषो भर्तर् ") अग्ने, हे वसो (=साधो), श्रेष्ठं द्युमन्तं (=दीप्तिमन्तं) पुरुस्पृहं (=बहुभिः स्पृहणीयं) रयिं (=धनम्) आ भर (=आनय) ॥

८. यास्तव विद्वान् असा जो तूं तो देवांला आनंद कर [आणि] नंतर हे ज्ञानवान् [अग्नी], त्यांजप्रीत्यर्थ यजन कर. आणि ह्या दर्भांवर बैस.

8. Therefore do thou the learned one gladden [the gods] and sacrifice to them, o knowing one! And sit thou down on this *kus'a*-grass.

८. हा उपसंहार आहे. अग्नीनें देवांस आणून त्यांप्रीत्यर्थ यजन करावें अशी यांत प्रार्थना आहे.

सूक्त ७–१९८.

ऋषि–सोमाहुति. देवता–अग्नि. वृत्त–गायत्री.

१. हे अत्यंत तरुण अग्नी, हे भारता, हे साधू, तूं श्रेष्ठ [आणि] तेजस्वी [आणि] पुष्कळांनीं जिची इच्छा करावी अशी संपत्ति घेऊन ये.

HYMN 7—198.

To *Agni*. By *Somâhuti*. Metre —*Gâyatrî*.

1. Bring, o Agni, o most youthful Bhârata, o good [Agni], a wealth that is excellent, resplendent and wished for by many.

१. 'भारता.' भारत हें अग्नीचें नांव आहे. तसें नांव कां पडलें तें खात्रीनें सांगवत नाहीं. सायण बहुतेक ठिकाणीं हवि वाहून नेणारा म्हणून 'भारत' असें म्हणतात.

मा नो अरातिरीशत देवस्य मर्त्यस्य च ।
पर्षि तस्या उत द्विषः ॥ २ ॥

मा । नः । अरातिः । ईशत । देवस्य । मर्त्यस्य । च ।
पर्षि । तस्याः । उत । द्विषः ॥ २ ॥

विश्वा उत त्वया वयं धारा उदन्या इव ।
अति गाहेमहि द्विषः ॥ ३ ॥

विश्वाः । उत । त्वया । वयम् । धाराः । उदन्याःऽइव ।
अति । गाहेमहि । द्विषः ॥ ३ ॥

शुचिः पावक वन्द्योऽग्ने बृहद्वि रोचसे ।
त्वं घृतेभिराहुतः ॥ ४ ॥

शुचिः । पावक । वन्द्यः । अग्ने । बृहत् । वि । रोचसे ।
त्वम् । घृतेभिः । आऽहुतः ॥ ४ ॥

भाषायाम्.

२. देवस्य मर्त्यस्य च (=देवानां मर्त्यानां च =देवानां मनुष्याणां वा) अरातिः (=शत्रुर्) नः (=अस्मान्) मा ईशत (=मा राजतां =मा वशीकरोतु) । उत (=अपि च) तस्या द्विषः (=तादृशाच्छत्रोर्) [अस्मान्] पर्षि (=पारं नय) ॥

३. उत (=अपि च) वयं त्वया [सहायेन] उदन्या धारा इव (=उदकसंबन्धिनोल्पप्रवाहान् इव) विश्वा द्विषः (=सर्वानपि शत्रून्) अति गाहेमहि ॥

४. हे पावक (=शोधक) अग्ने, शुचिः (=प्रकाशवान्) वन्द्यः (=वन्दनार्हस्) [त्वं] बृहत् (=अत्यधिकं) वि रोचसे (=विशेषेण प्रकाशसे) । त्वं [हि] घृतेभिः (=घृतैर्) आहुतः (=आराधितोसि) ॥

२. शत्रु आम्हांवर राज्य न करो, [मग तो] देवांचा [असो] अथवा मर्त्यांचा [असो]. तर तसल्या शत्रूच्या पार [आम्हांला] पाड.

३. आणि तुझ्या प्रसादेंकरून अल्पोदक प्रवाहांच्या पार गेल्या-प्रमाणें सर्व शत्रूंच्या पार आम्ही जाऊं असें कर.

४. हे पावका, हे अग्नी, पवित्र [आणि] वंद्य असा जो तूं तो फार प्रकाशत आहेस. [कारण] तुला घृताहुतींनीं आराधिलें आहे.

2. May the enemy never rule over us, whether of the gods or of the men. Place [us] then beyond the reach of such an enemy.

3. And may we through thy favour go across all enemies as across thin streams of water.

4. Pure [and] adorable thou dost shine greatly, o purifying Agni. [For] thou hast been propitiated with [offerings of] clarified butter.

---

४. ‘ घृताहुतींनीं ’ म्हणजे दूध देणाऱ्या गाईचें तूप काढून त्याच्या योगानें.

त्वं नो असि भारताग्ने वशाभिरुक्षभिः ।
अष्टापदीभिराहुतः ॥ ५ ॥

त्वम् । नः । असि । भारत । अग्ने । वशाभिः । उक्षऽभिः ।
अष्टाऽपदीभिः । आऽहुतः ॥ ५ ॥

द्र्वन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः ।
सहसस्पुत्रो अद्भुतः ॥ ६ ॥ २८ ॥

द्रुऽअन्नः । सर्पिःऽआसुतिः । प्रत्नः । होता । वरेण्यः ।
सहसः । पुत्रः । अद्भुतः ॥ ६ ॥ २८ ॥

भाषायाम्.

५. हे भारत अग्ने, त्वं नः (=अस्माकं) वशाभिः (=वन्ध्याभिर्गोभिस्) [तथा] उक्षभिः (=बलीवर्दैर्) अष्टापदीभिः (="गर्भिणीभिश्च") आहुतोसि (=आराधितोसि) ॥

६. द्र्वन्नः (=समिद्रूपं काष्ठमन्नं यस्य सः) सर्पिरासुतिः (=घृतं पेयं यस्य स) प्रत्नः (=पुरातनो) वरेण्यः (=वरणीयः=श्रेष्ठो) होता (=देवानाम् आह्वाता) [अपि च] अद्भुतः (=आश्चर्यभूतः) सहसस्पुत्रः (=बलस्य पुत्रः) [एतादृशोग्निर्भवति]॥

सूक्तम् ८–१९९.

गृत्समद ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

वाजयन्निव नू रथान्योगाँ अग्नेरुप स्तुहि ।
यशस्तमस्य मीळ्हुषः ॥ १ ॥

वाजयन्ऽइव । नु । रथान् । योगान् । अग्नेः । उप । स्तुहि ।
यशःऽतमस्य । मीळ्हुषः ॥ १ ॥

भाषायाम्.

१. [हे ममान्तरात्मन्], वाजयन् [कोपि] रथान् इव (=यथा संग्राममिच्छन् कश्चिद् रथांस्त्वरया प्रेरयति तद्वत्) यशस्तमस्य (=प्रवृद्धयशसो) मीळ्हुषः (=दा-

५. हे भारता, हे अग्नी, आम्हीं आमच्या वंध्य गाईंच्या योगानें, बैलांच्या योगानें आणि गाभण्या [गाईंच्या योगा]नें तुझें आराधन केलें आहे.

5. Thou hast been propitiated, o Bhârata Agni, by means of our barren cows, our bulls and our cows big with calf.

६. [अग्नि म्हणजे] लांकूड ज्याचें अन्न [आणि] तूप ज्याचें पेय असा पुरातन उत्तम होता [आणि] आश्चर्यकारक बळपुत्र [होय].

6. [Agni is] the excellent ancient invoker whose food is wood, whose drink is clarified butter; the wonderful son of might.

---

५. वंध्य गाईनीं. बैलांनीं इ० म्हणजे दुभत्या गाईचा गोरस काढून त्याच्या योगानें तुझें आराधन केलें म्हणून वर सांगितलें; आतां म्हणतो गोरस न देणाऱ्या ज्या वांझ गाई, बैल आणि गाभण्या गाई त्यांच्या योगानेंहि आराधन केलें आहे. पण वांझ गाई वगैरे मारून त्यांच्या मांसानें आराधन केलें असें समजावयाचें काय ? असें असेल तर गाभण्या गाईस तें कसें लागू होईल ? तशा गाई बहुतकरून मारीत नसतील.

सूक्त ८–१९९.

ऋषि–गृत्समद. देवता–अग्नि. वृत्त–गायत्री.

१. संग्रामाला [जाऊं] इच्छिणारा [मनुष्य] जसा रथांला वेगानें [चालवितो] त्याप्रमाणें तूं अत्यंत महायश [आणि] उदार अग्नीच्या घोड्यांला स्तवून वेगानें येथें आण.

Hymn 8–199.

To *Agni*. By *Gṛitsamada*. Metre —*Gâyatrî*.

1. Like one [urging his] chariots when going to battle, urge thou quickly through praises the horses of the most victorious and liberal Agni.

य॒ः सु॒नी॑थो द॒दाशु॑षेऽजु॒र्यो ज॒रय॑न्न॒रिम् ।
चारु॑प्रतीक॒ आहु॑तः ॥ २ ॥

यः । सु॒ऽनी॑थः । द॒दाशुषे॑ । अ॒जु॒र्यः॑ । ज॒रय॑न् । अ॒रिम् ।
चारु॑ऽप्रतीकः । आऽहु॑तः ॥ २ ॥

य उ॑ श्रि॒या दमे॒ष्वा दो॒षोष॑सि॑ प्रश॒स्यते॑ ।
यस्य॑ व्र॒तं न मीय॑ते ॥ ३ ॥

यः । ऊं॒ इति॑ । श्रि॒या । दमे॑षु । आ । दो॒षा । उ॒षसि॑ । प्र॒ऽश॒स्यते॑ ।
यस्य॑ । व्र॒तम् । न । मीय॑ते ॥ ३ ॥

आ यः स्व१॒॑र्ण भा॒नुना॑ चि॒त्रो वि॒भात्य॒र्चिषा॑ ।
अ॒ञ्जा॒नो अ॒जरै॑र॒भि ॥ ४ ॥

आ । यः । स्वः॑ । न । भा॒नुना॑ । चि॒त्रः । वि॒ऽभाति॑ । अ॒र्चिषा॑ ।
अ॒ञ्जा॒नः । अ॒जरैः॑ । अ॒भि ॥ ४ ॥

तुर॒) अग्नेर्योगान् (=अश्वान्) तु (=क्षिप्रम्) उप स्तुहि (=समीपं स्तुहि =स्तुत्वा समीपं प्रेरय=आनय) ॥

भाषायाम्.

२. यो दाशुषे (=हविर्दत्तवते यजमानाय) सुनीथः (=सुनयनः =सुनायकः) अरिं जरयन् (=शत्रुं नाशयन्नपि) [स्वयम्] अजुर्यः (=अनभिभाव्यः) [अपि च] [यश्] चारुप्रतीकः (=रमणीयाननः सन्) आहुतो [भवति],

३. उ (=उत=अपि च) यो दमेषु आ (=गृहेषु) श्रिया (=ज्वालया) [सहागत्य] दोषोषसि (=रात्रावुषःकाले च) प्रशस्यते (=प्रकर्षेण स्तूयते) यस्य [च] व्रतं (=कर्म) न मीयते (=न क्षीयते),

४. यः स्वर्न भानुना (=सूर्यः किरणैरिव) अर्चिषा (=दीप्त्या) चित्रः (=सुन्दरः सन्) आ विभाति (=सर्वतो भासते) अञ्जानो अजरैरभि (=जरारहितैरविनाशिभिर्ज्वालासमूहैः सर्वं वस्तुजातं सर्वतः प्रकटयन् =ज्वालासमूहैर्वस्तुजातं प्रकटयति च),

२. जो हविर्दात्याचा चांगला नायक, शत्रूला जेर करणारा पण स्वतः जेर न होणारा [आणि] सुंदरानन [अग्नि] आराधिला आहे;

३. आणि जो [अग्नि] दीप्तीसहित घरीं [येऊन] सायंकाळीं [आणि] उषःकाळीं स्तविला जातो, [आणि] ज्याचें कर्म नाश पावत नाहीं;

४. जो [अग्नि], सूर्य जसा किरणांनीं तसा प्रभेनें सुंदर होत्साता प्रकाशतो, आणि [आपल्या] अजर ज्वालांनीं [सर्व वस्तु] प्रगट करितो;

2. He who is a good guide to the sacrificer, who conquers the enemy [though himself] unconquerable, who is of amiable face [and is] invoked;

3. And who [coming] with brightness into houses is praised at eve [and] at morn, [and] whose ordinance is never destroyed;

4. Who shines brilliant with his splendor even as the sun with its rays, and enlightens [all] with his ever-youthful flames ;

अत्रिमनु स्वराज्यमग्निमुक्थानि वावृधुः ।
विश्वा अधि श्रियो दधे ॥ ५ ॥

अत्रिम् । अनु । स्वऽराज्यम् । अग्निम् । उक्थानि । ववृधुः ।
विश्वाः । अधि । श्रियः । दधे ॥ ५ ॥

अग्नेरिन्द्रस्य सोमस्य देवानामूतिभिर्वयम् ।
अरिष्यन्तः सचेमह्यभि ष्याम पृतन्यतः ॥ ६ ॥ २९ ॥ ५ ॥

अग्नेः । इन्द्रस्य । सोमस्य । देवानाम् । ऊतिऽभिः । वयम् ।
अरिष्यन्तः । सचेमहि । अभि । स्याम । पृतन्यतः ॥६॥२९॥५॥

भाषायाम्.

५. उक्थानि (=शस्त्राणि =स्तोत्राणि) अत्रिम् (=अन्नानां भक्षकं) स्वराज्यं (=स्वकीयेन तेजसा भासमानम्) अग्निं वावृधुः (=वर्धयन्ति)। [स] विश्वाः श्रियः (=सर्वा दीप्तीर्) अधि दधे (=अधिकं धारयति=विशेषेण धारयति) ॥

६. अरिष्यन्तः (=केनाप्यहिंस्यमाना) वयम् अग्नेः इन्द्रस्य, सोमस्य [तथान्येषां] देवानाम् ऊतिभिः (=रक्षाभिः) सचेमहि (=युक्ता भवेम)। [अपि च] पृतन्यतः (=शत्रून्) अभि ष्याम (=अभिभवेम) ॥

द्वितीयाष्टके पञ्चमोध्यायः समाप्तः ॥

सूक्तम् ९–२००.

गृत्समद ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

नि होता होतृषदने विदानस्त्वेषो दीदिवाँ असदत्सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः ॥ १ ॥

नि । होता । होतृऽसदने । विदानः । त्वेषः । दीदिऽवान् । असदत् ।
सुऽदक्षः ।
अदब्धव्रतऽप्रमतिः । वसिष्ठः । सहस्रम्ऽभरः । शुचिऽजिह्वः । अग्निः ॥ १ ॥

५. [हवींचें] भक्षण करणारा [आणि] स्वयंप्रभ असा जो अग्नि त्याला स्तोत्रें वाढवितात. तो सकळ कांतींला धारण करितो.

६. अग्नीची, इंद्राची, सोमाची [आणि दुसऱ्या] देवांची कृपा आम्हांस प्राप्त होओ, आणि आम्हांस कोणताच उपद्रव न होओ. आम्ही शत्रूंस जिंकूं असें होओ.

5. Hymns have magnified Agni who is the consumer [of oblations] [and] who shines with his own brilliancy. He wears all glories.

6. May we possess the protection of Agni, of Indra, of Soma [and] of [other] gods, becoming free from harm. May we defeat [our] enemies !

---

५. ‘ स्वयंप्रभ ’=‘ स्वराज्यम्. ’ म्हणजे जो आपल्या स्वताहाच्या तेजानें प्रकाशणारा, चंद्रादिकांसारिखा दुसऱ्याच्या तेजानें प्रकाशणारा नव्हे तो. ‘ स्तोत्रें वाढवितात ’=‘उक्थानि वावृधुः’ म्हणजे स्तोत्रें म्हणण्यांत आलीं म्हणजे तो वाढतो, मोठा होतो.

सूक्त ९–२००.

ऋषि–गृत्समद. देवता–अग्नि. वृत्त–त्रिष्टुभ्.

१. विद्वान्, प्रवृद्ध, दीप्तिमान्, महाबल, आणि ज्याची कृपा अहतव्यापार होय, [जो] सर्वांत उत्तम, हजारो प्रकारची संपत्ति आणणारा, [आणि] शुद्ध जिव्हेचा होता असा अग्नि, होत्याच्या ठायीं बसो.

Hymn 9–200.

To *Agni*. By *Gṛitsamada*. Metre—*Trishṭubh*.

1. May Agni occupy the seat of invoker, he who is a learned, great, resplendent invoker, mighty, of beneficence the action of which is unobstructed, who is the best [of all the gods], the bringer of a thousandfold wealth, possessed of a pure tongue.

---

१. विद्वान् असा जो अग्नि तो होत्याच्या स्थानीं बसो. ‘ ज्याची कृपा अहतव्यापार होय ’=‘ अदब्धव्रतप्रमतिः ’. म्हणजे ज्याची

त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता ।
अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपाः ॥ २ ॥

त्वम् । दूतः । त्वम् । ऊं इति । नः । परःऽपाः । त्वम् । वस्यः । आ । वृषभ । प्रऽनेता ।
अग्ने । तोकस्य । नः । तने । तनूनाम् । अप्रऽयुच्छन् । दीद्यत् । बोधि । गोपाः ॥ २ ॥

विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।
यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे ॥ ३ ॥

विधेम । ते । परमे । जन्मन् । अग्ने । विधेम । स्तोमैः । अवरे । सधऽस्थे ।
यस्मात् । योनेः । उत्ऽआरिथ । यजे । तम् । प्र । त्वे इति । हवींषि । जुहुरे । सम्ऽइद्धे ॥ ३ ॥

---

१. विदानः (=विद्वान्) त्वेषः (=प्रवृद्धो) दीदिवान् (=दीप्तिमान्) सुदक्षः (=शोभनबलः) अदब्धव्रतप्रमतिः (=अहिंसितव्यापारा प्रकृष्टा अनुग्रहात्मिका बुद्धिर्यस्य स) वसिष्ठः (=सर्वेषु देवेषु मध्ये साधुतमः) सहस्रंभरः (=सहस्रसंख्याकानि धनानि बिभ्रत्) सुजिह्वः (=शोभनजिह्वः =सुवचनो) होता (=देवानामाह्वाता) [एतादृशो]ग्निर्होतृसदने (=होतुः स्थाने) नि असदत् (=निषीदतु) ॥

भाषायाम्.

२. त्वं [नो] दूतो [भव] त्वम् उ (=अपि च त्वं) नः परस्पाः (=परस्तात्पालकः =पालयिता) [भव] । हे वृषभ (=महाबल), त्वं वस्य आ प्रणेता (=वसीयः=उत्तमं श्रेय आनयन्=श्रेष्ठस्य कल्याणस्यानेता) [भव] । हे अग्ने, नस्तने (=अस्माकं संतानाय =संततस्थितये) त्वं दीद्यत् (=प्रकाशमानः सन्) तोकस्य तनूनाम् (=अस्माकं पुत्रादिसंततेः=पुत्रादीनाम् अस्मदीयानां च शरीराणाम्) अप्रयुच्छन् गोपाः (=अप्रमाद्यन् गोपायिता) बोधि (=भव) ॥

३. हे अग्ने, परमे जन्मन् (=उत्कृष्टे जन्मनि जन्मस्थाने=द्युलोके) ते (=तुभ्यं) विधेम (=त्वां परिचरेम) । स्तोमैः (=स्तोत्रैस्) [तुभ्यम्] अवरे सधस्थे (=अधस्तने स्थाने=अन्तरिक्षे) विधेम (=परिचरेम) । [अपि च] यस्माद् योनेः (=यस्माज्जन्मस्थानात् पृथिवीरूपाद्) उदारिथ (=उद्गतोसि=प्रादुर्भूतोसि) तं [योनिं]

२. [हे अग्नी], तूं [आमचा] दूत [हो], आणि तूं आम्हांस तार करणारा हो. आणि हे प्रभू, तूं उत्तम कल्याण प्राप्त करून देणारा हो. हे अग्नी, तूं प्रकाशून, आम्ही शाश्वत राहावें म्हणून आमच्या संततीचा आणि आम्हां स्वताहाचा दुर्लक्ष्य न करणारा असा रक्षक हो.

2. [Be] thou [our] messenger and our protector. [Be] thou, o lord, a bringer of the highest good. That we may live long, o Agni, do thou shine and be thou the staunch protector of our children [and] of ourselves.

३. हे अग्नी, तुझें जें सर्वांत उंच जन्मस्थान तेथें आम्हांस तुला भजूं दे. आणि खालच्या स्थानीं स्तोत्रांनीं तुला भजूं दे. ज्या जन्मस्थानापासून तूं उपजलास त्याप्रत मी भजतों. चांगला पेटलेला असा जो तूं त्या तुझ्या ठायीं ऋत्विजांनीं हव्यें अर्पण केलीं आहेत.

3. Let us worship thee, o Agni, in thy highest nativity, let us worship in thy lower nativity with hymns. Let me worship the place from whence thou hast arisen. They have poured oblations in thee, who hast been well-kindled.

कृपा अशी आहे कीं, ती प्रवृत्त होऊं लागली म्हणजे तिला कोणीहि प्रतिबंध करूं शकत नाहीं.

२. 'आम्ही शाश्वत राहावें म्हणून' ='नस्तने.' अक्षरशः आमच्या सातत्यासाठीं; म्ह० आमचा कुलक्षय न व्हावा म्हणून.

३. 'सर्वांत उंच स्थान'=' परमे जन्मन्.' म्हणजे द्युलोक असें सायणाचार्य म्हणतात. आणि खालच्या स्थानीं 'अवरे सधस्थे.' म्ह० अंतरिक्षांत आणि ज्या जन्मस्थानापासून म्ह० पृथिवीपासून असें म्हणतात, आणि द्युलोक, अंतरिक्ष आणि पृथिवी यांत "असलेला" जो अग्नि त्याप्रत असा अर्थ लावितात. कवीचा अभिप्राय असा दिसतो खरा.

अग्ने यजस्व हविषा यजीयाञ्छ्रुष्टी देष्णमभि गृणीहि राधः ।

त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता ॥ ४ ॥

अग्ने । यजस्व । हविषा । यजीयान् । श्रुष्टी । देष्णम् । अभि । गृ-णीहि । राधः ।

त्वम् । हि । असि । रयिऽपतिः । रयीणाम् । त्वम् । शुक्रस्य । वचसः । मनोता ॥ ४ ॥

उभयं ते न क्षीयते वसव्यं दिवेदिवे जायमानस्य दस्म ।

कृधि क्षुमन्तं जरितारमग्ने कृधि पतिं स्वपत्यस्य रायः ॥ ५ ॥

उभयम् । ते । न । क्षीयते । वसव्यम् । दिवेऽदिवे । जायमानस्य । दस्म । कृधि । क्षुऽमन्तम् । जरितारम् । अग्ने । कृधि । पतिम् । सुऽअपत्यस्य । रायः ॥ ५ ॥

(=जन्मस्थानं) यजे (=पूजयामि) । समिद्धे (=सम्यग्दीप्ते) त्वे (=त्वयि) हवींषि प्र जुहुरे (=अध्वर्य्वादयः प्रकर्षेण जुह्वति सृजन्ति) ॥

भाषायाम्.

४. हे अग्ने, यजीयान् (=अतिशयेन यजनकर्ता =यजनकर्मकुशलतरस्) [त्वं] हविषा [देवान्] यजस्व (=पूजय) । श्रुष्टी (=क्षिप्रं) देष्णं (=दानमेतदस्माभिर्दीयमानं) राधः (=हविश्च) अभि गृणीहि (=देवानां पुरत इदं स्वादुतरमिदं स्वादुतरमिति ब्रूहि) । हि (=यस्मात् कारणात्) त्वं रयीणां रयिपतिरसि (=धनानां पतिरसि) । त्वं शुक्रस्य (=दीप्तस्य) वचसः (=स्तुतिरूपस्य वचनस्य) मनोता (=प्रज्ञाता=उत्पादयिता) [भवसि] ॥

५. हे दस्म (=पराक्रमिन्) [अग्ने], दिवेदिवे (=प्रतिदिनं) जायमानस्य ते (=तव) उभयं (=दिव्यं भौमं च धनं) न क्षीयते (=न हीयते) हे अग्ने, जरितारं (=स्तोतारं) क्षुमन्तम् (=अन्नवन्तं) कृधि (=कुरु) [अपि च] स्वपत्यस्य रायः पतिं (=शोभनापत्यसहितस्य धनस्य प्रभुं) [कृधि=कुरु] ॥

४. हे अग्नी, यजन करण्याविषयीं अति कुशल असा जो तूं तो हवीनें यजन कर. [आणि] [या] दानाची [आणि] हवीची [देवांपुढें] लवकर प्रशंसा कर. कारण कीं, तूं संपत्तींचा प्रभु आहेस, तूं तेजस्वी स्तुतीचा कर्ता आहेस.

५. हे पराक्रमी [अग्नी], तूं प्रतिदिनीं उत्पन्न होतोस तरी तुझें दोन्ही प्रकारचें धन नष्ट होत नाहीं. हे अग्नी, तूं स्तोत्याला अन्नसंपन्न कर [आणि] चांगल्या संततीसहित जी संपत्ति तिचा पति [कर].

4. Do thou, o Agni, who art an expert in sacrificing, offer worship [to the gods] with [this] oblation. Commend quickly this offering [and this] food [to them]. For thou art the master of riches, thou the inventor of the bright hymn.

5. Thy wealth of both kinds does not diminish, though thou art born day by day, o victorious one! Give food, o Agni, to the poet, make him the lord of wealth accompanied by good progeny.

---

४. ‘ स्तुतीचा कर्ता ’=‘ वचसो मनोता.’ म्हणजे स्तुति कशी रचावी तें ज्याणें शोधून काढिलें तो. ऋग्वेदांत तीन ठिकाणीं हा शब्द आला आहे त्या सर्व ठिकाणीं हा अर्थ चांगला जुळतो, आणि प्रस्तुत ठिकाणीं सायणहि त्याच्या जवळजवळच अर्थ करितात, तो पहा.

सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि ॥६॥१॥

सः । एना । अनीकेन । सुऽविदत्रः । अस्मे इति । यष्टा । देवान् । आऽयजिष्ठः । स्वस्ति ।
अदब्धः । गोपाः । उत । नः । परःऽपाः । अग्ने । द्युऽमत् । उत । रेवत् । दिदीहि ॥ ६ ॥ १ ॥

भाषायाम्.

६. स [त्वम्] (=अतस्त्वम्) एना अनीकेन (=अनेन तव तेजसा) सुविदत्रः (=सुधनः=शोभनधनदाता) आयजिष्ठः (=अतिशयेन यजनकर्ता=यजनकर्मणि कुशलतमः सन्) अस्मे स्वस्ति (=अस्माकं कल्याणं यथा भवति तथा) देवान् यष्टा भव (=देवानां पूजयिता भव) । [तथा च] नः (=अस्माकम्) अदब्धः (=अहिंसितो) गोपाः (=पालयिता) उत (=अपि च) परस्पाः (=पारयिता) द्युमत् (=सप्रकाशं यथा तथा) उत (=अपि च) रेवत् (=धनवत्=वयं यथा धनं लभेमहि तेन प्रकारेण) दिदीहि (=दीप्यस्व) ॥

सूक्तम् १०–२०१.

गृत्समद ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

जोहूत्रो अग्निः प्रथमः पितेवेळस्पदे मनुषा यत्समिद्धः ।
श्रियं वसानो अमृतो विचेता मर्मृजेन्यः श्रवस्यः स वाजी ॥१॥

जोहूत्रः । अग्निः । प्रथमः । पिताऽइव । इळः । पदे । मनुषा । यत् । सम्ऽइद्धः ।
श्रियम् । वसानः । अमृतः । विऽचेताः । मर्मृजेन्यः । श्रवस्यः । सः । वाजी ॥ १ ॥

भाषायाम्.

१. जोहूत्रः (=आह्वानयोग्यः) प्रथमः पितेव (=पुरातनपितृसदृशः) अग्निः मनुषा (=मनुष्येण ऋत्विजा) इळः पदे (=इळायाः पदे=उत्तरवेद्यां) यद् (=यदा)

६. यास्तव उदार [आणि] देवोपासना करण्याच्या कामीं अत्यंत कुशल असा जो तूं तो या तुझ्या तेजानें आमचें कल्याण होईं अशा रीतीनें देवांचें यजन करणारा [हो]. आणि हे अग्नी, तूं आमचा अतिरस्कृत रक्षक [आणि] पालक [होत्साता] सतेज [आणि] सधन अशा रीतीनें प्रकाश.

6. [Do] thou, therefore, with this splendor [be] the sacrificer to the gods for our welfare, thou who art bounteous [and] most versed in sacrificing. And being our undespised protector [and] preserver, do thou, o Agni, shine brilliantly [and] so as give us riches.

सूक्त १०–२०१.

ऋषि–गृत्समद. देवता–अग्नि. वृत्त–त्रिष्टुभ्.

१. आह्वानयोग्य [आणि] प्राचीन पित्यासारिखा अग्नि जेव्हां मनुष्यानें इळेच्या स्थानीं[1] पेटविला जातो, तेव्हां तेजातें धारण करणारा, अमर, महाप्रज्ञ, कीर्तिमान् [आणि] बलवान् तो [अग्नि] उपासनेस योग्य [असतो].

Hymn 10–201.

To *Agni*. By *Gṛitsamada*. Metre—*Trishṭubh.*

1. When Agni, worthy of being invoked [and] like an ancient father, is well kindled by the human worshipper on the seat of Iḷâ, he clad in splendor, immortal, very wise, renowned [and] mighty, is worthy of being worshipped.

---

१. इळेच्या स्थानीं'=' इळस्पदे.' म्हणजे उत्तर वेदीवर. देवांस अर्पावयाचें जें अन्न तें 'इळ्' आणि तें जेथें अर्पिलें जातें तें 'इळस्पद' अथवा उत्तरवेदी.

श्रूया अग्निश्चित्रभानुर्हवं मे विश्वाभिर्गीर्भिरमृतो विचेताः ।
श्यावा रथं वहतो रोहिता वोतारुषाह चक्रे विभृत्रः ॥ २ ॥

श्रुयाः । अग्निः । चित्रऽभानुः । हवम् । मे । विश्वाभिः । गीःऽभिः । अमृतः । विऽचेताः ।
श्यावा । रथम् । वहतः । रोहिता । वा । उत । अरुषा । अह । चक्रे । विऽभृत्रः ॥ २ ॥

उत्तानायामजनयन्त्सुषूतं भुवदग्निः पुरुपेशासु गर्भः ।
शिरिणायां चिदक्तुना महोभिरपरीवृतो वसति प्रचेताः ॥ ३ ॥

उत्तानायाम् । अजनयन् । सुऽसूतम् । भुवत् । अग्निः । पुरुऽपेशासु गर्भः ।
शिरिणायाम् । चित् । अक्तुना । महःऽभिः । अपरिऽवृतः । वसति । प्रऽचेताः ॥ ३ ॥

समिद्धो) [भवति] [तदा] श्रियं वसानः (=दीप्त्यात्मानमाच्छादयन्) अमृतः (=अमरणधर्मा) विचेताः (=विशेषेण प्रज्ञावान्) श्रवस्यः (=सुश्लोकः) स वाजी (=बलवान्) मर्मृजेन्यः (=परिचरणार्हो) [भवति] ॥

जोहूत्रोश्वद्धेषाशब्दं कुर्वन्निति पाश्चात्त्याः केचित् ॥

भाषायाम्.

२. चित्रभानुः (=विचित्रदीप्तिर्) अमृतः (=अमरणधर्मा) विचेताः (=विशिष्टप्रज्ञावान्) अग्निः विश्वाभिर्गीर्भिः (=सर्वाभिर्मया कृताभिः स्तुतिभिर्) मे हवं (=ममाह्वानं) श्रूयाः (=श्रूयात्=शृणोतु) । [अस्य] रथं श्यावा (=श्यावौ=शामवर्णावश्वौ) रोहिता वा (=लोहितवर्णावश्वौ वा) उत अरुषा (=आरक्तवर्णौ वा) वहतः । अह (अध=अथ) [ऋत्विग्भिः] विभृत्रश्चक्रे (=नानास्थानेषु विहृतः कृतोस्ति) ॥

३. उत्तानायाम् (=उत्तानशयायाम् अरण्याम्) [एतम् अग्निरूपं] सुसूतं (=शोभनं पुत्रम्) अजनयन् (=उदपादयन्नृत्विजः) । अग्निः पुरुपेशासु (=नानावर्णास्वोषधीषु) गर्भो भुवत् (=अन्तर्वर्तमानतया गर्भ इवाभवत्) । प्रचेताः (=प्रकृष्टमेधावी) [सोग्निः] शिरिणायां चित् (=रात्रावपि) अक्तुना (=अन्धकारे-

२. सुंदर प्रभेचा, अमर, [आणि] महाप्रज्ञ अग्नि सर्व स्तुतींच्या द्वारें माझी हाक ऐको. [याच्या] रथाला कुमेत रंगाचे घोडे ओढितात, अथवा तांबडे घोडे [ओढितात], अथवा आरक्त वर्णाचे घोडे [ओढितात]. आतां त्याला निरनिराळ्या ठिकाणीं नेलें आहे.

३. उताणी पडलेली जी अरणी तिच्या ठायीं [या] उत्तम पुत्राला उपजविते झाले. नानारूप [ओषधीं]च्या पोटीं अग्नि गर्भ राहिला. महाप्रज्ञ [अग्नि] रात्रीच्या वेळींहि अंधकारानें न झांकला जातां तेजांनीं [युक्त होत्साता] वास करितो.

2. May Agni of excellent splendor, immortal [and] full of wisdom, hear my call through all [my] hymns. A pair of dark horses draw his chariot, or a pair of red horses, or a pair of brown horses. Now he is carried to several places.

3. They begot [this] good son in her [the Araṇî] lying on her back. Agni became an embryo in those who have many forms. The very wise [Agni] exists even at night, full of lustres, uncovered with darkness.

---

२. 'त्याला निरनिराळ्या ठिकाणीं नेलें आहे.'='विभृत्रश्चक्रे'. म्ह० उत्तरवेदी इत्यादि निरनिराळ्या स्थळीं ऋत्विजांनीं एका ठिकाणाहून नेलें आहे, असा भावार्थ.

'कुमेत रंगाचे,' तांबड्या वर्णाचे अथवा आरक्त वर्णाचे जे घोडे सांगितले ते त्या त्या वर्णाचा जो धूर, ज्या ज्वाला अथवा जो प्रकाश तद्रूप होत.

संहितेंत 'श्रूयाः' असा पाठ असून पादांत 'श्रुयाः' असा ह्रस्व पाठ आहे तो संप्रदायसिद्ध आहे. ऋ. ५. ७४. १० आणि ऋ. ८. ७३. १८ यांतहि 'शुश्रूयातम्' आणि 'शुश्रुयातम्' असे पाठ आहेत ते पहा.

३. या मंत्रांत अग्नीला ऋत्विजांनीं काष्ठाच्या आंगीं घर्षण करून उत्पन्न केलें ही एक गोष्ट, आणि तो रात्रीच्या वेळींहि इतर वस्तूंप्रमाणें अंधकारानें झांकला जात नाहीं ही दुसरी, याप्रमाणें दोन गोष्टी सांगितल्या आहेत.

जिघर्म्यग्निं हविषा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नैं रभसं दृशानम् ॥ ४ ॥
जिघर्मि । अग्निम् । हविषा । घृतेन । प्रतिऽक्षियन्तम् । भुवनानि । विश्वा ।
पृथुम् । तिरश्चा । वयसा । बृहन्तम् । व्यचिष्ठम् । अन्नैः । रभसम् । दृशानम् ॥ ४ ॥

आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत ।
मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा जर्भुराणः ॥ ५ ॥
आ । विश्वतः प्रत्यञ्चम् । जिघर्मि । अरक्षसा । मनसा । तत् । जुषेत । मर्यऽश्रीः । स्पृहयत्ऽवर्णः । अग्निः । न । अभिऽमृशे । तन्वा । जर्भुराणः ॥ ५ ॥

ण) अपरीवृतः (=अनाच्छादितः सन्) महोभिर्वसति (=तेजोभिः सह वर्तते=तेजोयुक्तो वर्तते) ॥

भाषायाम्.

४. विश्वा भुवनानि (=सर्वाणि भूतानि) प्रतिक्षियन्तं (=वैश्वानरात्मनाधितिष्ठन्तं) तिरश्चा पृथुं (=सर्वतो विस्तृतं) वयसा बृहन्तं (=बलेन महान्तं) व्यचिष्ठं (=व्याप्ततमम्) अन्नै रभसं (=हविरन्नैर्बलवन्तं) दृशानं (=दृश्यमानम्) अग्निं हविषा घृतेन [च] जिघर्मि (=आसिञ्चामि) ॥

५. विश्वतः प्रत्यञ्चं (=सर्वतो व्याप्तम्) [अग्निम्] आ जिघर्मि (=आसिञ्चामि) । तत् [सेचनम्] अरक्षसा मनसा (=अबाधकेन मनसा=प्रसन्नेन मनसा) जुषेत (=सेवताम्) । मर्यश्रीः (=युवमनुष्यदर्शनः) स्पृहयद्वर्णः (=वर्णं स्पृहयन्=सुरूपकामी) अग्निस् तन्वा जर्भुराणः (=तेजसा पूर्णः=यदा तादृशो भवति तदा) नाभिमृशे (=अभिमर्शनयोग्यो न भवति) ॥

४. सकल भूतांच्या ठायीं वास करणारा, सर्व बाजूंनीं मोठा, बळानें महान्, अत्यंत व्यापक, अन्नांनीं बळवान्, [आणि] दृष्टिगोचर असा जो अग्नि, त्याला मी हवीनें [आणि] तुपानें भिजवितों.

५. चोहींकडे पसरणाऱ्या [अग्नी]ला मी [तुपानें] भिजवीत आहें. त्याचें तो प्रसन्न मनानें सेवन करो. एकाद्या तरुण मनुष्याप्रमाणें दिसणारा, रूपाची वांछा करणारा जो अग्नि तो तेजानें परिपूर्ण झाला म्हणजे त्याला स्पर्श करण्यासारिखा नसतो.

4. I besprinkle with oblation [and] with clarified butter Agni who lives in all beings, who extends on all sides, great with power, most permeating, powerful with offerings, [and who is] visible.

5. I besprinkle Agni who spreads in all directions. May he accept it with a pleased mind. Agni, who appears like a youth [and] is fond of fine appearance, cannot be touched when he puts on his splendor.

५. ‘ तेजानें परिपूर्ण झाला म्हणजे ’ =‘ तन्वा जर्भुराणः ’ म्हणजे, चांगला पेटल्यावर. पाश्चात्य विद्वान् फुसफुसूं लागला म्हणजे असा अर्थ करितात.

ज्ञेया भागं सहसानो वरेण त्वादूतासो मनुवद्वदेम ।
अनूनमग्निं जुह्वा वचस्या मधुपृचं धनसा जोहवीमि ॥ ६ ॥२॥

ज्ञेयाः । भागम् । सहसानः । वरेण । त्वाऽदूतासः । मनुऽवत् । वदेम । अनूनम् । अग्निम् । जुह्वा । वचस्या । मधुऽपृचम् । धनऽसाः । जोहवीमि ॥ ६ ॥ २ ॥

भाषायाम्.

६. वरेण सहसानः (=हविषा शत्रूनभिभवन्=हविषा शश्वभिभवनशीलो) भागं ज्ञेयाः (=हविर्भागमिमं जानीहि) । त्वादूतासः (=त्वं दूतो येषां ते वयं) मनुवत् (=मनुरिव) वदेम (=स्तोत्रं ब्रूयाम) । अनूनं (=पूर्णं) मधुपृचम् (=उपासकान् माधुर्येण पूरयन्तं माधुर्यदायिनम्) अग्निं धनसाः (=धनस्य संभक्ताहं) जुह्वा (=एतन्नामकेन पात्रेण=हविषा) वचसा (=वचस्यया=स्तुतिकामनया=स्तुत्या) जोहवीमि (=आह्वयामि) ॥

सूक्तम् ११-२०२.

गृत्समद ऋषिः । इन्द्रो देवता । अन्त्या त्रिष्टुभ् । शिष्टा विराट्स्थानाः ॥

श्रुधी हवमिन्द्र मा रिषण्यः स्याम ते दावने वसूनाम् ।
इमा हि त्वामूर्जो वर्धयन्ति वसूयवः सिन्धवो न क्षरन्तः ॥ १ ॥

श्रुधि । हवम् । इन्द्र । मा । रिषण्यः । स्याम । ते । दावने । वसूनाम् । इमाः । हि । त्वाम् । ऊर्जः । वर्धयन्ति । वसुऽयवः । सिन्धवः । न । क्षरन्तः ॥ १ ॥

भाषायाम्.

१. हे इन्द्र, [अस्माकं] हवम् (=आह्वानं) श्रुधि (=शृणु) । मा रिषण्यः (=मा हिंसीः) । ते वसूनां दावने स्याम (=तव धनानां दानाय पात्रभूता भवेम) । हि (=यस्मात् कारणाद्) वसूयवः (=धनमिच्छन्त्यः) क्षरन्तः सिन्धवो न [क्षरन्त्यः] (=क्षरन्त्य आप इव) इमा ऊर्जः (=एतानि हविरन्नानि) त्वां वर्धयन्ति (=हर्षयन्ति) ॥

६. हवीच्या योगानें जयशाली होणारा असा जो तूं तो [या] हविर्भागाला ग्रहण कर. तूं आमचा दूत होशील तर आम्ही मनूप्रमाणें [स्तोत्र] म्हणूं. परिपूर्ण, [आणि] माधुर्य देणारा जो अग्नि त्याला धनेच्छू मी पळीनें [आणि] स्तुतीनें बोलावितों.

6. Overpowering through excellence mayest thou accept [this] offering. May we with thee for our messenger pray like Manu. I am invoking,—I, desirous of wealth, [am invoking] with oblation and praise Agni who is perfect [and] is the giver of sweetness.

६. 'मनूप्रमाणें'='मनुवत्.' म्हणजे मनु म्हणून जो आदि उपासक तो जसा देवांशीं प्रत्यक्ष बोलत असे त्याप्रमाणें. 'मनु' कोण याविषयीं सू. ११२ मं. १६ आणि त्याजवरील टीप पहा.

सूक्त ११-२०२.

ऋषि–**गृत्समद**. देवता–**इन्द्र**. वृत्त–शेवटची (एकविसावी) **त्रिष्टुभ्**, ती खेरीज करून बाकी सर्व **विराट्स्थाना** या वृत्ताच्या.

Hymn 11-202.

To *Indra*. By *Gṛitsamada*. Metre—*Virâṭsthânâ*, except in the last verse where it is *Trishṭubh*.

१. हे इंद्रा, तूं [आमची] हाक ऐक, तूं आमची हेळसांड करूं नको. तुझ्या संपत्तीस आम्ही पात्र होऊं असें कर. कारण कीं, धनाची इच्छा करणारीं [आणि] वाहणाऱ्या नद्यांप्रमाणें [वाहणारीं] जीं हीं हविरन्नें तीं तुला हर्षवीत आहेत.

I. Hear [our] call, o Indra, do not neglect us. May we be fit for the gift of thy wealth. For these offerings, desirous of wealth, [and poured] like flowing waters, are exhilarating thee.

१. 'नद्यांप्रमाणें वाहणारीं,' म्हणजे पाण्याच्या प्रवाहांप्रमाणें सोमादिकांचे जे लोट अर्पण केलेले ते.

सृजो महीरिन्द्र या अपिन्वः परिष्ठिता अहिना शूर पूर्वीः ।
अमर्त्यं चिद्दासं मन्यमानमवाभिनदुक्थैर्वावृधानः ॥ २ ॥

सृजः । महीः । इन्द्र । याः । अपिन्वः । परिऽस्थिताः । अहिना । शूर । पूर्वीः ।
अमर्त्यम् । चित् । दासम् । मन्यमानम् । अव । अभिनत् । उक्थैः । ववृधानः ॥ २ ॥

उक्थेष्विन्नु शूर येषु चाकन्त्स्तोमेष्विन्द्र रुद्रियेषु च ।
तुभ्येदेता यासु मन्दसानः प्र वायवे सिस्रते न शुभ्राः ॥ ३ ॥

उक्थेषु । इत् । नु । शूर । येषु । चाकन् । स्तोमेषु । इन्द्र । रुद्रियेषु । च ।
तुभ्य । इत् । एताः । यासु । मन्दसानः । प्र । वायवे । सिस्रते । न । शुभ्राः ॥ ३ ॥

भाषायाम्.

२. हे शूर इन्द्र, महीः (=महतीर्महत्यः) पूर्वीः (=प्रभूता) या [आपः] अहिन (=वृत्रेण) परिष्ठितास् [तास्त्वं] सृजः (=असृजः =व्यसृजः) । उक्थैर्वावृधानः (=स्तोत्रैः प्रवृद्धस्त्वम्) अमर्त्यं चित् मन्यमानम् (=आत्मानं मरणरहितमेव मन्यमानं) दासं (=दस्युं =वृत्रम्) अव अभिनद् (=भित्त्वावसृष्टवान्) ॥

३. हे शूर इन्द्र, येषूक्थेषु (=स्तोत्रेषु) रुद्रियेषु च स्तोमेषु (=रुद्रकृतेषु स्तवनेषु) त्वं चाकन् (=कामयसे) यासु [स्तुतिषु च] [त्वं] मन्दसानो (=हृष्टो) [भवसि] [तादृशा] एताः शुभ्राः (=दीप्यमानाः) [स्तुतयो] वायवे न (=वायुं प्रतीव) तुभ्य इत् (=तुभ्यमपि =त्वां प्रति) नु (=क्षिप्रं) प्र सिस्रते (=प्रकर्षेण सरन्ति) ॥

यादृशानि स्तोत्राणि कामयसे यादृशानि च रुद्रकृतानि स्तवनानि ते प्रीतिकराणि भवन्ति यादृशाभिश्च स्तुतिभिस् त्वं हृष्टो भवसि तादृशानि मया कृतानीमानि स्तुतिवचनानि त्वां प्रति वायुं प्रति च धावन्तीति भावः ॥

२. हे शूर इंद्रा, ज्यांला अहीनें वेष्टून टाकिलें होतें त्या महान् [आणि] विपुळ उदकांला तूं खालीं वर्षिता झालास. स्तोत्रांनीं बळवान् झालेला असा जो तूं, तो आपणास अमरच मानणाऱ्या असुरालासुद्धा मारून खालीं टाकिता झालास.

३. हे शूर इंद्रा, ज्या स्तोत्रांची, आणि रुद्रकृत गायनाची तुला आवड आहे आणि ज्या स्तुतींनीं तूं आनंद पावतोस, त्या ह्या सुंदर स्तुती वायूप्रत [धांवल्या]-प्रमाणें सत्वर तुजप्रत धांवत आहेत.

2. O brave Indra, thou didst pour down in rich streams the great [and] plentiful [waters] which were besieged by the serpent. Thou, strengthened by hymns, didst strike down the demon that thought himself quite immortal.

3. O brave Indra, the hymns and the songs composed by Rudra which thou lovest, and these fair praises in which thou takest pleasure, are running quickly towards thee as towards Vâyu.

---

२. यांत सांगितलेला इंद्राचा पराक्रम सर्वत्र प्रसिद्ध आहे.

३. 'ज्या प्रकारचीं स्तोत्रें आणि रुद्रकृत वचनें तुला आवडतात, आणि ज्या स्तुतींपासून तुला हर्ष होतो तसलीं हीं वचनें आणि ह्या स्तुति तुजप्रत आणि वायूप्रत धांवत आहेत,' असा भावार्थ.

परंतु रुद्रकृत गायनें इंद्राला आवडतात असें म्हटलें आहे यावरून रुद्र इंद्राची स्तुति करीत असतो असें प्रसिद्ध पाहिजे, तें नाहीं; मात्र रुद्राचे पुत्र जे मरुत् (त्यांनां रुद्रिय म्हणतात) ते इंद्राची स्तुति गातात असें वेदांत पुष्कळ ठिकाणीं सांगितलें आहे. सू. ५२ मं. १५ पहा. तेव्हां या ठिकाणीं रुद्रकृत म्हणजे रुद्राचे पुत्र जे मरुत् त्यांणीं केलेलीं असा अर्थ घ्यावयाचा आहे काय?

शुभ्रं नु ते शुष्मं वर्धयन्तः शुभ्रं वज्रं बाह्वोर्दधानाः ।
शुभ्रस्त्वमिन्द्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः ॥ ४ ॥

शुभ्रम् । नु । ते । शुष्मम् । वर्धयन्तः । शुभ्रम् । वज्रम् । बाह्वोः । दधानाः ।
शुभ्रः । त्वम् । इन्द्र । ववृधानः । अस्मे इति । दासीः । विशः । सूर्येण । सह्याः ॥ ४ ॥

गुहा हितं गुह्यं गूळ्हमप्स्वपीवृतं मायिनं क्षियन्तम् ।
उतो अपो द्यां तस्तभ्वांसमहन्नहिं शूर वीर्येण ॥ ५ ॥ ३ ॥

गुहा । हितम् । गुह्यम् । गूळ्हम् । अप्ऽसु । अपिऽवृतम् । मायिनम् । क्षियन्तम् ।
उतो इति । अपः । द्याम् । तस्तभ्वांसम् । अहन् । अहिम् । शूर । वीर्येण ॥ ५ ॥ ३ ॥

भाषायाम्.

४. नु अधुना ते शुभ्रं शुष्मं (=तव दीप्तं बलं) [स्तोत्रेण] वर्धयन्तः [अपि च] तव शुभ्रं वज्रं बाह्वोर्दधानाः (=स्तोत्रेण तव बाह्वोर्निदधाना) [भवामः] । [अतः] हे इन्द्र, शुभ्रस्त्वं (=दीप्तस्त्वम्) [अस्माकं स्तोत्रेण] वावृधानः (=वर्धमानः सन्) अस्मे (=अस्मदर्थं) सूर्येण (=तेजस्विना वज्रेण) दासीर्विशः (=दस्युसंबन्धिनीः प्रजाः=अनार्यान् जनान्) सह्याः (=अभिभव) ॥

५. हे शूर, गुहा हितं (=गुहायां निहितम्) [अत एव] गुह्यम् (=अदृश्यं) गूळ्हं (=निगूढम्) अप्सु (=मेघोदकेषु) अपीवृतं क्षियन्तम् (=आच्छादितं वसन्तं) मायिनं (=मायाविनम्) उत (=अपि च) अपो द्यां (=मेघोदकानि =अन्तरिक्षं द्युलोकं च) तस्तभ्वांसं (=स्तम्भयन्तम्) अहिं (=वृत्ररूपं सर्पं) वीर्येण (=तव सामर्थ्येन) अहन् (=त्वं हतवान्) ॥

४. आम्ही तुझें सुंदर बळ आतां वाढवीत आहों, [तुझें] सुंदर वज्र [तुझ्या] खांद्यावर ठेवीत आहों. तर हे इंद्रा, सुंदर असा जो तूं तो [आम्हांकडून] बळवान् केला होत्साता तेजःपुंज वज्राच्या योगानें आम्हांसाठीं अनार्य लोकांचा पाडाव कर.

4. We are now promoting thy fair strength, we are placing [thy] fair thunderbolt on [thy] shoulders. Do thou the fair one, strengthened [by us], o Indra, subdue for us the un-Âryan forces with thy resplendent [thunderbolt].

५. हे शूर [इंद्रा], गुहेंत असलेला, अदृश्य, लपून राहिलेला, उदकांमध्यें छपून वास करणारा, मायावी आणि उदकांला [आणि] द्युलोकाला थांबविणारा जो अहि, त्याला तूं [आपल्या] पराक्रमानें मारिता झालास.

5. Thou didst, o brave [Indra], slay with thy might, the artful serpent lying invisible [and] concealed in the den and dwelling hidden in the waters, and that stopped the waters [and] the heaven.

---

४. ‘ आम्हीं स्तोत्रें म्हणून तुझें बळ वाढवीत आहों आणि तुझ्या हातून वज्र तुझ्या खांद्यावर चढवीत आहों. तर या प्रकारें बळवान् झालेला जो तूं तो अनार्य लोकांला जिंक;’ असें तात्पर्य.

स्तवा नु त इन्द्र पूर्व्या महान्युत स्तवाम नूतना कृतानि ।
स्तवा वज्रं बाह्वोरुशन्तं स्तवा हरी सूर्यस्य केतू ॥ ६ ॥

स्तव । नु । ते । इन्द्र । पूर्व्या । महानि । उत । स्तवाम । नूतना । कृतानि ।

स्तव । वज्रम् । बाह्वोः । उशन्तम् । स्तव । हरी इति । सूर्यस्य । केतू इति ॥६॥

हरी नु त इन्द्र वाजयन्ता घृतश्चुतं स्वारमस्वार्ष्टाम् ।
वि समना भूमिरप्रथिष्टारंस्त पर्वतश्चित्सरिष्यन् ॥ ७ ॥

हरी इति । नु । ते । इन्द्र । वाजयन्ता । घृतऽश्चुतम् । स्वारम् । अस्वार्ष्टाम् ।

वि । समना । भूमिः । अप्रथिष्ट । अरंस्त । पर्वतः । चित् । सरिष्यन् ॥७

नि पर्वतः साद्यप्रयुच्छन्त्सं मातृभिर्वावशानो अक्रान् ।
दूरे पारे वाणीं वर्धयन्त इन्द्रेषितां धमनिं पप्रथन्नि ॥ ८ ॥

नि । पर्वतः । सादि । अप्रऽयुच्छन् । सम् । मातृऽभिः । वावशानः । अक्रान् ।

दूरे । पारे । वाणीम् । वर्धयन्तः । इन्द्रऽइषिताम् । धमनिम् । पप्रथन् । नि ॥ ८ ॥

भाषायाम्.

६. हे इन्द्र, ते (=तव) पूर्व्या (=पूर्व्याणि=पुरातनानि) महानि (=महान्ति) [कृतानि] स्तव (=स्तवाम) । उत (=अपि च) नूतना (=नूतनानि) कृतानि (=पराक्रमकर्माणि) स्तवाम । [तव] बाह्वोरुशन्तं (=कामयमानं वीरकर्मकरणोत्सुकं) वज्रं स्तव (=स्तवाम) । सूर्यस्य केतू (=केतुभूतौ=प्रज्ञापकौ) हरी (=एतन्नामकौ तवाश्वौ) स्तव (=स्तवाम) ॥

७. हे इन्द्र, वाजयन्ता (=वेगं कुर्वन्तौ) ते (=तव) हरी घृतश्चुतं (=मेघोदकरूपं घृतं च्यावयन्तं) स्वारं (=नादं) नु (=सत्वरं=यस्मिन् क्षणे) अस्वार्ष्टाम् (=अशब्दयताम्=अकुरुतां) [तस्मिन् क्षणे] भूमिः (=पृथिवी) समना (=क्षिप्रं=सत्वरं) वि अप्रथिष्ट (=सर्वतः प्रथिताभूत्=ममोपरि वज्रप्रहारो भविष्यतीति भीत्या निश-

६. हे इंद्रा, आम्ही आतां तुझे महान् पुरातन पराक्रम स्तवूं आणि [तुझे] अर्वाचीन पराक्रम स्तवूं; [तुझ्या] खांद्यावरच्या उत्सुक वज्राला स्तवूं; सूर्याचे ध्वज [होत असे जे तुझे] पिवळे घोडे [ते] स्तवूं.

6. Let us now praise, o Indra, thy great ancient deeds and let us praise [thy] modern deeds. Let us praise the thunderbolt ready on [thy] shoulders. Let us praise the tawny horses, the banners of the sun.

७. हे इन्द्रा, तुझे वेगवंत अश्व घृतस्रावी नाद करिते झाले [तोंच] पृथिवी एकदम आडवी पडून राहिली, पर्वत चालणार होता तो स्तब्ध झाला.

7. Thy swift tawny horses, o Indra, only neighed a rain-dropping neigh, [when] the earth immediately spread herself flat, the mountain that was going to move stopped motionless.

८. पर्वत बिनचूक खालीं बसला, [आणि] आयांबरोबर घोष करीत करीत गर्जना करिता झाला. इन्द्रप्रेरित जय-नादाला दूरच्या प्रदेशीं मोठा करणारे असे [जे स्तोते ते] त्या वाणीला पसरिते झाले.

8. The mountain settled down with care. It roared, lowing with the mothers. The [praising worshippers], who increased in the distant region the shout sent forth by Indra, expanded that voice.

---

६. 'पुरातन,' 'अर्वाचीन'='पूर्व्या,' 'नूतना.' म्हणजे वृत्रहननादिक जीं पुरातन कामें आणि उपासकरक्षणादिक जीं आधुनिक कामें केलेलीं तीं.

'सूर्याचे ध्वज होत असें'='सूर्यस्य केतू.' इन्द्र आणि सूर्य हे एकच होत असें वेदांत कोठकोठें येतें.

७. इन्द्र आपले घोडे जोडून वृत्रहननार्थ जाऊं लागला तेव्हां काय काय झालें तें सांगतो.

'घृतस्रावी नाद'='घृतश्चुतं स्वारम्' म्हणजे तुपाप्रमाणें चिक्कण असें मेघोदक मेघांकडून खालीं पाडणारा.

'पर्वत.' म्हणजे मेघ असें सायण म्हणतात तें खरें दिसतें.

८. भावार्थः– 'इन्द्राचे अश्व येतांच मेघरूपी जो पर्वत तो खालीं गळला आणि त्यापासून पडणाऱ्या उदकांबरोबर

इन्द्रो महां सिन्धुमाशयानं मायाविनं वृत्रमस्फुरन्निः ।
अरेजेतां रोदसी भियाने कनिक्रदतो वृष्णो अस्य वज्रात् ॥ ९ ॥

इन्द्रः । महाम् । सिन्धुम् । आऽशयानम् । मायाऽविनम् । वृत्रम् । अस्फुरत् । निः ।
अरेजेताम् । रोदसी इति । भियाने इति । कनिक्रदतः । वृष्णः । अस्य । वज्रात् ॥ ९ ॥

अरोरवीद्वृष्णो अस्य वज्रोऽमानुषं यन्मानुषो निजूर्वात् ।
नि मायिनो दानवस्य माया अपादयत्पपिवान्त्सुतस्य ॥ १० ॥४॥

अरोरवीत् । वृष्णः । अस्य । वज्रः । अमानुषम् । यत् । मानुषः । निऽजूर्वात् ।
नि । मायिनः । दानवस्य । मायाः । अपादयत् । पपिऽवान् । सुतस्य ॥ १० ॥ ४ ॥

यानाभवत्) पर्वतश्चित् (=पर्वतोपि=मेघोपि) सरिष्यन् (=गन्तुकामः सन्=यद्यपि सर्तुकामस्तदपि) अरंस्त (=भीत्या स्तब्धोभूत्) ॥

८. पर्वतः (=मेघः) अप्रयुच्छन् (=अप्रमाद्यन् सन्=निःशङ्कं) नि सादि (=न्यषीदत्) । मातृभिः सं वावशानः (=मातृभूताभिरद्भिर्मेघोदकैः सह शब्दं कुर्वन्) अक्रान् (=अक्रन्दत्=अगर्जत्) । इन्द्रेषिताम् (=इन्द्रप्रेरितां) वाणीं (=जयशब्दं) दूरे पारे (=दूरे प्रदेशे) वर्धयन्तः (=स्तोत्रैः प्रवृद्धां कुर्वन्तः) [स्तोतारस्] [तां] धमनिं (=वाचं) नि पप्रथन् (=नितरामप्रथयन्=व्यस्तारयन्) ॥

भाषायाम्.

९. महां सिन्धुं (=महान्तं मेघोदकरूपं प्रवाहम्) आशयानम् (=अधिष्ठाय शयानं) मायाविनं वृत्रम् इन्द्रो निरस्फुरत् (=निरहन्) । [तदानीम्] अस्य वृष्णः (=तस्य वीरस्य=इन्द्रस्य) कनिक्रदतो वज्रात् (=शब्दं कुर्वाणाद्वज्राद्) भियाने (=भयं प्राप्ते) रोदसी (=द्यावापृथिव्यौ) अरेजेताम् (=अकम्पेताम्) ॥

१०. अस्य वृष्णः (=वीरस्य=इन्द्रस्य) मानुषः (=मनुष्येभ्यो हितो) वज्रो यत् (=यदा) अमानुषं (=मनुष्येभ्योऽहितं) [वृत्रं] निजुर्वात् (=नितरामहिंसत् [तदा स वज्रः] अरोरवीत् (=भृशं शब्दमकरोत्) । [तदानीं] सुतस्य पपिवान्

९. इन्द्र महान् प्रवाहावर पडून राहिलेल्या मायावी वृत्राला फेकून देता झाला. द्युलोक आणि पृथिवी, या वीराचें जें गर्जना करणारें वज्र त्याला भिऊन कांपूं लागल्या.

9. Indra hurled away deceitful Vṛitra who lay on the great stream. Earth and heaven trembled in terror of the roaring thunderbolt of this hero.

१०. जेव्हां या वीराचें मनुष्यहितकारी वज्र मनुष्यद्वेषी वृत्राला संहारितें झालें, तेव्हां तें मोठी गर्जना करितें झालें. सोम प्यालेला [इन्द्र] कपटी दानवाचीं कृत्रिमें भंगून टाकिता झाला.

10. When the thunderbolt of this hero, which is friendly to mankind, destroyed [Vṛitra] the enemy of mankind, it roared loudly. [The hero] having drunk of the Soma, destroyed the deceits of the deceitful Dânava.

नाद करिता जहाला. नंतर उपासकांनीं अभिनंदन केल्यावर इन्द्राचा जो जयशब्द तो उपासकांनीं केलेल्या स्तोत्रांच्या योगानें अधिकाधिक गंभीर जहाला.'

'आयांबरोबर'=मातृभिः. म्हणजे मेघोदकें जीं त्याच कोणी माता त्यांजबरोबर. मेघोदकांस माता असें वेदांत पुष्कळ ठिकाणीं म्हटलें आहे. उदारणार्थ, अर्षन्तु आपो जवसा वि मातरः (आपोमाता वेगानें येओत) ऋ. ८. ८९. ४.

---

९. 'महान् प्रवाहावर'='महां सिन्धुं.' म्हणजे बाष्परूपानें अन्तरिक्षांत प्रवाहासारिखा दिसणारा जो मेघ त्याजवर.

पिबापिबेदिन्द्र शूर सोमं मन्दन्तु त्वा मन्दिनः सुतासः ।
पृणन्तस्ते कुक्षी वर्धयन्त्वित्था सुतः पौर इन्द्रमाव ॥ ११ ॥

पिबऽपिब । इत् । इन्द्र । शूर । सोमम् । मन्दन्तु । त्वा । मन्दिनः । सुतासः ।
पृणन्तः । ते । कुक्षी इति । वर्धयन्तु । इत्था । सुतः । पौरः । इन्द्रम् । आव ॥ ११ ॥

त्वे इन्द्राप्यभूम विप्रा धियं वनेम ऋतया सपन्तः ।
अवस्यवो धीमहि प्रशस्तिं सद्यस्ते रायो दावने स्याम ॥ १२ ॥

त्वे इति । इन्द्र । अपि । अभूम । विप्राः । धियम् । वनेम । ऋतऽया । सपन्तः ।
अवस्यवः । धीमहि । प्रऽशस्तिम् । सद्यः । ते । रायः । दावने । स्याम ॥ १२

(=अभिषुतं सोमं पीतवान्) [इन्द्रो] मायिनो दानवस्य (=असुरस्य तस्य वृत्रस्य) मायाः (=कपटानि) नि अपादयत् (=अबाधत) ॥

भाषायाम्.

११. हे शूर इन्द्र, [इमं] सोमं पिबापिबेत् (=पिबैव पिबैव) । मन्दिनः (=मदकराः) सुतासः (=अभिषुताः सोमास्) त्वा नन्दन्तु (=त्वां मादयन्तु) । ते कुक्षी पृणन्तः (=तवोदरपार्श्वौ पूरयन्तः) [सोमास्] [त्वां] वर्धयन्तु (=प्रवृद्धं कुर्वन्तु) । पौरः सुतः (=उदरपूरकः सोम) इत्था (=सत्यम्) इन्द्रम् आव (=इन्द्रं तर्पयति) ॥

१२. हे इन्द्र, विप्राः (=स्तोतारो) [वयं] त्वे अपि अभूम (=त्वयि कृताश्रया भवेम) । ऋतया सपन्तः (=ऋतं सम्यग्यथा तथा पूजयन्तो वयं) धियं वनेम (=त्वत्प्रीत्यर्थं कर्म संभजेमहि) । अवस्यवः (=रक्षणेच्छवो वयं) [तव] प्रशस्तं धीमहि (=स्तुतिं विदधीमहि) । सद्यः (=अनन्तरं) ते रायो दावने (=तव धनस्य दानाय पात्रभूताः) स्याम (=भवेम) ॥

११. पी पी हे शूर इन्द्रा, [हा] सोम पी. मदकारी सोमरस तुला हर्षवोत. ते तुझें पोट भरपूर भरून तुला बळवान् करोत. पोट भरून टाकणारा सोमरस [तुज] इन्द्राला खरोखरच प्रसन्न करीत असतो.

१२. हे इन्द्रा, आम्ही स्तोते तुझे होऊं असें कर. भक्तीनें उपासना करणारे जे आम्ही ते तुझी उपासना करूं, रक्षणेच्छू आम्ही [तुझें] स्तोत्र करूं, आणि नंतर आम्ही तुझ्या संपत्तीच्या दानास पात्र होऊं, असें कर.

11. Drink, oh, drink, brave Indra, [this] Soma. May the exhilarating Somas exhilarate thee. May the Somas filling thy sides strengthen thee. [For] truly does the filling juice that is extracted gratify Indra.

12. May we thy poets, o Indra, have thy support. Worshipping rightly may we perform [thy] rite. Desirous of protection may we compose thy praise, and then may we be fit for the gift of thy wealth.

स्याम ते त इन्द्र ये त ऊती अवस्यव ऊर्जं वर्धयन्तः ।
शुष्मिन्तमं यं चाकनाम देवास्मे रयिं रासि वीरवन्तम् ॥ १३ ॥

स्याम । ते । ते । इन्द्र । ये । ते । ऊती । अवस्यवः । ऊर्जम् । वर्धयन्तः ।
शुष्मिन्ऽतमम् । यम् । चाकनाम । देव । अस्मे इति । रयिम् । रासि । वीरऽवन्तम् ॥ १३ ॥

रासि क्षयं रासि मित्रमस्मे रासि शर्ध इन्द्र मारुतं नः ।
सजोषसो ये च मन्दसानाः प्र वायवः पान्त्यग्रणीतिम् ॥ १४ ॥

रासि । क्षयम् । रासि । मित्रम् । अस्मे इति । रासि । शर्धः । इन्द्र । मारुतम् । नः ।
सऽजोषसः । ये । च । मन्दसानाः । प्र । वायवः । पान्ति । अग्रऽनीतिम् ॥ १४ ॥

भाषायाम्.

१३. हे इन्द्र, ये [वयम्] ऊती (=ऊत्या=तर्पणसाधनेन हविषा) ते (=तव) ऊर्जं (=बलं) वर्धयन्तः [सन्तः] अवस्यवः (=रक्षणेच्छवः) [स्मस्] ते [वयं] ते (=तव) स्याम (=भवेम) । हे देव, शुष्मिन्तमं (=बलवत्तमं) वीरवन्तं (=शूरापत्योपेतं) यं रयिं (=धनं) चाकनाम (=कामयामहे) [तम्] अस्मे रासि (=अस्मभ्यं ददासि=देहि) ॥

१४. क्षयं (=गृहं) रासि (=देहि) । अस्मे (=अस्मभ्यं) मित्रं (=सखायं) रासि (=देहि) । हे इन्द्र, नः (=अस्मभ्यं) मारुतं शर्धः (=मरुतां बलं) रासि (=देहि) । सजोषसः (=संगता) मन्दसानाश्च (=त्वया समं मोदमाना) वायवः (=वायुरूपा) ये [मरुतः] अग्रनीतिम् (=अग्रे नीयमानं=सोमं) [त्वया सह] प्र पान्ति (=पिबन्ति) ॥

१३. हे इंद्रा, तुझें बळ हवीनें वाढवीत [आहों] असे जे आम्ही ते ज्यापेक्षां रक्षणाची इच्छा करीत आहों, त्यापेक्षां आम्ही तुझे होऊं असें तूं कर. हे देदीप्यमान [इंद्रा], जी अत्यंत बलयुक्त [संपत्ति] आम्ही वांछितों, ती शूरसंततीनें भरलेली संपत्ति तूं आम्हांला दे.

१४. घर दे, आम्हांस मित्र दे, हे इंद्रा, आम्हांला मरुतांचें बळ दे; जे वायु [रूप] [मरुत्] तुजबरोबर सोम पिऊन आनंद पावतात.

13. O Indra, may we, who increasing thy energy with oblation are desirous of protection, become thine. Grant to us, o resplendent one, that wealth, full of strength and brave progeny, which we long for.

14. Give a house, give us a friend, give us, o Indra, the strength of the Maruts; who, identical with the winds, drink the first offering [of the Soma] as [thy] companions, making themselves happy [along with thee].

---

१३. ' हवीनें '=' ऊती. ' ' ऊति ' शब्दाचा असा अर्थ होतो अशाविषयीं ऋ. ६. २९. ५ आणि त्याजवरील सायणभाष्य पहा.

१४. 'मरुतांचें बळ'='मारुतं शर्धः'. म्हणजे मरुतांचा गण. ' दे ' म्हणजे घेऊन ये. कदाचित् ' बळ ' यांत मरुद्दत्त सामर्थ्य असाहि श्लेषार्थ घेणें अवश्य आहे. म्हणून ' गण ' बद्दल ' बळ ' हें पद आम्हीं घातलें आहे.

व्यन्त्विन्नु येषुं मन्दसानस्तृपत्सोमं पाहि द्रह्यदिन्द्र ।
अस्मान्त्सु पृत्स्वा तरुत्रावर्धयो द्यां बृहद्भिरर्कैः ॥ १५ ॥ ५ ॥

व्यन्तुं । इत् । नु । येषुं । मन्दसानः । तृपत् । सोमंम् । पाहि । द्रह्यत् । इन्द्र ।

अस्मान् । सु । पृत्ऽसु । आ । तरुत्र । अवर्धयः । द्याम् । बृहत्ऽभिः । अर्कैः ॥ १५ ॥ ५ ॥

बृहन्त इन्नु ये ते तरुत्रोक्थेभिर्वा सुम्नमाविवासान् ।
स्तृणानासो बर्हिः पस्त्यावत्त्वोता इदिन्द्र वाजमग्मन् ॥ १६ ॥

बृहन्तः । इत् । नु । ये । ते । तरुत्र । उक्थेभिः । वा । सुम्नम् । आऽविवासान् ।

स्तृणानासः । बर्हिः । पस्त्यऽवत् । त्वाऽऊताः । इत् । इन्द्र । वाजम् । अग्मन् ॥ १६ ॥

भाषायाम्.

१५. येषु [मरुत्सु] मन्दसानः (=त्वं मोदमानो) [भवसि] [ते] नु (=क्षिप्रं) व्यन्तु इत् (=पिबन्त्वेव) । हे इन्द्र, तृपत् द्रह्यत् सोमं पाहि (=आ तृप्तेरा बलागमनाच्च सोमं पिब) । [अपि च] हे तरुत्र (=हे जेतः=तारक), बृहद्भिरर्कैः (=महद्भिर्मरुद्भिःसह) अस्मान् पृत्सु आ (=युद्धेषु) द्यां [च] (=द्युलोकं च) अवर्धयः (=प्रवृद्धान् कुरु) ॥

आ सप्तमीद्योतनार्थः ॥

१६. हे तरुत्र (=शत्रुनाशेन तारक), [ते] इत् (=त एव) नु बृहन्तः (=क्षिप्रं महान्तो) [भवन्ति] ये ते सुम्नं (=तव सुखं=त्वद्दत्तं सुखकरं धनम्) उक्थैः (=स्तोत्रैर्) आविवासान् (=परिचरेयुः=स्तुयुः) । वा (=अथवा) हे इन्द्र, त्वोताः (=त्वया रक्षिता) बर्हिः स्तृणानास इत् (=दर्भान् वेद्यामाच्छादयन्तः=ये त्वदर्थं बर्हिरास्तृणन्ति त एव) पस्त्यावत् वाजम् अग्मन् (=गृहवद्यथा तथा अन्नं प्राप्नुयुः=गृहमन्नं च लभेरन्) ॥

१५. हे इन्द्रा, ज्या मरुतांबरोबर तूं आनंद पावतोस ते [हा सोम] सत्वर पिओत, [आणि] तूं तृप्ति होईपर्यंत [आणि] बळ येईपर्यंत [हा] सोम पी. [आणि] हे तारणाऱ्या, महान् जे मरुत् त्यांसह तूं आम्हांला युद्धांत चांगले [आणि] द्युलोकाला बळवान् कर.

१६. हे तारणाऱ्या [इन्द्रा], जे स्तोत्रांनीं तुझी कृपा आळवितात तेंच लवकर मोठे होतात. हे इन्द्रा, त्वां रक्षिलेले जे [मनुष्य] तुजकरितां दर्भ पसरितात तेच गृह आणि अन्न यांप्रत पावतात.

15. Now may they (the Maruts) drink with whom thou makest thyself happy. Drink the Soma thou, o Indra, to thy satisfaction and so as to strengthen thyself. Strengthen us well in battle, o victor, [and] [strengthen] the heaven, with the vast [Maruts].

16. They alone soon become great, o victor, who praise thy beneficence in hymns. Those only attain to a home and to food who, protected by thee, spread the sacred grass [for thee].

---

१५. 'द्युलोकाला'='द्याम्.' द्युलोकाला बळवान् कर असें म्हटलें आहे त्याचा अभिप्राय असा दिसतो कीं, तूं सोम पी आणि आमच्या शत्रूंपासून आम्हांला युद्धांत सोडीव, आणि वृत्राच्या उपद्रवापासून द्युलोकाला सोडीव.

१६. 'दर्भ पसरितात'='बर्हिः स्तृणानासः'. म्हणजे यज्ञ करितात, भजतात.

उग्रेष्विन्नु शूर मन्दसानस्त्रिकद्रुकेषु पाहि सोममिन्द्र ।
प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिम् ॥१७॥
उग्रेषु । इत् । नु । शूर । मन्दसानः । त्रिऽकद्रुकेषु । पाहि । सोमम् । इन्द्र ।
प्रऽदोधुवत् । श्मश्रुषु । प्रीणानः । याहि । हरिऽभ्याम् । सुतस्य । पीतिम् ॥ १७ ॥
धिष्वा शवः शूर येन वृत्रमवाभिनद्दानुमौर्णवाभम् ।
अपावृणोर्ज्योतिरार्याय नि सव्यतः सादि दस्युरिन्द्र ॥ १८ ॥
धिष्व । शवः । शूर । येन । वृत्रम् । अवऽअभिनत् । दानुम् । और्णऽवाभम् ।
अप । अवृणोः । ज्योतिः । आर्याय । नि । सव्यतः । सादि । दस्युः । इन्द्र ॥ १८ ॥

भाषायाम्.

१७. हे शूर इन्द्र, उग्रेषु इत् मन्दसानः (=प्रबलेषु मरुत्सु मोदमान एव=तैः सह मोदमान एव) त्रिकद्रुकेषु सोमं पाहि (= " ज्योतिर्गौरायुरित्येतन्नामकेषु " उत्सवदिवसेषु सोमं पिब)। [अपि च] प्रीणानः (=प्रीतः सन्) श्मश्रुषु प्रदोधुवत् (=श्मश्रुषु लिप्तं सोमं पुनः पुनर्धुन्वन्) हरिभ्यां (=तव पीताश्वाभ्यां) सुतस्य पीतिं याहि (=अभिषुतस्य सोमस्य पानं प्रति गच्छ) ॥

१८. हे शूर, येन [शवसा] वृत्रम् और्णवाभं [च नाम] दानुम् (=असुरम्=एतन्नामकावसुरौ) अवाभिनत् (=बिभेदिथ) [तत्] शवः (=बलं) धिष्व (=धारय)। हे इन्द्र, [त्वम्] आर्याय (=आर्यजनार्थं) ज्योतिर् अप अवृणोः (=प्रकाशमुद्घाटितवानसि) [तदा] दस्युः (=स वृत्रासुरः) सव्यतो नि सादि (=तव सव्यपार्श्वे नितरां सन्नः सन्नशेत) ॥

१७. हे शूर इन्द्रा, प्रबळ [मरुतां]बरोबर आनंद पावणारा [असा जो] तूं [तो त्यांजबरोबर]च त्रिकद्रुकांच्या दिवसांत सोम पी. [आणि] प्रसन्न होऊन दाढीवरील [सोम] पुसीत पुसीत सोम प्यावयाला पिवळ्या घोड्यांनीं चल.

१८. हे शूरा, ज्या [बळा]नें तूं वृत्राला [आणि] और्णवाभ असुरांला मारून टाकिता झालास तें बळ तूं धारण कर. तूं आर्यासाठीं उजेड उघडिता झालास [आणि] हे इन्द्रा, दस्यु डावीकडे पडून गेला.

17. Enjoying thyself with the mighty [Maruts] drink thou quickly, o brave Indra, the Soma in the Trikadruka [festivals]. Being pleased go thou with thy tawny horses to drink the Soma, shaking [the drops off thy] beard.

18. Put on, o brave one, the might with which thou didst strike down Vṛitra, [and] Aurṇavâbha, the demons. Thou didst strike open the light for the Ârya, [and] the Dasyu lay down dead on the left, o Indra!

---

१७. 'त्रिकद्रुकांच्या दिवसांत'=' त्रिकद्रुकेषु.' सू. ३२ मं. ३ आणि टीप पहा.

' [सोम] पुसीत पुसीत '=' प्रदोधुवत्. ' म्हणजे एका ठिकाणीं सोम पिल्यावर तेथून निघून दुसरे ठिकाणीं जातांना दाढीस सोमाचे थेंब लागलेले पुसीत पुसीत चाल असा भावार्थ.

१८. ' और्णवाभ. ' हा एक असुर असून त्याला इंद्रानें वृत्राला मारितेवेळीं मारिलें असें ऋग्वेदांत आणखी दोन ठिकाणीं सांगितलें आहे.

'आर्यासाठीं उजेड उघडिता झालास' =' आर्याय ज्योतिरपावृणोः'. म्हणजे वृत्रादिक असुरांनीं सूर्याला आच्छादून टाकिलें होतें व प्रकाश बंद केला होता, तो वृत्राला मारून पुनः आर्य जनाला प्राप्त करून दिला. वृत्राला मारून मोकळा केलेला प्रकाश आर्यालाच मिळाला, अनार्याला मिळाला नाहीं असें तात्पर्य नाहीं; तर मुक्त केला तो आर्य लोकांसाठीं म्हणून केला, कारण आर्य लोक इन्द्राच्या प्रीतींतले होत. यहुदी लोकहि याप्रमाणेंच आपणास ईश्वराचे आवडते व ईश्वरानें स्वप्रीतीसाठीं निवडून काढिलेले लोक असें मानीत असतात.

' दस्यु '. म्हणजे वृत्र. सू.३३ मं.४,७ आणि टीप पहा.

सनेम ये त ऊतिभिस्तरन्तो विश्वाः स्पृध आर्येण दस्यून् ।
अस्मभ्यं तत्त्वाष्ट्रं विश्वरूपमरन्धयः साख्यस्य त्रिताय ॥ १९ ॥

सनेम । ये । ते । ऊतिऽभिः । तरन्तः । विश्वाः । स्पृधः । आर्येण । दस्यून् ।
अस्मभ्यम् । तत् । त्वाष्ट्रम् । विश्वऽरूपम् । अरन्धयः । साख्यस्य । त्रिताय ॥ १९ ॥

अस्य सुवानस्य मन्दिनस्त्रितस्य न्यर्बुदं वावृधानो अस्तः ।
अवर्तयत्सूर्यो न चक्रं भिनद्वलमिन्द्रो अङ्गिरस्वान् ॥ २० ॥

अस्य । सुवानस्य । मन्दिनः । त्रितस्य । नि । अर्बुदम् । ववृधानः । अस्तरित्यस्तः ।
अवर्तयत् । सूर्यः । न । चक्रम् । भिनत् । वलम् । इन्द्रः । अङ्गिरस्वान् ॥ २० ॥

भाषायाम्.

१९. ते (=तव) ऊतिभिः (=पालनैस्तव साहाय्येन) ये [पुरुषा] आर्येण (=आर्यभावेन) विश्वाः स्पृधः (=सर्वान् शत्रून्) दस्यून् (=असुरांश्च) तरन्तः (=अभिभवन्तो) [भवेयुस्तान् वयं] सनेम (=लभेमहि)। त्वाष्ट्रं (=त्वष्टुः पुत्रं) विश्वरूपम् (=एतन्नामकमसुरं) [यथा] साख्यस्य त्रिताय अरन्धयः (=? त्रितस्य साख्याय तस्मै वशमानयः=त्रितस्योपरि सख्यकरणाय यथा तमसुरं त्रितस्य वशमानयस्) तत् (=तथा) [तं विश्वरूपम्) अस्मभ्यं [रन्धय] (=अस्मभ्यं वशमानय=अस्माकं वशमानय)॥

२०. सुवानस्य (=सोमम् अभिषुण्वतो) मन्दिनः (=मदकरस्य=मदकारिणः=इन्द्रं हर्षयतः) अस्य त्रितस्य [नामर्षेः] [सोमेन] वावृधानः (=प्रवृद्धः) [इन्द्रः] अर्बुदम् (=एतन्नामानमसुरं) नि अस्तः (=नितराम् अवधीत्)। अङ्गिरस्वान् (=अङ्गिरोभिर्युक्तः) इन्द्रः सूर्यश्चक्रं न (=सूर्यः स्वचक्रं यथावर्तयति तथा) [वज्रम्] अवर्तयत् (=अभ्रमयत्) बलं [नामासुरं] भिनत् (=अभिनत्) [च]॥

१९. जे तुझ्या कृपेकरून आर्य[पराक्रमा]नें सर्व शत्रूंला [आणि] दस्यूंला जिंकणारे [हो- तील] असे [पुरुष] आम्हांस प्राप्त होओत. त्वष्ट्याचा पुत्र वि- श्वरूप ह्याला, त्रितावर स्नेह [रा- खण्याकरितां] तूं [जसा] त्याला त्रिताच्या अधिकाराखालीं आ- णिता झालास त्याप्रमाणें, आमच्या अधिकाराखालीं आण.

19. May we obtain those, who through thy favour shall conquer all enemies [and] demons with [the strength of] the Ârya. [Bring] under our power Vis'varûpa, the son of Tvâshtâ as thou didst bring under that of Trita out of friendship [to him].

२०. हा जो सोम काढून अर्पण करणारा, [आणि] आ- नंद देणारा त्रित, त्याच्या [सोमा- नें] प्रवृद्ध होत्साता [इन्द्र] अर्बुदाला भूमिगत करिता झाला. अंगिर- सांला बरोबर घेऊन इन्द्र, जसा सूर्य चक्र [फिरवितो], तसा वज्र फिरविता झाला आणि वलाला छेदिता झाला.

20. [Indra] strengthened [by the Soma] of that Trita, who extracted it, and exhilarated [him], laid Arbuda low. Indra, accompanied by the Angirases, revolved [the thunderbolt], as the sun [revolves] his wheel, and struck Vala.

---

१९. 'त्वष्ट्याचा पुत्र विश्वरूप'= त्याजविषयीं ऋग्वेदांत कांहीं विशेष सां- गितलेलें नाहीं. ऋ. १०.८.८,९ यांत सांगितलें आहे कीं, तीन शिरांचा जो त्वष्ट्याचा पुत्र विश्वरूप त्याला इंद्रानें शिरें तोडून मारिलें.

'त्रितावर'. 'त्रित' हा एक महर्षि होता असें सायण म्हणतात.

२०. 'अर्बुद.' हा एक असुर आहे. सू. ५१ मं. ६ आणि त्याजवरील अर्बुद याविषयींची टीप पहा.

'अंगिरसांला बरोबर घेऊन'=' अ- ङ्गिरस्वान्' म्हणजे अंगिरसांनीं त्याची स्तुति केल्यावरून त्यांस साहाय्य करण्याक- रितां त्यांजबरोबर गेला, आणि वलाला मारून त्याच्या उपद्रवापासून त्यांला सोड- विता झाला. 'अंगिरस' यांविषयीं सू. ५१ मं. ३ आणि सू. ७१ मं. २ यां- वरील टीपा पहा.

'सूर्य जसा चक्र [फिरवितो].'

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥
॥ २१ ॥ ६ ॥ १ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ २१ ॥ ६ ॥ १ ॥

भाषायाम्.

२१. हे इन्द्र, नूनम् (=इदानीं) ते (=तव) मघोनी (=धनवती) सा (=प्रख्याता) दक्षिणा जरित्रे (=स्तोत्रे) वरं (=मनोभिलाषं) प्रति दुहीयत् (=संपादयेत्) । भगः (=दाता त्वं) नः स्तोतृभ्यः (=अस्मभ्यं स्तोत्रकर्तृभ्यः) शिक्ष (=देहि) माति धक् (=मातिक्रम=प्रथममस्मभ्यं दत्त्वा पश्चादन्येभ्यो देहि) । सुवीराः (=शोभनवीर्योपेतैः पुत्रैः सहिताः सन्तो) विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=त्वामुद्दिश्य ब्रवाम) ॥

सूक्तम् १२–२०३.

गृत्समद ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् ।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥ १ ॥

यः । जातः । एव । प्रथमः । मनस्वान् । देवः । देवान् । क्रतुना । परिऽअभूषत् ।
यस्य । शुष्मात् । रोदसी इति । अभ्यसेताम् । नृम्णस्य । मह्ना । सः । जनासः । इन्द्रः ॥ १ ॥

भाषायाम्.

अत्र क इन्द्रः कीदृशः सः सत्यमेवास्ति न वेत्यादिसंशयान् कुर्वत्सु जनेषु कस्मिंश्चिज्जनसमूहे ब्रूते गृत्समद इन्द्रस्य स्वरूपम् । यत्तु बृहद्देवताकारः संयुज्य तपसा-

२१. आतां हे इंद्रा, तुझी जी धनसमृद्ध प्रख्यात दक्षिणा ती स्तोत्याची मनकामना पूर्ण करो. स्तोत्यांला दे, तूं उदार आम्हांस वगळूं नको. चांगल्या वीरांनीं युक्त होत्साते आम्ही तुझी मोठी कीर्ति यज्ञांत गाऊं असें कर.

21. Now, Indra, may thy rich bounty fulfil the desire of the poet. Give to us the poets, do not pass us over, thou the liberal one. May we, accompanied by brave sons, sing great praises [to thee] in sacrifices.

सूर्याच्या रथाला एकच चाक आहे व तें अत्यंत तेजस्वी आहे; तें तो गरगर फिरवून आपला रथ चालवीत असतो अशी समजूत आहे.

'वल' याविषयीं सू. ११ मं. ५ आणि त्यावरील टीप पहा.

२१. 'वगळूं नको'='मा धक्'. | 'धक्' हें 'दघ्' धातूचें रूप आहे.

सूक्त १२–२०३.

ऋषि–गृत्समद. देवता–इन्द्र. वृत्त–त्रिष्टुभ्.

१. जो उपजतांच सर्व श्रेष्ठ, मेधावी देव, देवांला आपल्या पराक्रमानें रक्षिता झाला, ज्याच्या बळाला [आणि] वीर्याच्या महत्त्वाला स्वर्ग आणि पृथिवी भिऊन कांपल्या, तो, हे जन हो, इंद्र [असें समजा].

Hymn 12–203.

To *Indra*. By *Gṛitsamada*. Metre —*Trishṭubh.*

1. He, the god, who immediately he arose defended the gods with [his] bravery, [being] the first [and] the wisest; at whose power [and] at the greatness of [whose] puissance earth and heaven trembled —that, o people, is Indra.

१. हें सूक्त फार महत्त्वाचें आहे. प्राचीन काळापासून याची मोठी ख्याति आहे. तें आलीकडे मोठमोठ्या यज्ञांत म्हणण्याची वैदिकांला चाल पडून गेलेली आहे. आणि तें कोणत्या प्रसंगास अनुलक्षून रचिलें (अथवा प्रवर्तलें) याविषयीं अनेक कल्पना अनेक ग्रंथकारांनीं केल्या आहेत. त्यांतून बृहद्देवतानामक प्रसिद्ध ग्रंथांत जी कथा सांगितली आहे ती भाषेवर पहा. वस्तुतः म्हटलें म्हणजे इंद्र

यः पृथिवीं व्यथमानामदृंहद्यः पर्वतान्प्रकुपिताँ अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनास इन्द्रः ॥२॥

यः । पृथिवीम् । व्यथमानाम् । अदृंहत् । यः । पर्वतान् । प्रऽकुपितान् । अरम्णात् ।
यः । अन्तरिक्षम् । विऽममे । वरीयः । यः । द्याम् । अस्तभ्नात् । सः । जनासः । इन्द्रः ॥ २ ॥

त्मानमैन्द्रं बिभ्रन्महद्वपुः । अदृश्यत मुहूर्तेन दिवि च व्योम्नि चेह च ॥ तमिन्द्र इति मत्वा तु दैत्यौ भीमपराक्रमौ । धुनिश्च चुमुरिश्चोभौ सायुधावभिपेततुः ॥ विदित्वा स तयोर्भावमृषिः पापं चिकीर्षतोः । यो जात इति सूक्तेन कर्माण्यैन्द्राण्यकीर्तयत् । इत्युक्तवान् अन्यैर्वा यदन्यैः प्रकारैरुक्तं प्रसङ्गविषयकमस्य सूक्तस्य तत्सर्वं चिन्त्यम् ॥

१. जात एव (=जायमान एव) प्रथमः (=सर्वश्रेष्ठो) मनस्वान् (=मनस्विनां मेधाविनां मध्य उत्तमो) देवो देवान् [सर्वान्] यः क्रतुना (=वृत्रहननादिना वीरकर्मणा) पर्यभूषत् (=रक्षकत्वेन समन्तादभवत्=तान् रक्षितुं पर्यवेष्टयत्) यस्य शुष्मात् (=बलात्) [यस्य च] नृम्णस्य मह्ना (=वीर्यस्य महत्त्वेन=महतः शौर्याद्) रोदसी (=द्यावापृथिव्यौ) अभ्यसेतां (=भीत्याकम्पेतां) स हे जनासः (=जनाः), इन्द्र [इति जानीत] ॥

भाषायाम्.

२. यो व्यथमानां (=चलन्तीं) पृथिवीम् अदृंहत् (=दृढामकरोत्) यः प्रकुपितान् पर्वतान् (=इतस्ततश्चलितान् पर्वतान्) अरम्णात् (=नियमितवात्=स्वे स्वे स्थाने स्थापितवान्) यो वरीयः (=अतिविस्तीर्णम्) अन्तरिक्षं विममे (=विविधं निर्मितवान् व्यवस्थया रचितवान्) यो द्याम् अस्तभ्नात् (=स्तम्भैरिव निरुद्धामकरोत्) स हे जनासः (=जनाः), इन्द्र [इति जानीत] ॥

२. जो कांपत असणाऱ्या पृथिवीला दृढ करिता झाला, जो चंचल पर्वतांला स्तब्ध करिता झाला, जो विस्तीर्ण अंतरिक्ष व्यवस्थापिता झाला, जो द्यूला धारण करिता झाला, तो हे जन हो, इंद्र [असें समजा].

2. He who made solid the trembling earth, who made firm the mobile mountains, who arranged in order the vast firmament, and who supported the heaven,—that, o people, is Indra.

कोण आहे, तो कसा आहे, त्याचा पराक्रम काय अशी शङ्का लोक घेऊं लागले, तेव्हां त्यांचा संशय जाण्यासाठीं इंद्राचें खरें स्वरूप काय आहे तें या सूक्तांत ऋषीनें सांगितलें आहे. आणि ईश्वर या नांवाचा जरी उपयोग यांत केलेला नाहीं, तरी ईश्वराच्या गुणाचा बोध कसकसा पुरातन आर्यलोकांस होत गेला तें या सूक्तावरून कांहींसें समजतें.

---

२. ‘ पृथिवी जशी आतां अचल आहे तशी पूर्वीं नव्हती आणि पर्वतहि आपापल्या ठिकाणीं जसे स्तब्ध आहेत तसे पूर्वीं नव्हते. अंतरिक्ष जसें आतां व्यवस्थित आहे तसें प्रथम नव्हतें, आणि द्युलोक जो आतां महा मंडपासारिखा अत्युच्च जडला जाऊन प्रकाशत आहे, तसा पूर्वीं नव्हता. तर आतांची जी ही स्थिति आहे ती इंद्रानें केली ’ असें तात्पर्य.

यो हत्वाहिमरिणात्सप्त सिन्धून्यो गा उदाजदपधा वलस्य ।
यो अश्मनोरन्तरग्निं जजान संवृक्समत्सु स जनास इन्द्रः ॥ ३ ॥

यः। हत्वा । अहिम् । अरिणात् । सप्त । सिन्धून् । यः । गाः । उत्ऽआजत् । अपऽधा । वलस्य ।
यः । अश्मनोः । अन्तः । अग्निम् । जजान । सम्ऽवृक् । समत्ऽसु । सः । जनासः । इन्द्रः ॥ ३ ॥

येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः ।
श्वघ्नीव यो जिगीवाँ लक्षमाददर्यः पुष्टानि स जनास इन्द्रः ॥४॥

येन । इमा । विश्वा । च्यवना । कृतानि । यः । दासम् । वर्णम् । अधरम् । गुहा । अकरित्यकः ।
श्वघ्नीऽइव । यः । जिगीवान् । लक्षम् । आदत् । अर्यः । पुष्टानि । सः । जनासः । इन्द्रः ॥ ४ ॥

भाषायाम्.

३. यः अहिं (=सर्पाकारमेघलक्षणं वृत्रं) हत्वा सप्त सिन्धून् (=सप्त नदीः=मेघोदकानि) अरिणात् (=प्रैरयत्) यो वलस्य (=वलनामकस्यासुरस्य) अपधा (=अपधायाः सकाशात्=तत्कर्तृकान्निरोधाद्) गा उदाजत् (=मेघोदकरूपाः सूर्यादिज्योतीरूपा वा गा निरगमयत्) यः अश्मनोरन्तः (=अत्यन्तमृदुरूपयोर्मेघयोर्मध्ये) [वैद्युतम्] अग्निं जजान (=उत्पादयामास) [यश्च] समत्सु संवृक् (=सम्यक्छेदनकर्ता शत्रुनाशको) [भवति] स हे जनासः (=जनाः), इन्द्र [इति जानीत] ॥

४. येन इमा विश्वा च्यवना (=इमानि दृश्यमानानि सर्वाणि भूतानि) कृतानि (=रचितानि) यो दासं वर्णं (=दस्युसंबन्धिनं वर्णम्=अनार्यान् जनान्) अधरं गुहा अकः (=गुहायां गूढस्थाने निकृष्टम् अकरोत्=पादेन निपात्य निकृष्टे निगूढस्थाने निहितवानिव) यो जिगीवान् श्वघ्नीव (=जितवान् कितव इव) अर्यो लक्षं पुष्टानि (=शत्रोर्लक्षसंख्याकानि धनानि) आदत् (=गृहीतवान्) स हे जनासः (=जनाः), इन्द्र [इति जानीत] ॥

३. जो अहीला मारून सप्त सिंधूंला खालीं सोडून देता झाला, जो गाईंला वलाच्या अटकेपासून मुक्त करिता झाला, जो पाषाणांमध्यें अग्नीला उत्पन्न करिता झाला, [जो] संग्रामांत विजयशील,– तो, हे जन हो, इंद्र [असें समजा].

3. He who having slain the Serpent let flow the seven rivers, who liberated the cows from the hiding-place of Vala, who created Agni between the two rocks, the destructive hero in battles—that, o people, is Indra.

४. ज्याणें हीं सर्व अस्थिर भुवनें निर्माण केलीं, जो अनार्य वर्णाला निर्दाळून टाकिता झाला, जो विजयी द्यूतकाराप्रमाणें शत्रूचीं [एक] लक्ष धनें घेता झाला– तो, हे जन हो, इंद्र [असें समजा].

4. He by whom all this frail creation was made, who put down the un-Âryan colour, who like a winning gambler took a hundred thousand goods of the enemy— that, o people, is Indra.

---

३. अहीला म्ह. वृत्राला. सू. ३२ मं. १ यावरील टीप पाहा.

'सप्त सिंधूंला'=' सप्त सिन्धून् ' म्हणजे मेघोदकांला. सू. ३५. मं ८. पाहा.

वलासुराच्या अटकेंतून सोडविलेल्या ज्या गाई येथें सांगितल्या, त्या मेघोदकरूपच समजाव्या, अथवा सूर्यादिकांचे जे किरण तद्रूप समजाव्या. ' पाषाणांमध्यें अग्नीला इ. ' म्ह. पाषाणासारिखे दिसणारे जे मेघ ते एकत्र मिसळले म्हणजे जो विद्युद्रूप अग्नि निर्माण होतो तो.

४. 'अनार्य वर्णाला '='दासं वर्णम्.' म्ह. आर्य नव्हत असे जे महार, कोळी, गोंड इत्यादि जातींचे लोक ते. त्यांनां दास अथवा दस्यू असें साधारण नांव वेदकाळीं असे. दस्युशब्दाचा चोर असा जो प्राचीन काळापासून एक अर्थ चालू आहे त्याचें कारण असें कीं, हे अनार्य लोक आर्य लोकांची चोरी करीत असत. दास शब्दाचा 'चाकर' असा जो अर्थ आतां प्रसिद्ध आहे, त्याचें कारण असें कीं, या अनार्य लोकांस आर्यांनीं मागाहून आपले गुलाम केले आणि गुलामकीचा संबंध त्यांच्याशीं ठेवूं लागले. अनार्य लोकांला दास याअर्थीं पूर्वीं नांव असे याचें एक प्रमाण असें आहे कीं, तेलंग आणि कानडी प्रदेशांत एक प्रकारचे अनार्य लोक, महारांच्या जातीसारिखे आहेत त्यांस अजून दास (दासरू ದಾಸರು) असें नांव आहे. ते लोक दास म्हणजे गुलाम कधींतरी होते अथवा गुलामकीचें कां-

यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम् ।
सो अर्यः पुष्टीर्विज इवा मिनाति श्रदस्मै धत्त स जनास इन्द्रः॥५॥७

यम् । स्म । पृच्छन्ति । कुह । सः । इति । घोरम् । उत । ईम् । आहुः । न । एषः । अस्ति । इति । एनम् ।

सः । अर्यः । पुष्टीः । विजःऽइव । आ । मिनाति । श्रत् । अस्मै । धत्त । सः । जनासः । इन्द्रः ॥ ५ ॥ ७ ॥

यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः ।
युक्तग्राव्णो योऽविता सुशिप्रः सुतसोमस्य स जनास इन्द्रः॥६॥

यः । रध्रस्य । चोदिता । यः । कृशस्य । यः । ब्रह्मणः । नाधमानस्य । कीरेः ।

युक्तऽग्राव्णः । यः । अविता । सुऽशिप्रः । सुतऽसोमस्य । सः । जनासः । इन्द्रः ॥ ६ ॥

भाषायाम्.

५. यं घोरं स कुहेति पृच्छन्ति स्म (=शत्रूणां घातकः श्रेष्ठः स क्वास्तीति यद्विषये प्रश्नं कुर्वन्ति) उत (=अपि च) एष नास्तीति ईम् एनमाहुः (=एष तवेन्द्रो नास्त्येवेति यद्विषय आहुः केचिद्वदन्ति) स विज इव (=उद्वेजको हरणशीलो) [द्यूतकार इव] अर्यः पुष्टीः (=शत्रोर्धनानि) आ मिनाति (=हिनस्ति=हरति) । अस्मै श्रत् धत्त (=तस्मै श्रद्धत्त=स इन्द्रोस्तीति विश्वासं कुरुत) । स हे जनासः (=जनाः), इन्द्र [इति जानीत] ॥

६. यो रध्रस्य (=समृद्धस्य) चोदिता (=प्रेरयिता) यः कृशस्य (=अल्पस्य= दरिद्रस्य) यो ब्रह्मणः (=ब्रह्मणः उपासनायाः कर्तुरुपासकस्य) नाधमानस्य कीरेः (=याचमानस्य स्तोतुश्च) [चोदिता] यो युक्तग्राव्णः (=अभिषवार्थं संयुक्तग्राव्णः) सुतसोमस्य (=अभिषुतसोमस्य) [यजमानस्य] सुशिप्रः (=शोभनवदनः) अविता (=रक्षिता) [भवति] स हे जनासः (=जनाः), इन्द्र [इति जानीत] ॥

हीं काम करीत अथवा करितात असें नाहीं, दास हें त्या जातीचेंच नांव आहे.

'लक्ष धनें '=' लक्षं पुष्टानि ' आ- म्हांला हाच अर्थ उत्तम दिसतो. त्याला अडचण इतकीच कीं, 'लक्ष' शब्द पुनः ऋग्वेदांत आलेला नाहीं, त्यामुळें त्याचा

५. 'तो कोठें आहे' असें ज्या परात्पराविषयीं विचारितात आणि तो नाहींच असें ज्याविषयीं म्हणतात, तो शत्रूचीं धनें, नागविणाऱ्या [द्यूतकारा]प्रमाणें, हरण करितो, त्याजवर तुम्हीं भाव ठेवा—तो, हे जन हो, इंद्र [असें समजा].

६. जो श्रीमंताचा चालविणारा, जो दरिद्र्याचा [आणि] जो उपासकाचा [आणि] याचना करणाऱ्या स्तोत्याचा [चालविणारा], जो ग्रावे जोडणाऱ्याचा [आणि] सोम काढणाऱ्याचा शुभानन रक्षिता [होय], तो, हे जन हो, इंद्र [असें समजा].

5. He the sublime one about whom they ask, 'where is he?' and about whom they say, 'he is not,' that one deprives the enemy of the wealth like a deceitful [gambler]. Have ye faith in him. That, o people, is Indra.

6. He who is the mover of the rich, who [is] the [mover] of the poor, who [is the mover] of the worshipper [and] of the prayerful poet, who [is] the ready protector of him that has joined the pressing stones and has extracted the Soma,—that, o people, is Indra.

एक लक्ष असा संख्यावाचक अर्थ घेणें योग्य आहे कीं नाहीं अशी शंका निघते. पण दुसरा कोणताहि अर्थ घेतला तरी येथें जुळेल असा दिसत नाहीं.

५. 'ज्याविषयीं कितीएक, तुम्हीं परात्पर इंद्र म्हणतां तो कोठें आहे, असें विचारतात, आणि ज्याविषयीं तो तुमचा इंद्र नाहींच असें दुसरे म्हणतात, आणि असें असतांहि ज्याच्या साहायानें युद्धांत मोठा जय येऊन शत्रूंची संपत्ति विजयी वीराच्या हातीं येते, तो इंद्र होय, असा विश्वास ठेवा'.

६. 'ग्रावे जोडणाऱ्या' = 'युक्तग्राव्णः'. म्हणजे सोम काढण्यासाठीं जो दगडाचा एक प्रकारचा घाटगा असे तो ज्याणें सिद्ध केला आहे असा, म्हणजे यजमान.

यस्याश्वा॑सः प्रदि॒शि यस्य॒ गावो॒ यस्य॒ ग्रामा॒ यस्य॒ विश्वे॒ रथा॑सः।
यः सूर्यं॒ य उ॒षसं॑ ज॒जान॒ यो अ॒पां ने॒ता स जना॑स॒ इन्द्रः॑ ॥ ७ ॥

यस्य॑ । अश्वा॑सः । प्र॒ऽदि॒शि । यस्य॑ । गावः॑ । यस्य॑ । ग्रामाः॑ । यस्य॑ । विश्वे॑ । रथा॑सः ।

यः । सूर्य॑म् । यः । उ॒षस॑म् । ज॒जान॑ । यः । अ॒पाम् । ने॒ता । सः । ज॒ना॒स॒ः । इन्द्रः॑ ॥ ७ ॥

यं क्रन्द॑सी सं॒यती वि॒ह्वये॑ते परेऽवर उ॒भया॑ अ॒मित्राः॑ ।
स॒मा॒नं चि॒द्रथ॑मातस्थि॒वांसा॒ नाना॑ हवेते॒ स जना॑स॒ इन्द्रः॑ ॥ ८ ॥

यम् । क्रन्द॑सी॒ इति॑ । सं॒यती इति॑ स॒म्ऽय॒ती । वि॒ह्वये॑ते॒ इति॑ वि॒ऽह्वये॑ते । परे॑ । अव॑रे । उ॒भयाः॑ । अ॒मित्राः॑ ।

स॒मा॒नम् । चि॒त् । रथ॑म् । आ॒त॒स्थि॒ऽवांसा॑ । नाना॑ । ह॒वे॒ते इति॑ । सः । ज॒ना॒स॒ः । इन्द्रः॑ ॥ ९ ॥

भाषायाम्.

७. यस्य प्रदिशि (=अनुशासने) [विश्वे] अश्वासः (=अश्वाः) यस्य [प्रदिशि] [विश्वा] गावः यस्य [प्रदिशि] विश्वे ग्रामाः यस्य [प्रदिशि] विश्वे रथासः (=सर्वे रथाः) यः सूर्यं यश् [च] उषसं जजान यः अपां नेता (=उदकानां प्रेरकः स्वामी) [भवति] स हे जनासः (=जनाः), इन्द्र [इति जानीत] ॥

८. यं क्रन्दसी (=द्वौ सिंहनादौ) संयती (=युद्धार्थं संगच्छमाने सती=युद्धार्थं संगच्छमानाभ्यां सेनाभ्यां कृते) विह्वयेते (=विविधं ह्वयतः साहाय्यार्थं) [यं] परे अवरे (=परपार्श्वस्थाः समीपपार्श्वस्था इति) उभया अमित्राः (=उभयविधाः परस्परशत्रव) [आह्वयन्ति] [यं] समानं चित् रथम् आतस्थिवांसा (=एकमेव रथमातस्थिवांसौ=एकमेव मनोरथं धारयन्तौ) नाना हवेते (=प्रत्येकं तस्यैकस्यैव मनोरथस्य पूरणार्थं पृथगाह्वयतः)– स हे जनासः (=जनाः), इन्द्र [इति जानीत]॥

७. ज्याच्या आज्ञेंत [सर्व] अश्व, ज्याच्या [आज्ञेंत] [सर्व] गाई, ज्याच्या [आज्ञेंत सर्व] ग्राम, ज्याच्या [आज्ञेंत] सर्व रथ, जो सूर्याला [आणि] जो उषेला उत्पन्न करिता झाला, जो उदकांचा नायक, तो हे जन हो, इंद्र [असें समजा].

८. ज्याला सिंहनाद करणाऱ्या [आणि] परस्पर भिडणाऱ्या उभय सेना हाका मारितात, पलीकडचे [आणि] आलीकडचे असे उभय शत्रु [हाका मारितात], [ज्याला] एकाच रथावर बसलेले दोघेजण आपआपल्या बाजूला बोलावितात, तो हे जन हो, इंद्र [असें समजा].

7. He at whose command [are] [all] horses, at whose [command] [are] [all] cows, at whose [command] [are] [all] villages, at whose [command] [are] all chariots, he who created the sun, he who [created] the dawn, who [is] the master of the waters–that, o people, is Indra.

8. He whom both the war-cries, joining battle, each invoke for help; [whom] both enemies, those there and these here, [each invoke for help]; [whom] two persons aiming at the same object call to help from different sides,—that, o people, is Indra.

---

७. 'उदकांचा नायक' = 'अपां नेता.' म्हणजे उदकें ज्याच्या आज्ञेंत आहेत तो.

८. 'परस्परांवर जय मिळावा म्हणून एकमेकांशीं लढणाऱ्या सेनांचे जे सिंहनाद अथवा जयशब्द 'जय जय इंद्र इ०,' त्यांहींकरून जो बोलाविला जाणारा, ज्याला परस्परांचे शत्रु आपआपल्या जयासाठीं बोलावितात, तो इंद्र होय.'

या ऋचेंत क्रंदस् आणि संयत् हे नपुंसक शब्द किंचित् कठिण आहेत आणि 'रथ' शब्दाचा अर्थ मनोरथ असा करावा लागतो,याशिवाय यांत कांहीं कठिण नाहीं. आम्हीं मराठी भाषांतर केवळ अक्षरास न अनुसरतां अभिप्रायास अनुसरून केलें आहे.

'पलीकडचे आणि आलीकडचे' = 'परे अवरे'. म्हणजे लढाईंत समोरासमोर उभे राहिलेले.

'एकाच रथावर बसलेले' = 'समानं रथम् आतस्थिवांसा.' म्ह. एकच मनोरथ धारण करणारे.

यस्मान्न ऋते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत्स जनास इन्द्रः ॥९॥

यस्मात् । न । ऋते । विऽजयन्ते । जनासः । यम् । युध्यमानाः । अवसे । हवन्ते ।

यः । विश्वस्य । प्रतिऽमानम् । बभूव । यः । अच्युतऽच्युत् । सः । जनासः । इन्द्रः ॥ ९ ॥

यः शश्वतो मह्येनो दधानानमन्यमानाञ्छर्वा जघान ।
यः शर्धते नानुददाति शृध्यां यो दस्योर्हन्ता स जनास इन्द्रः ॥ १० ॥ ८ ॥

यः । शश्वतः । महि । एनः । दधानान् । अमन्यमानान् । शर्वा । जघान ।

यः । शर्धते । न । अनुऽददाति । शृध्याम् । यः । दस्योः । हन्ता । सः । जनासः । इन्द्रः ॥ १० ॥ ८ ॥

भाषायाम्.

९. यस्मादृते जनासः (=जना) न विजयन्ते (=विजयं न प्राप्नुवन्ति) यं युध्यमानाः (=युद्धं कुर्वाणा जना) अवसे हवन्ते (=रक्षणाय आह्वयन्ति) यो विश्वस्य (=सर्वस्य जगतः) प्रतिमानं (=मानं) बभूव यः अच्युतच्युत् (=अच्युतानां क्षयरहितानां पर्वतादीनामपि च्यावयिता) [भवति] स हे जनासः (=जनाः), इन्द्र [इति जानीत] ॥

१०. यो महि एनो दधानान् (=महत् पापं विदधानान् कुर्वाणान्) अमन्यमानान् (=इन्द्रमपूजयतः) शश्वतः (=बहून् क्रमेण) शर्वा जघान (=वज्रेण हतवान्) यः शर्धते (=बलं कुर्वते=बलवानस्मीति गर्वं कुर्वते) शृध्यां (=बलं) नानुददाति (=आनुकूल्येन न ददाति) यश् [च] दस्योर्हन्ता (=शत्रोर्घातको) [भवति] स हे जनासः (=जनाः), इन्द्र [इति जानीत] ॥

९. ज्याच्या शिवाय लोकांला जय मिळत नाहीं, ज्याला [लोक] युद्ध करीत असतांना रक्षणासाठीं बोलावितात, जो सकळ विश्वाचें प्रतिमान झाला आहे, जो अचलांलाहि हालविणारा, तो हे जन हो, इंद्र [असें समजा].

१०. जो मोठें पाप करणारे [आणि] उपासना न करणारे बहुत जन यांस वज्रानें सतत मारिता झाला, जो बळाचा डौल घालणाऱ्या [अनुपासका]ला बळ देत नाहीं, जो दस्यूला मारणारा, तो हे जन हो, इंद्र [असें समजा].

9. He without whom people do not conquer, whom those that are fighting invoke for help, who has become the standard of all, who is the shaker of that which is unshakable,— that, o people, is Indra.

10. He who killed with the thunderbolt one after another many who committed sin [and] who made no worship, who gives no strength to him that boasts his strength, who is the killer of the enemy—that, o people, is Indra.

---

९. 'प्रतिमान' सू. ५२मं. १३ याजवरील टीप पहा.

१०. 'दस्यूला मारणारा' =' दस्योर्हन्ता.' म्हणजे अनार्य जातीचा जो शत्रु त्याला नाहींसा करणारा.

यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत् ।
ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः॥११॥

यः । शम्बरम् । पर्वतेषु । क्षियन्तम् । चत्वारिंश्याम् । शरदि । अनुऽअविन्दत् ।
ओजायमानम् । यः । अहिम् । जघान । दानुम् । शयानम् । सः । जनासः । इन्द्रः ॥ ११ ॥

यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्त सिन्धून् ।
यो रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहन्तं स जनास इन्द्रः ॥ १२ ॥

यः । सप्तऽरश्मिः । वृषभः । तुविष्मान् । अवऽअसृजत् । सर्तवे । सप्त । सिन्धून् ।
यः । रौहिणम् । अस्फुरत् । वज्रऽबाहुः । द्याम् । आऽरोहन्तम् । सः । जनासः । इन्द्रः ॥ १२ ॥

भाषायाम्.

११. यः पर्वतेषु क्षियन्तम् (=इन्द्रभिया बहून् संवत्सरान् प्रच्छन्नो भूत्वा पर्वतगुहासु निवसन्तं) शम्बरम् (=एतन्नामानमसुरं) चत्वारिंश्यां शरदि (=चत्वारिंशे वर्षे) अन्वविन्दत् (=अन्विष्यालभत) यश् [च] ओजायमानं (=बलमाचरन्तम्) अहिं दानुम् (=असुरं) शयानं (=शयनं कुर्वन्तं) जघान (=हतवान्) स हे जनासः (=हे जनाः), इन्द्र [इति जानीत]॥

१२. सप्तरश्मिः (="सप्तसंख्याकाः पर्जन्या रश्मयो यस्य" स) वृषभः (=वीरस्) तुविष्मान् (=बलवान्) यः सप्त सिन्धून् (=मेघोदकरूपा नदीः) सर्तवे अवासृजत् (=सर्तुमवासृजत्=अवसृज्यावाहयत्) वज्रबाहुः (=वज्रं बाह्वोर्गृहीत्वा) रौहिणं [नामासुरं] द्याम् आरोहन्तं [सन्तम्] अस्फुरत् (=अहन्) स हे जनासः (=हे जनाः), इन्द्र [इति जानीत]॥

सप्तरश्मिः सप्तसंख्याकाः पर्जन्या रश्मयो यस्य । ते च रश्मयो वराहवः स्वतपसो विद्युन्महसो धूपयः श्वापयो गृहमेधाश्चेत्येते ये च मेऽशिमिविद्विषः पर्जन्याः सप्त पृथिवीमभिवर्षन्ति वृष्टिभिरिति तैत्तिरीयारण्यके ह्याम्नाताः । इति सायणः ॥

११. जो पर्वतांत वास करणाऱ्या शंबराला चाळिसाव्या वर्षीं शोधून काढिता झाला, [आणि] जो बळाचा डौल घालणाऱ्या असुर अहीला पडून राहिला असतां मारिता झाला– तो हे जन हो, इंद्र [असें समजा].

१२. जो सप्तरश्मि, बळवान्, प्रतापी [होत्साता] सप्त सिन्धूंला सोडून देऊन वाहविता झाला, जो द्युलोकावर चढणाऱ्या रौहिणाला हातांत वज्र घेऊन मारून टाकिता झाला, तो हे जन हो, इंद्र [असें समजा].

11. He who found, out in the fortieth year Śambara that dwelt in the mountains, [and] who killed the demon serpent that was lying down [and] that made an effort to show his strength—that, o people, is Indra.

12. He who, being seven-rayed, the powerful Lord, let down the seven rivers to flow, [and] who with the thunderbolt in his hands slew Rauhiṇa ascending heaven—that, o people, is Indra.

---

११. ‘शंबर’. सू. ५१ मं. ६ आणि टीप पहा. येथें ‘अहि’ आणि ‘दानु’ (असुर) हीं पदेंहि शंबरालाच लाविलीं आहेत असें दिसतें.

१२. ‘ सप्तरश्मि ’ म्हणजे सायणांनीं अर्थ काय केला आहे तो भाषेखालीं पहा. वस्तुतः सात लगाम हातांत घेऊन रथ हाकणारा असा अर्थ दिसतो. रथाला सप्तरश्मि असें म्हटलेलीं स्थळें पुष्कळ आहेत आणि तेथें तर सात लगाम असलेला हा अर्थ उघड आहे.

‘ सप्त सिंधूंला ’ म्हणजे मेघोदकरूप नद्यांला. सू. ३५ मं. ८ आणि टीप पहा.

‘रौहिण’ सू. १०३ मं. २ आणि टीप पहा.

द्यावा॑ चि॒दस्मै॑ पृथि॒वी न॑मेते॒ शुष्मा॑च्चि॒दस्य॒ पर्व॑ता भयन्ते ।
यः सो॑म॒पा नि॑चि॒तो वज्र॑बाहु॒र्यो वज्र॑हस्तः॒ स ज॑नास॒ इन्द्रः॑ ॥ १३ ॥

द्यावा॑ । चि॒त् । अ॒स्मै॒ । पृ॒थि॒वी इति॑ । न॒मे॒ते इति॑ । शुष्मा॑त् । चि॒त् । अ॒स्य॒ । पर्व॑ताः । भ॒य॒न्ते॒ ।
यः । सो॒म॒ऽपाः । नि॒ऽचि॒तः । वज्र॑ऽबाहुः । यः । वज्र॑ऽहस्तः । सः । ज॒ना॒सः॒ । इन्द्रः॑ ॥ १३ ॥

यः सु॒न्वन्त॒मव॑ति॒ यः पच॑न्तं॒ यः शंस॑न्तं॒ यः श॑शमा॒नमू॒ती ।
यस्य॒ ब्रह्म॒ वर्ध॑नं॒ यस्य॒ सोमो॒ यस्ये॒दं राधः॒ स ज॑नास॒ इन्द्रः॑ ॥ १४ ॥

यः । सु॒न्वन्त॑म् । अव॑ति । यः । पच॑न्तम् । यः । शंस॑न्तम् । यः । श॒श॒मा॒नम् । ऊ॒ती ।
यस्य॑ । ब्रह्म॑ । वर्ध॑नम् । यस्य॑ । सोमः॑ । यस्य॑ । इ॒दम् । राधः॑ । सः । ज॒ना॒सः॒ । इन्द्रः॑ ॥ १४ ॥

भाषायाम्.

१३. अस्मै द्यावा पृथिवी चित् (=द्यावापृथिव्यावपि) नमेते (=स्वयमेव प्रह्वीभवतः)। अस्य शुष्मात् (=बलात्) पर्वताश्चित् (=पर्वता अपि) भयन्ते (=बिभ्यति)। यः सोमपाः (=सोमस्य पाता) निचितः (=दृढाङ्गो) वज्रबाहुः (=वज्रो बाहौ यस्य स) यो वज्रहस्तः (=वज्रो हस्ते यस्य स)– स हे जनासः (=जनाः), इन्द्र [इति जानीत] ॥

१४. यः सुन्वन्तं (=सोमम् अभिषुण्वन्तं) यो [हविः] पचन्तं यः शंसन्तं (=शस्त्राण्युच्चारयन्तं) यः शशमानं (=स्तोत्रं कुर्वाणम्) ऊती (=साहाय्येन) अवति (=रक्षति) यस्य ब्रह्म (=स्तोत्रं) वर्धनं (=वृद्धिकरं) [भवति] यस्य सोमो यस्य [च] इदं राधः (=अस्मदीयं पुरोडाशादिलक्षणम् अन्नं) [वृद्धिकरं भवति] स हे जनासः (=जनाः), इन्द्र [इति जानीत] ॥

१३. द्यू आणि पृथिवी सुद्धा ह्याला नमन करितात, ह्याच्या प्रतापाला पर्वत सुद्धा भितात. जो सोमपान करणारा, बळकट, वज्रबाहु, ज्याच्या हातांत वज्र आहे, तो हे जन हो, इंद्र [असें समजा].

13. To him even heaven and earth bend themselves. Even the mountains tremble before his might. He who is a drinker of the Soma, mighty, wielder of the thunderbolt, who is armed with the thunderbolt—that, o people, is Indra.

१४. जो सोम काढणाऱ्याला रक्षितो, जो [हवि] शिजविणाऱ्याला, जो रक्षण करण्याविषयीं प्रार्थना करणाऱ्याला, जो स्तोत्र करणाऱ्याला, कृपेनें [रक्षितो], ज्याला स्तोत्र वृद्धिकर होतें, ज्याला सोम [वृद्धिकर होतो], ज्याला हें हविरन्न [वृद्धिकर होतें], तो हे जन हो, इंद्र [असें समजा].

14. He who protects the extractor of [Soma], who [protects] him who cooks the [oblation], who [protects] the prayerful, who [protects] with his help the poet that praises him, to whom a hymn brings strength, to whom the Soma [and] to whom this sacrificial food brings strength—that, o people, is Indra.

---

१३. 'जो सोमपान करणारा'=' सोमपाः'. सोमपानानें बळ अतिशय वाढत असतें म्हणून सोमपा म्ह. अतिशय बळवान् असा अर्थ येथें समजायाचा आहे.

१४. ' स्तोत्र वृद्धिकर होतें'=' ब्रह्म वर्धनम्.' स्तोत्र, सोम हविरन्न इत्यादि ज्याला अर्पण केलें असेल तो देव बळवान् होतो, असें ऋग्वेदांत जिकडे तिकडे आढळतें.

यः सुन्वते पचते दुध्र आ चिद्वाजं दर्दर्षि स किलासि सत्यः ।
वयं त इन्द्र विश्वह प्रियासः सुवीरासो विदथमा वदेम॥१५॥९॥

यः । सुन्वते । पचते । दुध्रः । आ । चित् । वाजम् । दर्दर्षि । सः ।
किल । असि । सत्यः ।
वयम् । ते । इन्द्र । विश्वह । प्रियासः । सुऽवीरासः । विदथम् । आ ।
वदेम ॥ १५ ॥ ९ ॥

भाषायाम्.

१५. [हे इन्द्र], दुध्रः (=दुर्धरो) यः सुन्वते पचते आ चित् (=सोमम् अभिषुण्वत एव हविरन्नं च पचत एव जनाय) वाजं दर्दर्षि (=बलम् अतिशयेन ददासि) स [त्वं] किल सत्योसि (=यथा त्वमसीति जना आहुस्तथा सत्यमेव विद्यसे) । [तस्मात्] हे इन्द्र, ते प्रियासः (=तुभ्यं प्रीतिकरा) वयं सुवीरासः (=कल्याणपुत्रपौत्राः सन्तो) विश्वह (=सर्वेष्वहःसु) विदथम् आ वदेम (=स्तोत्रं ब्रूयाम) ॥

सूक्तम् १३–२०४.

गृत्समद ऋषिः । इन्द्रो देवता । अन्त्या त्रिष्टुप् । शिष्टं सूक्तं जागतम् ॥

ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते ।
तदाहना अभवत्पिप्युषी पयोऽंशोः पीयूषं प्रथमं तदुक्थ्यम् ॥१॥

ऋतुः । जनित्री । तस्याः । अपः । परि । मक्षु । जातः । आ । अविशत् । यासु । वर्धते ।
तत् । आहनाः । अभवत् । पिप्युषी । पयः । अंशोः । पीयूषम् । प्रथमम् । तत् । उक्थ्यम् ॥ १ ॥

भाषायाम्.

१. ऋतुः (=वर्षाख्यः कालः) [सोमस्य] जनित्री (=जनयित्री) [भवति] । तस्याः परि जातः (=तस्याः सकाशाज्जातो) मक्षु (=क्षिप्रम्) अप आ अविशत् (=उदकानि प्राविशत्) यासु [अप्सु] [स सोमो] वर्धते । तत् (=ततः) पयः पि-

१९. [हे इन्द्रा], दुर्धर होत्साता जो तूं सोम काढणाऱ्यालाच आणि [हविरन्न] शिजविणाऱ्यालाच बळाढ्य करितोस, तो तूं आहेस खरा यांत संशय नाहीं. हे इंद्रा, तुला प्रिय होत्साते आम्ही शूर पुत्रपौत्रांसहित नित्य स्तोत्र म्हणूं असें कर.

15. Thou who being irresistible grantest strength in plenty to him alone who extracts [the Soma] and to him alone who cooks [the oblation], dost doubtless exist. May we, o Indra, dear to thee daily sing the hymn, accompanied by brave progeny.

---

१५. उपसंहार. 'इंद्र आहे याची प्रतीति सोम काढून अर्पणाऱ्या आणि हवि शिजवून घालणाऱ्या उपासकांला येते त्यापेक्षां निदान आम्हांस तरी तुझ्या अस्तित्वाविषयीं संशय नाहीं; त्यापेक्षां हे इंद्रा, आम्हीं तुला प्रिय व्हावें आणि तुझ्या प्रसादानें आमच्या पोटीं शूर पुत्रपौत्र उपजावे आणि त्यांसहित, तुझी आम्ही स्तुति गावी असें कर.' असें तात्पर्य.

सूक्त १३–२०४.

ऋषि–गृत्समद. देवता–इन्द्र. वृत्त–तेरावी ऋचा त्रिष्टुभ्; शिवाय सर्व सूक्त जगती वृत्ताचें.

१. ऋतु आई [होय]. तिजपासून जन्मतांच तो एकदम उदकांत प्रवेश करिता झाला, कीं ज्यांत तो वाढतो. त्यावरून जिणें रसाला पुष्ट केलें आहे अशी ती [सोमलता] सोमरस काढण्यासाठीं कुटावयास योग्य झाली. सोमलतेचा तो उत्कृष्ट रस वाखाणण्यास योग्य [होय].

Hymn. 13—204.

To *Indra*. By *Gṛitsamada*. Metre —*Jagatî*, except in the last verse where it is *Trishṭubh*.

1. The season [is its] mother. So soon as it was born to her it entered the waters in which it grows. Then having fattened the juice [the plant] became fit to be crushed. That first juice of the Soma-plant [is] praiseworthy.

सध्रीमा यन्ति परि बिभ्रतीः पयो विश्वप्स्न्याय प्र भरन्त भोजनम् ।
समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः॥२॥
सध्री । ईम् । आ । यन्ति । परि । बिभ्रतीः । पयः । विश्वऽप्स्न्याय ।
प्र । भरन्त । भोजनम् ।
समानः । अध्वा । प्रऽवताम् । अनुऽस्यदे । यः । ता । अकृणोः ।
प्रथमम् । सः । असि । उक्थ्यः ॥ २ ॥

प्युषी (=रसं वर्धितवती) [सोमौषधी] आहना अभवत् (=अभिषोतव्याभवत्) । अंशोस्तत् प्रथमं पीयूषं (=सोमलतायाः स प्रथमो रस) उक्थ्यं (=स्तवनीयं) [भवति]॥

दुर्बोधकल्पैषा सायणेनैवं व्याख्याता । ऋतुर्वर्षाख्यः कालो जनित्री सोमस्य जनयित्री जननी भवति । तस्याः परि तस्या जनन्याः सकाशाज्जातः सोमोऽप उदकानि मक्षु शीघ्रमाविशत् । यास्वप्सु सोमो वर्धते ता अविशदित्यन्वयः । तस्मादप्सु प्रविष्टत्वात् सोम आहना आहन्तव्योऽभिषोतव्यो भवति । आहना इति सकारान्तमिदं पदम् । तथा च मन्त्रवर्णः । ये ते मदा आहनसो विहायस इति । या चांशुरूपा सोमलता पयः सारभूतं पिप्युषी वर्धयन्त्यभवत् । ...... अंशोस्तस्याः सोमलतायाः पीयूषं रसभूतं पय उक्थ्यं प्रशस्यं हविरिन्द्रस्य भवति । इति ॥

भाषायाम्.

२. पयः परि बिभ्रतीः (=परितः सर्वत उदकम् आनयन्त्यो) [? नद्यः] सध्री (=सह) ईम् आ यन्ति (=तं वक्ष्यमाणं समुद्रं सर्वतो गच्छन्ति) [ता] विश्वप्स्न्याय (=? विश्वासाम् अपाम् आश्रयभूताय समुद्राय) भोजनं प्र भरन्त (=पयोरूपम् अन्नं प्रकर्षेण संपादयन्ति) प्रवतां (=निम्नगानाम्) अनुष्यदे (=अनुष्यन्दनाय) समानो अध्वा (=एक एव मार्गो) [भवति] । यस्ता (=तानि=एतानि वीरकर्माणि) प्रथमम् अकृणोः (=अकरोः) स [त्वम्] उक्थ्योसि (=प्रशस्यो भवसि) ॥

अनेका नद्यः सर्वत उदकं बिभ्रत्यः समुद्रमेकं प्रति गच्छन्ति इत्येतद् वीरकर्म यस्मात्त्वमकरोस्तस्मात्त्वं प्रशस्यो भवसीति भावः ॥

---

१. ह्या ऋचेंत सोमाविषयीं सांगितलें आहे. पण ऋचा कांहींशी दुर्बोध आहे. सायणांनीं सांगितल्या अर्थाप्रमाणें तात्पर्य असें दिसतें कीं, ' ज्या ऋतूंत (म्हणजे पावसाळ्यांत) सोमवल्ली तयार होते तो ऋतु सोमाची आई आहे. तो उत्पन्न होतांच वल्लीच्या आंगांत असलेल्या पाण्यांत शिरतो. नंतर तें सोमयुक्त जें आंगचें

२. चोहींकडून पाणी आणणाऱ्या ज्या त्या एकदम त्या [समुद्रा]प्रत जातात, सर्वाशय [समुद्रा]प्रत भोजन घेऊन जातात. प्रवाहांला वाहण्याकरितां एकच मार्ग [आहे]. हें सर्व जो तूं प्रथम करिता झालास, तो तूं स्तुत्य आहेस.

2. Carrying water from all sides they run to it (the sea) simultaneously —they carry food for the Shelter of All. Common is the road of the streams to glide along. Thou who didst these things first art deserving of praise.

पाणी तें पुष्ट झालें म्हणजे वल्ली सोमरस काढून घेण्याजोगी होते. तेव्हां ती वल्ली पिळल्यानंतर जो सोमरस निघतो तो उत्तम असतो.'

२. या सूक्तांतील इतर ऋचांप्रमाणें हीहि कठिण आहे. सायणांनीं केलेल्या अर्थाप्रमाणें भावार्थ असा आहे कीं, 'सर्व बाजूंनीं पाणी वाहून आणणाऱ्या नद्या एकट्या समुद्राप्रत ज्या तुझ्या पराक्रमानें एका हेतूनें जात असतात, तो तूं स्तवनीय आहेस.'

असा भावार्थ दिसतो तरी त्याचा खरेपणा 'विश्वप्स्न्य' या शब्दाचा अर्थ समुद्र असा होईल किंवा नाहीं या संशयावर अवलंबून आहे.

अन्वेको वदति यद्ददाति तद्रूपा मिनन्तदपा एक ईयते ।
विश्वा एकस्य विनुदस्तितिक्षते यस्ताकृणोः प्रथमं सास्युक्थ्यः॥३॥
अनु । एकः । वदति । यत् । ददाति । तत् । रूपा । मिनन् । त-
तुऽअपाः । एकः । ईयते ।
विश्वाः । एकस्य । विऽनुदः । तितिक्षते । यः । ता । अकृणोः । प्रथ-
मम् । सः । असि । उक्थ्यः ॥ ३ ॥
प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते ।
असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः॥४॥
प्रऽजाभ्यः । पुष्टिम् । विऽभजन्तः । आसते । रयिम्ऽइव । पृष्ठम् ।
प्रऽभवन्तम् । आऽयते ।
असिन्वन् । दंष्ट्रैः । पितुः । अत्ति । भोजनम् । यः । ता । अकृणोः ।
प्रथमम् । सः । असि । उक्थ्यः ॥ ४ ॥

भाषायाम्.

३. एको यद् ददाति तद् अनुवदति । रूपा मिनन् (=रूपाणि हिंसन्) एकस् तदपाः (=रूपहिंसनं कर्म यस्य स एक) ईयते (=इतस्ततो गच्छति) । एकस्य विश्वा विनुदः (=सर्वान् विक्षेपान्) तितिक्षते (=सहते) । यस्ता प्रथमम् अकृणोः (=अकरोः) स [त्वम्] उक्थ्योसि (=प्रशस्यो भवसि) ॥

इत्यक्षरार्थः । सायणस्तु दुर्बोधामिमामेवं व्याचष्टे । यजमानो यद्धविर्देवेभ्यो ददाति तदेको होतानुवदति । याज्यापुरोनुवाक्याभ्यां देवताः स्मारयति । एकोऽध्वर्यू रूपा पश्वादीनां रूपाणि मिनन् हिंसन् तदपास्तद्विशसनाख्यमपः कर्म यस्य तादृशः सन् ईयते । देवयजने सर्वत्र गच्छति । एकस्याध्वर्योर्विश्वा विनुदः सर्वाणि तत्कर्तृकाणि विक्षेपणरूपाणि कर्मवैगुण्यानि तितिक्षते । तद्योग्यप्रायश्चित्तकरणेन ब्रह्मा सहते ।...... तानि हविःप्रदानादीनि कर्माणि यस्त्वमकृणोः । अकारयः स त्वमुक्थ्योऽसि । इति ॥

४. आयते (=आगच्छते=अतिथये) पृष्ठं प्रभवन्तं रयिम् इव (=यथा तस्मै "धारकं" "बहुभरणसमर्थं" च धनं ददति तद्वत्) प्रजाभ्यः (=जनेभ्यः) पुष्टिं विभजन्तः (=पोषकं धनं प्रयच्छन्त) आसते (=निवसन्ति) । दंष्ट्रैरसिन्वन् (=द-

३. एक जें देतो त्याजबरोबर तो बोलतो. रूपनाश करणें हें ज्याचें काम आहे असा एकजण तें काम करीत इकडे तिकडे फिरतो. एकाचे सर्व मार सहन करितो. हें सर्व जो तूं प्रथम करिता झालास, तो तूं स्तुत्य आहेस.

४. अतिथीला धारक [आणि] बहुभरणसमर्थ धन दिल्याप्रमाणें प्रजांला संपत्ति देत बसतात. दांतांनीं चावल्याशिवाय बापाचें अन्न खातो. हें सर्व जो तूं प्रथम करिता झालास, तो तूं स्तुत्य आहेस.

3. One speaks along with that which he gives. One goes about destroying forms, he whose business it is to do so. [He] bears all the blows of one. Thou who didst these things first art deserving of praise.

4. They sit distributing food to people like giving to a guest wealth that is sustaining and full of nourishing plenty. He swallows the food of [his] father without grinding it with his teeth. Thou who didst these things first art deserving of praise.

---

३. ही ऋचा सुद्धा कठिण आहे. अक्षरार्थ बराच सोपा आहे, तो दिला आहे. पण ‘एक’ ‘एक’ जो सांगितला आहे तो कोण हें गूढ आहे. पहिल्या तीन पादांतून प्रत्येक पादांत कांहींएक मोठ्या सृष्टिकार्याविषयीं अथवा अति बलवान् पदार्थाविषयीं सांगितलें आहे असें दिसतें. कदाचित् भावार्थ असा असेल काय? ‘मेघ पाणी देतो त्याजबरोबर तो गर्जना करितो. सविता सर्व प्राण्यांस म्हातारे करीत करीत सदैव चालत असतो. इंद्र एकटाच वृत्राचे प्रहार सहन करीत असतो. हें सर्व इंद्राच्या प्रतापामुळें होतें. तर त्याकरितां तो स्तुत्य आहे.’

‘विदुद्’ शब्द दुसरे ठिकाणीं कोठें आलेला नाहीं.

४. ही ऋचा तरी कठिणच आहे. ‘बसतात’ आणि ‘खातो’ यांचे कर्ते कोण तें समजत नाहीं. ज्याप्रमाणें पूर्वीच्या ऋचेंत ‘एक’ सांगितला आहे तो कोण हें समजत नाहीं, तसाच यांतील क्रियापदाचाहि कर्ता कोण आहे हें गूढ आहे. त्या पूर्वीच्या (दुसऱ्या) ऋचेंतहि पहिल्या तीन पादांत कर्ता कोण आहे हें गूढ आहे. ऋषीनें उखाण्यासारिखा अर्थ जाणविलेला दिसतो. तेव्हां अर्थ उघड न समजणें यांत नवल नाहीं.

आम्ही अर्थ पदशः केला आहे. आणि सायणाची व्याख्या भाषेखालीं उतरून घेतली आहे.

अधाकृणोः पृथिवीं संदृशे दिवे यो धौतीनामहिहन्नारिणक्पथः ।
तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन्त्सास्युक्थ्यः
॥ ५ ॥ १० ॥

अध । अकृणोः । पृथिवीम् । सम्ऽदृशे । दिवे । यः । धौतीनाम् । अहिऽहन् । अरिणक् । पथः ।

तम् । त्वा । स्तोमेभिः । उदऽभिः । न । वाजिनम् । देवम् । देवाः । अजनन् । सः । असि । उक्थ्यः ॥ ५ ॥ १० ॥

न्तैरसंखादन्=चर्वणमकृत्वैव) पितुर्भोजनमत्ति (=पितुरन्नं भक्षयति) । यस्ता प्रथममकृणोः (=अकरोः) स [त्वम्] । उक्थ्योसि (=प्रशस्यो भवसि) ॥

इत्यक्षरार्थः । अभिप्रायस्तु दुर्बोधः । सायण एवं व्याचष्टे । हे इन्द्र पुष्टिं त्वया दत्तं पोषकं धनं स्वकीयाभ्यः प्रजाभ्यो विभजन्तोऽस्यैतावदस्यैतावदिति विभागं कुर्वन्तो गृहमेधिन आसते । स्वस्वगृहेषु निवसन्ति । तत्र दृष्टान्तः । आयते गृहं प्रत्यागच्छतेऽतिथये पृक्षं धारकं प्रभवन्तं बहुभरणसमर्थं रयिं धनं यथा विभज्य प्रयच्छन्ति तद्वत् । असिन्वन् सेतुबन्धादिकं कर्म कुर्वन् लोकः पितुः पालयित्र्या दिवः सकाशादागतं भोजनमुदकं तत्कार्या ओषधीर्दंष्ट्रैर्दन्तैरत्ति । भक्षयति । यद्वा असिन्वन् अव्याप्रियमाणोऽग्निः पितुः पालकस्य यजमानस्य संबन्धि भोजनं हविर्लक्षणमन्नं दंष्ट्रैर्दन्तरूपैर्ज्वालैरत्ति । यस्ताकृणोरित्यादि सिद्धम् । इति सायणः ॥

भाषायाम्.

५. अध (=अपि च)पृथिवीं दिवे संदृशे अकृणोः (=पृथिवी द्युसदृशी यथा दृश्येत तथाकरोः =ज्योतिर्दानेन पृथिवीं द्युदर्शनाम् अकरोः) । हे अहिहन् (=वृत्रस्य हन्तरिन्द्र), यस् [त्वं] धौतीनां (=नदीनां मेघोदकलक्षणानां) पथः अरिणक् (=अरेचयः=वृत्रहननेन गन्तुं योग्यानकरोत्) तं त्वा देवाः (=?) उदभिर्वाजिनं न (=उदकैरश्वमिव) स्तोमेभिः (=स्तोत्रैः) अजनन् (=अजनयन्)। स [त्वम्] उक्थ्योसि (=प्रशस्यो भवसि) ॥

देवाः स्तोतारस्तं तादृशं देवं त्वां स्तोमेभिः स्तोत्रैरजनन् । तत्र दृष्टान्तः । उदभिर्न वाजिनम् । यथा वाजिनमश्वमुदभिरुदकैर्वर्धयन्ति तद्वत् । इति सायणः ॥

५. आणि तूं पृथिवी द्यू सारिखी दिसे असें करिता झालास. हे अहिघातका, जो तूं नद्यांचे मार्ग मोकळे करिता झालास त्या तुज देवाला, उदकांनीं अश्वाला उत्पन्न केल्याप्रमाणें, देव स्तोत्रांनीं उत्पन्न करिते झाले. तो तूं स्तुत्य आहेस.

5. And thou didst make the earth look like the heaven, thou, o killer of the serpent, who didst free the channels of the rivers. The gods begot thee with hymns even as a horse with the waters. Thou art therefore deserving of praise.

---

५. हाहि मंत्र कठिण आहे परंतु दुसऱ्या पादांतील उपमा खेरीज करून एकंदर भावार्थ सोपा आहे. 'ज्या इंद्रानें वृत्रहनन करून द्यूचा प्रकाश पृथिवीवर पाडिला, आणि अंतरिक्षांतील उदकें खालीं वाहविलीं, तो इंद्र स्तुतिपात्र आहे,' असें तात्पर्य.

देव उत्पन्न करिते झाले म्हणजे 'स्तोते उत्पन्न करिते झाले' असें सायण म्हणतात, आणि उत्पन्न करिते झाले म्हणजे स्तोत्रांनीं वाढविते झाले असें म्हणतात.

यो भोजनं च दयसे च वर्धनमार्द्रादा शुष्कं मधुमद्दुदोहिथ ।
स शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः ॥६॥

यः । भोजनम् । च । दयसे । च । वर्धनम् । आर्द्रात् । आ । शुष्कम् । मधुऽमत् । दुदोहिथ ।
सः । शेवऽधिम् । नि । दधिषे । विवस्वति । विश्वस्य । एकः । ईशिषे । सः । असि । उक्थ्यः ॥ ६ ॥

यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्य१वनीरधारयः ।
यश्चासमा अजनो दिद्युतो दिव उरुरूर्वाँ अभितः सास्युक्थ्यः ॥७

यः । पुष्पिणीः । च । प्रऽस्वः । च । धर्मणा । अधि । दाने । वि । अवनीः । अधारयः ।
यः । च । असमाः । अजनः । दिद्युतः । दिवः । उरुः । ऊर्वान् । अभितः । सः । असि । उक्थ्यः ॥ ७ ॥

भाषायाम्.

६. यस् [त्वं] भोजनं च वर्धनं च दयसे (=अन्नं च वृद्धिं च ददासि) [अपि च] आर्द्रात् आ [काण्डात्] शुष्कं मधुमत् (=अनार्द्रं माधुर्योपेतं व्रीह्यादिकं) दुदोहिथ (=दुग्धवानसि) स [त्वं] विवस्वति (=परिचरणवत्युपासके शेवधिं नि दधिषे (=धननिधिं स्थापयसि) । एकस् [त्वं] विश्वस्य (=सर्वस्य जगत) ईशिषे (=स्वामी भवसि) । स [त्वम्] उक्थ्योसि (=प्रशस्यो भवसि) ॥

७. यः पुष्पिणीश्च प्रस्वश्च (=पुष्पवतीः फलवतीश्च) अवनीः (=ओषधीर्) धर्मणा (=ऐश्वर्यकर्मणा) दाने (=क्षेत्रे) व्यधारयः (=विविधम् अस्थापयः) यश्च दिवः (=द्युलोकस्य) असमा दिद्युतः (=अद्वितीया विद्युतः) अजनः (=अजनयः) [यश्च] उरुः (=विस्तीर्णः सन्) ऊर्वान् (=उदकनिकायान्=समुद्रान्) अभितः (=सर्वतः) [अजनयः] स [त्वम्] उक्थ्योसि (=प्रशस्यो भवसि) ॥

६. जो तूं अन्न देतोस आणि वृद्धि [देतोस] आणि ओल्यापासून सुकें आणि गोड दोहतोस, तो तूं उपासकाच्या घरीं संपत्ति ठेवितोस. तूं एकला सर्वांचा स्वामी आहेस. तो तूं स्तुत्य आहेस.

६. Thou who givest both food and growth, and milkest that which is dry [and] sweet from that which is wet—thou dost place wealth in the house of the worshipper. Thou art the sole master of all. Thou art therefore deserving of praise.

७. जो तूं आपल्या करणीनें पुष्पवती आणि फलवती वनस्पतींस भूमीवर स्थापिता झालास, जो द्युपासून अनुपम विजा उत्पन्न करिता झालास, [आणि] महा विस्तीर्ण [असा जो तूं] विस्तीर्ण समुद्र [उत्पन्न करिता झालास], तो तूं स्तुत्य आहेस.

7. Thou who by thy order didst place in the field the blooming and fruitful plants, and who didst create the matchless thunderbolts of heaven, [and] thou who art vast didst create the deep seas —thou, [o Indra], art therefore, deserving of praise.

---

६. 'ओल्यापासून सुकें आणि गोड दोहतोस '=' आर्द्रात् आ शुष्कं मधुमत् दुदोहिथ.' म्हणजे 'ओल्या झाडापासून सुकें धान्य निर्माण करितोस ' असें सायण म्हणतात, तसें असेल.

७. 'ज्याणें शेतांत पुष्पांचीं आणि फळांचीं झाडें उत्पन्न केलीं, ज्याणें विद्युल्लता उत्पन्न केल्या, आणि ज्याणें समुद्र उत्पन्न केले तो तूं इंद्र स्तुतीस पात्र आहेस.' या मंत्रांत अडचण इतकी दिसते कीं, 'अवनी ' शब्दाचा मार्ग प्रवाह किंवा भूमि असा नेहमीचा अर्थ सोडून ओषधी असा अर्थ करावा लागतो.

यो नार्मरं सहवसुं निहन्तवे पृक्षाय च दासवेशाय चावहः ।
ऊर्जयन्त्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत्सास्युक्थ्यः ॥ ८ ॥

यः । नार्मरम् । सहऽवसुम् । निऽहन्तवे । पृक्षाय । च । दासऽवेशाय ।
च । अवहः ।
ऊर्जयन्त्याः । अपरिऽविष्टम् । आस्यम् । उत । एव । अद्य । पुरुऽ-
कृत् । सः । असि । उक्थ्यः ॥ ८ ॥

शतं वा यस्य दश साकमाद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ ।
अरज्जौ दस्यून्त्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः॥ ९ ॥

शतम् । वा । यस्य । दश । साकम् । आ । अद्यः । एकस्य । श्रुष्टौ ।
यत् । ह । चोदम् । आविथ ।
अरज्जौ । दस्यून् । सम् । उनप् । दभीतये । सुप्रऽअव्यः । अभवः ।
सः । असि । उक्थ्यः ॥ ९ ॥

भाषायाम्.

८. हे पुरुकृत् (=बहुवीर्यकर्मकारिन्) यः पृक्षाय च दासवेशाय च (=पृक्ष-नामकस्य कस्यचिदुपासकस्य दासवेशनामकस्य च अन्यस्योपासकस्य रक्षणाय) ऊर्ज-यन्त्याः (=बलवत्या वज्रधाराया) अपरिविष्टं (=कोशान्निष्कासितम्) आस्यम् (=अग्रं) निहन्तवे (=प्रहाराय) नार्मरं सहवसुम् (=एतन्नामकावसुरौ प्रति) अ-वहः (=प्रापयः) स [त्वम्] उतैवाद्य (=इदानीमपि) उक्थ्योसि (=प्रशस्यो भवसि)॥

९. यद्ध एकस्य श्रुष्टौ चोदम् आविथ (=यदा किल एकस्य कस्यचित् कवेरा-ह्वानवचनं श्रुत्वा तं कविं ररक्षिथ तदा) यस्य [तव] शतं वा दश [हरीन्] (=एक-सहस्रम् अश्वान्) साकं (=सहैव) आद्यः (=रथेबध्नाः=अयोजयः) [यस्त्वं] दभी-तये [नाम कस्मैचिदुपासकाय] दस्यून् (=अनार्यान् शत्रून्) अरज्जौ (=कारा-गृहे) सम् उनप् (=सम्यगहिंसः) [यश्च त्वं] सुप्राव्यो अभवः (=सुप्राविताभूः) स [त्वम्] उक्थ्योसि (=प्रशस्यो भवसि)॥

८. जो पृक्षाला आणि दासवेशाला रक्षण्यासाठीं प्रबळ वज्रधारेचें बाहेर काढिलेलें अग्र वध करण्यासाठीं नार्मराप्रत आणि सहवसूप्रत नेता झालास, तो तूं हे बहुपराक्रमकारी [इंद्रा], आजहि स्तुत्य आहेस.

९. त्वां एकाची हाक ऐकून कवीला रक्षिलें त्या प्रसंगीं ज्यापेक्षां तुझ्या रथाला एक हजार घोडे जोडिता झालास [आणि] तूं दभीतीसाठीं कारागृहीं दस्यूंचा वध करिता झालास, तूं फार सुलभ झालास, त्यापेक्षां तू स्तुत्य आहेस.

8. Thou, o achiever of great deeds, who for saving Priksha and Dâsaves'a didst bring the unsheathed point of the powerful thunderbolt to Nârmara and to Sahavasu for to strike, —thou, therefore, art even today deserving of praise.

9. Since thou didst tie ten times hundred [horses] together to thy [chariot] when thou didst save the poet on hearing the call, [and since] thou didst for Dabhîti destroy the demons in the prison and become most accessible, thou art therefore deserving of praise.

---

८. 'नार्मर' आणि सहवसु या असुरांविषयीं कांहीं इतिहास प्रसिद्ध नाहीं. आणि पृक्ष व दासवेश या भक्तांविषयींहि कांहीं ठाऊक नाहीं.

९. भावार्थः– ' एका कवीनें तुला हाक मारितांच ती ऐकून त्याला रक्षावयास तूं गेलास तो तुझ्या रथास एकदम सहस्र घोडे जोडून गेलास, आणि दभीति या उपासकाला रक्षण्यासाठीं शत्रूंस कारागृहीं मारून टाकिलेंस आणि उपासकांला सुलभ झालास. त्यापेक्षां तूं स्तुत्य आहेस.'

यांत ' शतं दश ' आणि ' अरज्जौ ' यांचा अर्थ आम्हीं केवळ सायणांप्रमाणें केला आहे.

यांत कवि सांगितलेला तो कोण हें कळत नाहीं. दभीतिविषयीं सू. ११२ मं. २३ पहा.

विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे धनम् ।
षळस्तभ्ना विष्टिरः पञ्च संदृशः परि परो अभवः सास्युक्थ्यः
॥ १० ॥ ११ ॥

विश्वाः । इत् । अनु । रोधनाः । अस्य । पौंस्यम् । ददुः । अस्मै । दधिरे । कृत्नवे । धनम् ।

षट् । अस्तभ्नाः । विऽस्तिरः । पञ्च । सम्ऽदृशः । परि । परः । अभवः । सः । असि । उक्थ्यः ॥ १० ॥ ११ ॥

सुप्रवाचनं तव वीर वीर्यं१यदेकेन क्रतुना विन्दसे वसु ।
जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युक्थ्यः॥ ११

सुऽप्रवाचनम् । तव । वीर । वीर्यम् । यत् । एकेन । क्रतुना । विन्दसे । वसु ।

जातूऽस्थिरस्य । प्र । वयः । सहस्वतः । या । चकर्थ । सः । इन्द्र । विश्वा । असि । उक्थ्यः ॥ ११ ॥

भाषायाम्.

१०. विश्वेत् (=?विश्वाः इत्=सर्वा अपि) रोधनाः (=नद्यः) अस्य (=इन्द्रस्य) पौंस्यमनु ददुः (=वीर्यमनु दधुः =तस्य पौंस्यमनुसृत्य धारयन्ति=तस्य बलात्तासां बलं निकृष्टं भवति)। अस्मै कृत्नवे धनम् [अनु] दधिरे (=तस्य धनमनुसृत्य धनं धारयन्ति =तस्य धनात्तासां धनं निकृष्टं भवति) ।—[हे इन्द्र], त्वं षट् विस्तिरः (=? "षट्संख्याका उर्वीः द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधय इत्येवंरूपाः") पञ्च संदृशः (=दिशश्च) अस्तभ्नाः (=नियमितवानसि =स्वे स्वे स्थले स्थापितवानसि) । [तथा कृत्वा] परः पर्यभवः (=परस्तात् पर्यतिष्ठः =ताः सर्वा अपि व्याप्य परस्तादतिष्ठः) । स [त्वम्] उक्थ्योसि (=प्रशस्यो भवसि) ॥

११. हे वीर, एकेन क्रतुना (=एकेनैव वीर्यकर्मणा) सहस्वतः (=बलवतो) जातूष्ठिरस्य (=एतन्नामकस्य) [कस्यचिदसुरस्य] वसु वयः (=धनमन्नं च) यद् विन्दसे (=लभसे हृतवानसि) तत् सुप्रवाचनं (=शोभनस्तवनयोग्यं) तव वीर्यं (=शौर्यं) [भवति] । हे इन्द्र, या विश्वा चकर्थ (=यानि विश्वानि त्वं कृतवान् =यस्त्वमेतत्सर्वं कृतवानसि) स [त्वम्] उक्थ्योसि (=प्रशस्यो भवसि) ॥

१०. सर्वेहि नद्यांचें बळ याच्या बळापेक्षां थोडें आहे; या पराक्रमकर्त्या इंद्राच्या धनापेक्षां त्यांचें धन थोडें आहे.– [हे इंद्रा], त्वां सहा उर्वी आणि पांच दिशा त्यांच्या त्यांच्या स्थानीं स्थापिल्या आहेत. आणि या सर्वांस वेष्टून तूं अधिक राहिला आहेस. तो तूं स्तुत्य आहेस.

10. All the rivers yield to him in strength. They yield to him, the brave one,in wealth.—Thou didst establish the six worlds and the five quarters of the globe, [and] surrounding them didst reach even beyond. Thou art, therefore, deserving of praise.

११. हे वीरा, तूं जो एकाच पराक्रमकृत्यानें धन हरण करिता झालास, बलाढ्य जातूष्ठिराचें द्रव्य [हरण करून घेता झालास], तें तुझें शौर्य अत्यंत श्लाघ्य [होय]. जो तूं हें सर्व करिता झालास तो हे इन्द्रा, तूं स्तुत्य आहेस.

11. It is praiseworthy puissance of thine, o hero, that thou didst, with one heroic deed, obtain the wealth—the affluence of mighty Jâtûshṭhira, o Indra! Thou who didst all these things art deserving of praise.

---

१०. ‘सर्व नद्यांचें बळ आणि धन तुझ्या बळापेक्षां आणि धनापेक्षां कमी आहे. तूं सहा लोकांस आणि पांच दिशांस त्यांच्या त्यांच्या ठिकाणीं ठेवून तूं त्यांस व्यापून त्यांच्या पलीकडेस आणखी उरलास.’

‘सहा उर्वी’=‘षट् विस्तिरः’. सहा लोक कोणते ह्याविषयीं संशय आहे. (सायणांनीं सांगितलेले भाषेंत घेतले आहेत). कदाचित् सू. १०२ मं.८ येथें सांगितलेले जे तीन भूलोक आणि तीन द्युलोक ते असतील. (तो मंत्र आणि त्याजवरील टीप पहा).

११. ‘जातूष्ठिर’ हा कोण होता हें ठाऊक नाहीं. त्याची धनसंपत्ति एकच पराक्रमकर्म करून म्हणजे पहिल्या हल्ल्यासरशीं इंद्र हरण करिता झाला इतकें मात्र या मंत्रावरून निघतें.

अरमयः सरपसस्तराय कं तुर्वीतये च वय्याय च स्रुतिम् ।
नीचा सन्तमुदनयः परावृजं प्रान्धं श्रोणं श्रवयन्त्सास्युक्थ्यः॥१२

अरमयः । सरऽअपसः । तराय । कम् । तुर्वीतये । च । वय्याय । च । स्रुतिम् ।
नीचा । सन्तम् । उत् । अनयः । पराऽवृजम् । प्र । अन्धम् । श्रोणम् । श्रवयन् । सः । असि । उक्थ्यः ॥ १२ ॥

अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः॥१३॥१२॥

अस्मभ्यम् । तत् । वसो इति । दानाय । राधः । सम् । अर्थयस्व । बहु । ते । वसव्यम् ।
इन्द्र । यत् । चित्रम् । श्रवस्याः । अनु । द्यून् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १३ ॥ १२ ॥

भाषायाम्.

१२. तुर्वीतये च वय्याय च तराय कं (=तुर्वीतिश्च वय्यश्च यथा सुखेन उत्तीर्णौ भवतस्तथा) [त्वं] सरपसः स्रुतिं (=नद्याः प्रवाहम्) अरमयः (=स्तब्धगतिमकरोः) । अन्धं श्रोणं परावृजं नीचा सन्तम् (=अन्धं पङ्गुम् आपत्सु पतितं च परावृजं नामोपासकं) प्र श्रवयन् उदनयः (=आपद्भ्य उन्नीतवानसि प्रख्यातं च कृतवानसि) ॥

१३. हे इन्द्र, [त्वं] यद् (=यथा अनु द्यून् (=दिने दिने) चित्रं श्रवस्याः (=दिने दिने चित्रं श्रेष्ठं श्रवो हविरन्नमिच्छेस्) तत् (=तथा) ते (=तव) बहु राधः (=अन्नं) वसव्यं (=धनं च) अस्मभ्यं दानाय समर्थयस्व (=अस्मभ्यं दातुं योजय) । [अनन्तरं] सुवीराः (=शोभनवीर्योपेतपुत्रपौत्रैः सहिता) विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=ब्रूयाम) ॥

यदि तव विपुलं धनमस्मभ्यं ददासि तुभ्यं प्रतिदिनं श्रेष्ठं हविर्दास्यामस्त्वया दत्तैर्वीरपुत्रैश्च सहितास्ते स्तोत्राणि वदिष्याम इति भावः ॥

१२. तूं तुर्वीतीला आणि वय्याला सहज ओलांडून जातां यावें म्हणून नदीचा प्रवाह थांबविता झालास. आंधळा [आणि] पंगु परावृज् भूमिगत झाला असतां तूं त्याचा उद्धार करिता झालास आणि त्याला प्रख्यात करिता झालास. तो तूं स्तुत्य आहेस.

१३. हे वसू इंद्रा, तुझें पुष्कळ धन [आणि] द्रव्य तूं आम्हांला देण्याकरितां काढ, कीं जेणेंकरून तूं श्रेष्ठ हविरन्न प्रतिदिवशीं इच्छूं शकशील. चांगल्या वीरांनीं युक्त होत्साते आम्ही तुझी मोठी कीर्ति गाऊं असें कर.

12. Thou didst stop the stream of the river for Turvîti [and] Vayya to cross over safely. Thou didst raise Parâvṛij who lay low, [who was] blind [and] lame, making him famous. Thou art therefore worthy of praise.

13. Set thou apart for gift to us, o good [Indra], thy plentiful affluence [and] wealth, so that thou mayest wish o Indra, for good oblation from day to day. May we, accompanied by brave sons, sing great praises [to thee] in the sacrifice.

---

१२. तुर्वीति आणि वय्य यांविषयीं सू. ३६ मं. १८ आणि सू. ६१ मं. १८ आणि टीप पहा. परावृज् याविषयीं सू. ११२ मं. ८ आणि त्याजवरील टीप पहा.

१३. 'हे इंद्रा, तूं जर आम्हांला तुझें विपुल धन देशील तर, तुला नित्य आम्ही उत्तम उत्तम हविरन्न देऊं आणि त्वां दिलेल्या पुत्रपौत्रांसहित तुझें मोठें स्तोत्र यज्ञांत गाऊं' असें तात्पर्य.

वसु हें इतर देवांप्रमाणें इंद्राचें विशेषण येतें, त्याचा अर्थ चांगला, साधु असा होतो.

सूक्तम् १४–२०५.

गृत्समद ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

अध्वर्यवो भरतेन्द्राय सोममामत्रेभिः सिञ्चता मद्यमन्धः ।
कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदिदेष वष्टि ॥१॥

अध्वर्यवः । भरत । इन्द्राय । सोमम् । आ । अमत्रेभिः । सिञ्चत । मद्यम् । अन्धः ।
कामी । हि । वीरः । सदम् । अस्य । पीतिम् । जुहोत । वृष्णे । तत् । इत् । एषः । वष्टि ॥ १ ॥

अध्वर्यवो यो अपो वव्रिवांसं वृत्रं जघानाशन्येव वृक्षम् ।
तस्मा एतं भरत तद्वशायँ एष इन्द्रो अर्हति पीतिमस्य ॥ २ ॥

अध्वर्यवः । यः । अपः । वव्रिऽवांसम् । वृत्रम् । जघान । अशन्याऽइव । वृक्षम् ।
तस्मै । एतम् । भरत । तत्ऽवशाय । एषः । इन्द्रः । अर्हति । पीतिम् । अस्य ॥ २ ॥

भाषायाम्.

१. हे अध्वर्यवः (=अध्वरस्य नेतारः सोमाभिषवकर्तारः), इन्द्राय सोमं भरत (=आनयत) । मद्यं (=मदकारि) अन्धः (=सोमरूपमन्नम्) अमत्रेभिः (=पात्रैः) आ सिञ्चत (=अग्नौ प्रक्षिपत) । हि (=यस्मात् कारणाद्) [अयं] वीरः सदम् अस्य कामी (=सदैव सोमस्य कामयिता) [भवति] । वृष्णे (=वीराय तस्मै) पीतिं (=सोमपानं =पेयं सोमं) जुहोत (=जुहुत) । एष तदित् (=तदेव) वष्टि (=कामयते)॥

२. हे अध्वर्यवः, यः अपो वव्रिवांसम् (=उदकानि वेष्टितवन्तं) वृत्रं वृक्षमिव अशन्या (=वज्रेण) जघान तस्मै तद्वशाय [इन्द्राय] (=सोमकामिने तस्मै) एतं [सोमं] भरत (=प्रयच्छत) । एष इन्द्रः अस्य (=तस्य सोमस्य) पीतिं (=पानम्) अर्हति ॥

सूक्त १४–२०५.

ऋषि–गृत्समद. देवता–इन्द्र. वृत्त–त्रिष्टुभ्.

१. हे अध्वर्यू हो, इंद्राला सोम अर्पण करा. मदकारी सोमरस पात्रांनीं ओता. कारण कीं त्या वीराला नित्य याची आवड आहे. [या] वीराला [सोम]पान अर्पण करा. हा तेंच वांछितो.

२. हे अध्वर्यू हो, उदकांला वेष्टून राहिलेल्या वृत्राला वृक्ष तोडिल्याप्रमाणें जो [आपल्या] वज्रानें तोडिता झाला, त्या सोमकामीला हा [सोम] तुम्ही अर्पण करा. हा इंद्र त्याच्या पानास योग्य आहे.

HYMN 14–205.

To *Indra.* By *Gṛitsamada.* Metre—*Trishṭubh.*

1. Bring, o Adhvaryus, the soma to Indra. Pour out the exhilarating drink with the vessels. For the hero is always fond of it. Offer the drink to brave [Indra]. He desires nothing but that.

2. O Adhvaryus, he who smashed like a tree with the thunderbolt Vṛitra who had surrounded the waters—offer to him this soma, to him who loves it. This Indra deserves to drink it.

---

१. ह्या आणि पुढच्या सूक्तांत सोमावर इंद्राची किती प्रीति आहे, व त्याचें पान करून इंद्राला बळ प्राप्त झाल्यावर त्याणें काय काय पराक्रम केले तें सांगितलें आहे. याजवरून प्राचीनकाळीं सोमाचें कसें महत्त्व असे व वस्तुतः त्याचें स्वरूप कसें होतें तें समजून येतें.

सोमरस सिद्ध करून तो अर्पण करणें हें अध्वर्यू नांवाच्या ऋत्विजाचें काम असे.

अध्वर्यवो यो दृभीकं जघान यो गा उदाजदप हि वलं वः ।
तस्मा एतमन्तरिक्षे न वातमिन्द्रं सोमैरोर्णुत जूर्न वस्त्रैः ॥ ३ ॥

अध्वर्यवः । यः । दृभीकम् । जघान । यः । गाः । उत्ऽआजत् । अप । हि । वलम् । वरिति वः ।
तस्मै । एतम् । अन्तरिक्षे । न । वातम् । इन्द्रम् । सोमैः । आ । ऊर्णुत । जूः । न । वस्त्रैः ॥ ३ ॥

अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून् ।
यो अर्बुदमव नीचा बबाधे तमिन्द्रं सोमस्य भृथे हिनोत ॥ ४ ॥

अध्वर्यवः । यः । उरणम् । जघान । नव । चख्वांसम् । नवतिम् । च । बाहून् ।
यः । अर्बुदम् । अव । नीचा । बबाधे । तम् । इन्द्रम् । सोमस्य । भृथे । हिनोत ॥ ४ ॥

भाषायाम्.

३. हे अध्वर्यवः, यो दृभीकं [नामासुरं] जघान यो गा उदाजत् (=निरगमयत्) [अपि च] वलम् अप वः (=वलं नामासुरम् अपावृणोत् =वलेन निरुद्धानाम् अपाम् अपवरणाय तम् अहिंसत्) तस्मै एतं [सोमम्] अन्तरिक्षे वातं न (=वायुमिव) [सृजत] । वस्त्रैर्जूर्न (=?" जीर्णो यथा वस्त्रैरङ्गमाच्छादयति तद्वत्") सोमैरिन्द्रम् आ ऊर्णुत (=सर्वत आच्छादयत) ॥

४. हे अध्वर्यवः, यो नव नवतिं च (=नवाधिकनवतिं) बाहून् चख्वांसं (=?" दर्शयन्तं " =प्रक्षिप्तवन्तम्) उरणं [नामासुरं] जघान यो अर्बुदं [नामासुरं] अव नीचा बबाधे (=अधोमुखं कृत्वा अवबबाधे) तम् इन्द्रं सोमस्य भृथे (=भरणे संपादने सति =सोमम् अर्पयित्वा) हिनोत (=हिनुत=स्तोत्रैः प्रीणयत) ॥

३. हे अध्वर्यू हो, जो दृभीकाचा वध करिता झाला, जो गाईला मुक्त करिता झाला आणि वलातें फोडिता झाला; त्याला हा सोम अंतरिक्षांत वायू [सोडिल्या]-प्रमाणें [सोडा]. वृद्ध मनुष्य वस्त्रांनीं [आपलें आंग झांकितो] त्याप्रमाणें इंद्राला सोमरसांनीं झांकून टाका.

3. O Adhvaryus, he who killed Dṛibhîka, who freed the cows, who broke open Vala—to him [let go] this [Soma] like wind in the sky. As an old man [covers himself] with clothes, cover Indra with libations of Soma.

४. हे अध्वर्यू हो, जो नव्याण्णव बाहु पसरणाऱ्या उरणाचा वध करिता झाला, जो अर्बुदाला खालीं पाडून निर्दाळिता झाला, त्या इंद्राला सोम अर्पण करून प्रसन्न करा.

4. O Adhvaryus, he who killed Uraṇa that spread out his nine and ninty arms, he who laid low Arbuda to the earth, propitiate that Indra by an offering of the soma.

---

३. दृभीकाविषयीं कांहीं ठाऊक नाहीं.

वलाविषयीं सू. ५२ मं. ५ आणि टीप पहा.

या मंत्रांतील शेवटील पादांत जी उपमा सांगितली आहे ती दुर्बोध आहे. कारण कीं, ‘ जू ’ शब्दाचा अर्थ येथें समजत नाहीं, दुसऱ्या दोन ठिकाणीं तो शब्द आला आहे तेथें वेगवान् असा अर्थ आहे तो येथें लागत नाहीं.

‘ अंतरिक्षांत वायु सोडिल्याप्रमाणें ’ =‘ अन्तरिक्षे वातं न ’. म्ह. हा सोम तुम्हीं सोडिल्यावर वायु जसा सर्व अंतरिक्षास झांकून टाकितो आणि वेगानें धांवतो त्याप्रमाणें हा इंद्रशरीरास व्यापील आणि त्याला वेगयुक्त करील. असा अभिप्राय दिसतो.

४. उरणाविषयीं या शिवाय ऋग्वेदांत कोठें पुनः उल्लेख आलेला नाहीं.

अर्बुदाविषयीं सू. ५१ मं. ६ आणि टीप पहा.

अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसम् ।
यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इन्द्रायान्धसो जुहोत ॥ ५ ॥
अध्वर्यवः । यः । सु । अश्नम् । जघान । यः । शुष्णम् । अशुषम् । यः । विऽअंसम् ।
यः । पिप्रुम् । नमुचिम् । यः । रुधिऽक्राम् । तस्मै । इन्द्राय । अन्धसः । जुहोत ॥ ५ ॥
अध्वर्यवो यः शतं शम्बरस्य पुरो बिभेदाश्मनेव पूर्वीः ।
यो वर्चिनः शतमिन्द्रः सहस्रमपावपद्भरता सोममस्मै ॥६॥१३॥
अध्वर्यवः । यः । शतम् । शम्बरस्य । पुरः । बिभेद । अश्मनाऽइव । पूर्वीः ।
यः । वर्चिनः । शतम् । इन्द्रः । सहस्रम् । अपऽअवपत् । भरत । सोमम् । अस्मै ॥ ६ ॥ १३ ॥

भाषायाम्.

५. हे अध्वर्यवः, यः अश्नम् [असुरं] जघान यः अशुषं (=सर्वस्य भक्षयितारं) शुष्णं यो व्यंसम् [असुरम्] यः पिप्रुं नमुचिं [च] यो रुधिक्रां [नामासुरं] [जघान] तस्मा इन्द्राय अन्धसः (=सोमलक्षणस्यान्नस्य) [आहुतीर्] जुहोत (=जुहुत =अग्नौ प्रक्षिपत) ॥

६. हे अध्वर्यवः, यः शम्बरस्य [नाम शत्रोः] शतं पूर्वीः पुरः (=शतं पुरातनानि नगराणि) अश्मनेव (=वज्रेणेव) बिभेद यश् [च] इन्द्रो वर्चिनो [नामानार्यस्य शत्रोः] शतं सहस्रं (=शतसहस्रसंख्याकान्) [वीरान् =पुत्रादीन्] अपावपत् (=हत्वा भूमौ पातितवान्) अस्मै (=तस्मै) सोमं भरत (=अर्पयत) ॥

५. हे अध्वर्यू हो, जो अश्नास मारून टाकिता झाला, जो सर्वभक्षी शुष्णाला, जो व्यंसाला, जो पिप्रूला, नमुचीला, [आणि] जो रुधिक्राला मारिता झाला, त्या इंद्राला सोमरस अर्पण करा.

६. हे अध्वर्यू हो, जो शंबराचीं शंभर पुरातन नगरें वज्रानें [विध्वंसिल्या]प्रमाणें विध्वंसिता झाला, जो वर्चीचे शंभर हजार [वीर] भूमिगत करिता झाला, त्याला सोम अर्पण करा.

5. O Adhvaryus, he who slew As'na, who [slew] devouring S'ushna, who [slew] Vyaṁsa, who [slew] Pipru [and] Namuchi, [and] who [slew] Rudhikrâ, to that Indra pour [libations] of the juice.

6. O Adhvaryus, he who destroyed the hundred ancient cities of S'ambara as if with the thunderbolt, [and] who rased to the ground the hundred thousand warriors of Varchin, to that Indra offer the soma.

---

५. ‘अश्न’. अंगिरसांचीं स्तोत्रें ऐकून इंद्रानें अश्नाचीं नगरें फोडिलीं असें ऋ. २.२०.५ यांत सांगितलें आहे. ऋ. ६.४.३ यांतहि अश्नाचीं नगरें इंद्रानें फोडून टाकिलीं असें सांगितलें आहे. याशिवाय दुसरी कांहीं कथा ठाऊक नाहीं.

‘शुष्ण’. सू. ५४ मं. ६ आणि टीप पहा.

‘व्यंस’. सू. १०१ मं. २ आणि टीप पहा.

‘पिप्रु’. सू. ५१ मं. ५. ‘नमुचि’. सू. ५३ मं. ७ आणि टीप पहा.

‘रुधिक्रा’ या असुराविषयीं कांहींच ठाऊक नाहीं. दुसऱ्या ठिकाणीं हें नांव आलेलें नाहीं.

६. ‘शंबर’. सू. ५१ मं. ६ आणि टीप पहा.

‘वर्ची’. हा एक अनार्य जातीचा म्हणजे आर्यव्यतिरिक्त जे कोळी इत्यादि लोक त्यांपैकीं एक शत्रु होता असें दिसून येतें. ऋ. ४. ३०.१५ यांत ‘दास वर्चीचे’ (म्हणजे अनार्य वर्चीचे) एक लक्ष वीर इंद्रानें मारिले असें सांगितलें आहे. ऋ. ६. ४७. २१ यांत शंबर आणि वर्ची या दोन अनार्य शत्रूंला इंद्रानें उदव्रज देशांत मारिलें असें सांगितलें आहे. ऋ. ७. ९९.५ यांत वर्चीचे एक लक्ष वीर एका काळीं मारिले असें सांगितलें आहे.

वर्चीचे एक लक्ष वीर मारिले आणि शंबराचीं शंभर नगरें विध्वंसिलीं ह्या दोन्ही गोष्टी बहुतकरून एकाच मंत्रांत येतात, आणि दोघांसहि ‘दास’ (अनार्य) असें म्हटलें आहे. यावरून शंबर आणि वर्ची

अध्वर्यवो यः शतमा सहस्रं भूम्यां उपस्थेऽवपज्जघन्वान् ।
कुत्सस्यायोरतिथिग्वस्य वीरान्न्यावृणग्भरता सोममस्मै ॥ ७ ॥

अध्वर्यवः । यः । शतम् । आ । सहस्रम् । भूम्याः । उपऽस्थे । अवपत् । जघन्वान् ।
कुत्सस्य । आयोः । अतिथिऽग्वस्य । वीरान् । नि । अवृणक् । भरत । सोमम् । अस्मै ॥ ७ ॥

भाषायाम्.

७. हे अध्वर्यवः, यः शतम् आ सहस्रं (=शतसहस्रसंख्याकान् वीरान्) जघन्वान् (=हतवान् सन्) भूम्या उपस्थे (=पृथिव्या उत्सङ्गे) अवपत् (=अपातयत्) [तथाच] कुत्सस्य [नाम] आयोर् [नाम] अतिथिग्वस्य [च] वीरान् (=शूरान्) नि अवृणक् (=नितरामवधीत्) अस्मै (=तस्मै) [इन्द्राय] सोमं भरत (=अर्पयत) ॥

हे दोघेहि अनार्य लोकांपैकीं कोणी बलाढ्य राजे असावेत असें उघड होतें. आणि आर्य लोकांचा प्रवेश जसजसा आर्यावर्ताकडे होऊं लागला तसतसे ते त्यांजबरोबर लढूं लागले आणि शेवटीं इंद्रकृपेनें त्यांचा संहार आर्य लोकांनीं केला, अशी कथा पुरातन काळापासून चालत आलेली वेदकाळीं इंद्रादिकांच्या सूक्तस्तुतींत ओविली गेली.

'वज्रानें [विध्वंसिल्या]प्रमाणें '= 'अश्मनेव.' यावरून शंबर हा भौतिक अनार्यरूप शत्रु होता, केवळ मेघोदकांचा निरोध करणारा कल्पिलेला वृत्रासारिखा कोणीएक नव्हता असें म्हणण्यास विशेष साधन मिळतें.

आतां इतकें खरें आहे कीं, कल्पिलेले आणि मेघोदकनिरोधी आणि सूर्यादितेजोनिरोधी वृत्रादिक शत्रु जे इंद्रानें मारिले, आणि आर्यलोकांनीं ज्या अनार्य भौतिक आणि खऱ्या शत्रूंचा संहार इंद्रादिकांच्या कृपेनें केला ते, अशांचा संकर लोकांच्या मनांत मागाहून झालेला वेदावरून उघड दिसून येतो. आणि हा जो खऱ्यांचा आणि कल्पितांचा संकर होणें, तो सर्व धर्मांत होत असतो. शिवाजी झालेला खरा, पण तो शिवाचा अवतार होता ही कल्पना. त्याणें किल्ले बांधले हें खरें, पण त्याणें मजूरदारांस मजुरीबद्दल गवताची काडी तोडून आपल्या हातानें दिली म्हणजे

७. हे अध्वर्यू हो, जो एक लक्ष [जनां]स मारून त्यांस पृथिवीच्या मांडीवर निजविता झाला [आणि जो] कुत्साच्या, आयूच्या [आणि] अतिथिग्वाच्या वीरांचा वध करिता झाला, त्याला सोम अर्पण करा.

7. O Adhvaryus, he who having killed a hundred thousand laid them low on the lap of earth [and] cut down the warriors of Kutsa, Âyu, [and] Atithigva, to him offer the soma.

तिचें सोनें होत होतें ही कल्पना. त्यानें आपल्या शत्रूंवर जय मिळविला हें खरें, पण त्याला भवानी प्रसन्न झाली होती ही कल्पना. रामचंद्रानें युद्ध केलें हें खरें, पण त्याला इंद्रानें साहाय्य करून रथ पाठवून दिला आणि हनूमंतानें द्रोणगिरी आणिला ही कविसुकल्पना. इत्यादि दुसऱ्या सर्व धर्मांतहि असाच घोटाळा झाला आहे व नित्य होत असतो.

त्यामुळेंच केव्हां केव्हां असें भासतें कीं, वेदांत सांगितलेले शत्रु हे कल्पित होत, आणि केव्हां केव्हां असें दिसतें कीं ते खरे शत्रु होते. तथापि नीट विचार करून पाहिल्यावर खरे कोणते आणि कल्पित कोणते हें बहुतकरून निवडून काढतां येतें.

---

७. 'निजविता झाला'='अवपत्.' अक्षरशः पेरता झाला, म्हणजे जमिनीवर बीं पेरल्याप्रमाणें इकडे तिकडे फेकून देता झाला.

'कुत्स.' सू. ५१ मं. ६ आणि त्याजवरील टीप पहा.

'आयु,' आणि 'अतिथिग्व.' सू.५३ मं. १० आणि त्याजवरील टीप पहा.

अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहन्तो नशथा तदिन्द्रे ।
गभस्तिपूतं भरत श्रुतायेन्द्राय सोमं यज्यवो जुहोत ॥ ८ ॥

अध्वर्यवः । यत् । नरः । कामयाध्वे । श्रुष्टी । वहन्तः । नशथ । तत् । इन्द्रे ।

गभस्तिऽपूतम् । भरत । श्रुताय । इन्द्राय । सोमम् । यज्यवः । जुहोत ८

अध्वर्यवः कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वम् ।
जुषाणो हस्त्यमभि वावशे व इन्द्राय सोमं मदिरं जुहोत ॥ ९ ॥

अध्वर्यवः । कर्तन । श्रुष्टिम् । अस्मै । वने । निऽपूतम् । वने । उत् । नयध्वम् ।

जुषाणः । हस्त्यम् । अभि । वावशे । वः । इन्द्राय । सोमम् । मदिरम् । जुहोत ॥ ९ ॥

भाषायाम्.

८. हे नरः (=शूरा) अध्वर्यवः, यद् [धनादिकं] कामयाध्वे (=वाञ्छथ) श्रुष्टी (=क्षिप्रं) [सोमं] वहन्तः (=इन्द्राय प्रार्पयन्तस्) तत् इन्द्रे नशथ (=इन्द्रे प्राप्नुथ =इन्द्रात्प्राप्स्यथ)। [अतः कारणात्] श्रुताय (=प्रसिद्धाय) इन्द्राय गभस्तिपूतं (=हस्तेन संशोधितं) सोमं भरत (=आनयत) [अपि च] हे यज्यवः (=यागं कुर्वाणाः), [तं] जुहोत (=जुहुत =अग्नौ प्रक्षिपत) ॥

९. हे अध्वर्यवः, अस्मा [इन्द्राय] [सोमं] श्रुष्टिं कर्तन (=सुखकरं कुरुत)। वने निपूतं—वने [निषूतम्] (=उदक आप्यायनेन संशोधितं) [सोमम्] उन्नयत (=ऊर्ध्वं नयत)। हस्त्यं (=हस्ताभ्यामभिषुतं) [सोमं] जुषाणः (=सेवमान) [इन्द्रो] वः (=युष्मान्) अभि वावशे (=कामयते)। इन्द्राय मदिरं (=मदकरं) सोमं जुहोत (=जुहुत) ॥

८. हे अध्वर्यू हो, हे शूर हो, तुम्ही जें वांछितां तें सत्वर सोम देऊन तुम्ही इंद्रापासून मिळवाल. कीर्तिमान् इंद्राला हातांनीं शुद्ध केलेला सोम आणा [आणि] हे यजनकर्ते हो, [तो त्याला] अर्पण करा.

९. हे अध्वर्यू हो, तुम्ही यासाठीं सोम सुखकर करा. पाण्यांत गाळलेला– पाण्यांत [गाळलेला सोम] बाहेर काढा. [इंद्र] हातांनीं काढिलेला [सोम] सेवून तुम्हांवर प्रीति करितो. इंद्राला मादकारक सोम अर्पण करा.

8. O Adhvaryus, o brave ones, that which you desire you attain to in Indra, if you bring [him] [the offering] quickly. Do bring [and] offer, o sacrificers, the soma purified by the hand to renowned Indra.

9. O Adhvaryus, make [the soma] agreeable to him. Raise the soma purified in water—[the soma that is] purified in water. Enjoying [the soma] prepared by the hands [Indra] loves you. To Indra pour ye out the exhilarating soma.

---

८. ‘ सोम देऊन... मिळवाल ’. म्हणजे जर सोम द्याल तर मिळवाल.

९. ‘ पाण्यांत गाळलेला ’=‘ वने निपूतम्. ’ आणि ‘ हातांनीं काढलेला ’= ‘ हस्त्यम् ’ हे सोमाचे प्रकार होत.

अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः॥१२॥१४॥

अस्मभ्यम् । तत् । वसो इति । दानाय । राधः । सम् । अर्थयस्व । बहु । ते । वसव्यम् ।
इन्द्र । यत् । चित्रम् । श्रवस्याः । अनु । द्यून् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १२ ॥ १४ ॥

भाषायाम्.

१२. हे इन्द्र, [त्वं] यद् (=यथा) अनु द्यून् (=दिने दिने) चित्रं श्रवस्याः (=दिने दिने चित्रं श्रेष्ठं श्रवो हविरन्नमिच्छेस्) तत् (=तथा) ते (=तव) बहु राधः (=अन्नं) वसव्यं (=धनं च) अस्मभ्यं दानाय समर्थयस्व (=अस्मभ्यं दातुं योजय) । [अनन्तरं] सुवीराः (=शोभनवीर्योपेतपुत्रपौत्रैः सहिता) विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=ब्रूयाम) ॥

सूक्तम् १५–२०६.

गृत्समद ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ।

प्र घा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम् ।
त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिन्द्रो जघान ॥ १ ॥

प्र । घ । नु । अस्य । महतः । महानि । सत्या । सत्यस्य । करणानि । वोचम् ।
त्रिऽकद्रुकेषु । अपिबत् । सुतस्य । अस्य । मदे । अहिम् । इन्द्रः । जघान ॥ १ ॥

भाषायाम्.

१. नु (=इदानीम्) [अहम्] अस्य महतो महानि (=महत इन्द्रस्य महान्ति) सत्यस्य [इन्द्रस्य] सत्या करणानि (=सत्यानि वीरकर्माणि) प्र घा वोचं (=प्रकर्षेण ब्रवीमि तावत्) ॥ इन्द्रस्त्रिकद्रुकेषु (=“ज्योतिर्गौरायुरित्येवंरूपेष्वाभिप्लविके-

१२. हे वसू इंद्रा, तुझें पुष्कळ धन [आणि] द्रव्य तूं आम्हांला देण्याकरितां काढ, कीं जेणेंकरून तूं श्रेष्ठ हविरन्न प्रतिदिवशीं इच्छूं शकशील. चांगल्या वीरांनीं युक्त होत्साते आम्ही यज्ञांत तुझी मोठी कीर्ति गाऊं असें कर.

12. Set thou apart for gift to us, o good [Indra], thy plentiful affluence [and] wealth, so that thou mayest wish, o Indra, for good oblation from day to day. May we, accompanied by brave sons, sing great praises [to thee] in the sacrifice.

---

१२. ही ऋचा आणि मागील सूक्ताची शेवटली ऋचा म्हणजे सू. २०४ मं. १३ हीं एकच असल्यामुळें टीपा वगैरेसाठीं तो मंत्र पहा.

सूक्त १५–२०६.

ऋषि–**गृत्समद.** देवता–**इन्द्र.** वृत्त–**त्रिष्टुभ्.**

१. आतां मी या महान् इंद्राचीं महा [चरितें]–[या] सत्य [इंद्रा]चीं सत्य चरितें वर्णितों. इंद्र त्रिकद्रुकांत सोम पिता झाला [आणि] त्या [सोमा]च्या मदांत अहीचा वध करिता झाला.

HYMN 15–206.

To *Indra.* By *Gritsamada.* Metre—*Trishtubh.*

1. I will now sing the great deeds of great Indra, the true [deeds] of true [Indra]. He drank the extracted juice in the *Trikadruka,* [festivals]. Under its exhilaration Indra killed the serpent.

---

१. 'त्रिकद्रुकांत'=सू. ३२ मं. ३ आणि टीप पहा.

अवंशे द्यामस्तभायद्बृहन्तमा रोदसी अपृणदन्तरिक्षम् ।
स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इन्द्रश्चकार ॥ २ ॥

अवंशे । द्याम् । अस्तभायत् । बृहन्तम् । आ । रोदसी इति । अपृणत् । अन्तरिक्षम् ।
सः । धारयत् । पृथिवीम् । पप्रथत् । च । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ २ ॥

सद्मेव प्राचो वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम् ।
वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार ॥ ३ ॥

सद्मऽइव । प्राचः । वि । मिमाय । मानैः । वज्रेण । खानि । अतृणत् । नदीनाम् ।
वृथा । असृजत् । पथिऽभिः । दीर्घऽयाथैः । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ ३ ॥

ष्वहःसु") सुतस्य (=अभिषुतस्य सोमस्य=सोमम्) अपिबत् । अस्य (=तस्य पीतस्य सोमस्य) मदे [च] अहिं जघान (=वृत्ररूपम् आहिं हतवान्) ॥

भाषायाम्.

२. [इन्द्रो] बृहन्तं द्याम् अवंशे (=अनवलम्ब आकाशे) अस्तभायत् (=अस्थापयत्) । रोदसी (=द्यावापृथिव्यौ) अन्तरिक्षं [च] आ अपृणत् (=तेजसापूरयत्) । स पृथिवीं धारयत् पप्रथत् च (=अधारयत् व्यस्तारयच्च) । ता (=तानि) [कर्माणि] इन्द्रः सोमस्य मदे (=हर्षे) [संजाते सति] चकार ॥

३. सद्मेव मानैर् [लोकान्] प्राचो वि मिमाय (=परिमाणैर्गृहं यथा कुर्वन्ति तद्वत् परिमाणैर्लोकान् पृथिव्यादीन् निर्मितवान्) । वज्रेण नदीनां खानि (=निर्गमनद्वाराणि) अतृणत् (=अखनत्) । वृथा (=अनायासेन) दीर्घयाथैः पथिभिः (=दीर्घगमनैर्मार्गैस्) [ता नदीर्] असृजत् (=सृष्टवान्) । ता (=तानि) [कर्माणि] इन्द्रः सोमस्य मदे [संजाते] चकार ॥

२. तो महा द्यूला अंतराळीं स्थापिता झाला. तो द्यावापृथिवींस [आणि] अंतरिक्षाला भरून टाकिता झाला. तो पृथिवीला धारण करिता झाला आणि पसरिता झाला. इंद्र तें सर्व सोमाच्या मदांत करिता झाला.

३. घर बांधिल्याप्रमाणें मोज घेऊन [हे लोक] पूर्वाभिमुख बांधिता झाला. वज्रानें नदीचीं द्वारें खोदिता झाला. नद्यांला लांब जाणाऱ्या मार्गांनीं सहज सोडून देता झाला. इंद्र तें सर्व सोमाच्या मदांत करिता झाला.

2. He fixed the great heaven in the supportless space. He filled the heaven and the earth and the firmament. He held and expanded the wide earth. It was in the exhilaration of the soma that Indra did those things.

3. He built the worlds, face to the east, with measurements like a house. With the thunderbolt he cut the apertures of the rivers. He let them flow easily by long-reaching paths. It was in the exhilaration of the soma that Indra did those things.

---

२. 'इन्द्रानें पृथिवीला स्थिर धरून विस्तीर्ण केली, द्यूला आकाशांत खांब वगैरे कांहीं नसतां घट्ट स्थापिलें, आणि द्यावापृथिवी आणि अंतरिक्ष यांस तेजानें भरून टाकिलें. हीं सर्व कामें इंद्रानें केलीं तीं सोमपान करून इंद्राला मद आला-तेव्हां केलीं.'

३. पहिल्या पादांत "लोक" हें अध्याहृत घेतलें पाहिजे ही एक अडचण या मंत्रांत आहे.

यांत सांगितलेल्या नद्या ज्या त्या मेघोदकरूपच होत असें दिसतें. त्यांचीं द्वारें म्हणजे वृत्रानें कोंडून ठेवलेल्या ठिकाणांतून बाहेर पडावयाचे मार्ग, ते इंद्रानें वज्र मारून मोकळे केले.

स प्रवोहॄन्परिगत्या दभीतेर्विश्वमधागायुधमिद्धे अग्नौ ।
सं गोभिरश्वैरसृजद्रथेभिः सोमस्य ता मद इन्द्रश्चकार ॥ ४ ॥
सः । प्रऽवोहॄन् । परिऽगत्य । दभीतेः । विश्वम् । अधाक् । आयुधम् ।
इद्धे । अग्नौ ।
सम् । गोभिः । अश्वैः । असृजत् । रथेभिः । सोमस्य । ता । मदे ।
इन्द्रः । चकार ॥ ४ ॥
स ईं महीं धुनिमेतोररम्णात्सो अस्नातॄनपारयत्स्वस्ति ।
त उत्स्नाय रयिमभि प्र तस्थुः सोमस्य ता मद इन्द्रश्चकार॥५॥१९
सः । ईम् । महीम् । धुनिम् । एतोः । अरम्णात् । सः । अस्नातॄन् ।
अपारयत् । स्वस्ति ।
ते । उत्ऽस्नाय । रयिम् । अभि । प्र । तस्थुः । सोमस्य । ता । मदे ।
इन्द्रः । चकार ॥ ५ ॥ १९ ॥

भाषायाम्.

४. स दभीतेः प्रवोहॄन् (=प्रवोढॄन्=प्रकर्षेण वहतः शत्रून्) परिगत्य (=मध्ये-मार्गमावृत्य) विश्वम् आयुधं (=सर्वाणि शस्त्राणि) इद्धे अग्नौ (=समिद्धेग्नौ) अधाक् (=अधाक्षीत्) । स गोभिरश्वै रथैश् [च] [तं दभीतिम्] असृजत् (=अयोजयत्) । ता (=तानि) [कर्माणि] इन्द्रः सोमस्य मदे [संजाते] चकार ॥

प्राक्किल चुमुरिधुनिप्रभृतयोसुरा दभीतेः पुरं संरुध्य परिगृह्य तस्मात् पुरान्निरगुरिति कथेति सायणः ॥

५. स ईं (=तां प्रसिद्धां) महीं (=महतीं) धुनिं (=नदीं "परुष्णीम्") एतोररम्णात् (=गमनादुपारमयत्) । सः अस्नातॄन् (=स्नातुमशक्तान्=तरणासमर्थान्) [ऋषीन्] स्वस्ति (=क्षेमेण) अपारयत् (=पारमनयत्) । [तदनन्तरं] ते उत्स्नाय (=नदीमुत्तीर्य) रयिमभि प्र तस्थुः (=अभीष्टधनं प्रति प्रतस्थिरे) । ता (=तानि) [कर्माणि] इन्द्रः सोमस्य मदे [संजाते] चकार ॥

अरम्णात् । उपाशमयत् । महाजलां नदीमल्पोदकामकरोदित्यर्थः । इति सायणः॥

४. दभीतीला नेऊन जाणाऱ्यांस वेढा घालून सर्व शस्त्रें पेटलेल्या विस्तवांत जाळिता झाला. [आणि] त्याला गाई, घोडे [आणि] रथ देता झाला. इंद्र तें सर्व सोमाच्या मदांत करिता झाला.

4. He, having surrounded those that were carrying off Dabhîti, burned every weapon in the kindled fire. He bestowed upon him cows [and] horses [and] chariots. It was in the exhilaration of the soma that Indra did those things.

५. तो त्या महा नदीची गति थांबविता झाला, तो ज्यांला तरून जातां येत नव्हतें त्यांला सुखरूपपणें पार करिता झाला. ते तरून जाऊन [अभीष्ट] धनाप्रत पावले. इंद्र तें सर्व सोमाच्या मदांत करिता झाला.

5. He stopped that great stream from going. He took safely across those that were unable to cross. They having crossed went on to the treasure. It was in the exhilaration of the soma that Indra did those things.

---

४. 'दभीति.' सू. ११२ मं. २३ आणि टीप पहा. दभीतीचे शत्रु त्याला धरून घेऊन जात असतां इंद्रानें मार्गांत त्यांस वेढून दभीतीला सोडविलें आणि त्याच्या शत्रूचीं सर्व हत्यारें काढून घेऊन तीं मोठा विस्तव पेटवून त्यांत जाळून टाकिलीं. अशी कथा आहे असें सायण म्हणतात. अर्थास तें जुळतें.

५. 'कांहीं भक्तांस परुष्णी नदीच्या पार जावयाचें असतां पाणी फार असल्यामुळें त्यांस उतरवेना. तेव्हां इंद्रानें नदीचा प्रवाह थांबविला आणि त्यांला पार नेलें' अशी कथा कांहीं असून तिला अनुलक्षून हें ऋषिवचन आहे.

'गति थांबविता झाला'=' एतोररम्णात्. ऋ. २. ३८. ३ आणि त्यावरील सायणभाष्य पहा.

सोदञ्चं सिन्धुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष ।
अजवसो जविनीभिर्विवृश्चन्त्सोमस्य ता मद इन्द्रश्चकार ॥ ६ ॥

सः । उदञ्चम् । सिन्धुम् । अरिणात् । महिऽत्वा । वज्रेण । अनः ।
उषसः । सम् । पिपेष ।
अजवसः । जविनीभिः । विऽवृश्चन् । सोमस्य । ता । मदे । इन्द्रः ।
चकार ॥ ६ ॥

स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्परावृक् ।
प्रति श्रोणः स्थाद्व्य१नगचष्ट सोमस्य ता मद इन्द्रश्चकार ॥७॥

सः । विद्वान् । अपऽगोहम् । कनीनाम् । आविः । भवन् । उत् ।
अतिष्ठत् । पराऽवृक् ।
प्रति । श्रोणः । स्थात् । वि । अनक् । अचष्ट । सोमस्य । ता । मदे ।
इन्द्रः । चकार ॥ ७ ॥

भाषायाम्.

६. स महित्वा (=स्वमहिम्ना) सिन्धुं (=नदीं) [प्राञ्चं सन्तम्] उदञ्चम् अरिणात् (=उदक्प्रेरयति स्म =उदग्यथा गच्छति तथाकरोत्) । वज्रेण उषसोऽनः सं पिपेष (=उषोदेव्याः शकटं चूर्णीचकार) । अजवसः (=वेगहीनाः " सेना ") जवनीभिः (=वेगवतीभिर्) विवृश्चन् (=विशेषेण भिन्दन्=बिभेद च) । ता (=तानि) [कर्माणि] इन्द्रः सोमस्य मदे [संजाते] चकार ॥

७. स (=प्रसिद्धः) परावृक् [नाम ऋषिः] कनीनामपगोहं विद्वान् (=कन्यकानामपगोहनं ज्ञातवान् सन्) आविर्भवन् उदतिष्ठत् (=आविरभवत् उदतिष्ठच्च) । श्रोणः (=पङ्गुः) [सन्नपि] प्रति स्थात् (=कन्यकाः प्रति प्रतिष्ठते) । [स] वि अनक् (=विशेषेणाशोभत) अचष्ट (=आन्ध्यापगमात् अपश्यत्) । ता (=तानि) [कर्माणि] इन्द्रः सोमस्य मदे [संजाते] चकार ॥

पुरा किल कन्यकाश्चक्षुर्हीनं पादहीनं परावृजं जिघृक्षुमृषिं दृष्ट्वाभिदुद्रुवुः । ततः स ऋषिरिन्द्रं स्तुत्वा चक्षुः पादं च लेभे । तदेतदाह । इति सायणः ॥

६. तो [आपल्या] महिम्यानें नदीला उत्तराभिमुख वाहविता झाला. [आपल्या] वज्रानें उषेची गाडी चिरडून टाकिता झाला आणि वेगवतींकडून वेगहीनांला छेदिता झाला. इंद्र तें सर्व सोमाच्या मदांत करिता झाला.

६. He by [his] greatness made the river run to the north, with his thunderbolt he smashed the cart of Ushas, cutting the slow through those that were impetuous. It was in the exhilaration of the soma that Indra did those things.

७. तो परावृज्, कन्यका लपल्या तें जाणून, प्रगट झाला आणि उठून उभा राहिला. पङ्गु [परावृज्] चालूं लागला. तो चांगला दिसला आणि पाहूं लागला. इंद्र तें सर्व सोमाच्या मदांत करिता झाला.

7. That Parâvṛij, having known the hiding of the girls, manifested himself and stood erect. The lame man began to walk, he shone, he saw. It was in the exhilaration of the soma that Indra did those things.

---

६. कोणती नदी इंद्रानें पूर्वी पूर्वाभिमुख वाहत असतां उत्तराभिमुख वाहविली तें समजत नाहीं.

'उषेची गाडी'='उषसोऽनः'. उषेचा रथ इंद्रानें मोडून टाकिला; आणि नंतर उषा पळून गेली, असें ऋग्वेदांत सांगितलेलें आहे. ऋ. ४. ३०. ८–११ पहा.

या ऋचेंत सांगितलेल्या 'वेगवती' आणि 'वेगहीन' त्या कोण होत तें समजत नाहीं. सायण 'सेना' असें म्हणतात. पण त्या तरी कोणाच्या सेना हें ते सांगत नाहींत.

७. परावृज् याविषयीं सू. ११२ मं. ८ आणि टीप पहा.

भिनद्वलमङ्गिरोभिर्गृणानो वि पर्वतस्य दृंहितान्यैरत् ।
रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इन्द्रश्चकार ॥ ८ ॥

भिनत् । वलम् । अङ्गिरःऽभिः । गृणानः । वि । पर्वतस्य । दृंहितानि। ऐरत् ।
रिणक् । रोधांसि । कृत्रिमाणि । एषाम् । सोमस्य । ता । मदे । इन्द्रः। चकार ॥ ८ ॥

स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघन्थ दस्युं प्र दभीतिमावः ।
रम्भी चिदत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश्चकार ॥ ९ ॥

स्वप्नेन । अभिऽउप्य । चुमुरिम् । धुनिम् । च । जघन्थ । दस्युम् । प्र दभीतिम् । आवः ।
रम्भी । चित् । अत्र । विविदे । हिरण्यम् । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ ९ ॥

भाषायाम्.

८. अङ्गिरोभिर्गृणानः (=स्तुतः) [स] वलं भिनत् (=वलासुरमभिनत्) । पर्वतस्य (=मेघस्य) दृंहितानि (=दुर्गाणि) वि ऐरत् (=न्यपादयत्=छित्त्वा भूमावपातयत्) । एषां (=तेषां दृंहितानां) कृत्रिमाणि रोधांसि (=क्रियया निर्वृत्तान् रोधनकर्तृन् प्राकारान्) रिणक् (=उदघाटयत्) । ता (=तानि) [कर्माणि] इन्द्रः सोमस्य मदे [संजाते] चकार ॥

९. चुमुरिं धुनिं च दस्युं (=चुमुरिनामकं धुनिं च नाम दासम् अनार्यं शत्रुं) स्वप्नेन (=स्वापेन=निद्रया) अभ्युप्य (=भूमौ प्रस्तार्य) जघन्थ (=हतवानसि)। दभीतिं [नामोपासकं] प्रावः (=प्रकर्षेण रक्षितवानसि) । अत्र (=तस्मिन्युद्धे) रम्भी चित् (=? तव रक्षणावलम्बो दभीतिरेव) हिरण्यं विविदे (=तयोर्धनं लेभे)। ता (=तानि) [कर्माणि] इन्द्रः सोमस्य मदे [संजाते] चकार ॥

८. [इन्द्र] अंगिरसांनीं स्तविला होत्साता वलाला मारिता झाला. तो पर्वताचे बुरूज फोडून खालीं पाडिता झाला. तो त्यांचें कृत्रिम आवार मोकळें करिता झाला. इंद्र तें सर्व सोमाच्या मदांत करिता झाला.

९. [हे इंद्रा], तूं चुमुरि आणि धुनि या दस्यूंला निद्रेनें खालीं पाडून त्यांस मारिता झालास [आणि] दभीतीला रक्षिता झालास. ज्याला [तुझा] आधार होता तोच सुवर्णाप्रत पावला.— इंद्र तें सर्व सोमाच्या मदांत करिता झाला.

8. Praised by the Angirases he slew Vala. He rased to the ground the towers of the Mountain. He broke open their artificial walls. It was in the exhilaration of the soma that indra did those things.

9. Having laid Chumuri and Dhuni low through sleep, thou didst slay those Un-Âryan enemies and preserve Dhabhîti. He only who had [thy] support obtained the gold.—It was in the exhilaration of the soma that Indra did those things.

---

८. 'अंगिरस.' सू. ३१ मं. १. १७ आणि सू. १ मं. ६ पहा.

'वल.' सू. ११ मं. ५ आणि सू. ५२ मं. ५ आणि टीपा पहा.

९. 'चुमुरि.' हा एक असुर असे कीं ज्याचा इंद्रानें निद्रेंत वध केला. ह्या कथेस अनुसरून बरेच ठिकाणीं प्रस्तुत मंत्राप्रमाणें उल्लेख आलेले आहेत. पण चुमुरीला दभीतीसाठीं इंद्रानें निजवून मारिलें आणि त्याजबरोबर धुनीलाहि मारिलें यापेक्षां अधिक कांहीं सांगितलेलें नाहीं. ऋ. ७. १९. ४.

'धुनि' चुमुरीबरोबरच धुनीचें नांव येतें. दोघांलाहि निजवून दभीतीसाठीं मारिलें असें सांगितलें आहे त्याशिवाय दुसरें कांहीं विशेष धुनीविषयींहि ठाऊक नाहीं.

'दभीति.' सू. ११२ मं. २३ आणि टीप पहा.

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ १० ॥ १६ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १० ॥ १६ ॥

भाषायाम्.

१०. हे इन्द्र, नूनम् (=इदानीं) ते (=तव) मघोनी (=धनवती) सा (=प्रख्याता) दक्षिणा जरित्रे (=स्तोत्रे) वरं (=मनोभिलाषं) प्रति दुहीयत् (=संपादयेत्)। भगः (=दाता त्वं) नः स्तोतृभ्यः (=अस्मभ्यं स्तोत्रकर्तृभ्यः) शिक्ष (=देहि) माति धक् (=मातिक्रम=प्रथममस्मभ्यं दत्त्वा पश्चादन्येभ्यो देहि)। सुवीराः (=शोभनवीर्योपेतैः पुत्रैः सहिताः सन्तो) [वयं] विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=त्वामुद्दिश्य ब्रवाम)॥

सूक्तम् १६—२०७.

गृत्समद ऋषिः । इन्द्रो देवता । जगती छन्दः । अन्त्या तु त्रिष्टुप् ॥

प्र वः सतां ज्येष्ठतमाय सुष्टुतिमग्नाविव समिधाने हविर्भरे ।
इन्द्रमजुर्यं जरयन्तमुक्षितं सनाद्युवानमवसे हवामहे ॥ १ ॥

प्र । वः । सताम् । ज्येष्ठऽतमाय । सुऽस्तुतिम् । अग्नौऽइव । सम्ऽइधाने । हविः । भरे ।
इन्द्रम् । अजुर्यम् । जरयन्तम् । उक्षितम् । सनात् । युवानम् । अवसे । हवामहे ॥ १ ॥

भाषायाम्.

१. हे यजमानाः, वः (=युष्मदर्थं) सतां ज्येष्ठतमाय (=महतां देवानां बृहत्तमाय) [इन्द्राय] समिधाने (=समिद्धे) अग्नौ हविरिव सुष्टुतिं भरे (=शोभनां

१०. आतां हे इंद्रा, तुझी जी धनसमृद्ध प्रख्यात दक्षिणा ती स्तोत्याची मनकामना पूर्ण करो. स्तोत्यांला दे, तूं उदार आम्हांस वगळूं नको. चांगल्या वीरांनीं युक्त होत्साते आम्ही तुझी मोठी कीर्ति यज्ञांत गाऊं असें कर.

10. Now, Indra, may thy rich bounty fulfil the desire of the poet. Give to us the poets, do not pass us over, thou the liberal one. May we, accompanied by brave sons, sing great praises [to thee] in sacrifices.

१०. ही ऋचा आणि २०२व्या सूक्ताची जी शेवटची २१वी ऋचा ह्या एकच आहेत. तिचें भाषांतर आणि तिजवरील टिपा पहा.

सूक्त १६–२०७.

ऋषि–गृत्समद. देवता–इन्द्र. वृत्त–शेवटची त्रिष्टुभ्, उरलेलें सर्व सूक्त जगती वृत्ताचें.

१. [हे यजमान हो], तुम्हांसाठीं मोठ्यांत अत्यंत मोठा असा जो इंद्र त्याला पेटलेल्या अग्नींत हवि [अर्पण केल्या]प्रमाणें मी चांगली स्तुति अर्पण करितों. अजर [पण सर्वांस] जरा आणणारा, पुरातन काळापासून वाढलेला [तरी] सदा तरुण असा जो इंद्र, त्यातें आम्ही रक्षणासाठीं बोलावितों.

Hymn 16–207.

To *Indra*. By *Gṛitsamada*. Metre *Jagatî*, except in the last verse where it is *Trishṭubh*.

1. For your sake, [o sacrificers], I offer to Indra, the eldest of the great gods, an excellent hymn even as an oblation in the burning fire. We invoke for protection Indra that never grows old [though] he makes others old, [and] that has grown from ancient times [and is yet] ever young.

यस्मादिन्द्राद्बृहतः किं चनेमृते विश्वान्यस्मिन्त्संभृताधि वीर्या ।
जठरे सोमं तन्वी३सहो महो हस्ते वज्रं भरति शीर्षणि क्रतुम् २

यस्मात् । इन्द्रात् । बृहतः । किम् । चन । ईम् । ऋते । विश्वानि । अस्मिन् । सम्ऽभृता । अधि । वीर्या ।
जठरे । सोमम् । तन्वि । सहः । महः । हस्ते । वज्रम् । भरति । शीर्षणि । क्रतुम् ॥ २ ॥

न क्षोणीभ्यां परिभ्वे त इन्द्रियं न समुद्रैः पर्वतैरिन्द्र ते रथः ।
न ते वज्रमन्वश्नोति कश्चन यदाशुभिः पतसि योजना पुरु ॥३॥

न । क्षोणीभ्याम् । परिऽभ्वे । ते । इन्द्रियम् । न । समुद्रैः । पर्वतैः । इन्द्र । ते । रथः ।
न । ते । वज्रम् । अनु । अश्नोति । कः । चन । यत् । आशुऽभिः । पतसि । योजना । पुरु ॥ ३ ॥

स्तुतिं संपादयामि) । अजुर्यम् (=अजरं) जरयन्तम् (=इतरान् जीर्णांकुर्वन्तं) सनादुक्षितं (=पुरातनकालादारभ्य वर्धितम्) [अपि] युवानं (=सदा तरुणम्) इन्द्रम् अवसे (=रक्षणाय) हवामहे (=आह्वयामः) ॥

भाषायाम्.

२. बृहतः (=महतो) यस्माद् ईम् इन्द्राद् ऋते (=इन्द्रं वर्जयित्वा) किं चन (=किमपि न) [वर्तते] अस्मिन् (=तस्मिन्) [इन्द्रे] अधि विश्वानि वीर्या संभृता (=सर्वाणि सामर्थ्यानि संभृतानि संहितानि) [सन्ति] । [स] जठरे सोमं तन्वि (=शरीरे) सहो महः (=बलं तेजश्च) हस्ते वज्रं [तथा] शीर्षणि (=शिरसि) क्रतुं (=विज्ञानं) [च] भरति (=धारयति) ॥

३. हे इन्द्र, यत् (=यदा) आशुभिः पुरु योजना पतसि (=क्षिप्रैरश्वैर्बहूनि योजनानि गच्छसि) [तदा] न क्षोणीभ्यां ते इन्द्रियं परिभ्वे (=द्यावापृथिवीभ्यामपि तव सामर्थ्यं न परिभवनाय=नाभिभवनाय) [योग्यं भवति], न समुद्रैः पर्वतैस्ते रथः [परिभ्वे भवति] (=समुद्रैरपि पर्वतैरपि वा तव रथोभिभवितुं योग्यो न भवति), ते वज्रं कश्चन नान्वश्नोति (=न कोपि तव वज्रस्य साम्यं करोति) ॥

२. ज्या महा इंद्राशिवाय कांहींच [होत] नाहीं त्याच्या ठायीं सकळ सामर्थ्यें एकवट झालीं आहेत. तो [आपल्या] पोटांत सोम, शरीराचे ठायीं बळ [आणि] तेज, हातांत वज्र, [आणि] मस्तकांत विज्ञान धारण करितो.

३. हे इंद्रा, तूं जेव्हां वेगवंत अश्वांच्या योगानें पुष्कळ योजनें धांवत असतोस, तेव्हां तुझ्या बळाला द्यावापृथिवी [सुद्धा] जिंकूं शकत नाहींत, तुझ्या रथाला समुद्र अथवा पर्वत [सुद्धा] [जिंकूं शकत नाहींत], [आणि] तुझ्या वज्राची कोणीहि बरोबरी करूं शकत नाहीं.

2. In that great Indra, without whom there is nothing, all prowess is collected. He bears the soma in his stomach, power and splendor in his person, the thunderbolt in his hand, [and] wisdom in his head.

3. When thou dost fly many leagues with quick horses, not by Earth and Heaven is thy prowess to be surpassed, not by seas and mountains, o Indra, [is] thy chariot [to be surpassed], nor does any one equal thy thunderbolt.

---

२. 'मस्तकांत विज्ञान'='शीर्षणि क्रतुम्.' विज्ञान अथवा प्रज्ञा किंवा बुद्धि मस्तकांत असते ही समजूत केवळ आधुनिक नव्हे, तर फार प्राचीन आहे. रावणादिक जे असुर आणि ब्रह्मदेव, शिव, इत्यादिक जे देव, त्यांस एकापेक्षां अधिक शिरें होतीं असें जें कवींनीं कल्पिलें, त्याचें तात्पर्य असें कीं त्यांची प्रज्ञा एका मस्तकांत जितकी राहावी त्यापेक्षां मोठी होती. असें दाखविण्याकरितांच अधिक शिरें होतीं, म्हणून सांगितलें आहे. त्याप्रमाणें मोठें सामर्थ्य होतें असें दाखविण्याकरितां सहस्र अथवा तसेच कांहीं पुष्कळ बाहु होते असें कवि म्हणतात. उदाहरणार्थ सहस्रार्जुन, काळी, महिषासुरमर्दनी इत्यादि प्रसिद्ध आहेत.

विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भरन्ति वृषभाय सश्चते ।
वृषा यजस्व हविषा विदुष्टरः पिबेन्द्र सोमं वृषभेण भानुना ॥४॥

विश्वे । हि । अस्मै । यजताय । धृष्णवे । क्रतुम् । भरन्ति । वृषभाय । सश्चते ।
वृषा । यजस्व । हविषा । विदुःऽतरः । पिब । इन्द्र । सोमम् । वृषभेण । भानुना ॥ ४ ॥

वृष्णः कोशः पवते मध्व ऊर्मिर्वृषभान्नाय वृषभाय पातवे ।
वृषणाध्वर्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वति ५।१७

वृष्णः । कोशः । पवते । मध्वः । ऊर्मिः । वृषभऽअन्नाय । वृषभाय । पातवे ।
वृषणा । अध्वर्यू इति । वृषभासः । अद्रयः । वृषणम् । सोमम् । वृषभाय । सुस्वति ॥ ५ ॥ १७ ॥

भाषायाम्.

४. हि (=यस्मात् कारणाद्) विश्वे (=सर्वे) [जना] यजताय (=पूजनीयाय) धृष्णवे (=शत्रूणां धर्षणशीलाय) सश्चते (=साहाय्यं कर्तुं सज्जमानाय=साहाय्यसिद्धाय) अस्मै वृषभाय (=वीराय) क्रतुं भरन्ति (=यज्ञरूपं कर्म प्रणयन्ति)।—हे इन्द्र, विदुष्टरः (=अतिशयेन विद्वान्) वृषा (=वीरस्) [त्वं] भानुना वृषभेण (=दीप्यमानेन वीरेण अग्निना द्वारा) हविषा यजस्व (=दत्तहविष्को भव) सोमं पिब [च] ॥

५. वृष्णो मध्वः (=वीर्यवतो मधुरस्य सोमस्य) कोशः (=कोशस्थो रसः) ऊर्मिश् [च] (=धारा च) वृषभान्नाय वृषभाय पातवे पवते (=वीरान्नभक्षिणे वीरायेन्द्राय पातुं गच्छति=पानाय पात्रे पतति)। वृषणा अध्वर्यू (=वृषणौ=वीरावध्वर्यू) वृषभासश् [च] अद्रयः (=वीराश्च ग्रावाणो) वृषणं (=वीरं) सोमं वृषभाय (=वीरायेन्द्राय) सुष्वति (=अभिषुण्वन्ति) ॥

४. कारण कीं हा जो पूज्य, पराक्रमी, [आणि] साहाय्यकारी [इन्द्र] प्रभु त्याची सर्व लोक उपासना करितात.– तर हे इन्द्रा, अत्यंत विद्वान् वीर जो तूं तो तेजस्वी वीर अग्नि याच्या द्वारें हविर्दान स्वीकारून घे [आणि] सोम पी.

4. For all bring sacrifice to this hero, [who is] adorable, victorious, [and] ready to help.—Do thou, the most knowing hero, o Indra, accept through the resplendent hero [Agni] the worship with the oblation, [and] drink the soma.

५. वीर्यवान् [आणि] मधुर अशा [सोमा]चा रस [आणि] प्रवाह, वीरान्नभक्षी जो वीर त्याणें प्यावा म्हणून गळत आहे. दोघे वीर अध्वर्यू [आणि] वीर जे पाषाण ते वीर [इंद्रा]साठीं वीर सोम काढीत आहेत.

5. The juice, the stream of the heroic sweet [soma], is flowing for the hero, who eats the heroic food, to drink. The two heroic Adhvaryus [and] the heroic stones are pressing the heroic soma for the hero.

---

५. 'वीर पाषाण.' म्हणजे ग्रावे. 'वीर' ह्या अर्थाचा वृषन् अथवा वृषभ हा शब्द या मंत्रांत कसा योजिला आहे तें लक्ष्यांत ठेवावें. सोमरसाविषयीं प्राचीन आर्य काय समजत तें यावरून दिसतें.

वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा ।
वृष्णो मदस्य वृषभ त्वमीशिष इन्द्र सोमस्य वृषभस्य तृष्णुहि॥६॥

वृषा । ते । वज्रः । उत । ते । वृषा । रथः । वृषणा । हरी इति । वृषभाणि । आयुधा ।
वृष्णः । मदस्य । वृषभ । त्वम् । ईशिषे । इन्द्र । सोमस्य । वृषभस्य । तृष्णुहि ॥ ६ ॥

प्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः ।
कुविन्नो अस्य वचसो निबोधिषदिन्द्रमुत्सं न वसुनः सिचामहे ७

प्र । ते । नावम् । न । समने । वचस्युवम् । ब्रह्मणा । यामि । सवनेषु । दधृषिः ।
कुवित् । नः । अस्य । वचसः । नि॒ऽबोधिषत् । इन्द्रम् । उत्सम् । न । वसुनः । सिचामहे ॥ ७ ॥

भाषायाम्.

६. [हे इन्द्र], ते (=तव) वज्रः वृषा (=वीरो) [भवति] उत (=अपि च) ते रथो वृषा (=वीरो) [भवति] । [तव] हरी वृषणा (=वृषणौ) [भवतः] । [तव] आयुधा (=आयुधानि) वृषभाणि (=वीर्ययुक्तानि)। हे वृषभ (=वीर), वृष्णः (=वीरस्य) मदस्य (=मदकारिणः सोमस्य) त्वम् ईशिषे (=स्वामी भवसि)। हे इन्द्र, वृषभस्य (=वीरस्य) सोमस्य (=तस्य पानेन) तृष्णुहि (=तृप्तो भव) ॥

७. दाधृषिः (=धर्षकः=त्वद्गमनरूपधर्षणस्वभावः) [अहं] वचस्युवं (=स्तोत्रेच्छुं) नावं (=नौकासदृशं) ते (=त्वां) समने न (=संग्राम इव) सवनेषु (=त्रिषु सवनेषु) ब्रह्मणा प्र यामि (=प्राप्नोमि=स्तौमि) । [स] नः अस्य वचसः (=अस्माकमस्योच्यमानस्य स्तोत्रस्य=इदं स्तोत्रं) कुवित् (=बहु) निबोधिषत् (=नितरां बुध्यताम्) । वसुन उत्सं न (=धनस्य निधिमिव=धननिधिसदृशम्) इन्द्रं सिचामहे (=सोमेन सिञ्चामः) ॥

६. तुझें वज्र वीर [आहे] आणि तुझा रथ वीर [आहे]. तुझे अश्व वीर [होत], [तुझीं] आयुधें वीर [होत]. हे वीरा, तूं वीर सोमाचा राजा आहेस. हे इन्द्रा, तूं वीर सोम पिऊन तृप्त हो.

७. [हे इन्द्रा], मी धैर्य करून तुज नौकासदृशाला आणि स्तोत्रप्रियाला संग्रामांत स्तविल्याप्रमाणें स्तोत्रानें यज्ञांत स्तवितों.— [इन्द्र] हें आमचें स्तोत्र ऐको. आम्ही धनाच्या निधीसारिखा जो इन्द्र त्याला [सोमांनीं] भिजवितों.

6. Heroic [is] thy thunderbolt, heroic [is] thy chariot, heroic [are] thy horses, heroic [are] thy weapons. Thou, o hero, art the master of the heroic juice. Be gratified, o Indra, with the heroic soma.

7. I [being] venturesome, o Indra, with praise approach thee in the sacrifices—thou who art fond of praise [and like] a ship—as in battle.—May [Indra] hear this praise of ours. We sprinkle [with somas] Indra even as a spring of wealth.

---

७. ‘ नावेसारिखा तारक आणि स्तोत्रावर प्रीति करणारा जो इंद्र त्याला मी जसा युद्धांत बोलावितों, तसा आज या यज्ञांत स्तोत्र म्हणून बोलावितों; तर तो आमचें हें स्तोत्र ऐको. आम्ही इंद्राला धननिधि असें समजून सोम ओतून भिजवितों.’

पुरा संबाधादभ्या ववृत्स्व नो धेनुर्न वत्सं यवसस्य पिप्युषी ।
सकृत्सु ते सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि ८

पुरा । सम्ऽबाधात् । अभि । आ । ववृत्स्व । नः । धेनुः । न । वत्सम् । यवसस्य । पिप्युषी ।
सकृत् । सु । ते । सुमतिऽभिः । शतक्रतो इति शतऽक्रतो । सम् । पत्नीभिः । न । वृषणः । नसीमहि ॥ ८ ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥ १८ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ९ ॥ १८ ॥

भाषायाम्.

८. यवसस्य पिप्युषी (=यवसस्य घासस्य भक्षणेन वर्धिता) धेनुर्वत्सं न (=गौर्वत्सं यथा संबाधाद्दुःखादावर्तयति रक्षति तथा) संबाधात् पुरा (=दुःखात्) नः (=अस्मान्) अभ्या ववृत्स्व (=आवर्तय परावर्तय=रक्ष) । हे शतक्रतो (=शतप्रज्ञ इन्द्र), पत्नीभिर्वृषणो न (=स्त्रीभिर्युवानो यथा संनसन्ते तथा) सकृत् (=क्षिप्रं) ते सुमतिभिः (=तव शोभनमतिभिरनुग्रहरूपाभिः) सु (=सुष्ठु यथा तथा) सं नसीमही (=संगच्छेमहि=यथा वयं तव अनुग्रहात्मिकाभिर्मतिभिः संगता भवेम तथा कुरु) ॥

९. हे इन्द्र, नूनम् (=इदानीं) ते (तव) मघोनी (=धनवती) सा (=प्रसिद्धा) दक्षिणा जरित्रे (=स्तोत्रे) वरं (=मनोभिलाषं) प्रति दुहीयत् (=संपादयेत्) । भगः (=दाता त्वं) नः स्तोतृभ्यः (=अस्मभ्यं स्तोत्रकर्तृभ्यः) शिक्ष (=देहि) । माति धक् (=मातिक्रम=प्रथममस्मभ्यं दत्त्वा पश्चादन्येभ्यो देहि) । सुवीराः (=शोभनवीर्योपेतैः पुत्रैः सहिताः सन्तो) विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=त्वामुद्दिश्य ब्रवाम) ॥

८. [हे इंद्रा], गवत खाऊन पुष्ट झालेली गाय वत्साला संकटापासून [रक्षिते त्या]प्रमाणें आम्हांला संकटापासून रक्ष. हे शतप्रज्ञ [इन्द्रा], स्त्रियांशीं जसा पतींचा [संयोग होतो] त्याप्रमाणें तुझ्या ज्या कृपा त्यांशीं आमचा सत्वर संयोग होई असें कर.

8. Preserve us from distress even as a cow fattened with grass [preserves her] calf. Unite us quickly, o thou of hundred intellects, with thy favours even as husbands [unite] with their wives.

९. आतां हे इंद्रा, तुझी जी धनसमृद्ध प्रख्यात दक्षिणा ती स्तोत्याची मनकामना पूर्ण करो. स्तोत्यांला दे, तूं उदार आम्हांस वगळूं नको. चांगल्या वीरांनीं युक्त होत्साते आम्ही यज्ञांत तुझी मोठी कीर्ति गाऊं असें कर.

21. Now, Indra, may thy rich bounty fulfil the desire of the poet. Give to us the poets, do not pass us over, thou the liberal one. May we, accompanied by brave sons, sing great praises [to thee] in sacrifices.

८. 'कृपा' = 'सुमतिभिः'. ऋ. ४.२३.२ आणि सायणभाष्य पहा. यांत दिलेली उपमा जरी चमत्कारिक आहे, तरी ती वेदांत बरेच ठिकाणीं येत असते.

सूक्तम् १७–२०८.

गृत्समद ऋषिः । इन्द्रो देवता । जगती छन्दः । अन्त्ये द्वे त्रिष्टुभौ ॥

तदस्मै नव्यमङ्गिरस्वदर्चत शुष्मा यदस्य प्रत्नथोदीरते ।
विश्वा यद्गोत्रा सहसा परीवृता मदे सोमस्य दृंहितान्यैरयत् ॥१॥

तत् । अस्मै । नव्यम् । अङ्गिरस्वत् । अर्चत । शुष्माः । यत् । अस्य । प्रत्नऽथा । उत्ऽईरते ।
विश्वा । यत् । गोत्रा । सहसा । परिऽवृता । मदे । सोमस्य । दृंहितानि । ऐरयत् ॥ १ ॥

स भूतु यो ह प्रथमाय धायस ओजो मिमानो महिमानमातिरत् ।
शूरो यो युत्सु तन्वं परिव्यत शीर्षणि द्यां महिना प्रत्यमुञ्चत॥२॥

सः । भूतु । यः । ह । प्रथमाय । धायसे । ओजः । मिमानः । महिमानम् । आ । अतिरत् ।
शूरः । यः । युत्ऽसु । तन्वम् । परिऽव्यत । शीर्षणि । द्याम् । महिना । प्रति । अमुञ्चत ॥ २ ॥

भाषायाम्.

१. [हे स्तोतारः], यत् (=यस्मात्कारणाद्) अस्य शुष्माः प्रत्नथा उदीरते (=अस्य सामर्थ्यानि यथा पुरातनकाले तथेदानीमपि उद्गच्छन्ति प्रवर्तन्ते) यद् (=यस्मात्) [च] [स] परीवृता (=वृत्रेणाक्रान्तानि) दृंहितानि (=दृढं निरुद्धानि) गोत्रा (=गोत्राणि गोष्ठानि=मेघोदकानि) सोमस्य मदे [संजाते सति] सहसा (=स्वबलेन) ऐरयत् (=अपावृणोत्) तत् (=तस्मात्कारणात्) अस्मै (=तस्मा इन्द्राय) अङ्गिरस्वत् (=अङ्गिरसो यथार्चन्ति स्म तथा) नव्यं (=नूतनं स्तोत्रम्) अर्चत (=ब्रूत) ॥

२. यो ह प्रथमाय धायसे (=प्राथमिकाय सोमपानाय) ओजो मिमानः (=बलं कुर्वन्=प्रकाशयन्) महिमानम् आ अतिरत् (=स्वमहत्त्वमवर्धयत्) यः शूरो युत्सु (=संग्रामेषु) तन्वं परिव्यत (=आत्मानं कर्मणा परिवीतमकरोत्=शौर्येणारक्षत्) स [तादृश एव] भूतु (=भवतु=जयतु)। [स] महिना (=महिम्ना) द्यां शीर्षणि (=स्वशिरसि) प्रत्यमुञ्चत (=अभरत्=अधारयत्) ॥

सूक्त १७–२०८.

ऋषि–गृत्समद. देवता–इन्द्र. वृत्त–शेवटील दोन त्रिष्टुभ्, उरलेल्यांचें जगती.

१. अंगिरसांप्रमाणें तुम्ही याजप्रीत्यर्थ नवें स्तोत्र म्हणा, कारण कीं याच्या शक्ति पुरातन काळाप्रमाणेंच उठत असतात, [आणि] कारण कीं हा वेढलेले आणि घट्ट झांकलेले जे गाईंचे गोठे ते सर्व सोमाच्या मदांत आपल्या बळानें उघडून टाकिता झाला.

२. जो प्रथम [सोम]पानासाठीं [आपलें] बळ दाखवून [आपला] महिमा वाढविता झाला, जो शूर [होत्साता] आपणा स्वताहाला संग्रामांत रक्षिता झाला, त्याचा जय असो. तो आपल्या महिम्यानें द्यूला [आपल्या] शिरावर ठेविता झाला.

Hymn 17–208.

To *Indra*. By *Gṛitsamada*. Metre —*Jagatî* except in the last two verses where it is *Trishṭubh*.

1. Sing in honour of him a new hymn like the Angirases, since his powers rise as in ancient times, and since he broke open with his strength, in the exhilaration of soma, all the cow-folds that were guarded around and fortified.

2. May he prosper, who for the first drink exhibited his strength and increased his greatness, [and] who [being] brave defended himself in battles. He by [his] strength placed the heaven on his head.

---

१. 'अंगिरस्.' सू. ३१ मं.१,१७, आणि सू. १ मं. ६ आणि टीप पहा.

'उठत असतात'=' उदीरते.' म्हणजे जाज्वल्य आहेत, जीवंत जणुं आहेत, जागृत आहेत.

२. 'इंद्राला प्रथम सोम अर्पण करितात तो त्याणें आपला पराक्रम लोकांस दाखविल्यावरून आणि तेणेंकरून आपला महिमा वाढवून घेतल्यावरून आणि द्यूलाहि माथ्यावर घेण्यास समर्थ आहे असें दाखविल्यावरून करितात; तर तो पुढेंहि तसाच पराक्रमी असो.' हा मंत्र जरा कठिण आहे. 'भूतु' 'आतिरत्' आणि 'परिव्यत' यांचे अर्थ कठिण दिसतात. 'मिमानः' याचा 'दाखवून' असा अर्थ केला आहे त्याविषयीं इतर ठिकाणीं प्रमाण पाहून तो केला आहे.

अधांकृणोः प्रथमं वीर्यं महद्यदस्याग्रे ब्रह्मणा शुष्ममैरयः ।
रथेष्ठेन हर्यश्वेन विच्युताः प्र जीरयः सिस्रते सध्र्यंक् पृथंक्॥३॥

अधं । अकृणोः । प्रथमम् । वीर्यम् । महत् । यत् । अस्य । अग्रे । ब्रह्मणा । शुष्मम् । ऐरयः ।
रथेऽस्थेन । हरिऽअश्वेन । विऽच्युताः । प्र । जीरयः । सिस्रते । सध्र्यंक् । पृथंक् ॥ ३ ॥

अधा यो विश्वा भुवनाभि मज्मनैशानकृत्प्रवया अभ्यवर्धत ।
आद्रोदसी ज्योतिषा वह्निरातनोत्सीव्यन्तमांसि दुधिता समव्ययत् ॥ ४ ॥

अधं । यः । विश्वा । भुवना । अभि । मज्मना । ईशानऽकृत् । प्रऽवयाः । अभि । अवर्धत ।
आत् । रोदसी इति । ज्योतिषा । वह्निः । आ । अतनोत् । सीव्यन् । तमांसि । दुधिता । सम् । अव्ययत् ॥ ४ ॥

भाषायाम्.

३. अध (=अपि च) [हे इंद्र], [तत्] महत् वीर्यं (=तद्वक्ष्यमाणं बृहद् वीरकर्म) प्रथमम् अकृणोः (=त्वम् अकरोः) यत् (=यदा) अग्रे (=सर्वस्यादौ) ब्रह्मणा (=स्तोत्रेण) [वर्धितः सन्] अस्य शुष्मं (=तस्य वृत्रस्य बलम्) ऐरयः (=न्यैरयः अहिंसः)। रथेस्थेन (=रथस्थितेन) हर्यश्वेन (=हरयोश्वा यस्य तेन त्वया) विच्युताः (=स्वस्थानाच्यावितार) जीरयः (=शत्रुवीराः) सध्र्यक् पृथक् (=केचित्संयुक्ताः केचिद् वियुक्ताः सन्तः) प्र सिस्रते (=प्रकर्षेणेतस्ततो धावन्ति स्म) ॥

४. अध (=अपि च) यो मज्मना (=बलेन) अभि विश्वा भुवना (=अभि विश्वानि भुवनानि=सर्वान् लोकान् अभिलक्ष्य) प्रवया ईशानकृत् (=बलवान् ऐश्वर्यकृत् प्रबलो राजा) अभ्यवर्तत । आत् (=अनन्तरं) वह्निः (=नायकः) [स] रोदसी (=द्यावापृथिव्यौ) ज्योतिषा आ अतनोत् (=प्रकाशेनापूरयत्)। [अपि च] दुधिता तमांसि (=पूर्वोक्तेन ज्योतिषा नाशितान्यन्धतमसानि) सीव्यन् (=वस्त्रमिव सूच्या सधाय) समव्ययत् (=समावृणोत्) ॥

३. आणि हे इंद्रा, त्वां पहिला मोठा पराक्रम केला तो हा कीं, तूं स्तोत्राच्या योगानें प्रथम त्या [वृत्रा]चें बळ निर्दाळून टाकिता झालास: रथावर बसलेला आणि पीताश्व असा जो तूं, त्या त्वां खालीं पाडलेले शत्रु [कांहीं] एकवट होऊन [आणि कांहीं] निरनिराळे पळून गेले.

४. आणि जो, आपल्या सामर्थ्यानें वाढून सकळ भुवनांचा सामर्थ्यवान् राजा झाला. नंतर तो नायक द्यावापृथिवींस प्रकाशानें भरिता झाला. [आणि] अंधकाराचा नाश करून शिवून झांकून ठेविता झाला.

3. And that great achievement thou didst perform first, that by the hymn thou didst throw down in the beginning the might of that [Vṛitra]: [His] warriors thrown down by thee, that didst sit in thy chariot and wast driven by thy tawny horses, ran about some to-gether, some separately.

4. And he with his might grew as the mighty king of all the worlds. Then he the leader filled earth and heaven with light, [and] sewing the subdued darkness put it under a shroud.

---

३. या मंत्रांत ‘ अस्य ’ याचें विशेष्य सांगितलेलें नाहीं, आणि ‘ जीरयः’ हा शब्द अप्रसिद्ध आहे, या दोन अडचणी आहेत. अस्य याचें विशेष्य जरी सांगितलेलें नाहीं तरी वृत्रस्य याचा अध्याहार सहज करतां येतो, असें आम्हांस वाटतें. ‘जीरयः’ याचा अर्थ पाश्चात्त्य पंडित मेघोदकें असा समजतात, तसा संभवेल; पण दुसऱ्या दोन ठिकाणीं हा शब्द आला आहे, तेथेंहि सायणभाष्यांत त्या अर्थाचें प्रमाण मिळत नाहीं. आणि तोच अर्थ केला पाहिजे असेंहि विशेष कांहीं कारण नाहीं.

४. ‘इंद्र आपल्या बळानें वाढून सकळ भुवनांचा बलाढ्य राजा झाला. नंतर पृथिवी आणि द्यु यांस प्रकाशानें भरून अंधकाराला जणुं वस्त्रांत शिवून टाकून बांधून ठेविता झाला.’

स प्राचीनान्पर्वतान्दृंहदोजसाधराचीनमकृणोदपामपः ।
अधारयत्पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रसः॥५॥१९

सः । प्राचीनान् । पर्वतान् । दृंहत् । ओजसा । अधराचीनम् । अकृणोत् । अपाम् । अपः ।
अधारयत् । पृथिवीम् । विश्वऽधायसम् । अस्तभ्नात् । मायया । द्याम् । अवऽस्रसः ॥ ५ ॥ १९ ॥

सास्मा अरं बाहुभ्यां यं पिताकृणोद्विश्वस्मादा जनुषो वेदसस्परि ।
येना पृथिव्यां नि क्रिविं शयध्यै वज्रेण हत्व्यवृणक्तुविष्वणिः॥६॥

सः । अस्मै । अरम् । बाहुऽभ्याम् । यम् । पिता । अकृणोत् । विश्वस्मात् । आ । जनुषः । वेदसः । परि ।
येन । पृथिव्याम् । नि । क्रिविम् । शयध्यै । वज्रेण । हत्वी । अवृणक् । तुविऽस्वनिः ॥ ६ ॥

इदमुक्तं भवति। इन्द्रः स्वकीयेन बलेन वर्धित्वा सर्वेषां भुवनानां प्रबलो राजाभवत्। अनन्तरं लोकद्वयं प्रकाशेन युक्तं कृत्वा तमोनाशयत्। तच्च तमः वस्त्रे संसीव्य तस्मिन् समावृणोदिव। इति॥

भाषायाम्.

५. स प्राचीनान् पर्वतान् (=प्रकर्षेण गच्छतः पर्वतसदृशान् मेघान्) ओजसा (=स्वबलेन) दृंहत् (=अदृंहत्=दृढीचकार)। अपाम् अपः (=मेघोदकानां कर्म) अधराचीनम् (=अधःप्रदेशगतम्) अकृणोत् (=अकरोत्=ता अधः पृथिव्यां यथा पतन्ति तथाकरोत्)। विश्वधायसं (=सर्वेषां धात्रीं) पृथिवीम् अधारयत्। मायया (=प्रज्ञया) द्याम् अवस्रसः (=अवपतनात्) अस्तभ्नात् (=आकाशेधारयत्)॥

६. यं [वज्रं] पिता [इन्द्रः] अकृणोत् (=पिता सन्नजनयद्) येन [च] वज्रेण तुविष्वणिः (=महाघोष) [इन्द्रः] क्रिविं [नामासुरं] हत्वी (=हत्वा) पृथिव्यां शयध्यै अवृणक् (=पृथिव्यां शयनं कर्तुम् अच्छिनत्=छित्त्वा पृथिव्याम् अशाययत्) स [वज्रो] विश्वस्मात् आ जनुषो वेदसः परि (=सर्वस्मादपि जनात् सर्वस्मादपि च वस्तुनः सकाशात्=एतेषामपेक्षया) अस्मै बाहुभ्याम् अरम् (=इन्द्रस्य बाह्वोरधिकतरं बलसाम्यं करोति=स वज्रो यथा इन्द्रबाह्वोर्बलं धारयति न केपि जना न कान्यपि वस्तूनि तथा धारयन्ति)॥

५. तो गतिमान् पर्वतांला आपल्या सामर्थ्यानें अचल करिता झाला. [आणि] उदकांला खालीं वाहविता झाला. तो सर्वांला पोसणारी जी पृथिवी तिला धारण करिता झाला. [आणि] आपल्या कौशल्यानें द्यूला खालीं न पडे अशा रीतीनें [अंतराळीं] स्थापिता झाला.

६. पिता इंद्र ज्या वज्राला जन्म देता झाला, [आणि] ज्या वज्रानें महाघोष इंद्र क्रिवीला मारून खालीं भूमीवर पाडून निजविता झाला, तें वज्र सकळ प्राण्यांपेक्षां आणि पदार्थांपेक्षां त्याच्या भुजांची अधिक बरोबरी करणारें होय.

5. He with his might made firm the moving mountains. He directed downwards the energy of the waters. He held the earth that nourishes all. He fixed with his skill the heaven from falling.

6. That thunderbolt which Indra begot [like a] father and with which he the great thunderer struck, felled and laid to sleep on the ground [the demon] Krivi, better equals his arms than do all beings and things.

---

५. 'पर्वतांला' म्ह० मेघांला.

६. 'इन्द्रानें केलेलें जें वज्र तें इंद्राच्या बाहूंची बरोबरी करितें, आणि तें वज्रच एकटें इंद्राच्या बाहूंची बरोबरी करितें, दुसरा कोणताहि प्राणी अथवा कोणताहि पदार्थ तशी बरोबरी करूं शकत नाहीं.'

'क्रिवि.' हा एक असुर होता आणि त्याचा इंद्रानें वध केला याशिवाय दुसरा कांहीं इतिहास ठाऊक नाहीं.

अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगम्।
कृधि प्रकेतमुप मास्या भर दद्धि भागं तन्वो३ येन मामहः॥ ७॥

अमाजूःऽइव । पित्रोः । सचा । सती । समानात् । आ । सदसः । त्वाम् । इये । भगम् ।
कृधि । प्रऽकेतम् । उप । मासि । आ । भर । दद्धि । भागम् । तन्वः । येन । ममहः ॥ ७ ॥

भोजं त्वामिन्द्र वयं हुवेम ददिष्ट्वमिन्द्रापांसि वाजान्।
अविड्ढीन्द्र चित्रया न ऊती कृधि वृषन्निन्द्र वस्यसो नः ॥ ८ ॥

भोजम् । त्वाम् । इन्द्र । वयम् । हुवेम । ददिः । त्वम् । इन्द्र । अपांसि । वाजान् ।
अविड्ढि । इन्द्र । चित्रया । नः । ऊती । कृधि । वृषन् । इन्द्र । वस्यसः । नः ॥ ८ ॥

भाषायाम्.

७. [हे इन्द्र], पित्रोः सचा सती अमाजूः समानादा सदस इव (=मातापित्रोर्गृहे निवसन्ती तस्मिन्गृह एव जीर्णा भवन्ती कन्या यथा भगं सौभाग्यं पितृसाधारणाद्गृहाद्याचते तथा) [अहं] त्वां भगम् इये (=त्वां सौभाग्यं याचे)। [अतः कारणात्] प्रकेतं कृधि (=अस्मासु प्रज्ञानं कुरु=अन्तश्चक्षुः कुरु) [अपिच] येन तन्वो [भागेन] (=तवात्मनो भाग्येन) [यजमानान्] मामहः (=आपूजयसि=सुखयसि) [तं] भागम् उप मासि (=एतावदिदं तव देयं धनमिति कुरु=दानाय पृथक्कुरु=) आ भर (=तदानय) दद्धि (=देहि च) ॥

८. हे इन्द्र, भोजं (=दातारं) त्वां वयं हुवेम (=आह्वयेम=अस्माकमाह्वानं शृणु) । हे इन्द्र, त्वम् अपांसि वाजान् ददिः (=कर्माणि अन्नानि च=कर्मणामन्नानां च दाता) [भवसि] । हे इन्द्र, नः (=अस्मान्) चित्रया (=श्रेष्ठया) ऊती (=ऊत्या =साहाय्येन) अविड्ढि (=रक्ष) । हे वृषन्निन्द्र (=वीर इन्द्र), नः (=अस्मान्) वस्यसः (=अतिशयेन वसुमतः=सुखिनः) कृधि (=कुरु) ॥

७. [हे इंद्रा], आईबापांच्या घरीं राहून म्हातारी होणारी कन्या [पितृ]साधारण घरांतून जसें [सौभाग्य याचिते], तसा मी तुजपाशीं सौभाग्य याचितों. तूं [आमच्या अंगीं] अंतश्चक्षु उत्पन्न कर. तुझ्या ज्या [भाग्या]नें तूं [उपासकांस] संतोषवीत असतोस तें भाग्य [आम्हांकरितां] काढ, घेऊन ये [आणि आम्हांस] दे.

८. हे इंद्रा, तुज दात्याचें आम्हांस आह्वान करूं दे. हे इंद्रा, तूं कर्में [आणि] अन्न देणारा [आहेस]. हे इंद्रा, तूं उत्कृष्ट पाठबळानें आमचें संरक्षण कर. हे वीरा इन्द्रा, तूं आम्हांस सुखी कर.

7. I pray thee for good fortune, even as a maid that remains and grows old in [the house of her] parents [prays] from the common house. Create [in us] the internal sight. Set apart, bring [and] give [us] that good fortune of thine own with which thou gladdenest [thy worshippers].

8. Let us invoke thee, o Indra, who art bounteous. Thou, o Indra, art the giver of works and foods. Protect us, o Indra, with excellent help. Make us happy, o hero Indra!

---

७. ‘ एकाद्या कन्येला वर न मिळाल्यामुळें माहेरीं अविवाहित राहून वृद्ध होत जाणारी ती जशी वररूप सौभाग्य मोठ्या उत्कंठेनें याचिते, त्याप्रमाणें हे इंद्रा मी तुजपाशीं उत्कंठेनें सौभाग्य मागत आहें इ०’ असा भावार्थ.

‘ [पितृ]साधारण घरांतून’=‘समानात् आ सदसः’ म्हणजे ज्या घरांत आईबापांबरोबर राहत असेल तेथून. तिला पति न मिळाल्यामुळें स्वताहाचें घर नसतें असें दाखविण्याकरितां हें वाक्य घातलें आहे असें दिसतें.

ह्या मंत्रावरून उघड दिसून येतें कीं वेदकाळीं मुलींना जर वर मिळाला नाहीं तर तिला तिचे आईबाप कोणाना कोणा म्हाताऱ्याला अथवा आंधळ्याला, किंवा दहावीस बायका आधींच असणाऱ्या एकाद्याला देऊन टाकून कसेंतरी नांवाचें लग्न करीत नव्हते, तर वर न मिळाला असतां मुलींस म्हाताऱ्या होईपर्यंत तशाच अविवाहित ठेवीत असत. यावरून बालकन्याविवाह करण्याचे जे

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥ २० ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ९ ॥ २० ॥

भाषायाम्.

९. हे इन्द्र, नूनम् (=इदानीं) ते (=तव) मघोनी (=धनवती) सा (=प्रख्याता) दक्षिणा जरित्रे (=स्तोत्रे) वरं (=मनोभिलाषं) प्रति दुहीयत् (=संपादयेत्) । भगः (=दाता त्वं) नः स्तोतृभ्यः (=अस्मभ्यं स्तोत्रकर्तृभ्यः) शिक्ष (=देहि) । माति धक् (=मातिक्रम=प्रथममस्मभ्यं दत्त्वा पश्चादन्येभ्यो देहि) । सुवीराः (=शोभनवीर्योपेतैः पुत्रैः सहिताः सन्तो) विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=त्वामुद्दिश्य ब्रवाम) ॥

सूक्तम् १८—२०९.

गृत्समद ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

प्राता रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः सप्तरश्मिः ।
दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो भूत् ॥ १ ॥

प्रातरिति । रथः । नवः । योजि । सस्निः । चतुःऽयुगः । त्रिऽकशः । सप्तऽरश्मिः ।
दशऽअरित्रः । मनुष्यः । स्वःऽसाः । सः । इष्टिऽभिः । मतिऽभिः । रंह्यः । भूत् ॥ १ ॥

भाषायाम्.

१. नवः (=नूतनः) सस्निः (=संभक्ता=धनवान्) चतुर्युगः (=युगचतुष्टयोपेतस्) त्रिकशः (=तिस्रः कशा यस्य स) सप्तरश्मिः (=सप्तप्रग्रहो) दशारित्रः (=द-

९. आतां हे इंद्रा, तुझी जी धनसमृद्ध प्रख्यात दक्षिणा ती स्तोत्याची मनकामना पूर्ण करो. स्तोत्यांला दे, तूं उदार आम्हांस वगळूं नको. चांगल्या वीरांनीं युक्त होत्साते आम्ही यज्ञांत तुझी मोठी कीर्ति गाऊं असें कर.

9. Now, Indra, may thy rich bounty fulfil the desire of the poet. Give to us the poets, do not pass us over, thou the liberal one. May we, accompanied by brave sons, sing great praises [to thee] in sacrifices.

आलीकडे प्रचार पडले आहेत, त्यांस वेदांत आधार नाहीं इतकेंच नव्हे, पण उपवर झाल्यावर स्त्रियांचा विवाह करावा याविषयीं या मंत्रांत आधार सांपडतो. शिवाय ऋ. १.११७.७ आणि ऋ. १०.३९.३ आणि दुसऱ्या एकदोन मंत्रांतहि हा आधार सांपडतो.

८. 'कर्मं......देणारा'='अपांसि ददिः.' म्हणजे पराक्रम करविणारा, पराक्रम करण्याचें सामर्थ्य देणारा ?

सूक्त १८–२०९.

ऋषि–गृत्समद. देवता–इन्द्र. वृत्त–त्रिष्टुभ्.

१. नवा, धनवान्, चार जुकडांचा, तीन चाबकांचा, सात लगामांचा, दहा अरित्रांचा, मनुष्यांचें हित करणारा, स्वर्गामी, असा जो रथ तो प्रातःकाळीं जोडिला आहे. त्याला हविर्दानांनीं [आणि] स्तोत्रांनीं वेग देतां आला आहे.

Hymn 18–209.

To *Indra*. By *Gṛitsamada*. Metre —*Trishṭubh*.

1. In the morning is prepared the chariot that is new, rich, furnished with four yokes, having three whips, seven reins, ten openings, that is beneficial to mankind and moving in heaven. It has been accelerated by oblations [and] hymns.

१. 'इंद्रानें येथें यावें म्हणून आम्हीं आपल्या स्तोत्राच्या योगानें त्याचा रथ जोडिला आहे. तो लवकर येओ.' अथवा सायण म्हणतात त्याप्रमाणें येथें रथ म्हणजे यज्ञरूप रथ घ्यावयाचा आहे असें दिसतें खरें. तसा अभिप्राय

सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः स होता ।
अन्यस्या गर्भमन्य ऊं जनन्त सो अन्येभिः सचते जेन्यो वृषा ॥२

सः । अस्मै । अरम् । प्रथमम् । सः । द्वितीयम् । उतो इति । तृतीयम् । मनुषः । सः । होता ।
अन्यस्याः । गर्भम् । अन्ये । ऊं इति । जनन्त । सः । अन्येभिः । सचते । जेन्यः । वृषा ॥ २ ॥

शवक्त्रो) मनुष्यः (=मनुष्येभ्यो हितः) स्वर्षाः (=स्वर्गगामी) रथः प्रातः (=प्रातःकाले) योजि (=अयोजि=अयुज्यताश्वैः) । स इष्टिभिः (=यागैर्) मतिभिः (=स्तुतिभिश्) [च] रंह्यो भूत् (=प्रेरणीयोभवत्=ताभिः कृतवेगोभवत्) ॥

रथोत्र यज्ञरूपो वा यज्ञायेन्द्रानयनकर्मा तस्यैव रथो वा ॥

प्रथमपक्षे चतुर्युगश्चतुर्ग्रीवा । अध्वर्य्वाद्यृत्विग्युक्तो वा । त्रिकशः तिस्रः कशा वाचो मन्द्रमध्यमोत्कृष्टरूपा यस्य तथोक्तः । सवनत्रययुक्तो वा । सप्तरश्मिः सप्तसंख्याकानि गायत्र्यादीनि छन्दांसि यस्य स तथोक्तः । दशारित्रो दशग्रहयुक्तः । चमसाध्वर्युयुक्तो वा । स्वर्षाः स्वर्गस्य दाता । एवंविधो यज्ञः । इति सायणस्याभिप्रायः ॥

भाषायाम्.

२. सः (=?) अस्मै (=इन्द्राय) प्रथमं (=प्रथमे काले) अरं (=पर्याप्तो भवति) स द्वितीयं (=द्वितीये काले पर्याप्तो भवति) । उतो (=अपि च) स मनुषो होता (=मनुष्याणाम् अर्थे देवानाम् आह्वाता) तृतीयं (=तृतीये काले) [अरं=पर्याप्तो भवति] । अन्यस्या गर्भम् (=एकस्याः कस्याश्चिद् गर्भे पुत्रं सन्तम्) अन्ये उ (=अन्य एव केपि) जनन्त (=अजनयन्) । स जेन्यो वृषा (=प्रशस्तो वीरः) अन्येभिः सचते (=अन्यैः कैश्चिदेव सच्यते सेव्यते पुष्यते) ॥

स यज्ञः सोमो वास्मा इन्द्राय प्रथमं प्रातःसवने अरं पर्याप्तोभूत् ।.........स यज्ञः सोमो वा मनुषो मनुष्यस्य होता शुभानां वोढा भवति । .... अन्ये ऋत्विजोन्यस्याः पृथिव्या वेदात्मिकाया वाचो वा गर्भं सन्तं सोमं यज्ञं वा .... अन्येभिरन्यैरिन्द्रादिभिर्देवैः सचते । संगच्छते । इति सायणः ॥

२. तो याला प्रथम पुरतो, तो दुसऱ्या वेळेस आणि तो मनुष्याचा होता तिसऱ्या वेळस [पुरतो]. भलतीचा पुत्र असा तो भलत्यांचपासून उत्पन्न झाला. त्या प्रशस्त वीराचें पाळणपोषण भलतेच करितात.

2. He is enough for him the first, he the second time, and he the men's priest the third time. Offspring of one he is begotten by others. He the noble hero is brought up by others.

समजल्यास चार जुकडांचा इत्यादिक विशेषणांचा अर्थ काय समजावयाचा तें भाषेखालीं पहा.

'दहा अरित्रांचा' = 'दशारित्रः.' अरित्र म्हणजे वक्ष अथवा तोंड (दरवाजा ?) असें सायण म्हणतात.

२. यांत पदशः अर्थ उघड आहे तो आम्हीं वर दिला आहे. यांत तो म्ह० कोण तें समजत नाहीं. ऋषीनेंच ऋचा रचितांना गूढार्थ रचिली आहे. सायण तो म्ह० 'यज्ञ किंवा सोम' असें म्हणतात. तसें असेल, किंवा अग्नि विवक्षित असेल. भाषेखालीं पहा.

हरी नु कं रथ इन्द्रस्य योजमायै सूक्तेन वचसा नवेन ।
मो षु त्वामत्र बहवो हि विप्रा नि रीरमन्यजमानासो अन्ये॥३॥

हरी इति । नु । कम् । रथे । इन्द्रस्य । योजम् । आऽयै । सुऽउक्तेन । वचसा । नवेन ।

मो इति । सु । त्वाम् । अत्र । बहवः । हि । विप्राः । नि । रीरमन् । यजमानासः । अन्ये ॥ ३ ॥

आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूयमानः ।
आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः ॥ ४ ॥

आ । द्वाभ्याम् । हरिऽभ्याम् । इन्द्र । याहि । आ । चतुःऽभिः । आ । षट्ऽभिः । हूयमानः ।

आ । अष्टाभिः । दशऽभिः । सोमऽपेयम् । अयम् । सुतः । सुऽमख । मा । मृधः । करिति कः ॥ ४ ॥

भाषायाम्.

३. नु कम् (=इदानीम्) आयै (=आगमनाय) इन्द्रस्य रथे सूक्तेन नवेन वचसा (=शोभनं यथा तथा प्रोच्चारितेन अनन्यपूर्वकृतेन स्तोत्रेण) हरी (=एतन्नामकाविन्द्रस्याश्वौ) योजं (=युनज्मि=युनजानि)।—[हे इन्द्र], अत्र (=अस्मिन् समये) बहवो विप्राः (=मेधाविनः स्तोतारः) अन्ये यजमानाश् [च] त्वां मो सु हि नि रीरमन् (=नितरां मा रमयन्तु सोमपानार्थम् आगमनप्रवृत्तस्य तव मा विघ्नं कुर्वन्तु)॥

४. हे इन्द्र, हूयमानः (=अस्माभिराहूयमानस्त्वं) सोमपेयं (=सोमपानार्थं) द्वाभ्यां हरिभ्याम् (=अश्वाभ्याम्) आ याहि [अथवा] चतुर्भिरा [याहि] [अथवा] षड्भिरा [याहि] [अथवा] अष्टाभिरा [याहि] दशभिर् [वायाहि]। हे सुमख (=सुयज्ञ), अयम् [अत्र] सुतः (=अभिषुतः सोमो) [भवति]। मा मृधः कः (=मावज्ञां कुरु)॥

३. आतां इंद्रानें यावें म्हणून मला त्याच्या रथास सुंदर रीतीनें गाइलेल्या नव्या स्तोत्रानें पिवळ्या घोड्यांची जोडी जोडूं दे.– [हे इंद्रा], या वेळीं तुला पुष्कळ स्तोते आणि दुसरे यजमान अडवून न ठेवोत.

४. हे इंद्रा, तुला आम्ही बोलावीत आहों, तर तूं दोन घोड्यांनीं ये; चार [घोड्यां]नीं ये, सहांनीं ये, सोम प्यावयाला आठ [घोड्यां]नीं ये, दहांनीं [ये], हे सुयज्ञ [इन्द्रा], हा सोम काढिला आहे. तूं तिरस्कार करूं नकोस.

3. Let me now harness by means of a well-chanted new hymn the tawny horses to Indra's chariot that he may come.—Let not, [o Indra], the many poets and other sacrificers detain thee at this time.

4. Come by two horses, o Indra, come by four, come by six, thou who art invoked, come by eight [horses] [or] by ten, to drink the soma. Here is the extracted juice, o receiver of good sacrifices. Do not scorn.

---

३. 'नव्या'='नवेन.' म्ह० हें जें मी सूक्त म्हणत आहें तें नवें रचून म्हणत आहें. जुनें दुसऱ्या कोणाचें नव्हे. वैदिक ऋषि आपल्या सूक्तांस अनाद्यनंत समजत नसत.

या ऋचेंत यजमान वेगळे आणि यजमानांकरितां स्तोत्रें रचून तीं म्हणणारे कवि किंवा स्तोते वेगळे हा विवक्षित असलेला भेद ध्यानांत ठेवण्यासारखा आहे.

६. 'शुनहोत्र' या नांवाचें एक सोम घालण्याचें पात्र होय असें सायण म्हणतात.

आ विंशत्या त्रिंशता याह्यर्वाङा चत्वारिंशता हरिभिर्युजानः ।
आ पञ्चाशता सुरथेभिरिन्द्रा षष्ट्या सप्तत्या सोमपेयम् ॥५॥२१॥

आ । विंशत्या । त्रिंशता । याहि । अर्वाङ् । आ । चत्वारिंशता । हरिऽभिः । युजानः ।
आ । पञ्चाशता । सुऽरथेभिः । इन्द्र । आ । षष्ट्या । सप्तत्या । सोमऽपेयम् ॥ ५ ॥ २१ ॥

आशीत्या नवत्या याह्यर्वाङा शतेन हरिभिरुह्यमानः ।
अयं हि ते शुनहोत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय ॥६॥

आ । अशीत्या । नवत्या । याहि । अर्वाङ् । आ । शतेन । हरिऽभिः । उह्यमानः ।
अयम् । हि । ते । शुनऽहोत्रेषु । सोमः । इन्द्र । त्वाऽया । परिऽसिक्तः । मदाय ॥ ६ ॥

मम ब्रह्मेन्द्र याह्यच्छा विश्वा हरी धुरि धिष्वा रथस्य ।
पुरुत्रा हि विहव्यो बभूथास्मिञ्छूर सवने मादयस्व ॥ ७ ॥

मम । ब्रह्म । इन्द्र । याहि । अच्छ । विश्वा । हरी इति । धुरि । धिष्व । रथस्य ।
पुरुऽत्रा । हि । विऽहव्यः । बभूथ । अस्मिन् । शूर । सवने । मादयस्व ॥ ७ ॥

भाषायाम्.

५. हे इन्द्र, सोमपेयं (=सोमपानं प्रति) विंशत्या (=विंशतिसंख्याकैस्) त्रिंशता, चत्वारिंशता [वा] हरिभिः (=अश्वैर्) युजानः (=युक्तः सन्) अर्वाङ् आ याहि (=अस्मदभिमुख आ याहि) [अथ वा] पञ्चाशता (=एतत्संख्याकैः) सुरथेभिः (=शोभनरथयुक्तैरश्वैर्) आ [याहि] [अथ वा] षष्ट्या सप्तत्या [वा] (=षष्टिसंख्याकैः सप्ततिसंख्याकैर्) [वा] आ [याहि] ॥

६. अशीत्या नवत्या [वा] अर्वाङ् (=अस्मदभिमुख) आ याहि । शतेन हरिभिः (=अश्वैर्) उह्यमानः (=धार्यमाणस्त्वम्) आ [याहि] । हि (=यस्मा-

५. हे इंद्रा, तूं वीस [अथवा] तीस घोडे जोडून ये. [अथवा] चाळीस घोडे जोडून ये, सुंदर रथास जोडिलेल्या पन्नास [घोड्यां]नीं ये, सोम प्यावयास साठ [अथवा] सत्तर [घोड्यां]नीं ये.

६. ऐशीं [अथवा] नव्वद घोड्यांनीं येथें ये [अथवा] शंभर घोडे जोडून ये. कारण कीं हे इंद्रा, तुला मद येण्यासाठीं हा सोम त्वद्भक्तिपुरःसर शुनहोत्रांत ओतिला आहे.

७. हे इंद्रा, तूं माझ्या स्तोत्राप्रत ये. तुझे दोनहि घोडे रथाच्या धुरेला जोड. तुला जरी पुष्कळ ठिकाणीं बोलाविलें असेल तरी हे शूरा, या [आमच्याच] यज्ञांत तूं सोम पिऊन हर्ष पाव.

5. Come hither, drawn by twenty [or] by thirty [or] by forty horses; come by fifty horses harnessed, o Indra, to an excellent chariot, come by sixty [or] by seventy horses to drink the soma.

6. Come hither by eighty [or] by ninty [horses], come drawn by a hundred horses; for here, o Indra, is soma for thy exhilaration, poured into the S'unahotras out of love for thee.

7. Come to my hymn, o Indra, put both thy horses to the yoke of [thy] chariot. Thou hast indeed been the object of invocation in many places; but be thou, o hero, gratified nowhere else but in this our sacrifice.

न मे इन्द्रेण सख्यं वि योषदस्मभ्यमस्य दक्षिणा दुहीत ।
उप ज्येष्ठे वरूथे गभस्तौ प्रायेप्राये जिगीवांसः स्याम ॥ ८ ॥

न । मे । इन्द्रेण । सख्यम् । वि । योषत् । अस्मभ्यम् । अस्य । दक्षिणा । दुहीत ।
उप । ज्येष्ठे । वरूथे । गभस्तौ । प्रायेऽप्राये । जिगीवांसः । स्याम ॥८

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः॥९।२२

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ९ ॥ २२ ॥

त्कारणात्) हे इन्द्र, अयं सोमस्ते मदाय (=तव हर्षाय) शुनहोत्रेषु [नाम पात्रेषु] त्वाया परिषिक्तः (=निहितो) [भवति] ॥

शुनहोत्रेषु एतन्नामकेषु जनेषु मध्ये इति पाश्चात्त्याः ॥

७. हे इन्द्र, [त्वं] मम ब्रह्म (=मम स्तोत्रं प्रति) अच्छ याहि (=आयाहि) । विश्वा हरी (=विश्वावपि तव हरी=उभावपि तव पीताश्वौ) रथस्य धुरि धिष्व (=स्थापय=संयोजय) । पुरुत्रा (=बहुषु स्थलेषु) विहव्यो बभूथ हि (=विविधम् आह्वानविषयो जातोसि हि) तदपि हे शूर, अस्मिन् सवने (=अस्मिन्नस्माकमेव सवने यज्ञे) मादयस्व (=सोमपानेन हृष्टो भव) ॥

भाषायाम्.

८. इन्द्रेण [सह यत्] मे सख्यं [तत्] न वि योषत् (=कदाचिदपि मा वियुज्यताम्) । अस्य दक्षिणा (=तस्य दानम्) अस्मभ्यं दुहीत (=अभीष्टरूपं दुग्धं दद्यात्) । [तस्य] गभस्तौ उप ज्येष्ठे वरूथे (=तस्य बाहौ श्रेष्ठे संरक्षणोपाये समीपे सति=तादृशस्य बाहोराश्रये वर्तिनो वयं) प्रायेप्राये (=सर्वस्मिन्युद्धे) जिगीवांसः स्याम (=प्राप्तविजया भवेम) ॥

९. हे इन्द्र, नूनम् (=इदानीं) ते (=तव) मघोनी (=धनवती) सा (=प्रख्याता) दक्षिणा जरित्रे (=स्तोत्रे) वरं (=मनोभिलाषं) प्रति दुहीयत् (=संपादयेत्) ।

८. इंद्राशीं जें माझें सख्य तें न तुटो. त्याचें औदार्य आमचा मनोरथ पूर्ण करो. याचा जो बाहु त्याच्या श्रेष्ठ आश्रयाखालीं आम्ही प्रत्येक युद्धांत विजयी होऊं असें घडो.

९. आतां हे इंद्रा, तुझी जी धनसमृद्ध प्रख्यात दक्षिणा ती स्तोत्याची मनकामना पूर्ण करो. स्तोत्यांला दे, तूं उदार आम्हांस वगळूं नको. चांगल्या वीरांनीं युक्त होत्साते आम्ही यज्ञांत तुझी मोठी कीर्ति गाऊं असें कर.

8. May my friendship with Indra never be broken. May his bounty flow with milk for us. May we under the excellent protection of his arm be victorious in every battle.

9. Now, Indra, may thy rich bounty fulfil the desire of the poet. Give to us the poets, do not pass us over, thou the liberal one. May we accompanied by brave sons, sing great praises [to thee] in sacrifices.

सूक्तम् १९–२१०.

गृत्समद ऋषिः। इन्द्रो देवता। त्रिष्टुप् छन्दः।

अपाय्यस्यान्धसो मदाय मनीषिणः सुवानस्य प्रयसः।
यस्मिन्निन्द्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यन्तश्च नरः॥१॥

अपायि। अस्य। अन्धसः। मदाय। मनीषिणः। सुवानस्य। प्रयसः। यस्मिन्। इन्द्रः। प्रऽदिवि। ववृधानः। ओकः। दधे। ब्रह्मण्यन्तः। च। नरः॥ १ ॥

भगः (=दाता त्वं) नः स्तोतृभ्यः (=अस्मभ्यं स्तोत्रकर्तृभ्यः) शिक्ष (=देहि) मातिधक् (=मातिक्रम=प्रथममस्मभ्यं दत्त्वा पश्चादन्येभ्यो देहि)। सुवीराः (=शोभनवीर्योपेतैः पुत्रैः सहिताः सन्तो) विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=त्वामुद्दिश्य ब्रवाम)॥

भाषायाम्.

१. हे मनीषिणः (=प्राज्ञा यजमानाः), अस्य अन्धसः (=सोमरूपस्यान्नस्य) [अस्य] सुवानस्य प्रयसः (=अभिषूयमाणस्य प्रीतिकरस्य सोमस्य) [युष्माभिर्] मदाय (=हर्षप्राप्त्यर्थम्) अपायि (=अयमभिषूयमाणः सोमो युष्माभिः पीयतां=तं यूयं पिबत)। यस्मिन् [अन्धसि] वावृधानः (=तत्पानेनातिशयेन प्रवर्धमान) इन्द्रो ब्रह्मण्यन्तश्च नरः (=स्तोत्रादिकं कर्म कुर्वन्तश्च यजमानाः) प्रदिवि (=पुरातनेष्वहःसु=पुरातनकालादारभ्येदानीं यावत्) ओको दधे (=सेव्यतया निवासं चक्रुः=आसक्तया सेवन्ते)॥

मनीषिण इत्यस्य संबुद्धत्वादाद्युदात्तत्वम्॥

सूक्त १९–२१०.

ऋषि–गृत्समद. देवता–इन्द्र. वृत्त–त्रिष्टुभ्.

१. हे विद्वान् जन हो, ज्या पेयाच्या ठायीं प्रबळ होत्साता इन्द्र आणि उपासक जन प्राचीन काळापासून सुख भोगीत आले आहेत, तें हें पेय, [हें] प्रिय भक्ष्य गाळून काढिलें जात आहे, हें मद येण्याकरितां प्यावें.

HYMN 19–210.

To *Indra*. By *Gṛitsamada*. Metre —*Trishṭubh*.

1. Let this drink,[this] dear thing which is being pressed, be drunk for exhilaration, o learned men; in which from ancient time have Indra waxing strong and pious men placed their happiness.

---

१. 'जो सोम पिऊन इन्द्र आणि उपासक जन प्राचीन काळापासून प्रबळ झाले आणि त्यामुळें ज्या सोमाला अत्यंत मोठ्या सुखाचा विषय असें मानूं लागले, तो हा सोम गाळून काढिला जात आहे; तर तो तुम्ही प्या' असें सूक्तवक्ता आपल्या विद्वान् मित्रांस म्हणतो.

'प्राचीनकाळापासून'='प्रदिवि.' अक्षरशः प्राचीनकाळीं. ऋ. ३. ४६. ४ आणि त्याजवरील सायणभाष्य पहा. या ऋचेवरून प्राचीन आर्य लोक सोमपान केवळ देवांकडून करवीत असें नाहीं, तर आपण स्वतःहि करीत असत आणि सोमपानापासून बळ आणि अत्यंत सुख प्राप्त होतें असें मानीत असत हें उघड आहे.

अस्य मन्दानो मध्वो वज्रहस्तोऽहिमिन्द्रो अर्णोवृतं वि वृश्चत् ।
प्र यद्वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चक्रमन्त ॥ २ ॥

अस्य । मन्दानः । मध्वः । वज्रऽहस्तः । अहिम् । इन्द्रः । अर्णःऽवृतम् । वि । वृश्चत् ।
प्र । यत् । वयः । न । स्वसराणि । अच्छ । प्रयांसि । च । नदीनाम् । चक्रमन्त ॥ २ ॥

स माहिन इन्द्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रम् ।
अजनयत्सूर्यं विदद्गा अक्तुनाह्नां वयुनानि साधत् ॥ ३ ॥

सः । माहिनः । इन्द्रः । अर्णः । अपाम् । प्र । ऐरयत् । अहिऽहा । अच्छ । समुद्रम् ।
अजनयत् । सूर्यम् । विदत् । गाः । अक्तुना । अह्नाम् । वयुनानि । साधत् ॥ ३ ॥

भाषायाम्.

२. अस्य मध्वो मन्दानः (=अनेन पूर्वोक्तेन मधुरेण सोमरसेन हृष्ट) इन्द्रो वज्रहस्तः [सन्] अर्णोवृतं (=मेघोदकानाम् आवरकम्) अहिम् (=अहिसदृशं वृत्रं) वि वृश्चत् (=विविधम् अच्छिनत्) । यत् (=यदा) नदीनां प्रयांसि (=प्रीतिकराः प्रवाहा) अच्छ स्वसराणि वयो न (=कुलायानभिलक्ष्य पक्षिणो यथा धावन्ति तद्वत्) प्र चक्रमन्त च (=प्रकर्षेण गन्तुम् उपाक्रमन्) ॥

३. माहिनः (=महान्) अहिहा (=अहेर्वृत्रस्य हन्ता) स इन्द्रः अपाम् अर्णः (=मेघोदकानां प्रवाहम्) अच्छ समुद्रं प्रैरयत् (=समुद्रम् अभिलक्ष्य प्रसृष्टवान्) । [स] सूर्यम् अजनयत् (=उदपादयत्) । गा विदत् (=पणिहृता अङ्गिरसां गा अन्विष्यालभत) । अक्तुना (=स्वजनितस्य सूर्यस्य तेजसा) अह्नां वयुनानि (=दिवसानां प्रकाशान्=दिवसेषु दृश्यमानानि पदार्थजातानि) साधत् (=असाधयत्) ॥

२. हा मधुर [सोमरस] पिऊन हृष्ट झालेला जो इंद्र तो हातांत वज्र घेऊन, उदकांला वेढणाऱ्या अहीला तोडून तुकडे करिता झाला. आणि त्या वेळीं नद्यांचे रमणीय प्रवाह, पक्षी घरट्यांकडे [धांवतात त्या]प्रमाणें, बाहेर पडून धावूं लागले.

३. अहीतें मारणारा महान् इंद्र उदकांच्या प्रवाहांला समुद्राकडे पाठवून देता झाला. तो सूर्याला उत्पन्न करिता झाला. तो गाईंचा थांग लाविता झाला. तो तेजानें दिवसांचा प्रकाश साधिता झाला.

2. Exhilarated by this sweet [soma] Indra, arming himself with the thunderbolt, cut asunder the serpent that hemmed the waters; when the delicious streams of the rivers began to flow even as birds towards their nests.

3. That great Indra, the killer of the serpent, sent forth the stream of the waters towards the sea. He produced the sun. He discovered the cows. With the light he accomplished the splendors of the days.

---

२. सोम पिऊन इंद्रानें वृत्र मारिला आणि मेघोदकें मुक्त केलीं.

‘अहीला’=‘अहिम्.’ वृत्राला अहि असें नांव आहे. सू. ३२ मं १ आणि टीप पहा.

‘बाहेर पडून धावूं लागले’=‘प्र चक्रमन्त.’ म्हणजे समुद्राकडे मोठ्या वेगानें धावूं लागले असा अर्थ पुढल्या ऋचेवरून गम्यमान् दिसतो.

३. ‘अंगिरसांच्या गाई पणि नांवांच्या असुरांनीं चोरून नेल्या, त्यांचा, शोध लावण्याकरितां इंद्रानें सूर्य उत्पन्न केला, आणि त्या सूर्याच्या प्रकाशानें दिवसास दृष्टि पडणारी सृष्टि दृष्टिगोचर केली’ असा उत्तरार्धाचा भावार्थ आहे. अंगिरसांच्या गाईविषयीं सू. ६२ मं. २ टीप पहा.

सो अ॑प्र॒तीनि॒ मन॑वे पु॒रूणीन्द्रो॑ दा॒शद्दा॒शुषे॒ हन्ति॑ वृ॒त्रम् ।
स॒द्यो यो नृभ्यो॑ अत॒साय्यो॒ भूत्प॑स्पृधा॒नेभ्यः॒ सूर्य॑स्य सा॒तौ ॥ ४ ॥
सः । अ॒प्र॒तीनि॑ । मन॑वे । पु॒रूणि॑ । इन्द्रः॑ । दा॒श॒त् । दा॒शुषे॑ । हन्ति॑ । वृ॒त्रम् ।
स॒द्यः । यः । नृऽभ्यः॑ । अ॒त॒साय्यः॑ । भूत् । प॒स्पृ॒धा॒नेभ्यः॑ । सूर्य॑स्य । सा॒तौ ॥ ४ ॥
स सु॑न्व॒त इन्द्रः॒ सूर्य॒मा दे॒वो रि॑ण॒ङ्मर्त्या॑य स्त॒वान् ।
आ यद्र॒यिं गु॒हद॑वद्यमस्मै॒ भर॒दंशं॒ नैत॑शो द॒श॒स्यन् ॥ ५ ॥ २३॥
सः । सु॒न्व॒ते । इन्द्रः॑ । सूर्य॑म् । आ । दे॒वः । रि॒ण॒क् । मर्त्या॑य । स्त॒वान् ।
आ । यत् । र॒यिम् । गु॒हत्ऽअ॑वद्यम् । अ॒स्मै॒ । भर॑त् । अंश॑म् । न । एत॑शः । द॒श॒स्यन् ॥ ५ ॥ २३ ॥

भाषायाम्.

४. स इन्द्रो मनवे (=मनुष्याय) अप्रतीनि (=अद्वितीयानि=उत्कृष्टानि) पुरूणि (=बहूनि) [वस्तूनि] दाशत् (=अददात्) [अपि च] दाशुषे (=हविर्दात्रे यजमानाय) वृत्रं हन्ति (=हतवान्)। य [इन्द्रः] सूर्यस्य सातौ (=सूर्यस्य लाभे निमित्ते सति) पस्पृधानेभ्यः (=अहमेव प्रथमं सूर्यं प्राप्नुयामहमेव प्रथमं सूर्यं प्राप्नुयामिति परस्परमतिशयेन स्पर्धमानेभ्यो) नृभ्यः सद्यः (=तदानीमेव) अतसाय्यो भूत् (=समाश्रयणीयोभवत्)॥

यदेन्द्रः सूर्यमजनयत् तदा तं सूर्यमहमेव प्रथमं प्राप्नुयामहमेव प्रथमं प्राप्नुयामिति मनुष्याः स्पर्धां चक्रुरिन्द्रं प्रति च एकस्मिन्नेव काले संजग्मिर इति भावः॥

५. यत् (=यदा) एतशो [नाम कश्चिद् उपासको] दशस्यन् (=हविः प्रयच्छन् सन्) अस्मै (=तस्मा इन्द्राय) अंशं न (=पिता पुत्राय भागं प्रयच्छति तद्वत्) गुहदवद्यम् (=प्रच्छन्नदोषं=निर्दोषं) रयिं (=सोमरूपं धनम्) आ भरत् (=सम्पादयत्) [तदानीं] देवः (=दीप्तिमान्) स इन्द्रः स्तवान् (=स्तुतः सन्) मर्त्याय (=मरणधर्मणे) सुन्वते (=सोमम् अभिषुण्वते तस्मा एतशाय) सूर्यम् आ रिणक् (=वशमानयत्)॥

स्तवान् आघोषकर्ता महानादकर्तेति पाश्चात्याः। सायणो नित्यं स्तुत इत्येव॥

४. तो इंद्र मनुष्यांला अप्रतिम अशा पुष्कळ वस्तु देता झाला. तो हविर्दात्या उपासकासाठीं वृत्राला मारिता झाला. आणि सूर्य मिळण्यासाठीं [परस्पर] स्पर्धा करणारे जे मनुष्य ते एकदम त्याजकडेस धांवले.

५. जेव्हां उपासक एतश वित्तांश [अर्पण केल्या]प्रमाणें निर्दोष [सोम]धन इन्द्राला अर्पण करिता झाला, तेव्हां तो देदीप्यमान इन्द्र स्तविला होत्साता सूर्याला त्या सोम अर्पण करणाऱ्या मर्त्य उपासकाच्या स्वाधीन करिता झाला.

4. That Indra gave many unequalled [things] to man [and] killed Vṛitra for the worshipper. And to him instantly crowded men who struggled to obtain the sun.

5. Resplendent Indra, being praised, subjected the sun to Etas'a, the mortal soma-sacrificer, when he piously offered him the spotless [juicy] treasure like a portion [of his wealth].

४. 'सूर्य उत्पन्न केला तेव्हां तो मला अगोदर पाहिजे मला अगोदर पाहिजे अशी स्पर्धा करून सर्व मनुष्य इन्द्राकडे एकदम धांवले' असा उत्तरार्धाचा अभिप्राय आहे.

५. ही ऋचा जरी शब्दार्थाच्या संबंधानें सोपी आहे तरी 'एतश' याचें आख्यान काय आहे तें बरोबर समजत नसल्यामुळें भावार्थ कठिण आहे. परंतु सायण म्हणतात एतश नांवाच्या राजर्षीबरोबर सूर्य लढत असतां सूर्याला इंद्रानें हरविलें आणि एतशाचा जय केला. अशा कथेस अनुसरून अर्थ केला म्हणजे मंत्र लागतो, आणि आम्हीं तसाच लाविला आहे. ऋ. ८.१.११ यांत एतश नांवाचा राजर्षि सूर्याबरोबर लढत असतां इंद्रानें त्या संग्रामांत जाऊन एतशाला साहाय्य केलें असें सांगितलें आहे असा सायण तेथेंहि अर्थ करितात. ऋ. ६.१५.५ यावरील भाष्यांतहि सायण एतशाचें व सूर्याचें युद्ध झाल्याचें सांगतात. ऋ. ५.३१.११. यावरहि तसेंच समजून सायण भाष्य करितात. ऋ. ५.२९.५ यांत इंद्रानें एतशाशीं स्पर्धा करणाऱ्या सूर्याच्या घोड्या पुढें जात होत्या तरी मंदगति करून टाकिल्या असें सांगितलें आहे. ऋ. ४.३०.६ यांत इंद्रानें 'एतश' या मर्त्य ऋषीसाठीं सूर्याचा पराभव

स र॑न्धयत्स॒दिव॒: सार॑थये॒ शुष्ण॑म॒शुषं॒ कुय॑वं॒ कुत्सा॑य ।
दिवो॑दासाय नव॒तिं च॒ नवेन्द्र॒: पुरो॒ व्यै॑र॒च्छम्ब॑रस्य ॥ ६ ॥

सः । र॒न्धय॒त् । स॒ऽदिव॑: । सार॑थये । शुष्ण॑म् । अ॒शुष॑म् । कुय॑वम् । कुत्सा॑य ।
दिव॑:ऽदासाय । न॒व॒तिम् । च॒ । नव॑ । इन्द्र॑: । पुर॑: । वि । ऐ॒र॒त् । शम्ब॑रस्य ॥ ६ ॥

ए॒वा त॑ इन्द्रो॒चथ॑महेम श्र॒व॒स्या न त्मना॑ वा॒जय॑न्तः ।
अ॒श्याम॒ तत्साप्त॑माशुषा॒णा न॒नमो॒ व॒धरदे॑वस्य पी॒योः ॥ ७ ॥

ए॒व । ते॒ । इ॒न्द्र॒ । उ॒चथ॑म् । अ॒हे॒म । श्र॒व॒स्या । न । त्मना॑ । वा॒जय॑न्तः ।
अ॒श्याम॑ । तत् । साप्त॑म् । आ॒शु॒षा॒णाः । न॒नम॑: । व॒ध॑: । अदे॑वस्य । पी॒योः ॥ ७ ॥

भाषायाम्.

६. सदिवः (=दीप्तिमान्) स [इन्द्रः] अशुषं शुष्णं (=भक्षयितारं शुष्णं नाम शत्रुं) कुयवं [नाम शत्रुं] [च] सारथये कुत्साय रन्धयत् (=आत्मनः सारथ्यं कुर्वतः कुत्सस्य वशमानयत्)। इन्द्रो दिवोदासाय [नामोपासकाय] शम्बरस्य नवतिं नव च पुरः (=नगराणि) वि ऐरत् (=विदारितवान्)॥

७. हे इन्द्र, एवा (=एवं) वाजयन्तो न (=आजिधावनं कुर्वन्त इव) श्रवस्या (=श्रवस्यया धनेच्छया) ते उचथं (=तव स्तोत्रम्) अहेम (=रचयेम=रचितवन्तः स्मः)। आशुषाणाः (=त्वां भजमाना) [वयं] तत् (=प्रसिद्धं) [तव] साप्तम् अश्याम (=सप्तपुरुषसंबन्धि सख्यं प्राप्नुयाम)। अदेवस्य (=देवरहितस्य) पीयोः (=शत्रोर्) वधः (=शस्त्रं) ननमः (=नमय)॥

केला व तसें करून एतशाला रक्षिलें असें सांगितलें आहे तें प्रस्तुत ऋचेंत सांगितल्याप्रमाणेंच आहे. ऋ. ४.१७.१४ याजवरील भाष्यांत सायण अशी कथा सांगतात कीं, "स्वश्व नांवाचा एक राजा असे, त्याणें पुत्र होण्यासाठीं सूर्याची उपासना केली. सूर्यानें त्याचे पोटीं जन्म घेऊन एतश नांवाच्या महर्षीशीं युद्ध केलें तेव्हां एतशानें जयासाठीं इंद्राची स्तुति केली. तेव्हां इन्द्रानें एतशाचें त्या युद्धांत संरक्षण केलें." कसेंहि असो आणि एतश आणि सूर्य हे कोणिहि असोत, पण

६. तो दीप्तिमान् इंद्र सर्वभक्षी शुष्णाला, [आणि] कुयवाला सारथि कुत्साच्या अधिकाराखालीं आणिता झाला. इंद्र दिवोदासासाठीं शंबराचीं नव्याण्णव नगरें विध्वंसिता झाला.

६. He the resplendent one brought the devouring S′ushṇa and Kuyava under the power of his fellow-charioteer Kutsa. Indra destroyed for Divodâsa the ninety-nine fortresses of S′ambara.

७. हे इंद्रा, या प्रकारेंकरून तुझें स्तोत्र धन जिंकण्याच्या इच्छेनें शर्यंत धांवणाऱ्या मनुष्यांप्रमाणें आम्हीं रचिलें आहे; [तर] तुला भजणारे जे आम्ही त्या आम्हांस [तुझें] तें सात [पिढ्यां]चें [सख्य] प्राप्त होओ. देवहीन जो द्वेष्टा त्याचें शस्त्र तूं भंगून टाक.

7. Thus have we, o Indra, sung thy praise with a desire for reward like those that run a race. May we, [therefore], who serve thee, obtain [thy] well-known friendship of seven generations. Do thou bend the weapon of the godless hater.

एतश म्हणून कोणीएक व्यक्ति त्याला रक्षण्यासाठीं सूर्याला (हा सूर्य कोणी असो) इंद्रानें जिंकिलें अशी कथा प्राचीनकाळीं प्रसिद्ध असावी, आणि तिला अनुलक्षून सांप्रतच्या ऋचेंत ऋषीची उक्ति आहे असें समजलें पाहिजे. सू. ६१ मं. १५ पहा.

‘ वित्तांश [अर्पण केल्या]प्रमाणें.’ म्हणजे पिता जसा पुत्राला आपल्या धनाचा अंश देतो त्याप्रमाणें, असें सायण म्हणतात. पण या उपमेचें तात्पर्य काय असेल तें चांगलें समजत नाहीं.

---

६. शुष्ण. सू.५१. मं.६ आणि सू.५६ मं. ३. कुयव सू. १०३ मं. ८ आणि सू. १०४ मं. ३. आणि कुत्साविषयीं. सू. ५१ मं. ६ हे पहा.

दिवोदासाविषयीं सू.११२ मं. १४ आणि शंबराविषयीं सू. ५१ मं. ६ आणि टीप पहा.

७. ‘ शर्यंत धांवणारा मनुष्य ज्या उत्कंठेनें धांवतो त्या उत्कंठेनें आम्हीं धन मिळावें म्हणून इन्द्राचें हें स्तोत्र केलें आहे. तर आमच्या सात पिढ्यांपासून चालत आलेलें जें इंद्राबरोबरचें सख्य, तें आम्हांस प्राप्त होओ; इंद्र नास्तिक शत्रूंचा पाडाव करो.’ असा या ऋचेचा भावार्थ दिसतो.

‘ सात [पिढ्यां]चें सख्य ’= ‘ साप्तम्’.

एवा ते गृत्समदाः शूर मन्मावस्यवो न वयुनानि तक्षुः ।
ब्रह्मण्यन्त इन्द्र ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः ॥ ८ ॥
एव । ते । गृत्सऽमदाः । शूर । मन्म । अवस्यवः । न । वयुनानि । तक्षुः ।
ब्रह्मण्यन्तः । इन्द्र । ते । नवीयः । इषम् । ऊर्जम् । सुऽक्षितिम् । सुम्नम् । अश्युः ॥ ८ ॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः॥९॥२४
नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ९ ॥ २४ ॥

भाषायाम्.

८. एवा (=अनेन प्रकारेण) हे शूर, अवस्यवो गृत्समदाः (=तव प्रसादमिच्छन्तो गृत्समदपुत्रास्) ते मन्म वयुनानि न तक्षुः (=स्तोत्रं यजनरूपकर्माणि च त्वदर्थं चक्रुः)। [अतो] हे इन्द्र, ब्रह्मण्यन्तः (=स्तोत्रं कर्तुमिच्छन्तः भावयुक्तास्ते) ते इषम् ऊर्जं सुक्षितिं सुम्नं (=तव त्वया दत्तम् अन्नं बलं शोभनं निवासं सुखं च) नवीयः (=नूतनतरं=यथा तेषां पूर्वे प्रापुस्तद्वत्तेप्यधुना) अश्युः (=प्राप्नुयुः)॥

तक्षुः। ततक्षुः। चक्रुः। तत्र दृष्टान्तः। अवस्यवो न।......अवो गमनमिच्छन्तः पुमांसो वयुनानि मार्गान् यथा कुर्वन्ति तद्वत्। इति सायणः॥

९. हे इन्द्र, नूनम् (=इदानीं) ते (=तव) मघोनी (=धनवती) सा (=प्रसिद्धा) दक्षिणा जरित्रे (=स्तोत्रे) वरं (=मनोभिलाषं) प्रति दुहीयत् (=संपादयेत्)। भगः (=दाता त्वं) नः स्तोतृभ्यः (=अस्मभ्यं स्तोत्रकर्तृभ्यः) शिक्ष (=देहि) माति धक् (=मातिक्रम=प्रथममस्मभ्यं दत्त्वा पश्चादन्येभ्यो देहि)। सुवीराः (=शोभनवीर्योपेतैः पुत्रैः सहिताः सन्तो) विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=त्वामुद्दिश्य ब्रवाम)॥

८. याप्रमाणें हे शूर इन्द्रा, प्रसादेच्छु गृत्समद तुजसाठीं स्तोत्र आणि उपासना करिते झाले आहेत. [तर] हे इंद्रा, भक्तिमंत [गृत्समद] तुझें जें अन्न, बळ, चांगलें घर [आणि] सुख त्याप्रत पुनः पावोत.

९. आतां हे इंद्रा, तुझी जी धनसमृद्ध प्रख्यात दक्षिणा ती स्तोत्याची मनकामना पूर्ण करो. स्तोत्यांला दे, तूं उदार आम्हांस वगळूं नको. चांगल्या वीरांनीं युक्त होत्साते आम्ही यज्ञांत तुझी मोठी कीर्ति गाऊं असें कर.

8. Thus have the Gritsamadas, desirous of [thy] favour, made for thee, o brave one, praise and worship. May the pious [Gritsamadas] again obtain, o Indra, the food, the strength, the good home and the comfort that thou givest.

9. Now, Indra, may thy rich bounty fulfil the desire of the poet. Give to us the poets, do not pass us over, thou the liberal one. May we, accompanied by brave sons, sing great praises [to thee] in sacrifices.

हा शब्द पुनः ऋग्वेदसंहितेंत आला नसल्यामुळें येथें सायणानुसारें दिलेल्या अर्थास प्रयोगान्तराची बळकटी मिळत नाहीं. ‘ देवहीन द्वेष्टा ’ म्हणून जो यांत सांगितला आहे, तो आर्य लोकांबरोबर लढणारे जे कर्महीन काळे लोक तद्रूप होय. पुढच्या सूक्ताची सातवी आणि आठवी ह्या ऋचा पहा.

---

८. ‘ गृत्समद’ म्हणजे हें सूक्त ज्याणें रचिलें तो आणि त्याचे पुत्रादिक.

‘ स्तोत्र आणि उपासना ’ = ‘ मन्म वयुनानि न.’ ‘ न ’ शब्दाचा येथें केलेला ‘आणि’ हा अर्थ सायणाचार्य जरी केव्हांकेव्हां करितात, तरी निदान याजागीं आम्हांस त्याविषयीं संशय आहे.

‘ पुनः ’=‘ नवीयः’. म्ह. आमच्या वाडवडिलांस पूर्वीं जशी या वस्तूंची प्राप्ति झाली तशी आम्हांलाहि आतां होओ.

‘ तुझें ’=‘ ते.’ म्ह. तूं जें उपासकास देत असतोस तें.

सूक्तम् २०-२११.

गृत्समद ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

वयं ते वय इन्द्र विद्धि षु णः प्र भरामहे वाजयुर्न रथम् ।
विपन्यवो दीध्यतो मनीषा सुम्नमियक्षन्तस्त्वावतो नॄन् ॥ १ ॥

वयम् । ते । वयः । इन्द्र । विद्धि । सु । नः । प्र । भरामहे । वाजऽयुः । न । रथम् ।
विपन्यवः । दीध्यतः । मनीषा । सुम्नम् । इयक्षन्तः । त्वाऽवतः । नॄन् ॥ १ ॥

त्वं न इन्द्र त्वाभिरूती त्वायतो अभिष्टिपासि जनान् ।
त्वमिनो दाशुषो वरूतेत्थाधीरभि यो नक्षति त्वा ॥ २ ॥

त्वम् । नः । इन्द्र । त्वाभिः । ऊती । त्वाऽयतः । अभिष्टिऽपा । असि । जनान् ।
त्वम् । इनः । दाशुषः । वरूता । इत्थाऽधीः । अभि । यः । नक्षति । त्वा ॥ २ ॥

भाषायाम्.

१. हे इन्द्र, वयं वाजयुर्न रथं (=जयमिच्छन् रथं प्रेरयति तद्वत्) ते वयः प्र भरामहे (=त्वदर्थं हविरन्नं प्रकर्षेण संपादयामः) । [अतस्त्वं] नः सु विद्धि (=अस्मान् सम्यग् जानीहि=अनुगृहाण) । विपन्यवः (=तव स्तोत्रं कुर्वाणा) मनीषा दीध्यतः (=मनीषया स्तुत्या ध्यानं कुर्वन्तस्) त्वावतो नॄन् सुम्नम् इयक्षन्तः (=त्वत्सदृशान् अग्न्यादीन् शूरान् धनं याचमाना) [वयं वयः प्रभरामहे] ॥

२. हे इन्द्र, त्वं त्वाभिः (=त्वत्संबन्धिनीभिर्) ऊती (=ऊतिभिः=रक्षणोपायैर्) नः (=अस्मान्) त्वायतो जनान् (=त्वत्कामान् मनुष्यांश्च) अभिष्टिपा असि (=शत्रोः पालयिता भवसि) । त्वं यस्त्वाम् अभि नक्षति (=गच्छति) [तस्य] दाशुषः (=हविर्दत्तवतो यजमानस्य) इनः (=स्वामी) इत्थाधीर्वरूता(=सत्यकर्मा पालयिता) [च भवसि] ॥

अभिष्टी पासि जनान् इति पाठं रक्षणेन जनान् पालयसीति च तस्य विवरणं कर्तुमिच्छति मास्मानः ॥

सूक्त २०–२११.

ऋषि–गृत्समद. देवता–इन्द्र. वृत्त–त्रिष्टुभ्.

१. हे इंद्रा, धनार्थी [मनुष्य] जसा रथाला [हाकितो] त्याप्रमाणें आम्हीं हें हविरन्न तुला अर्पण केलें आहे, तर तूं आम्हांवर चांगली कृपा कर. स्तोत्र करणारे, भक्तीनें ध्यान करणारे, आणि तुझ्या सारिख्या शूरांजवळ धन मागणारे जे आम्हीं त्या आम्हीं हें [हविरन्न तुला अर्पण केलें आहे].

२. हे इंद्रा, तूं आमचा [आणि] तुझी भक्ति करणाऱ्या जनाचा तुझ्या रक्षणोपायांनीं शत्रूंपासून पाळण करणारा आहेस. तूं, जो तुला शरण जातो, त्या हविर्दात्या उपासकाचा स्वामी आणि मनःपूर्वक रक्षण करणारा आहेस.

HYMN 20–211.

To *Indra*. By *Gṛitsamada*. Metre—*Trishṭubh*.

1. We have brought, o Indra, [this] offering to thee even as one desirous of winning [drives] his chariot; regard us with kindness: we, who are prayerful, who contemplate with devotion and implore the blessing of heroes like thee.

2. Thou, o Indra, art a preserver from enemies of us, and of men who love thee, with thy protections. Thou art the master and the true saviour of that sacrificer who goes to thee.

---

१. यांत जी उपमा दिली आहे तिचा अभिप्राय असा दिसतो कीं, 'धन जिंकण्यासाठीं अथवा जय मिळविण्यासाठीं जसे पुष्कळ जण रथ मोठ्या त्वरेनें हाकितात, आणि त्यांतून प्रत्येक जण दुसऱ्याला जय न मिळतां आपणाला मिळावा असें इच्छितो, त्याप्रमाणें आम्हीं इतर उपासकांबरोबर हवि अर्पण करीत आहों. तर इतर उपासकांवर प्रसाद न करितां आम्हांवरच कर; दुसऱ्यांवर करूं नको.'

स नो युवेन्द्रो जोहूत्रः सखा शिवो नरामस्तु पाता ।
यः शंसन्तं यः शशमानमूती पचन्तं च स्तुवन्तं च प्रणेषत् ॥३॥
सः । नः । युवा । इन्द्रः । जोहूत्रः । सखा । शिवः । नराम् । अस्तु ।
पाता ।
यः । शंसन्तम् । यः । शशमानम् । ऊती । पचन्तम् । च । स्तुवन्तम् ।
च । प्रऽनेषत् ॥ ३ ॥
तमु स्तुष इन्द्रं तं गृणीषे यस्मिन्पुरा वावृधुः शाशदुश्च ।
स वस्वः कामं पीपरदियानो ब्रह्मण्यतो नूतनस्यायोः ॥ ४ ॥
तम् । ऊं इति । स्तुषे । इन्द्रम् । तम् । गृणीषे । यस्मिन् । पुरा ।
ववृधुः । शाशदुः । च ।
सः । वस्वः । कामम् । पीपरत् । इयानः । ब्रह्मण्यतः । नूतनस्य ।
आयोः ॥ ४ ॥

भाषायाम्.

३. यः शंसन्तं (=शस्त्राणि शंसन्तं) शशमानं (=क्रियाः कुर्वाणं) पचन्तं (=चरुपुरोडाशादिकं संस्कुर्वन्तं च) स्तुवन्तं च (=स्तोत्रं कुर्वाणं च) [जनम्] ऊती (=स्वकीयेन रक्षणोपायेन) प्रणेषत् (=प्रकर्षेण पारं नयेत्) स युवा (=सदा तरुणो) जोहूत्रः (=स्तोतृभिराह्वातव्यः) शिवः सखा (=कल्याणो मित्रभूतो) नो नरां पातास्तु (=अस्माकं वीराणां पालयिता भवतु)॥

४. तमु (=तमेव) स्तुषे (=स्तौमि) तम् इन्द्रं गृणीषे (=तमेवेन्द्रं शंसामि) यस्मिन् पुरा (=पुरातनकाले) [जना] वावृधुः शाशदुश्च (=बलवन्तो बभूवुः विजयं प्रापुश्च)। स [इन्द्र] इयानः (=स्तुतः सन्) नूतनस्य ब्रह्मण्यत आयोः (=इदानींतनस्य स्तोत्राद्युपासनाकर्तुर्मनुष्यस्य) वस्वः कामं (=धनसंबन्धिनमभिलाषं) पीपरत् (=पूरयतु)॥

३. जो स्तोत्याला,[उपासना]. कर्म कर्त्याला, आणि पाक करणाऱ्याला आणि स्तुति करणाऱ्याला पार नेतो, तो सदा तरुण [आणि] आह्वानयोग्य [आणि] कल्याणी सखा इंद्र आमच्या जनांचा त्राता होओ.

४. त्यालाच मी स्तवितों, त्याच इंद्राला मी आळवितों, कीं ज्याच्या ठायीं पुरातन काळीं[लोक] बळवान् झाले आणि विजय पावले. तो स्तविला होत्साता नूतन उपासक मनुष्याची धनाविषयींची इच्छा पूर्ण करो.

3. May that Indra be the saviour of our people, who is an ever young and beneficent friend deserving to be invoked, who promotes with his protection him who implores, him who works, and him who cooks, and him who praises.

4. That very one I praise, that Indra I propitiate, in whom [people] became strong and triumphed in ancient times. Being praised may he fulfil the desire for wealth of the modern worshipping man.

---

३. 'पाक करणाऱ्याला'='पचन्तम्.' म्ह. पुरोडाशादि शिजविणाऱ्याला.

४. 'ज्याच्या ठायीं'='यस्मिन्.' म्ह. ज्याच्या मुळें असा अर्थ.

सो अङ्गिरसामुचथा जुजुष्वान्ब्रह्मा तूतोदिन्द्रो गातुमिष्णन् ।
मुष्णन्नुषसः सूर्येण स्तवानश्नस्य चिच्छिश्नथत्पूर्व्याणि ॥५॥२५॥

सः । अङ्गिरसाम् । उचथा । जुजुष्वान् । ब्रह्म । तूतोत् । इन्द्रः । गातुम् । इष्णन् ।

मुष्णन् । उषसः । सूर्येण । स्तवान् । अश्नस्य । चित् । शिश्नथत् । पूर्व्याणि ॥ ५ ॥ २५ ॥

स ह श्रुत इन्द्रो नाम देव ऊर्ध्वो भुवन्मनुषे दस्मतमः ।
अव प्रियमर्शसानस्य साह्वाञ्छिरो भरद्दासस्य स्वधावान् ॥ ६ ॥

सः । ह । श्रुतः । इन्द्रः । नाम । देवः । ऊर्ध्वः । भुवत् । मनुषे । दस्मऽतमः ।

अव । प्रियम् । अर्शसानस्य । सह्वान् । शिरः । भरत् । दासस्य । स्वधाऽवान् ॥ ६ ॥

भाषायाम्.

५. स इन्द्रः अङ्गिरसाम् उचथा (=उचथानि स्तोत्राणि) जुजुष्वान् (=सेवितवान्) गातुम् इष्णन् (=स्तोत्रं श्रेयांसि प्रति प्रापयन् सन्) ब्रह्म तूतोत् (=उपासनाकर्म प्रावर्धयत्)। स्तवान् (=स्तुतः सन्) सूर्येणोषसो मुष्णन् (=सूर्येण उषसोपहरन्) [स इन्द्रः] अश्नस्य चित् पूर्व्याणि [पुराणि] (=अश्ननामकस्य कस्यचिद् असुरस्यापि पुरातनानि नगराणि) शिश्नथत् (=अश्नथयत्=हिंसितवान्) ॥

६. श्रुतः (=प्रख्यातो) देवः (=दीप्तो) दस्मतमः (=अतिशयेन पराक्रमकारी) स इन्द्रो मनुषे (=मनुष्यार्थम्) ऊर्ध्वो भुवत् (=रक्षणसिद्धो भवतु)। साह्वान् (=शत्रुजित्) स्वधावान् (=बलवान्) [इन्द्रः] अर्शसानस्य (=हिंसारुचियुक्तस्य) दासस्य (=दस्योः=अनार्यजनस्य) प्रियं शिरः अव भरत् (=भूमौ पातयतु)॥

५. तो इंद्र अंगिरसांचीं स्तवनें सेवून स्तोत्राचा उत्कर्ष करिता झाला आणि उपासनाकर्माची वृद्धि करिता झाला. तो स्तविला होत्साता सूर्याच्या योगानें उषांचें अपहरण करिता झाला. तो अश्नाचींहि अनेक [नगरें] विध्वंसिता झाला.

६. तो देदीप्यमान, प्रख्यात [आणि] अत्यंत पराक्रमी इंद्र मनुष्याला साहाय्य करण्यासाठीं सिद्ध असो. विजयी आणि बळवान् इंद्र नाशक अनार्याचें प्रिय शिर भूमीवर पाडो.

5. That Indra, having enjoyed the hymns of the Angirases, strengthened the worship, promoting the sacred song. Being praised he destroyed the Ushases by means of the sun and shattered the ancient cities of even As'na.

6. May that Indra, renowned, resplendent and most victorious be ready with help for man. May overpowering [and] mighty [Indra] bring down the dear head of the mischievous un-Âryan.

---

५. ‘ अंगिरसांनीं केलेली स्तुति ऐकून स्तोत्र आणि उपासना करण्याचा जो मार्ग तो इंद्रानें पुनः संस्थापिला. इंद्रानें उषा नाहींशा केल्या आणि अश्न या असुराचीं नगरें फोडिलीं.’

‘ अंगिरस.’ सू. ३१ मं. १,१७.

‘ उषा नाहींशा केल्या.’ सू. २०६ मं. ६ ऋ. ४. ३०. ८–११

‘ अश्न.’ सू.२०५. मं. ५ पहा. ऋ.६. ४.३ यांतहि अश्नाचीं नगरें फोडिलीं असें सांगितलें आहे.

६. ‘ नाशक अनार्याचें ’=‘ अर्शसानस्य दासस्य.’ म्हणजे नाश करणारा जो कोळी वगैरे अनार्यरूप शत्रु त्याचें. यांत इंद्रानें अनार्य लोकांचा पाडाव करावा आणि आर्य लोकांचा जय करावा अशी प्रार्थना आहे. ऋ. ६.१२.९ ऋ. १०. ९९.७ आणि सू. १३० मं. ८ आणि टीप पहा.

स वृ॒त्र॒हेन्द्रः॑ कृ॒ष्णयो॑नीः पुरं॒द॒रो दासी॑रैरय॒द्वि ।
अज॑नय॒न्मन॑वे॒ क्षाम॒पश्च॑ स॒त्रा शंसं॒ यज॑मानस्य तूतोत् ॥ ७ ॥

सः । वृ॒त्र॒ऽहा । इन्द्रः॑ । कृ॒ष्णऽयो॑नीः । पु॒रम्ऽद॒रः । दासीः॑ । ऐ॒र॒य॒त् । वि ।
अज॑नयत् । मन॑वे । क्षाम् । अ॒पः । च॒ । स॒त्रा । शंस॑म् । यज॑मानस्य ।
तू॒तो॒त् ॥ ७ ॥

तस्मै॑ तव॒स्यं१॒मनु॑ दायि स॒त्रेन्द्रा॑य दे॒वेभि॒रर्ण॑सातौ ।
प्रति॒ यद॑स्य॒ वज्रं॑ बा॒ह्वोर्धु॒र्ह॒त्वी दस्यू॒न्पुर॒ आय॑सी॒र्नि ता॑रीत् ॥ ८॥

तस्मै॑ । त॒व॒स्य॑म् । अनु॑ । दा॒यि॒ । स॒त्रा । इन्द्रा॑य । दे॒वेभिः॑ । अर्ण॑ऽसातौ ।
प्रति॑ । यत् । अ॒स्य॒ । वज्र॑म् । बा॒ह्वोः । धुः । ह॒त्वी । दस्यू॑न् । पुरः॑ ।
आय॑सीः । नि । ता॒री॒त् ॥ ८ ॥

भाषायाम्.

७. वृत्रहा (=वृत्रस्य हन्ता) पुरंदरः (=पुराणां नगराणां विदारयिता) स इन्द्रः कृष्णयोनीर्दासीः (=कृष्णजातीरनार्यप्रजा) वि ऐरयत् (=विविधम् ऐरयत् व्यनुदत्=इतस्ततो व्यनाशयत्)। स मनवे आर्यजनाय क्षाम् अपश्च (=पृथिवीम् उदकानि च) अजनयत् [स] सत्रा (=सदैव) यजमानस्य शंसं (=यजनकर्तुः स्तोत्रं) तूतोत् (=वर्धयतु)॥

८. सत्रा (=संततम्) अर्णसातौ (=संग्रामे) देवेभिस्तस्मा इन्द्राय तवस्यम् अनु दायि (=देवैस्तस्मा इन्द्राय बलम् अनुध्रियते=तस्मादिन्द्रात् पश्चाद्देवैर्बलं ध्रियते =देवानां बलादस्य बलं गरीयो भवति)। यत् (=यदा) अस्य बाह्वोर्वज्रं प्रति धुः (=निदधुः) [स्तोतारः ?], [तदानीं स] दस्यून् हत्वी (=अनार्यान् शत्रून् हत्वा) आयसीः पुरः (=अयोमयीस्तेषां पुरो) नि तारीत् (=नितरामनाशयत्)॥

७. तो वृत्रघ्न [आणि] पुरभंजक इंद्र अनार्य काळ्या जातीच्या लोकांची दाणादाण करिता झाला. तो [आर्य]जनाकरितां पृथिवी आणि उदकें निर्माण करिता झाला. तो यजन करणाऱ्या जनाचें स्तोत्र सदैव वाढवो.

८. त्या इंद्राचें बळ युद्धांत [इतर] देवांच्या बळापेक्षां सदैव श्रेष्ठ असतें. त्याच्या खांद्यांवर जेव्हां [स्तोते जन] वज्र ठेविते झाले, [तेव्हां तो] दस्यूंला मारून [त्यांचीं] लोखंडी नगरें जमीनदोस्त करिता झाला.

7. That Indra, the killer of Vritra and the shatterer of the fortresses, dispersed the un-Âryan races of the black origin. He created the earth and the waters for [the Âryan] man. May he always promote the hymn of the sacrificer.

8. The power of that Indra is ever superior in battle to that of [all] the gods. When they placed the thunderbolt on his shoulders, he killed the Dasyus and smashed their iron forts.

---

७. यांतहि, आर्यजनाचें कोळी भिल्ल इत्यादि काळ्या अनार्य जनांवर वर्चस्व आहे व इंद्र तें सदैव राखो, अशी इंद्राला प्रार्थना आहे. ह्यांत काळे लोक सांगितले त्याविषयीं. सू. १०३ मं. ३ यांतील दस्यु शब्दावरची टीप पहा.

८. ‘ इतर देवांच्या बळापेक्षां सदैव श्रेष्ठ असतें ’=‘ देवेभिस्तस्मै तवसम् अनु दायि.’ येथें ‘ अनुदा ’ या धातूचा अर्थ ‘ अनुधा ’च्या अर्थासारिखा होतो. ऋ. ८.६२.७ आणि त्याजवरील सायणभाष्य पहा. शिवाय सू.२०३ मं. १० आणि टीप पहा.

‘ खांद्यावर वज्र ठेविते झाले ’=‘वज्रं बाह्वोर्धुः.’ म्हणजे स्तोत्यांनीं स्तोत्र केल्यावरून इंद्रानें प्रसन्न होऊन जेव्हां वज्र आपल्या खांद्यांवर घेतलें तेव्हां.

‘ दस्यूंला.’ म्हणजे अनार्य जे शत्रु त्यांला.

‘ लोखंडी नगरें ’=‘ आयसीः पुरः’. म्हणजे लोखंडासारिखे गांवाचे आवार अथवा गांवकुसें.

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥९॥२६

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ९ ॥ २६ ॥

भाषायाम्.

९. हे इन्द्र, नूनम् (=इदानीं) ते (=तव) मघोनी (=धनवती) सा (=प्रसिद्धा) दक्षिणा जरित्रे (=स्तोत्रे) वरं (= मनोभिलाषं) प्रति दुहीयत् (=संपादयेत्) । भगः (=दाता त्वं) नः स्तोतृभ्यः (=अस्मभ्यं स्तोत्रकर्तृभ्यः) शिक्ष (=देहि) माति धक् (=मातिक्रम=प्रथममस्मभ्यं दत्त्वा पश्चादन्येभ्यो देहि) । सुवीराः (=शोभनवीर्योपेतैः पुत्रैः सहिताः सन्तो) विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=त्वामुद्दिश्य ब्रवाम) ॥

सूक्तम् २१–२१२.

गृत्समद ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

विश्वजिते धनजिते स्वर्जिते सत्राजिते नृजित उर्वराजिते ।
अश्वजिते गोजिते अब्जिते भरेन्द्राय सोमं यजताय हर्यतम् ॥१॥

विश्वऽजिते । धनऽजिते । स्वःऽजिते । सत्राऽजिते । नृऽजिते । उर्वराऽजिते ।
अश्वऽजिते । गोऽजिते । अप्ऽजिते । भर । इन्द्राय । सोमम् । यजताय । हर्यतम् ॥ १ ॥

भाषायाम्.

१. [हे अध्वर्यो], विश्वजिते (=सर्वेषां जेत्रे) धनजिते (=धनस्य जेत्रे) स्वर्जिते (=स्वर्गस्य जेत्रे) सत्राजिते (=महतां जेत्रे) नृजिते (=शूराणां जेत्रे) उर्वराजिते (=सस्याढ्यानां क्षेत्राणां जेत्रे) अश्व जिते (=अश्वानां जेत्रे) गोजिते (=गवां

९. आतां हे इंद्रा, तुझी जी धनसमृद्ध प्रख्यात दक्षिणा ती स्तोत्याची मनकामना पूर्ण करो. स्तोत्यांला दे, तूं उदार आम्हांस वगळूं नको. चांगल्या वीरांनीं युक्त होत्साते आह्मी यज्ञांत तुझी मोठी कीर्ति गाऊं असें कर.

9. Now, Indra, may thy rich bounty fulfil the desire of the poet. Give to us the poets, do not pass us over, thou the liberal one. May we, accompanied by brave sons, sing great praises [to thee] in sacrifices.

सूक्त २१–२१२.

ऋषि–गृत्समद. देवता–इन्द्र. वृत्त–त्रिष्टुभ्.

Hymn 21–212.

To *Indra*. By *Gṛitsamada*. Metre-*Trishṭubh*.

१. [हे अध्वर्यू], सर्व जिंकणारा, धन जिंकणारा, स्वर्ग जिंकणारा, मोठमोठ्यांला जिंकणारा, शूरांस जिंकणारा, क्षेत्र जिंकणारा, घोडे जिंकणारा गाई जिंकणारा, उदकें जिंकणारा, असा जो पूज्य इन्द्र त्याला तूं रमणीय सोम अर्पण कर.

1. Offer the delicious soma to adorable Indra, the conqueror of all, the conqueror of wealth, the conqueror of heaven, the conqueror of the great, the conqueror of heroes, the conqueror of fruitful fields, the conqueror of horses, the conqueror of cows, the conqueror of the waters.

---

१. 'धन जिंकणारा '=' धनजित्.' म्हणजे शत्रूंस मारून त्यांचें धन हरण करून घेणारा. ' क्षेत्र जिंकणारा '=' उर्वराजित्.' जिजमध्यें धान्य पिकतें तसल्या जमिनीला 'उर्वरा' असें नांव आहे. अनार्यलोक जे पूर्वीं या देशांत असत त्यांचीं शेतें काढून घेऊन आर्यलोकांस देणारा असें ' उर्वराजित् ' या विशेषणाचें तात्पर्य आहे.

उदकें म्हणजे वृत्रानें आवरून धरिलेलीं जीं तीं.

अभिभुवेऽभिभङ्गाय वन्वतेऽषाह्लाय सहमानाय वेधसे ।
तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इन्द्राय वोचत ॥ २ ॥

अभिऽभुवे । अभिऽभङ्गाय । वन्वते । अषाह्लाय । सहमानाय । वेधसे । तुविऽग्रये । वह्नये । दुस्तरीतवे । सत्राऽसहे । नमः । इन्द्राय । वोचत ॥२

सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः ।
वृतंचयः सहुरिर्विक्ष्वारित इन्द्रस्य वोचं प्र कृतानि वीर्या ॥ ३ ॥

सत्राऽसहः । जनऽभक्षः । जनम्ऽसहः । च्यवनः । युध्मः । अनु । जोषम् । उक्षितः ।
वृतम्ऽचयः । सहुरिः । विक्षु । आरितः । इन्द्रस्य । वोचम् । प्र । कृतानि । वीर्या ॥ ३ ॥

जेत्रे) अब्जिते (=उदकानां मेघस्थानां जेत्रे) यजताय (=यजनीयाय=पूजनीयाय) इन्द्राय हर्यतं (=रमणीयं=माधुर्येण हर्षकारकं) सोमं भर (=आनय =अर्पय) ॥

भाषायाम्.

२. [हे ऋत्विजः], अभिभुवे (=सर्वस्याभिभवित्रे) अभिभङ्गाय (=असुराणां भञ्जकाय) वन्वते (=जेत्रे) अषाह्लाय (=शत्रुभिरनभिभूताय) सहमानाय (=सर्वसहाय) वेधसे (=प्राज्ञाय) तुविग्रये (=बहुस्तुताय) दुस्तरीतवे सत्रासहे वह्नये (=दुस्तरणीयाय महतां जेत्रे नायकभूताय) इन्द्राय नमो वोचत (=स्तोत्रं ब्रूत) ॥

३. सत्रासहः (=महतामप्यभिभविता) जनभक्षः (=जनेभ्यः संभजनीयो) जनंसहः (=बलिनां जनानाम् अभिभविता) च्यवनः (=शत्रूणां च्यावयिता) युध्मः (=योधनशीलः) अनु जोषम् उक्षितः (=स्वेच्छामनुसृत्य वर्धितो) वृतंचयः (=शत्रोर्हिंसिता) सहुरिः (=शत्रूणां सोढा) [एतादृश इन्द्रो] विक्षु आरितः (=जनेषु रक्षणाय प्राप्तः=शरणाय प्राप्तो भवति=तस्य शरणं प्राप्नुवन्ति) । [तस्य] इन्द्रस्य कृतानि (=चरितानि)-वीर्या (=वीर्याणि=शूरकर्माणि) [च] प्र वोचं (=प्रकर्षेण ब्रवीमि) ॥

२. [शत्रूचा] उपमर्द करणारा, भंजक, विजयी, अजिंक्य, जयशील, प्राज्ञ, ज्याचें बहुत लोक स्तोत्र करितात असा, नायक, दुस्तर, मोठ्यांलाहि जिंकणारा, असा जो इंद्र त्याप्रीत्यर्थ स्तोत्र म्हणा.

३. मोठ्यांलाहि जिंकणारा, जनसेव्य, जनजेता, हालविणारा, युद्धशील, मनाप्रमाणें वाढविलेला, शत्रूचा पाडाव करणारा, महा बलवान् असा जो इंद्र त्याला लोकांत शरण जातात. त्या इंद्राचीं चरितें आणि पराक्रम मी गातों.

2. Chant a hymn in honour of Indra [who is] overpowering, conquering, victorious, irresistible, strong, wise, praised by many, an invincible [and] mighty leader.

3. He who is the vanquisher of the great, the object of peoples' worship, who vanquishes the people, who over-throws his enemies, who is warlike, [and] strengthened according to his desire, the destroyer of the enemy, and the overpowering, is resorted to among the people. I will proclaim the achievements and the brave exploits of Indra.

२. वरच्या मंत्राप्रमाणें यांतहि इंद्राचीं कितीएक विशेषणें आहेत याशिवाय यांत कांहीं विशेष नाहीं.

३. 'मनाप्रमाणें वाढविलेला'='अनु जोषम् उक्षितः'. म्हणजे त्याची तृप्ति होईपर्यंत स्तोत्रांनीं आणि सोमांनीं प्रबळ केलेला.

अनानुदो वृषभो दोधतो वधो गम्भीर ऋष्वो असमष्टकाव्यः ।
रध्रचोदः श्नथनो वीळितस्पृथुरिन्द्रः सुयज्ञ उषसः स्वर्जनत् ॥४॥

अनुनुऽदः । वृषभः । दोधतः । वधः । गम्भीरः । ऋष्वः । असमष्टऽकाव्यः ।
रध्रऽचोदः । श्नथनः । वीळितः । पृथुः । इन्द्रः । सुऽयज्ञः । उषसः । स्वः । जनत् ॥ ४ ॥

यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः ।
अभिस्वरा निषदा गा अवस्यव इन्द्रे हिन्वाना द्रविणान्याशत॥५॥

यज्ञेन । गातुम् । अप्ऽतुरः । विविद्रिरे । धियः । हिन्वानाः । उशिजः । मनीषिणः ।
अभिऽस्वरा । निऽसदा । गाः । अवस्यवः । इन्द्रे । हिन्वानाः । द्रविणानि । आशत ॥ ५ ॥

भाषायाम्.

४. अनतुदः(=प्रभूतदानेन नास्ति समानो यस्य तादृशो) वृषभः (=वीरो) दोधतो वधः (=हिंसकस्य शत्रोर्हन्ता) गम्भीरः ऋष्वः (=महान्) असमष्टकाव्यः (=अन्यैरप्राप्तकौशलो) रध्रचोदः (=समृद्धानां प्रेरकः) श्नथनः (=शत्रूणां बलापहारेण शातयिता) वीळितः (=दृढाङ्गः) पृथुः (=जगद्व्याप्य वर्तमानः) सुयज्ञः (=शोभना यज्ञाः सन्ति यस्य स) इन्द्रः उषसः स्वर्जनत् (=उषसश्च सूर्यं च उदपादयत्) ॥

५. उशिजः (=इन्द्रं कामयमाना) मनीषिणः (=मेधाविनः) [अङ्गिरआदय उपासका] धियो हिन्वानाः (=कर्माणि प्रेरयन्तः कुर्वन्तः) अप्तुरः (=उदकानां प्रेरयितुरिन्द्राद्) यज्ञेन गातुं विविद्रिरे (=कल्याणं लेभिरे) । अवस्यवः (=प्रसादेच्छवस्) [ते] गा इन्द्रे हिन्वानाः (=गोरसरूपाणि हवींषीन्द्रे प्रेरयन्तः ददतः सन्तः) अभिस्वरा निषदा (=स्तोत्रेण तथोपासनया) द्रविणानि आशत (=धनानि प्राप्नुवन्) ॥

मेधाविनोऽङ्गिरसः ...... गाः स्तुतीः । इति सायणः ॥

४. अनुपम वीर, नाशकाचा संहर्ता, गंभीर, महान्, अनन्यप्राप्तकौशल, समृद्धांचा प्रेरक, शत्रूंचा नाश करणारा, बळकट, विश्वव्यापी [आणि] सुयज्ञ असा जो इंद्र, तो उषांला आणि सूर्याला उत्पन्न करिता झाला.

५. [इन्द्र]कामी [आणि] विद्वान् [उपासक] उपासना करणारे [होत्साते] यज्ञाच्या योगानें उदकप्रेरका [इंद्रा]पासून कल्याणाप्रत पावले. प्रसादेच्छु उपासक इंद्राला हव्यें अर्पण करून स्तोत्राच्या योगानें आणि उपासनेच्या योगानें संपत्तींप्रत पावले.

4. Indra the matchless hero, the destroyer of the mischievous, deep, great, and of skill unattained by any, the promoter of the rich, the destroyer, the firm, the vast, the receiver of good sacrifices, created the dawns and the sun.

5. The worshippers, devout and contemplating, offered worship and through sacrifice obtained prosperity from the sender of the waters. [They], desirous of protection, obtained riches through prayer [and] worship, offering oblations to Indra.

---

४. यांतहि इंद्राचीं पुष्कळ विशेषणें आहेत आणि त्यांतून बहुतेक अशीं आहेत कीं, त्यांचा अर्थ फार करून एकसारिखाच आहे.

'समृद्धाचा प्रेरक'='रध्रचोदः'. म्हणजे श्रीमंतांला प्रेरणा करणारा. पण या विशेषणाच्या अर्थाविषयीं संशय आहे.

५. सायणाप्रमाणें यांत जे उपासक सांगितले ते अंगिरस होत. अंगिरसांविषयीं सू. १ मं. ६ आणि सू. ५१ मं. ३ पहा.

इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम्॥६॥२७

इन्द्र । श्रेष्ठानि । द्रविणानि । धेहि । चित्तिम् । दक्षस्य । सुभगऽत्वम् । अस्मे इति ।
पोषम् । रयीणाम् । अरिष्टिम् । तनूनाम् । स्वाद्मानम् । वाचः । सुदिनऽत्वम् । अह्नाम् ॥ ६ ॥ २७ ॥

भाषायाम्.

६. हे इन्द्र, अस्मे (=अस्मासु=अस्माकं गृहे) श्रेष्ठानि द्रविणानि (=धनानि) चित्तिं (=ज्ञानं) दक्षस्य सुभगत्वं (=बलस्य सौभाग्यं=सुभगं बलं) रयीणां पोषं (=धनानां पुष्टिं=त्वया दत्तानां धनानां वर्धनं) तनूनाम् अरिष्टिं (=शरीराणाम् आरोग्यं) वाचः स्वाद्मानं (=वाचो मधुरत्वं=मधुरां वाचम्) अह्नां सुदिनत्वं (=सुदिनानि अहानि) धेहि (=स्थापय=अस्मभ्यं प्रयच्छ) ॥

सूक्तम् २२–२१३.

गृत्समद ऋषिः । इन्द्रो देवता । आद्यायाम् अष्टिश्छन्दश्चतुःषष्ट्यक्षरा । अवशिष्टाः षष्ट्यक्षरा अतिशक्वर्यः । अन्त्याष्टिर्वा ॥

त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत् ।
स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥ १ ॥

त्रिऽकद्रुकेषु । महिषः । यवऽआशिरम् । तुविऽशुष्मः । तृपत् । सोमम् । अपिबत् । विष्णुना । सुतम् । यथा । अवशत् ।
सः । ईम् । ममाद । महि । कर्म । कर्तवे । महाम् । उरुम् । सः । एनम् । सश्चत् । देवः । देवम् । सत्यम् । इन्द्रम् । सत्यः । इन्दुः ॥ १

भाषायाम्.

१. महिषः (=महान्) तुविशुष्मः (=बहुबल) [इन्द्रस्] त्रिकद्रुकेषु (="ज्यो-

६. हे इंद्रा, तूं आमच्या घरीं श्रेष्ठ संपत्ति, ज्ञान, आणि बळाचें सौभाग्य ठेव; धनसंपत्तींची समृद्धि, शरीरांचें आरोग्य, वाचेचें मधुरत्व आणि दिवसांचें सुदिनत्व [ठेव].

6. O Indra, put into our house excellent riches, knowledge, the good blessing of strength, the growth of wealth, the security of persons, the sweetness of voice, the fineness of days.

६. हा मंत्र प्रख्यात आहे. महयज्ञ, जातकर्म इत्यादि जे संस्कार, त्यांत याचा पाठ म्हणण्याची चाल आहे. सूक्तकर्ता गृत्समद ऋषि यांत जे वर मागतो त्यांकडे लक्ष्य देण्यासारिखें आहे.

सूक्त २२–२१३.

ऋषि–**गृत्समद**. देवता–**इंद्र**. वृत्त–पहिलीचें **अष्टि**, दुसरी आणि तिसरी यांचें **अतिशक्करी**, चवथीचें **अतिशक्करी** किंवा **अष्टि**.

१. महान् [आणि] महाबल [इन्द्र] त्रिकद्रुकांत इच्छेप्रमाणें यवाशिर सोम विष्णूसह तृप्ति होईपर्यंत पिता झाला. तो [सोम] महान् [आणि] विस्तीर्ण इंद्रानें महा कृत्य करावें म्हणून त्याला माद आणिता झाला. तो देदीप्यमान आणि सत्य रस या देदीप्यमान आणि सत्य इंद्राला प्रबळ करो.

Hymn 22–213.

To *Indra*. By *Gritsamada*. Metre—of the first *Ashti*, of verses 2 and 3 *Atis'akvarî*; of the fourth *Atis'akvarî* or *Ashti*.

1. In the Trikadruka [festivals] the great and very mighty [Indra] drank as he wished with Vishnu the barley-malted soma to his satisfaction. That soma exhilarated great [and] vast Indra for achieving a great deed. May that juice, bright and true, [now] invigorate that Indra, bright and true.

१. या ऋचेचें वृत्त अष्टि; म्हणजे चौसष्ट अक्षरांचा एक श्लोक. हीं चौसष्ट अक्षरें अशा रीतीनें गोविलेलीं असतात कीं, पहिला चरण बारा, दुसरा आणि

अध॒ त्विषी॑माँ अ॒भ्योज॑सा॒ क्रिविं॑ यु॒धाभ॑व॒दा रोद॑सी अपृणदस्य म॒ज्मना॒ प्र वा॑वृधे ।
अध॑त्ता॒न्यं ज॒ठरे॒ प्रेम॑रिच्यत॒ सैनं॑ सश्चद्दे॒वो दे॒वं स॒त्यमिन्द्रं॑ स॒त्य इन्दुः॑ ॥ २ ॥

अध॑ । त्विषि॑ऽमान् । अ॒भि । ओज॑सा । क्रिवि॑म् । यु॒धा । अ॒भ॒व॒त् । आ । रोद॑सी॒ इति॑ । अ॒पृ॒ण॒त् । अ॒स्य॒ । म॒ज्मना॑ । प्र । व॒वृ॒धे॒ ।
अध॑त्त । अ॒न्यम् । ज॒ठरे॑ । प्र । ई॒म् । अ॒रि॒च्य॒त॒ । सः । ए॒न॒म् । स॒श्च॒त् । दे॒वः । दे॒वम् । स॒त्यम् । इन्द्र॑म् । स॒त्यः । इन्दुः॑ ॥ २ ॥

तिर्गौरायुरित्येतन्नामकेष्वाभिप्लविकेष्वहःसु") सुतम् (=अभिषुतं सोमं) यथाव-शत् [तथा] (=यथाकामयत तथा=इच्छामनु) विष्णुना (=एतन्नाम्ना देवेन सह) तृपत् अपिबत् (=आ तृप्तेः पीतवान्) । स [पीतः सोमो] महि कर्म कर्तवे (=महद् वीरकर्म वृत्रहननादिरूपं कर्तुम्) ईं महाम् उरूम् (=एनं महान्तं विस्तीर्णं चेन्द्रं) ममाद (=अमादयत्) । देवः (=दीप्तः) सत्यः स इन्दुः (=सोमो) दैवं (=दीप्तं) सत्यम् एनम् इन्द्रम् [इदानीमपि] सश्चत् (=प्रवर्धयतु) ॥

भाषायाम्

२. अध (=अनन्तरं) त्विषीमान् (=बलवान्) [इन्द्र] ओजसा (=स्वतेजसा) युधा (=युद्धेन) क्रिविं [नामासुरम्] अभि अभवत् (=अभिभूतवान्) । [सः] अस्य मज्मना प्र वावृधे (=तस्य सोमस्य बलेन प्रवृद्धो बभूव) [स्वकीयेन प्रवृद्धत्वेन च] रोदसी (=द्यावापृथिव्यौ) आ अपृणत् (=पूरयामास) । [एकः] अन्यं जठरे अधत्त (=इन्द्रः पीतं सोमं स्वकीयोदरेधारयत्) । [अन्यः=सोम] ईं प्रारिच्यत (=अन्यस्मात्=इन्द्रात् अधिको बभूव) । देवः (=दीप्तः) सत्यः स इन्दुः (=सोमो) देवं (=दीप्तं) सत्यम् एनम् इन्द्रम् [इदानीमपि] सश्चत् (=प्रवर्धयतु) ॥

तिसरा प्रत्येकीं आठ, मिळून सोळा; चौथा चार; पांचवा बारा, साहवा आणि सातवा प्रत्येकीं आठ, मिळून सोळा; आठवा चार; मिळून चरण आठ, अक्षरें चौसष्ट.

'त्रिकद्रुकांत' सू. ३२ मं. ३ पहा.

'विष्णु.' सू. २२ मं. १६ पहा.

'यवाशिर '=' यवाशिरम्.' म्ह. धान्यामध्यें घालून तयार केलेला. आधुनिक मद्य जसें धान्य कुजवून त्यापासून तयार करितात, त्याप्रमाणें तयार केलेला सोम असें विवक्षित दिसतें.

२. आणि तेजस्वी इंद्र क्रिवीशीं युद्ध करून [आपल्या] पराक्रमानें त्याला जिंकिता झाला. तो त्या [सोमा]च्या बळानें वाढून द्यावापृथिवींस भरून टाकिता झाला. तो यास आपल्या जठरांत धरिता झाला, हा त्याहून मोठा झाला. [तर] तो देदीप्यमान आणि सत्य रस या देदीप्यमान आणि सत्य इंद्राला प्रबळ करो.

2. And mighty [Indra] defeated with his valour Krivi in battle. He filled earth and heaven [when] he grew vast with the force of that [soma]. He held the other (the soma) in his belly. The other (the soma) reached beyond him. May that juice, bright and true, [now] invigorate that Indra, bright and true.

---

२. या ऋचेचें वृत्त अतिशक्करी आहे. अतिशक्करीचें लक्षण सू. १३७ मं. १ याजवरील टिपेंत पहा.

'क्रिवि' या असुराविषयीं सू. २०८ मं. ६ पहा.

'याच्या बळानें वाढून द्यावापृथिवींस भरून टाकिता झाला.' म्हणजे सोम पिऊन इंद्राला बळ आलें, त्याच्या योगानें तो इतका मोठा झाला कीं, द्यावापृथिवींस त्याणें आपल्या शरीरानें भरून टाकिलें.

'तो यास इ०' इंद्रानें प्यालेला सोम जरी पोटांत होता तरी इंद्र वाढून त्याणें उभयलोक भरून टाकिले असें जें वर सांगितलें, तें वस्तुतः सोमाचेंच वाढणें असें समजलें पाहिजे; अथवा वाढला जो तो इंद्र नव्हे, परंतु इंद्राच्या पोटांतील सोम असें समजावें. असा कवीचा अभिप्राय.

साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः ।
दाता राधः स्तुवते काम्यं वसु सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥ ३ ॥

साकम् । जातः । क्रतुना । साकम् । ओजसा । ववक्षिथ । साकम् । वृद्धः । वीर्यैः । ससहिः । मृधः । विऽचर्षणिः ।
दाता । राधः । स्तुवते । काम्यम् । वसु । सः । एनम् । सश्चत् । देवः । देवम् । सत्यम् । इन्द्रम् । सत्यः । इन्दुः ॥ ३ ॥

तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।
यद्देवस्य शवसा प्रारिणा असुं रिणन्नपः ।
भुवद्विश्वमभ्यादेवमोजसा विदादूर्जं शतक्रतुर्विदादिषम् ॥४।२८।२

तव । त्यत् । नर्यम् । नृतो इति । अपः । इन्द्र । प्रथमम् । पूर्व्यम् । दिवि । प्रऽवाच्यम् । कृतम् ।
यत् । देवस्य । शवसा । प्र । अरिणाः । असुम् । रिणन् । अपः ।
भुवत् । विश्वम् । अभि । अदेवम् । ओजसा । विदात् । ऊर्जम् । शतऽक्रतुः । विदात् । इषम् ॥ ४ ॥ २८ ॥ २ ॥

भाषायाम्.

३. [त्वम् इन्द्रः] क्रतुना साकं (=प्रज्ञया सह) जातः । ओजसा साकं ववक्षिथ (=तेजसा सह वर्धितोसि) । वीर्यैः साकं वृद्धः (=पराक्रमैः सह प्रवृद्धोसि) । विचर्षणिः (=विशेषेण द्रष्टा त्वं) मृधः सासहिः (=हिंसकानां जेता) [भवसि] । स्तुवते (=स्तोत्रं कुर्वते) राधः (=धनं=धनस्य) काम्यं वसु (=मनोहरस्य वित्तस्य) दाता [भवसि] । देवः (=दीप्तः) सत्यः स इन्दुः (=सोमो) देवं (=दीप्तं) सत्यम् एनम् इन्द्रम् [इदानीमपि] सश्चत् (=प्रवर्धयतु) ॥

४. हे इन्द्र, हे नृतो (=नेतः= नायक), तत् (=वक्ष्यमाणं) नर्यं (=नृभ्यो हितं) तव दिवि प्रवाच्यं (=द्युलोके स्तवनीयं) पूर्व्यं (=पुरातनम्) अपः (=कर्म=वीरकर्म) प्रथमं कृतं [भवति] यत् शवसा (=तव बलेन) अपो रिणन्

३. [तूं इंद्र] प्रज्ञेसह जन्मलास, तेजासह वाढलास, पराक्रमांनीं मोठा झालास. अत्यंत मेधावी असा तूं दुष्टांचा संहार करणारा [होस]. तूं स्तोत्याला धन आणि रमणीय संपत्ति देणारा [आहेस]. [तर] तो देदीप्यमान आणि सत्य रस या देदीप्यमान आणि सत्य इंद्राला प्रबळ करो.

४. हे इंद्रा, हे नायका, तुझें स्वर्गीं वाखणण्या जोगें प्रथम केलेलें मनुष्यहितकारक पुरातन चरित हें [होय] कीं, तूं आपल्या बळानें देदीप्यमान शत्रूचा प्राण घालविता झालास आणि उदकांला मुक्त करिता झालास.– [हा] शतप्रज्ञ [इंद्र] सकल देवहीन जनास निर्दाळो [आणि] बळ पावो आणि हविरन्नाप्रत पावो.

3. With wisdom wast thou born, with might didst thou grow, with deeds of valour didst thou become great. [Thou art] a giver of wealth [and] of handsome riches to the praiser. May that juice bright and true [now] invigorate that Indra, bright and true.

4. O leader, o Indra, that exploit, beneficial to mankind, ancient and fit to be proclaimed in heaven, was achieved first, that thou didst with [thy] valour destroy the life of [thy] resplendent enemy, sending forth the waters.—May Indra of hundred intellects defeat every godless [man] and may he receive strength, may he receive the oblation.

---

४. ‘यांत जो पराक्रम वर्णिला आहे तो इंद्रानें वृत्राला मारून उदकें मुक्त केलीं हाच होय.’

‘सकळ देवहीन जनास इ०.’ याचें तात्पर्य असें कीं, इंद्र आर्य लोकांचे जे देवास न मानणारे अनार्य शत्रु, त्या सर्वांस मारून टाको म्हणजे आर्य लोक त्याला हवि देऊन बलिष्ठ करितील.

सूक्तम् २३-२१४.

गृत्समद ऋषिः। ब्रह्मणस्पतिर्देवता। यासु तु बृहस्पतिशब्दः श्रूयते ता बृहस्पति-देवताका इति संप्रदायः। वस्तुतस्तु बृहस्पतिब्रह्मणस्पतयोरैक्यमेव। पञ्चद-श्येकोनविंशी च त्रिष्टुभौ। शिष्टा जगत्यः॥

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम्॥ १॥

गणानाम्। त्वा। गणऽपतिम्। हवामहे। कविम्। कवीनाम्। उपमश्रवःऽतमम्।

ज्येष्ठऽराजम्। ब्रह्मणाम्। ब्रह्मणः। पते। आ। नः। शृण्वन्। ऊतिऽभिः। सीद। सदनम्॥ १॥

(=मेघोदकानि निरुद्धानि प्रेरयन्) देवस्य (=दीप्तिमतः) [शत्रोर्वृत्ररूपस्य] असुं (=प्राणं) प्रारिणाः (=अहिंसः)। शतक्रतुः (=शतप्रज्ञ) [इन्द्र] ओजसा (स्वतेजसा) विश्वम् अदेवं (=सर्वमपि देवहीनम् अनार्यं शत्रुम्) अभि भुवत् (=अभिभवतु) [तथा कृत्वा च] ऊर्जं विदात् इषं विदात् (=बलं लभतां हविरन्नं च लभतां=यजमानैर्दत्तं हविर्लब्ध्वा तेन प्रबलो भवतु)॥

भाषायाम्.

१. हे ब्रह्मणां ब्रह्मणस्पते (=स्तोत्राणां स्वामिन् ब्रह्मणस्पतिनामन् देव), गणानां गणपतिं (=देवादिगणानां स्वामिनम्) उपमश्रवस्तमं कवीनां कविं (=कविषु मध्ये श्रेष्ठकीर्तिमन्तं कविं) ज्येष्ठराजं (=ज्येष्ठेषु श्रेष्ठेषु मध्ये राजमानं=श्रेष्ठराजं) त्वा (=त्वां) हवामहे (=आह्वयामः)। नः शृण्वन् (=अस्मान्=अस्माकं स्तोत्राणि शृण्वन् सन्) ऊतिभिः (=प्रसादैः सह) सदनम् आ सीद (=आगत्यास्माकं यज्ञगृहं प्रविश)॥

सूक्त २३–२१४.

१. ऋषि–गृत्समद. देवता–ब्रह्मणस्पति (सांप्रदायिक म्हणणें असें आहे कीं, या सूक्तांतील ज्या ऋचांत बृहस्पति हें नांव आलें आहे त्या बृहस्पतिदेवताक, राहिलेल्या ब्रह्मणस्पतिदेवताक. वस्तुतः ब्रह्मणस्पति आणि बृहस्पति हे एकच होत. खालीं टीप पहा). वृत्त– १५वी आणि १९वी ह्या दोन ऋचांचें वृत्त त्रिष्टुभ्, बाकी सर्व जगती वृत्ताच्या.

Hymn 23–214.

To *Brahmaṇaspati* (traditionally those verses in which the name *Bṛihaspati* occurs, are said to have *Bṛihaspati* for their deity, though the two are virtually the same. By *Gṛitsamada.* Metre—*Jagatî*, except in verses 15 and 19, where it is *Trishṭubh.*

१. गणांचा स्वामी, [आणि] विद्वानांमध्यें श्रेष्ठकीर्तिमान् विद्वान्, [आणि] उत्तमांचा राजा असा जो तूं त्या तुला, हे मंत्रांच्या स्वामी, आम्ही बोलावितों. [तर] तूं आमचें ऐकून घेऊन प्रसादांसहित ये आणि [आमच्या] घरीं बैस.

1. O Brahmaṇaspati, [master] of prayers, we invoke thee the master of the troops, the poet of poets, of the most excellent renown, the king of the greatest. Hear us and coming with thy favours, enter [our] house.

---

१. ही ऋचा मोठी प्रख्यात आहे. जेथें जेथें कांहीं तरी संस्कार, कर्म इत्यादि होतें, तेथें तेथें गणपतीचें आह्वान होत असतें. आणि हा मंत्र गणपतीविषयीं आहे असें मानून जिकडे तिकडे म्हणत असतात. मात्र गणपतीचा संबंध या मंत्राशीं कांहीं नाहीं. तो 'ब्रह्मणस्पति' या देवाविषयीं आहे. ब्रह्मणस्पति अथवा बृहस्पति म्हणजे कोण, याविषयीं सू. १४ मं. ३ आणि टीप पहा.

' गणांचा स्वामी '=' गणानां गणपतिम्.' हें विशेषण वेदांत इंद्राला जेव्हां लाविलेलें आढळतें, तेव्हां मरुद्देवांचे जे गण त्यांचा अधिपति, असा त्याचा अर्थ होतो. 'ब्रह्मणस्पति' देवाला लाविलेलें असतें तेव्हां गण म्हणजे स्तोते जनांचे गण समजणें योग्य आहे. ऋ. ६.४०. १ इत्यादि ऋचांत गण हें पद स्तोत्रसंघास

देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः ।
उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि॥२॥

देवाः । चित् । ते । असुर्य । प्रऽचेतसः । बृहस्पते । यज्ञियम् । भागम् । आनशुः ।
उस्राःऽइव । सूर्यः । ज्योतिषा । महः । विश्वेषाम् । इत् । जनिता । ब्रह्मणाम् । असि ॥ २ ॥

आ विबाध्या परिरापस्तमांसि च ज्योतिष्मन्तं रथमृतस्य तिष्ठसि ।
बृहस्पते भीममित्रदम्भनं रक्षोहणं गोत्रभिदं स्वर्विदम् ॥ ३ ॥

आ । विऽबाध्य । परिऽरपः । तमांसि । च । ज्योतिष्मन्तम् । रथम् । ऋतस्य । तिष्ठसि ।
बृहस्पते । भीमम् । अमित्रऽदम्भनम् । रक्षःऽहनम् । गोत्रऽभिदम् । स्वःऽविदम् ॥ ३ ॥

भाषायाम्.

२. हे असुर्य (=बलवन्) बृहस्पते, प्रचेतसः (=मेधाविनो) देवाश्चित् (=देवा अपि) ते यज्ञियं भागम् आनशुः (=तव यज्ञियमंशं प्रापुः=तेषां यो भागस् तं त्वया हेतुना प्राप्नुवन्ति)। महः (=दीप्तः) सूर्यो ज्योतिषा (=स्वतेजसा) उस्रा इव (=यथा किरणान्) [जनयति तथा] विश्वेषाम् इत् ब्रह्मणां जनिता असि (=सर्वेषामपि स्तोत्राणां जनयिता पिता भवसि)॥

३. हे बृहस्पते, परिरपस्तमांसि च (=रक्षांसि तमांसि च) विबाध्य (=तेजसा निराकृत्य) ज्योतिष्मन्तं (=प्रकाशयुक्तं) भीमं (=भयंकरम्) अमित्रदम्भनं (=शत्रुहिंसकं) रक्षोहणम् (=असुरघातकं) गोत्रभिदं (=मेघोदकरूपाणां गवामावरकस्य वृत्रस्य भेत्तारं) स्वर्विदं (=स्वर्गस्य लम्भकम्) ऋतस्य रथं (=यज्ञस्य रथं=यज्ञरूपं रथम्) आ तिष्ठसि (=अधितिष्ठसि)॥

२. हे बळवान् बृहस्पती, प्रज्ञावान् देवहि तुझा यज्ञभाग पावले. देदीप्यमान सूर्य जसा तेजानें किरण [उत्पन्न करितो] तसा तूं सर्व स्तोत्रांचा बाप आहेस.

३. हे बृहस्पती, तूं राक्षसांला आणि अंधकारांला [आपल्या] तेजानें नाहींसे करून, सत्याचा जो तेजःपुंज, भयंकर, शत्रुनाशक, राक्षसघातक, गोष्ठभेदक [आणि] स्वर्गप्रापक रथ, त्याजवर बसत असतोस.

2. Even the wise gods, o mighty Brihaspati, attained their sacrificial portion [when] given by thee. As the resplendent sun [produces] the rays with [his] brightness, thou art the father of all prayers.

3. Having driven away demons and darkness, thou, o Brihaspati, dost mount the chariot of Truth, which is full of splendor, which is terrific, the destroyer of the enemy, the killer of the demons, the breaker of the cowfold [and] one that reachs heaven.

लाविलेलें आढळतें. आणि ब्रह्मणस्पति अथवा बृहस्पति हा स्तोते जनांचाच विशेषेंकरून अधिपति होय हें उघड आहे.

'मंत्रांचा स्वामी'=' ब्रह्मणां ब्रह्मणस्पते.' म्हणजे हे ब्रह्मणस्पती; 'ब्रह्मणस्पति' शब्दाचा अर्थ स्तोत्रांचा स्वामी इतकाच आहे.

---

२. 'एवढे जे प्रज्ञावान् देव तेहि आपापल्या यज्ञभागाला तुझ्याकडून पावतात. तूं जर नसतास तर तो भाग त्यांस मिळाला नसता' इ०.

३. ब्रह्मणस्पति अथवा बृहस्पति यज्ञरूप रथावर बसतो असें सांगितलें, त्याचा अभिप्राय उघड आहे. तो देव उपासनेचा अभिमानी देव असल्यामुळें देवांकडे मनुष्यांच्या पक्षानें जाऊन बोलणें तें उपासनारूप रथांत जाऊन बोलणें योग्यच आहे.

सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत् ।
ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनम् ॥४॥

सुनीतिऽभिः । नयसि । त्रायसे । जनम् । यः । तुभ्यम् । दाशात् । न । तम् । अंहः । अश्नवत् ।
ब्रह्मऽद्विषः । तपनः । मन्युऽमीः । असि । बृहस्पते । महि । तत् । ते । महिऽत्वनम् ॥ ४ ॥

न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः ।
विश्वा इदस्माद्ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते ॥ ५ ॥ २९ ॥

न । तम् । अंहः । न । दुःऽइतम् । कुतः । चन । न । अरातयः । तितिरुः । न । द्वयाविनः ।
विश्वाः । इत् । अस्मात् । ध्वरसः । वि । बाधसे । यम् । सुऽगोपाः । रक्षसि । ब्रह्मणः । पते ॥ ५ ॥ २९ ॥

भाषायाम्.

४. [त्वं] जनं सुनीतिभिः (=सुमार्गैर्) नयसि त्रायसे [च] । यस्तुभ्यं दाशात् (=हविर्दद्यात्) तम् अंहो नाश्नवत् (=दुःखं न प्राप्नुयात्) । [त्वं] ब्रह्मद्विषस्तपनः (=स्तोत्रशत्रोः संतापको) मन्युमीः (=तस्य क्रोधस्य हन्ता) [च] असि । हे बृहस्पते, तत् (=उक्तं) ते महित्वनं (=तव महत्त्वं) महि (=महत्) [भवति] ॥

५. हे ब्रह्मणस्पते, सुगोपाः (=सुरक्षकस्त्वं) यं रक्षसि तम् अंहः (=दुःखं) न [तिरति=बाधते] न कुतश्चन दुरितं (=कुतोपि पापं न) [तिरति] न अरातयः (=शत्रवो) न द्वयाविनः (=वञ्चकास्) तितिरुः (=बाधन्ते=हिंसन्ति) । अस्मात् (=तस्मात्तादृशाद् उपासकाद्) विश्वा इत् ध्वरसः (=सर्वा अपि हिंसिका) वि बाधसे (=विविधं वारयसि) ॥

४. तूं जनाला सन्मार्गांनीं नेतोस आणि तारितोस; जो तुझी सेवा करितो त्याला दुःख शिवूं शकत नाहीं. तूं ब्रह्मद्वेष्ट्याला ताप करणारा [आणि] त्याच्या क्रोधाचा नाश करणारा आहेस. हे बृहस्पती, हा तुझा महिमा मोठा होय.

५. हे ब्रह्मणस्पती, उत्तम रक्षक असा जो तूं, तो तूं ज्याला रक्षितोस त्याला दुःख [बाधत] नाहीं, कोठूनहि संकट [बाधत] नाहीं, शत्रु बाधत नाहींत, वंचक [बाधत] नाहींत; त्याजपासून सर्वैहि घातकांस तूं हाकून लावितोस.

4. By good paths thou guidest [and] savest people. Evil shall not approach him who should sacrifice to thee. Thou art a tormenter of the enemy of the worship, [and] a destroyer of his wrath. Great is that greatness of thine, o Bṛihaspati!

5. Him whom thou, the good protector, preservest, o Brahmaṇaspati, evil does not vanquish, nor does distress from any side, nor enemies, nor deceivers; and thou dost drive away all mischief-makers from him.

---

४ 'ब्रह्मद्वेष्ट्याला'='ब्रह्मद्विषः' म्हणजे आर्य जनांनीं करावयाच्या देवोपासनेचा उपहास करून द्वेष करणारे जे अनार्य शत्रु त्यांचा.

५. तुझ्या कर्मासाठीं म्ह० तुझा यज्ञ संपादण्यासाठीं.

त्वं नो गोपाः पथिकृद्विचक्षणस्तव व्रताय मतिभिर्जरामहे ।
बृहस्पते यो नो अभि ह्वरो दधे स्वा तं मर्मर्तु दुच्छुना हरस्वती६
त्वम् । नः । गोपाः । पथिऽकृत् । विऽचक्षणः । तव । व्रताय । मतिऽभिः । जरामहे ।
बृहस्पते । यः । नः । अभि । ह्वरः । दधे । स्वा । तम् । मर्मर्तु । दुच्छुना । हरस्वती ॥ ६ ॥
उत वा यो नो मर्चयादनागसोऽरातीवा मर्तः सानुको वृकः ।
बृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि ॥७॥
उत । वा । यः । नः । मर्चयात् । अनागसः । अरातिऽवा । मर्तः । सानुकः । वृकः ।
बृहस्पते । अप । तम् । वर्तय । पथः । सुऽगम् । नः । अस्यै । देवऽवीतये । कृधि ॥ ७ ॥

भाषायाम्.

६. त्वं नः पथिकृत् (=सन्मार्गकर्ता) विचक्षणः (=विशेषेण द्रष्टा) नो गोपा [भवसि]। तव व्रताय यज्ञकर्मणे [वयं] मतिभिर्जरामहे (=स्तुतिभिः स्तुमः)। हे बृहस्पते, यो नः अभि ह्वरो दधे (=अस्मानभिलक्ष्य कौटिल्यं करोति) तं स्वा दुच्छुना (=स्वकीया दुष्कृतिः=तस्यैव दुष्कृतिस्तं) हरस्वती मर्मर्तु (=वेगवती सती मारयतु)॥

७. उत वा (=अपि च) अरातीवा (=अस्माभिमुखं शत्रुबुद्ध्यागमनवान्), सानुकः (=गर्वयुक्तो) वृकः (=धनादीनामपहर्ता) यो मर्तः (=मर्त्यः) अनागसः अनपराधान्) नो मर्चयात् (=हिंसात्) तं हे बृहस्पते, पथः (=? "वैदिकान्मार्गात्") अप वर्तय (=निवर्तय) [अपि च] अस्यै देववीतये (=अस्मै यज्ञकर्मणे=अस्य यज्ञस्य पूर्तये) नः सुगं कृधि (=अस्माकं सुमार्गं कुरु)॥

६. तूं आमचा सन्मार्गदर्शी [आणि] विचक्षण रक्षक [आहेस]. तुझ्या कर्मासाठीं आम्ही स्तोत्रांनीं स्तवीत आहों. हे बृहस्पती, जो [कोण] आमची प्रतारणा करील त्याची दुष्ट क्रिया झटकन त्यालाच मारो.

७. अथवा जो नाशक, गर्विष्ठ [आणि] अपहारक मर्त्य आम्हां निरपराधांस दुःख देईल त्याला हे बृहस्पते, मार्गापासून काढून टाक, [आणि] ही उपासना [चालविण्या]साठीं आमचा मार्ग सुगम कर.

6. Thou art our protector, [our] farseeing guide. We praise with hymns for thy worship. O Bṛihaspati, he who practises deception towards us, may his own evil deed swiftly overtake him.

7. And that mortal, inimical, proud and devouring, who should hurt us who are innocent, turn him, o Bṛihaspati, from the path, and make our path easy for this sacrifice.

त्रातारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुम् ।
बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ॥८ ॥

त्रातारम् । त्वा । तनूनाम् । हवामहे । अवऽस्पर्तः । अधिऽवक्तारम् । अस्मऽयुम् ।
बृहस्पते । देवऽनिदः । नि । बर्हय । मा । दुःऽएवाः । उत्ऽतरम् । सुम्नम् । उत् । नशन् ॥ ८ ॥

त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि ।
या नो दूरे तळितो या अरातयोऽभि सन्ति जम्भया ता अनप्नसः॥९

त्वया । वयम् । सुऽवृधा । ब्रह्मणः । पते । स्पार्हा । वसु । मनुष्या । आ । ददीमहि ।
याः । नः । दूरे । तळितः । याः । अरातयः । अभि । सन्ति । जम्भय । ताः । अनप्नसः ॥ ९ ॥

भाषायाम्.

८. हे अवस्पर्तः (=उपद्रवेभ्यः पारयितः), तनूनां त्रातारम् (=अस्माकं रक्षितारम्) अधिवक्तारम् (=अस्मासु पक्षपातेन देवानां समीपे अधिकं वक्तारम्) अस्मयुम् (=अस्मान् कामयमानं) त्वा (=त्वां) हवामहे (=आह्वयामः)। हे बृहस्पते, देवनिदो नि बर्हय (=देवनिन्दकान् विनाशय)। दुरेवाः (=दुर्बुद्धयः शत्रव) उत्तरं सुम्नम् (=उत्कृष्टं सुखं) मा उन्नशन् (=मा प्राप्नुवन्तु) ॥

९ हे ब्रह्मणस्पते, वयं सुवृधा त्वया (=सुवर्धकेन त्वया सहायेन) स्पार्हा मनुष्या वसु (=स्पार्हाणि स्पृहणीयानि उत्कृष्टानि मनुष्येभ्यो हितानि धनानि) आ ददीमहि (=गृह्णीमहि)। या अरातयः दूरे याश् [च] तळितो नः अभि सन्ति (=ये शत्रवः अस्मान् दूरदेशे ये च समीपेस्मान् अभि भवन्ति उपद्रवन्ति) ता अनप्नसः (=कर्महीना) [अरातीर्] जम्भय (=नाशय) ॥

८. हे पार नेणाऱ्या, आमचा त्राता, कैवारी [आणि] आमचा कनवाळू असा जो तूं, त्या तुला आम्ही बोलावीत आहों. हे बृहस्पती, तूं देवनिंदकांस मारून टाक. दुष्टबुद्धीच्या [जनां]स उत्कृष्ट सुख मिळूं देऊं नकोस.

९. हे ब्रह्मणस्पती, तुज सुवर्धकाच्या साहाय्यानें आम्हांला कमनीय आणि मनुष्यहितकारक संपत्ति मिळतील असें कर. जे शत्रु आम्हांस दूरून [आणि] जे जवळून उपद्रव करितात त्या कर्महीनांस तूं नाहींसे कर.

8. O saviour, we invoke thee, the preserver of our persons, our champion, our friend. Cut down, o Bṛihaspati, the revilers of the gods. May the wicked never attain to the highest good.

9. May we with thee for our ally receive, o Brahmaṇaspati, excellent wealth which is good for men. Destroy those impious enemies who harm us from afar [and those] who [harm us] from near.

त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा ।
मा नो दुःशंसो अभिदिप्सुरीशत प्र सुशंसा मतिभिस्तारिषीमहि
॥ १० ॥ ३० ॥

त्वया । वयम् । उत्ऽतमम् । धीमहे । वयः । बृहस्पते । पप्रिणा । सस्निना । युजा ।
मा । नः । दुःऽशंसः । अभिऽदिप्सुः । ईशत । प्र । सुऽशंसाः । मतिऽभिः । तारिषीमहि ॥ १० ॥ ३० ॥

अनानुदो वृषभो जग्मिराहवं निष्टप्ता शत्रुं पृतनासु सासहिः ।
असि सत्य ऋणया ब्रह्मणस्पत उग्रस्य चिद्दमिता वीळुहर्षिणः ११

अनुनुऽदः । वृषभः । जग्मिः । आऽहवम् । निःऽतप्ता । शत्रुम् । पृतनासु । ससहिः ।
असि । सत्यः । ऋणऽयाः । ब्रह्मणः । पते । उग्रस्य । चित् । दमिता । वीळुऽहर्षिणः ॥ ११ ॥

भाषायाम्.

१०. हे बृहस्पते, पप्रिणा (=मनोरथपूरकेण) सस्निना (=संभक्ता=धनवता) त्वया युजा (=सहायेन) वयम् उत्तमं वयः (=श्रेष्ठमन्नं) धीमहे (=धारयामहे=प्राप्नुयाम)। अभिदिप्सुः (=अभिदम्भितुमभिभवितुमिच्छुर्) दुःशंसः (=पारुष्यवादी=दुर्वचनो मनुष्यो) मा न ईशत (=अस्माकमीश्वरः स्वामी मा भवतु)। मतिभिः (=स्तुतिभिः) सुशंसाः (=सुवचना) [वयं] प्र तारिषीमहि (=प्रकर्षेण वर्धेमहि)॥

११. हे ब्रह्मणस्पते, अनानुदो वृषभः (=अनुपमौदार्यो वीरः) आहवं (=युद्धं) जग्मी (=गन्ता) शत्रुं निष्टप्ता (=शत्रोर्नितरां तापकः) पृतनासु सासहिः (=संग्रामेषु शत्रूणामभिभविता) [एतादृशस्त्वं] सत्य ऋणयाः (=ऋणानां यापयिता) असि। [अपि च] उग्रस्य (=प्रबलस्य) वीळुहर्षिणश्चित् (=कामुकस्य =नास्तिकस्यापि) दमिता (=उपशमयिता) [भवसि]॥

१०. हे बृहस्पती, आम्हांला तुज मनोरथपूरकाच्या [आणि] धनवंताच्या साहाय्यानें उत्तम अन्न मिळेल असें कर. आम्हांवर उपद्रव करूं इच्छिणाऱ्या दुर्वचनी [मनुष्या]चा अधिकार चालूं देऊं नको. स्तुतींच्या योगानें सुवचन असे जे आम्ही त्या आमचा उत्कर्ष होओ.

10. May we possess, o Brihaspati, with thee as our liberal and rich ally, excellent food. May the reviler, desirous of harm, never govern us. May we, pious with praises, prosper.

११. हे ब्रह्मणस्पती, अत्यंत उदार वीर, युद्धाप्रत धांवणारा, शत्रूचा संहार करणारा, संग्रामांत विजयी असा जो तूं, तो खरा ऋण फेडणारा आहेस, [आणि] प्रबळ नास्तिकालाहि शांत करणारा [आहेस].

11. A warrior of unbounded liberality, rushing to the battlefield, a destroyer of the enemy, a conqueror in battles thou, o Brahmaṇaspati, art a true repayer of debts, a subduer even of the powerful infidel.

---

१०. 'दुर्वचनी मनुष्याचा अधिकार इ०.' म्हणजे देवाची यज्ञादिकें करून आर्यलोकांप्रमाणें उपासना न करितां देवांची निंदा करणारे आणि आर्यजनांस उपद्रव करणारे जे अनार्य लोक, यांचा अंमल आर्य जनांवर चालूं नये; आर्य लोकांचा त्यांच्यावर चालावा. अशी प्रार्थना आहे.

अदेवेन मनसा यो रिषण्यति शासामुग्रो मन्यमानो जिघांसति ।
बृहस्पते मा प्रणक्तस्य नो वधो नि कर्म मन्युं दुरेवस्य शर्धतः १२

अदेवेन । मनसा । यः । रिषण्यति । शासाम् । उग्रः । मन्यमानः । जिघांसति ।
बृहस्पते । मा । प्रणक् । तस्य । नः । वधः । नि । कर्म । मन्युम् । दुःऽएवस्य । शर्धतः ॥ १२ ॥

भरेषु हव्यो नमसोपसद्यो गन्ता वाजेषु सनिता धनंधनम् ।
विश्वा इदर्यो अभिदिप्स्वो३मृधो बृहस्पतिर्वि ववर्हा रथाँ इव॥१३

भरेषु । हव्यः । नमसा । उपऽसद्यः । गन्ता । वाजेषु । सनिता । धनम्ऽधनम् ।
विश्वाः । इत् । अर्यः । अभिऽदिप्स्वः । मृधः । बृहस्पतिः । वि । ववर्ह । रथान्ऽइव ॥ १३ ॥

भाषायाम्.

१२. यः अदेवेन मनसा (=देवान् अमन्यमानेन चेतसा) शासां (=स्तोतारं) रिषण्यति (=हिनस्ति) उग्रो मन्यमानः (=बलवान् आत्मानं च बहुमन्यमानस्) [तं] जिघांसति हे बृहस्पते, तस्य वधः (=आयुधं) मा नः प्रणक् (=अस्मान् मा स्पृशतु)। शर्धतः (=बलवतो) दुरेवस्य (=दुर्जनस्य) मन्युं (=क्रोधं) नि कर्म (=यथा निराकुर्मस्तथा कुरु) ॥

१३. भरेषु (=संग्रामेषु) हव्यः (=योद्धृभिः स्वरक्षणार्थम् आह्वातव्यो) नमसा उपसद्यः (=उपास्यो) वाजेषु गन्ता (=संग्रामेषु गमनशीलो) धनंधनं सनिता (=सर्वस्य धनस्य दाता)। बृहस्पतिस् [त्वं] (=हे बृहस्पते), विश्वा इत् (=सर्वा अपि) अर्यः (=अरीः हविरदानशीला) अभिदिप्स्वः (=उपद्रवकारिणीर्) मृधः (=हिंसकाः =शत्रून्) रथानिव (=रथान् यथा तथैव) वि ववर्ह (=छिन्द्धि) ॥

१२. हे बृहस्पती, जो नास्तिक मनानें स्तोत्याला उपद्रव करितो [आणि] आपणास बलवान् आणि मोठा मानून त्याला मारूं इच्छितो, त्याचें आयुध आम्हांला स्पर्श न करो. प्रबळ दुर्जनाच्या क्रोधास आम्ही जमीनदोस्त करूं असें तूं कर.

१३. संग्रामांत ज्याचा धांवा करण्यास योग्य, भजन करून ज्याची उपासना करण्यास योग्य, युद्धांमध्यें जाणारा, [आणि] सर्व प्रकारचें धन देणारा असा तूं बृहस्पति उपासनाहीन [आणि] उपद्रव करूं इच्छिणारे जे शत्रु, त्यांस रथांप्रमाणें तोड.

12. He who with an ungodly mind injures, and thinking himself strong wishes to strike, him who prays—may the weapon of that man never touch us, o Bṛihaspati! May we put down the wrath of the powerful wicked man.

13. Fit to be invoked in battles, fit to be adored with worship, going into fights, giver of every booty, do thou Bṛihaspati, cut down like chariots even all the enemies, unsacrificing [and] desirous of harming.

---

१३. या सर्व मंत्रांत सांगितलेले जे शत्रु ते अनार्यरूप होत, हें ध्यानांत ठेविलें म्हणजे हें सूक्त फार चमत्कारिक आहे असें होतें. हें सर्व सूक्त आर्यलोक आपल्या अनार्य शत्रूंचा नाश करण्याविषयीं आपल्या देवांला कसे आळवीत तें दाखवितें.

तेजिष्ठया तपनी रक्षसस्तप ये त्वा निदे दधिरे दृष्टवीर्यम् ।
आविस्तत्कृष्व यदसत्त उक्थ्यं१बृहस्पते वि परिरापो अर्दय॥१४॥

तेजिष्ठया । तपनी । रक्षसः । तप । ये । त्वा । निदे । दधिरे । दृष्टऽ-
वीर्यम् ।
आविः । तत् । कृष्व । यत् । असत् । ते । उक्थ्यम् । बृहस्पते । वि ।
परिऽरपः । अर्दय ॥ १४ ॥

बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्१५।३१

बृहस्पते । अति । यत् । अर्यः । अर्हात् । द्युऽमत् । विऽभाति । क्र-
तुऽमत् । जनेषु ।
यत् । दीदयत् । शवसा । ऋतऽप्रजात । तत् । अस्मासु । द्रविणम् ।
धेहि । चित्रम् ॥ १५ ॥ ३१ ॥

भाषायाम्.

१४. ये दृष्टवीर्यं (=युद्धेषु दृष्टपराक्रमं) त्वा निदे दधिरे (=निन्दायै चक्रुः =त्वां निन्दन्ति) [तान्] रक्षसः (=राक्षसांस्) तेजिष्ठया (=अतिशयेन तेजस्विन्या) तपनी (=तापकारिण्या हेत्या) तप (=तापय) । हे बृहस्पते, यत् ते (=तव) उक्थ्यं [वीर्यम्] असत् (=सर्वैः प्रशंसनीयं शौर्यं भवेत्) तद् आविः कृष्व (=प्रादुर्भावय)। परिरपः (=निन्दकान्) वि अर्दय (=विशेषेण बाधस्व) ॥

१५. हे बृहस्पते, यद् [द्रविणम्] अर्यः अति अर्हात् (=अरीरति अर्हेत् =अरातीः प्रजा अतिक्रम्य अर्हेत्= हविरदात्रीणां प्रजानामनार्यजातीनां धनादप्यर्हतरं भवेत्) [यच्च] जनेषु द्युमत् क्रतुमत् विभाति (=दीप्तियुक्तं ज्ञानोपेतं शोभते) यत् [च] हे ऋतप्रजात (=ऋताय यज्ञाय प्रकर्षेण जात), शवसा दीदयत् (= बलेन स्वाश्रयं जनं दीपयति) तत् चित्रं द्रविणं (=तच्छ्रेष्ठं धनम्) अस्मासु (=अस्माकं गृहे) धेहि (=स्थापय =अस्मभ्यं देहि) ॥

१४. तुझा पराक्रम स्पष्ट दिसत असतांहि जे तुझी निंदा करितात त्या राक्षसांला तूं अत्यंत तेजस्वी शस्त्रानें जाळून टाक. हे बृहस्पती, तुझें वर्णनीय जें [शौर्य] असेल तें तूं प्रगट कर. निंदकांची तूं धुळधांड कर.

१५. हे बृहस्पती, जें अनुपासकां[च्या धना]पेक्षां अधिक मौल्यवान् असेल, [जें] जनांमध्यें तेजोयुक्त आणि ज्ञानयुक्त असें शोभेल, आणि हे यज्ञासाठीं उत्पन्न झालेल्या [बृहस्पती], जें बळानें प्रकाशवील, तसलें उत्कृष्ट धन आमच्या घरीं ठेव.

14. Burn with the brightest weapon the demons who revile thee although thy valour is seen. Manifest that [valour] which may be worthy of being praised. Destroy the revilers, o Bṛihaspati!

15. Give us, o Bṛihaspati, that excellent wealth which shall excel the unworshippers, and shall shine among the people with brightness and wisdom, [and] which shall, o thou born for [promoting] the Truth, illustrate [its possessor] with power.

१५. 'यज्ञासाठीं उत्पन्न झालेल्या बृहस्पती', सू. १४ मं. ३ आणि सू. ६२ मं. ३ पहा.

मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः १६

मा । नः । स्तेनेभ्यः । ये । अभि । द्रुहः । पदे । निरामिणः । रिपवः ।
अन्नेषु । जगृधुः ।
आ । देवानाम् । ओहते । वि । व्रयः । हृदि । बृहस्पते । न । परः ।
साम्नः । विदुः ॥ १६ ॥

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि १७

विश्वेभ्यः । हि । त्वा । भुवनेभ्यः । परि । त्वष्टा । अजनत् । साम्नःऽ-
साम्नः । कविः ।
सः । ऋणऽचित् । ऋणऽयाः । ब्रह्मणः । पतिः । द्रुहः । हन्ता ।
महः । ऋतस्य । धर्तरि ॥ १७ ॥

भाषायाम्.

१६. ये रिपवः (=शत्रवो) द्रुहः पदे (=द्रोहस्य पापस्य स्थाने अरण्ये) निरामिणः (=स्थायिनः) [अन्येषाम्] अन्नेषु अभि जगृधुः (=अभिकाङ्क्षां कुर्वन्ति) [ये च] देवानां व्रयः (=देवानां वर्जनं देवानां यागान् स्तुतींश्च न करवामेति बुद्धिं) हृदि वि ओहते (=मनसि वहन्ति) [तेभ्यः] स्तेनेभ्यो मा नो [दाः] (=चौरेभ्यो मास्मान् देहि =तेभ्यो वशं यथा न गच्छामस्तथा कुरु)। हे बृहस्पते, [अस्मादृशास्तैश्चौरैरुपद्रुता जनाः] साम्नः परो न विदुः (=स्तोत्रात् परं किमपि न जानन्ति)॥

स्तोत्रकरणमात्रशरणा वयं त्वां स्तुमः। अतः कारणादस्मांस्तेभ्यो रक्षेति यावत्॥

साम...रक्षोघ्नम्। साम वै रक्षोहेति। इति सायणः॥

१७. [हे ब्रह्मणस्पते], त्वष्टा (=विश्वकर्मा) त्वा (=त्वां) विश्वेभ्यो भुवनेभ्यः परि (=सर्वेभ्यो भूतेभ्यः सकाशाद्) अजनत् (=अजनयत्)। [स त्वं] साम्नःसाम्नः कविः (=सर्वस्य स्तोत्रस्य कर्ता) [भवसि]। स [त्वं] ब्रह्मणस्पतिर्मह ऋतस्य धर्तरि (=महतः सत्यस्य यज्ञरूपस्य धातरि कर्तरि यजमाने विषये) ऋणचित् (=तस्य कामम् ऋणमिव चिनोतीति स) ऋणयाः (=ऋणस्य यापयिता च) [तथा] द्रुहो हन्ता (=द्रोग्धुः शत्रोर्घातको) [भवसि]॥

१६. जे शत्रु अन्यायाच्या स्थळीं राहून [दुसऱ्यांच्या] धनांचा अभिलाष करितात, [आणि जे] देवांची हेळसण [करावी असें] मनांत वागवितात, त्या चोरांच्या हातीं आम्हांस [देऊं] नको. हे बृहस्पती, [जन] स्तोत्राच्या पलीकडे [कांहीं] जाणत नाहींत.

16. Do not [give] us over to the thieves, [those] enemies who living in the spot of harm covet the food [of others], [and who] entertain in [their] hearts a contempt of the gods. [Men like us] know not [anything], o Bṛihaspati, beyond a hymn.

१७. तुला विश्वकर्मा सर्व भूतांपासून निर्मिता झाला. [तूं] सर्व स्तोत्राचा कवि [आहेस]. तो तूं ब्रह्मणस्पति महा सत्याचा जो धारक [उपासक] त्याजविषयीं ऋणग्राही आणि ऋण फेडणारा [आणि] दुर्जनाचा संहार करणारा [आहेस].

17. Tvashṭâ produced thee from all beings. [Thou art] the poet of every hymn. And thou, Brahmaṇaspati, [art] to the observer of the great Truth the receiver of debt, the repayer of debt—the killer of the wicked.

---

१६. रस्तेलूट करणारे जे ठगांसारिखे चोर त्यांपासून रक्षण व्हावें अशी प्रार्थना यांत आहे. स्तोत्र करणें हाच उपाय आम्ही जाणतों, आणि तो उपाय आम्ही या सूक्ताच्या द्वारें करीत आहों तर आम्हांस चोरांच्या हातीं पडूं देऊं नको अशी प्रार्थना यांत आहे.

'अन्यायाच्या स्थळीं'=' द्रुहः पदे.' म्हणजे ज्या अरण्यांत अथवा रस्त्यावर राहून लुटण्याचा, मारण्याचा वगैरे अपराध करावयाचा ती जागा.

१७. 'त्वष्ट्यानें ब्रह्मणस्पतीला निर्मिलें तें सर्व भूतांपासून निर्माण केलें, त्यामुळें सर्व पदार्थांचें शाहणपण आणि चातुर्य त्याला आलें आणि तो सर्व स्तोत्रांचा कवि झाला. स्तोत्यानें केलेली जी सेवा तद्रूपानें आपण ऋणी झालों असें मानून दुष्टाचें हनन करणें हा प्रसाद स्तोत्यावर करून तें ऋण तो फेडीत असतो,' असा भावार्थ.

तव॑ श्रि॒ये व्य॑जिहीत॒ पर्व॑तो॒ गवां॑ गो॒त्रमु॒दसृ॑जो॒ यद॑ङ्गिरः ।
इन्द्रे॑ण यु॒जा तम॑सा॒ परी॑वृतं॒ बृह॑स्पते॒ निर॒पामौ॑ब्जो अर्ण॒वम्॥१८॥

तव॑ । श्रि॒ये । वि । अ॒जि॒ही॒त॒ । पर्व॑तः । गवा॑म् । गो॒त्रम् । उ॒त्ऽअ-
सृ॑जः । यत् । अ॒ङ्गि॒रः॒ ।
इन्द्रे॑ण । यु॒जा । तम॑सा । परि॑ऽवृतम् । बृह॑स्पते । निः । अ॒पाम् ।
औ॒ब्ज॒ः । अ॒र्ण॒वम् ॥ १८ ॥

ब्रह्म॑णस्पते॒ त्वम॒स्य य॒न्ता सू॒क्तस्य॑ बोधि॒ तन॑यं च जिन्व ।
विश्वं॒ तद्भ॒द्रं यद॑वन्ति दे॒वा बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑ १९।३२।६

ब्रह्म॑णः । प॒ते॒ । त्वम् । अ॒स्य । य॒न्ता । सु॒ऽउ॒क्तस्य॑ । बो॒धि॒ । तन॑यम् ।
च॒ । जि॒न्व॒ ।
विश्व॑म् । तत् । भ॒द्रम् । यत् । अव॑न्ति । दे॒वाः । बृ॒हत् । व॒दे॒म॒ । वि॒-
दथे॑ । सु॒ऽवीरा॑ः ॥ १९ ॥ ३२ ॥ ६ ॥

स्तोत्रा कृतं स्तोत्रमृणमिव स्वीकरोषि तस्य चाधमर्णमिवात्मानं मत्वा तदृणं प्रसा-
दैर्यापयसीति भावः ॥

भाषायाम्.

१८. हे अङ्गिरः (=?" आङ्गिरस ") [हे बृहस्पते], यद् (=यदा) [त्वं] गवां गोत्रम् उदसृजः (=मेघोदकरूपाणां गवां समूहं निरगमयस्) [तदा] पर्वतः (=वृत्ररूपः पर्वतोपामावरकस्) तव श्रिये (=आश्रयणार्थं=तवागमनार्थं) वि जिहीत (=विविधं गतवान् =त्वन्मार्गादपगतवान्) । हे बृहस्पते, इन्द्रेण युजा (=इन्द्रेण सहायेन =इन्द्रसाहाय्येन) [त्वं] तमसा परीवृतम् अपाम् अर्णवं (=वृत्ररूपेणान्धकारेण परित आक्रान्तं मेघोदकानां प्रवाहं संचयं) निरौब्जः (=नितरामधोमुखमकार्षीः =अवसृष्टवान् वृष्टिद्वारा) ॥

१९. हे ब्रह्मणस्पते, त्वमस्य सूक्तस्य यन्ता बोधि (=नियामको भव =रथस्य यन्ता यथा रथं सम्यक्प्रेर्य अभिलषितं स्थानं प्रति नयति तथास्य सूक्तस्य देवान् प्रति नेता भव) । तनयं च जिन्व (=पुत्रपौत्रादिलक्षणं संतानं च प्रीणय =सुखं प्रापय)। यत् [किमपि] देवा अवन्ति (=रक्षन्ति) तद् भद्रं (=कल्याणं) [भवति] । सुवीराः (=शोभनवीर्योपेतपुत्रपौत्रैः सहिता) विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=ब्रूयाम) ॥ द्वितीयाष्टके षष्ठोध्यायः समाप्तः ॥

१८. हे अंगिरा, तूं जेव्हां गाईंचा समूह उघडून सोडून देता झालास, [तेव्हां] पर्वत तुला जागा देण्याकरितां एकीकडे झाला. हे बृहस्पती, तमानें वेढिलेला [जो] उदकांचा संचय [त्या]ला तूं इंद्राच्या साहाय्यानें खालीं सोडून देता झालास.

१९. हे ब्रह्मणस्पती, तूं या सूक्ताचा नियामक हो आणि [आमच्या] पुत्रपौत्रादिकांचें बरें कर. जें देव रक्षितात तें सर्व कल्याण [होतें]. चांगल्या वीरांनीं युक्त होत्साते आम्ही यज्ञांत तुझी मोठी कीर्ति गाऊं असें कर.

18. The Mountain went apart to make room for thee, when thou, o Angiras, didst send forth the herd of the cows. With Indra for [thy] ally thou didst free the collection of the waters [that was] surrounded by darkness.

19. O Brahmaṇaspati, be thou the director of this hymn, and prosper our posterity. Blessed is everything that the gods protect. May we, accompanied by brave sons, chant great praises [to thee] in the sacrifice.

---

१८. यांत वृत्रभेद करून उदकवृष्टि केली हें शंभर वेळ पुनः पुनः सांगितलेलें इन्द्राचें महा चरित अथवा कृत्य बृहस्पतीनें केलें आणि इन्द्रानें साहाय्य केलें असें सांगितलें आहे. ज्या देवाची स्तुति, त्यानें सर्व केलें असें म्हणणें; इतक्याहून दुसरें कारण कांहीं नाहीं.

'हे अङ्गिरा'='अङ्गिरः'. सू. ३१ मं. १७ आणि टीप पहा. अग्नीला जसें 'अङ्गिरस्' लाविलेलें आढळतें तसेंच बृहस्पतीलाहि लाविलेलें असतें. खरें कारण कांहीं असो. सायणाचार्य 'आंगिरस' म्हणजे अंगिरसांसंबंधी अथवा अंगिरस् कुळांतील असा अर्थ करितात.

'पर्वत' म्हणजे येथें पर्वतासारिख्या मेघरूपानें दृष्टीस पडणारा जो वृत्र तो होय.

'तमानें'='तमसा.' हा तरी वृत्रच होय.

१९. 'रथाचा हाकणारा (यन्ता) जसा रथाला चांगला हाकून इच्छिलेल्या स्थळीं घेऊन जातो तसा तूं हे बृहस्पती, हें सूक्त चांगल्या मार्गानें नेऊन देवांप्रत पोंहचाव. कारण देव ज्यावर प्रसन्न होतात तें सर्व कल्याणकारक होतें. इ०.'

येथें दुसऱ्या अष्टकाचा सहावा अध्याय समाप्त झाला.

सूक्तम् २४–२१५.

गृत्समद ऋषिः । ब्रह्मणस्पतिर्देवता । द्वादशी तु ब्रह्मणस्पतिदेवताका इन्द्रदेवता च । जगती छन्दः । द्वादशीषोडश्यौ त्रिष्टुभौ ॥

सेमामविड्ढि प्रभृतिं य ईशिषेऽया विधेम नवया महा गिरा ।
यथा नो मीढ्वान्त्स्तवते सखा तव बृहस्पते सीषधः सोत नो मतिम् १

सः । इमाम् । अविड्ढि । प्रऽभृतिम् । यः । ईशिषे । अया । विधेम । नवया । महा । गिरा ।
यथा । नः । मीढ्वान् । स्तवते । सखा । तव । बृहस्पते । सीसधः । सः । उत । नः । मतिम् ॥ १ ॥

यो नन्त्वान्यनमन्न्योजसोतादर्दर्मन्युना शम्बराणि वि ।
प्राच्यावयदच्युता ब्रह्मणस्पतिरा चाविशद्वसुमन्तं वि पर्वतम् ॥२॥

यः । नन्त्वानि । अनमत् । नि । ओजसा । उत । अदर्दः । मन्युना । शम्बराणि । वि ।
प्र । अच्यवयत् । अच्युता । ब्रह्मणः । पतिः । आ । च । अविशत् । वसुऽमन्तम् । वि । पर्वतम् ॥ २ ॥

भाषायाम्.

१. [हे ब्रह्मणस्पते], य ईशिषे (=ईश्वरो भवसि) स [त्वम्] इमां प्रभृतिम् (=इमां प्रकर्षेण भृताम् अर्पितां स्तुतिम्) अविड्ढि (=प्राप्नुहि =प्रतिगृहाण)। अया (=अनया) नवया महा (=महया=महत्या) गिरा (=स्तुत्या) विधेम (=परिचरेम)। हे बृहस्पते, यथा तव मीढ्वान् सखा नः स्तवते स [त्वम्] उत नो मतिं सीषधः (=त्वम् अस्माकं स्तोत्रं तथा रचय यथा तव धनवान् सखा इन्द्रः अस्मान् स्तूयात्=सम्यक् कृतं स्तोत्रमिदम् इति ब्रूयात्) ॥

२. यो नन्त्वानि (=नमनीयानि =“ राक्षसादीनि ”) ओजसा नि अनमत् (=स्वतेजसा नितराम् अनमयत्) उत (=अपि च) मन्युना (=क्रोधेन) शम्बराणि वि अदर्दः (=मेघान् व्यदारयत्) [स] ब्रह्मणस्पतिः अच्युता (=अच्युतानि

सूक्त २४–२१५.

ऋषि–**गृत्समद.** देवता–**ब्रह्मणस्पति;** बारावी ऋचा मात्र **ब्रह्मणस्पति** आणि **इंद्र** या दोघांविषयीं आहे. वृत्त– **जगती,** मात्र १२वी आणि १६वी ह्या **त्रिष्टुभ्.**

१. जो तूं धनी आहेस तो आम्हीं अर्पण केलेला हा सोम स्वीकारून घे. आम्हांस या नव्या महा स्तोत्रानें [तुझी] उपासना करूं दे. हे बृहस्पती, तुझा मित्र उदार [इन्द्र] जेणेंकरून आमची प्रशंसा करील अशा रीतीनें तूं आमचें स्तोत्र रचीव.

२. जो आपल्या तेजानें नमवावयाच्या पदार्थास नमविता झाला आणि क्रोधानें मेघांतें विदारिता झाला, [तो] ब्रह्मणस्पति अचलांला पाडिता झाला आणि धनवान् पर्वतांत प्रवेश करिता झाला.

HYMN 24–215.

To *Brahmaṇaspati*, except verse 12 of which *Indra* and *Brahmaṇaspati* are the Devatâs. Metre.—*Jagatî*, except in the 12th and 16th verses where it is *Trishṭubh.*

1. Do thou who art the Master accept this proffered oblation. Let us worship with this new [and] great hymn. Compose, o Bṛihaspati, our hymn so that the bounteous [Indra], thy friend, may commend us.

2. Brahmaṇaspati who bent with his might that which was to be bent, and burst the clouds with his wrath, made to fall that which was firm, and entered the mountain which was full of wealth.

---

१. उत्तरार्धाचा भावार्थ असा आहे कीं, 'हे ब्रह्मणस्पती, आम्ही इंद्राचें स्तोत्र रचण्यास इच्छित आहों, तें तूं अशा रीतीनें रचण्याची शक्ति आम्हांस दे कीं तें स्तोत्र ऐकून इंद्र प्रसन्न होईल आणि म्हणेल कीं, हें स्तोत्र फार चांगलें रचिलें आहे.'

२. यांत ब्रह्मणस्पतीनें मेघांना फोडून त्यांतून उदकवृष्टि केली यापेक्षां अधिक अभिप्राय नाहीं.

तद्देवानां देवतमाय कर्त्वमश्रश्नन्दृह्वाव्रदन्त वीळिता ।
उद्गा आजदभिनद्ब्रह्मणा वलमगूहत्तमो व्यचक्षयत्स्वः ॥ ३ ॥

तत् । देवानाम् । देवऽतमाय । कर्त्वम् । अश्रश्नन् । दृह्वा । अव्रदन्त । वीळिता ।
उत् । गाः । आजत् । अभिनत् । ब्रह्मणा । वलम् । अगूहत् । तमः । वि । अचक्षयत् । स्वरिति स्वः ॥ ३ ॥

अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत् ।
तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणम् ॥४॥

अश्मऽआस्यम् । अवतम् । ब्रह्मणः । पतिः । मधुऽधारम् । अभि । यम् । ओजसा । अतृणत् ।
तम् । एव । विश्वे । पपिरे । स्वःऽदृशः । बहु । साकम् । सिसिचुः । उत्सम् । उद्रिणम् ॥ ४ ॥

नैश्चल्येन मेघेवस्थितान्युदकानि) प्राच्यावयत् (=मेघान् निरगमयत्) वसुमन्तं पर्वतं (=गोरूपधनवन्तं पर्वतसदृशं मेघं) व्याविशच्च (=प्राविशच्च) ॥

भाषायाम्.

३. देवानां [मध्ये] देवतमाय (=श्रेष्ठाय देवाय) [ब्रह्मणस्पतये] तत् कर्त्वम् (=एतद् वक्ष्यमाणं कर्तव्यमासीत्=तस्यैवेदं चरितं) [यद्] दृह्वा (=दृढानि पर्वतादीनि) अश्रश्नन् (=विश्लिष्टान्यभवन्) [अपि च] वीळिता (=वीळितानि =संस्तम्भितानि) अव्रदन्त (=मृदूभावं प्राप्तानि) । [स] ब्रह्मणा (=स्तोत्रेण) गा उदाजत् (=मेघोदकरूपा गा उदगमयत् =मेघान्निरगमयत्) वलं (=तासां निरोधनकर्तारं वृत्रम्) अभिनत् [अपि च] तमः अगूहत् (=अदृश्यमकरोत्) [तथा] स्वः (=सूर्यम्) व्यचक्षयत् (=अदर्शयद् =दृष्टिगोचरमकरोत्) ॥

४. अश्मास्यम् (=अश्मवद्दृढतरास्यं) मधुधारं (=मधुरधारं) यम् अवतं (=कूपं) ब्रह्मणस्पतिरोजसा (=तेजसा) अभि अतृणत् (=अहिंसीत्) तमेव विश्वे स्वर्दृशः (=?" सूर्यसंबन्धिनः किरणा ") [घर्मकाले] पपिरे (=पिबन्ति) । [तमेव] उद्रिणम् उत्सम् (=उदकवन्तं कूपं) साकं (=युगपत्) बहु सिसिचुः (बहु यथा तथा वर्षाकाले सिञ्चन्ति वर्षन्ति) ॥

३. सर्व देवांपेक्षां श्रेष्ठ देव जो [ब्रह्मणस्पति] त्याचाच हा पराक्रम होय कीं, जें अचल होतें तें शिथिल झालें [आणि] जें घट्ट होतें तें मृदु झालें. तो स्तोत्राच्या योगानें गाईंला मुक्त करिता झाला आणि वलाला मारिता झाला, अंधकाराला नाहींसा करिता झाला [आणि] सूर्य दृष्टीस पडे असें करिता झाला.

3. That was the achievement of the best god among the gods that, that which was firm became loose and that which was hard became soft. He freed the cow [and] broke Vala, through the hymn; he made the darkness to vanish, he made the Sun to be seen.

४. ज्या पाषाणमुखी आणि मधुर धारेच्या झऱ्याला ब्रह्मणस्पति [आपल्या] तेजानें फोडिता झाला, त्यालाच सूर्याचे सकळ [किरण] पितात. ते उदकवंत झऱ्याला एकदम पुष्कळ वर्षवितात.

4. The solar [rays] all drink that very stone-mouthed and sweet-streamed fountain which Brahmaṇaspati breaks with [his] power. They pour plentifully, all together, the spring [that was] full of waters.

---

३. यांत सुद्धा ब्रह्मणस्पतीनें वृत्रादिकांचें हनन करून मेघवृष्टि करविली आणि सूर्याचा प्रचंड प्रकाश भूमीवर पाडविला इतकेंच सांगितलें आहे.

४. या मंत्रांत जो झरा सांगितला, तो मेघरूपी होय आणि त्याला सूर्यकिरण उन्हाळ्यांत पितात आणि वर्षाकाळीं पुनः वृष्टिरूपानें सोडितात असें सायण म्हणतात. क्लिष्ट तर खरें पण दुसरा उपाय दिसत नाहीं.

सना ता का चिद्भुवना भवीत्वा माद्भिः शरद्भिर्दुरो वरन्त वः ।
अयतन्ता चरतो अन्यदन्यदिद्या चकार वयुना ब्रह्मणस्पतिः ॥५॥ १

सना । ता । का । चित् । भुवना । भवीत्वा । मात्ऽभिः । शरत्ऽभिः ।
दुरः । वरन्त । वः ।
अयतन्ता । चरतः । अन्यत्ऽअन्यत् । इत् । या । चकार । वयुना ।
ब्रह्मणः । पतिः ॥ ५ ॥ १ ॥

अभिनक्षन्तो अभि ये तमानशुर्निधिं पणीनां परमं गुहा हितम् ।
ते विद्वांसः प्रतिचक्ष्यानृता पुनर्यत उ आयन्तदुदीयुराविशम् ॥६॥

अभिऽनक्षन्तः । अभि । ये । तम् । आनशुः । निऽधिम् । पणीनाम् ।
परमम् । गुहा । हितम् ।
ते । विद्वांसः । प्रतिऽचक्ष्य । अनृता । पुनः । यतः । ऊं इति ।
आयन् । तत् । उत् । ईयुः । आऽविशम् ॥ ६ ॥

भाषायाम्.

५. एषा दुर्बोधतमा । सायणेन पुनरेवं व्याख्याता । हे ऋत्विग्यजमाना वो युष्मदर्थं सना सनातनानि ता तानि काचित् कानिचित् ब्रह्मणस्पतेः प्रज्ञानानि भुवना भुवनानाम् । सुपां सुलुगिति षष्ठ्या लुक् ॥ भुवनानामुदकानां भवीत्वा भाव्यानां दुरो द्वाराणि माद्भिर्मासैः । पदन्नित्यादिना मासशब्दस्य मास्भावः । स्वतवस्मासोषसां च त इष्यते । पा० ७. ४. ४८. २ । इति तत्वम् ॥ शरद्भिः संवत्सरैश्च वरन्त । वितृण्वन्ति । तत्काले वर्षणार्थं मेघद्वाराण्युद्धाटयन्तीत्यर्थः । कानि पुनस्तानि । ब्रह्मणस्पतिर्या यानि वयुना । ज्ञाननामैतत् । ज्ञानानि मन्त्रविषयाणि चकार । कृतवान् तदनन्तरमयतन्ता अयतमानावप्रयत्नावुभौ लोकौ द्यौश्च पृथिवी च अन्यदन्यदित् अन्यदन्यदेव पृथिवी वृष्टिजलं दिव्यमुदकं द्यौरुदककार्यं हविर्लक्षणं पार्थिवमन्नम् एवं परस्परव्यतिहारेण चरतः । भुञ्जाते ॥ चरगतिभक्षणयोः । इति ॥

६. ये विद्वांसः [अङ्गिरसः] अभिनक्षन्तः (=अभितो गच्छन्तस्) तं (=प्रसिद्धं मेघोदकरूपं) पणीनां [नामासुराणां] परमं (=श्रेष्ठं) गुहा हितं (=गुहायां निहितमपिहितं) निधिं (=गोसमूहम्) आनशुः (=प्रापुस्) ते अनृता (=अनृतानि=

५. "जीं स्तोत्रें ब्रह्मणस्पति करितो तीं [ब्रह्मणस्पतीचीं] कांहीं पुरातन स्तोत्रें तुम्हांकरितां भाव्य उदकांचीं द्वारें मासांनीं [आणि] वर्षांनीं उघडितात. [नंतर] अ-प्रयत्न [द्यावापृथिवी हे उभयलो-क] परस्पर बदल करून उप-भोगितात. "

5. "Some of those hymns which Brahmaṇaspati composed open after months and years the doors of the future waters for you. The two worlds without labour enjoy each other."

६. पणींचा जो श्रेष्ठ [आणि] झांकून ठेविलेला निधि त्याप्रत जे वि-द्वान् गेले ते कपटें पाहून ते जि-कडून आले होते तिकडे जाण्या-करितां परत निघून गेले.

6. Those learned ones (the Angirases) who went to that highest treasure of the Paṇis concealed in the cave, having perceived the falsehood returned thence to go thither whence they had come.

---

५. ही ऋचा फार कठिण आहे. आम्हीं सायणाप्रमाणें अर्थ केला आहे. त्याचा अभिप्राय असा आहे कीं, 'हे यजमान हो, ब्रह्मणस्पतीनें केलेलीं कितीएक पुरातन स्तोत्रें तुम्हांकरितां उदक-वृष्टि करितात. तेव्हां पृथिवी द्युलोकां-तून पडलेलें उदक पिते आणि द्युलोक पृथिवीनें दिलेलें हवि खातो आणि दो-घेहि हा उपभोग श्रम न करितां घेतात.'

तिसऱ्या चरणांत जें वाक्य आहे त्याचा अर्थ सायणांनीं केल्याप्रमाणें करि-तां आला तरी तें चवथ्या चरणांत स-माप्त झालेलें वाक्य झाल्यानंतर आलें पाहिजे होतें ही मोठी अडचण आहे. शिवाय 'भुवना' याचा 'भुवनानां' असा षष्ठीचा अर्थ करावा लागतो हाहि एक मोठा दोष आहेच.

६. पणि नांवाच्या राक्षसांनीं अंगिर-सांच्या (मेघोदकरूप) गाई चोरून नेऊन गुहेंत लपवून ठेविल्या होत्या त्या त्यांनीं शोधून काढून पाहिल्या, आणि तेथें असुरांची कृत्रिम माया पाहून ते परत घरीं जाण्याकरितां निघाले असें यांत सांगितलें आहे.

'पणि' आणि अंगिरसांच्या गाई यांजविषयीं सू. ६२ मं. ३ आणि टीप पहा.

'निधि' म्हणजे मेघोदकें लपवून ठे-विलीं होतीं तीं.

ऋतावानः प्रतिचक्ष्यानृता पुनरात आ तस्थुः कवयो महस्पथः ।
ते बाहुभ्यां धमितमग्निमश्मनि नकिः षो अस्त्यरणो जहुर्हि तम्॥७

ऋतऽवानः । प्रतिऽचक्ष्य । अनृता । पुनः । आ । अतः । आ । तस्थुः । कवयः । महः । पथः ।
ते । बाहुऽभ्याम् । धमितम् । अग्निम् । अश्मनि । नकिः । सः । अस्ति । अरणः । जहुः । हि । तम् ॥ ७ ॥

ऋतज्येन क्षिप्रेण ब्रह्मणस्पतिर्यत्र वष्टि प्र तदश्नोति धन्वना ।
तस्य साध्वीरिषवो याभिरस्यति नृचक्षसो दृशये कर्णयोनयः॥८॥

ऋतऽज्येन । क्षिप्रेण । ब्रह्मणः । पतिः । यत्र । वष्टि । प्र । तत् । अश्नोति । धन्वना ।
तस्य । साध्वीः । इषवः । याभिः । अस्यति । नृऽचक्षसः । दृशये । कर्णऽयोनयः ॥ ८ ॥

असुरैः कृता मायाः) प्रतिचक्ष्य (=दृष्ट्वा) यत उ आयन् (=यतः स्थानादागता आसन्) तत् आविशम् (=आवेष्टुं प्रवेष्टुं) पुनरुदीयुः (=प्रतिजग्मुः) ॥

गोसमूहे पणिभिरसुरैरपहृते सति पणीनां स्थानं सरमाख्यया देवशुन्या ज्ञात्वा ब्रह्मणस्पतिना सृष्टा अङ्गिरसस्तत्स्थानं प्राप्य गोसमूहं पणिभिर्निर्मिता मायाश्च दृष्ट्वा असुरनिवासस्थानं स्वहस्तोद्भूतेनाग्निना दग्ध्वा प्रत्यागच्छन् । तदेतदृचेनोच्यते । इति सायणः ॥

भाषायाम्.

७. ऋतावानः (=सत्यवन्तः=यज्ञरूपेण सत्येन युक्ताः) कवयः (=मेधाविनः [अङ्गिरसः] अनृता प्रतिचक्ष्य (=अनृतानि माया दृष्ट्वा) अतः (=ततः स्थानात्) पुनर्महः पथ आ तस्थुः (=महतः पथः पुनरवतस्थिरे) [अवतिष्ठमानाश्च] बाहुभ्यां धमितं (=हस्ताभ्यां मन्थनोत्पादितम्)—अरणः स (=असुखकारी सोऽग्निर्) नकिरस्ति (=पूर्वं क्वापि नासीत्) तम् अग्निम् अश्मनि जहुर्हि (=पणीनां निवासभूते शिलोच्चये दग्धुं त्यक्तवन्तः) ॥

अविद्यमानमग्निं स्वसामर्थ्यादुत्पाद्य तत्र प्रचिक्षिपुरिति सायणः ॥

८. ब्रह्मणस्पतिर्यत्र वष्टि (=यत्र प्रहारं कर्तुमिच्छति) तत् (=तत्र) [स]

७. ते सत्यवंत कवि कपटें पाहून तेथून पुनः मोठ्या मार्गास लागले. ते बाहूंनीं मथून उत्पन्न केलेला अग्नि–तो संहारक [अग्नि पूर्वीं] नव्हता त्याला– [त्या] पर्वतावर फेकिते झाले.

७. The poets, the followers of the Truth, having perceived the falsehood took their great way back from thence. They cast on the rock that fire produced by [their] arms—the destructive [fire] was not anywhere [before].

८. ब्रह्मणस्पति जेथें प्रहार करावयास इच्छितो तेथें सत्यच ज्याची दोरी अशा वेगयुक्त धनुष्यानें प्रहार करितो. ब्रह्मणस्पति ज्या बाणांनीं प्रहार करितो ते बिनचूक असतात [आणि] त्यांस पाहण्यासाठीं मनुष्यांचे डोळे असून ते कानापासून सुटतात.

8. With the quick bow equipped with the string of Truth Brahmaṇaspati strikes wherever he wishes. Unerring are the arrows with which he shoots, [and] have the sight of men to see, [and] are born of the ear.

---

७. 'गाईचा शोध लागल्यावर अंगिरस तेथून निघाले आणि आपल्या हातानें अग्नि उत्पन्न करून मेघरूपी पणीचें जें घर त्यावर टाकिला. हा नाश करणारा अग्नि पूर्वीं ठाऊक नव्हता.' हा अग्नि म्हणजे विद्युद्रूपच अग्नि समजावयाचा आहे.

८. 'सत्यच ज्याची दोरी.'=' ऋतज्येन.' म्हणजे यज्ञरूप ज्या ज्याला आहे असें. यज्ञाला आर्यलोक सत्य असें म्हणत. कारण कीं यज्ञ करणें हाच सत्य धर्म होय अशी त्यांची समजूत असे.

'पाहण्यासाठीं मनुष्यांचे डोळे असून' इ० "नृचक्षसः.' म्हणजे मनुष्यांला जसे डोळे असल्यामुळें प्रहार्य लक्ष्य अमुक ठिकाणीं आहे असें त्यांस समजतें तसें ब्रह्मणस्पतीच्या बाणांस दिसत असतें. प्रत्यक्ष मनुष्यांप्रमाणें पाहणारे इतकें तात्पर्य.

'कानापासून सुटतात'=' कर्णयोनयः.' अक्षरशः कानापासून उत्पन्न होणारे. म्हणजे धनुष्याला आकर्ण ओढून नंतर सोडिलेले असा भावार्थ.

या ऋचेवरून इतकें सिद्ध होतें कीं वेदकाळीं आर्य लोकांत धनुष्यानें लढण्याची, निदान मारण्याची तरी, चाल असे.

स संन्नयः स विनयः पुरोहितः स सुष्टुतः स युधि ब्रह्मणस्पतिः।
चाक्ष्मो यद्वाजं भरते मती धनादित्सूर्यस्तपति तप्यतुर्वृथा ॥ ९ ॥

सः । सम्ऽनयः । सः । विऽनयः । पुरःऽहितः । सः । सुऽस्तुतः । सः । युधि । ब्रह्मणः । पतिः ।
चाक्ष्मः । यत् । वाजम् । भरते । मती । धना । आत् । इत् । सूर्यः। तपति । तप्यतुः । वृथा ॥ ९ ॥

विभु प्रभु प्रथमं मेहनावतो बृहस्पतेः सुविदत्राणि राध्या ।
इमा सातानि वेन्यस्य वाजिनो येन जना उभये भुञ्जते विशः ॥
॥ १० ॥ २ ॥

विऽभु । प्रऽभु । प्रथमम् । मेहनाऽवतः । बृहस्पतेः । सुऽविदत्राणि । राध्या ।
इमा । सातानि । वेन्यस्य । वाजिनः । येन । जनाः । उभये । भुञ्जते । विशः ॥ १० ॥ २ ॥

ऋतज्येन (=ऋतं यज्ञ एव ज्या यस्य तेन) क्षिप्रेण (=वेगवता) धन्वना (=धनुषा) प्राश्नोति (=व्याप्नोति=प्रहरति) । [अपि च] याभिर् [इषुभिर्] अस्यति (=प्रहारं करोति [तास्] तस्य इषवः (=बाणाः) साध्वीः (=साध्व्यः=सम्यक्प्रहरन्त्यः) [अपि च] दृशये नृचक्षसः (=दर्शनाय मनुष्यस्य नेत्राणीव नेत्राणि यासां ताः) कर्णयोनयः (=कर्णान्निर्गच्छन्त्यश्च=आकर्णकृष्टसृष्टाश्च) [भवन्ति] ॥

भाषायाम्.

९. स ब्रह्मणस्पतिः संनयः (=विश्लिष्टानां मन्त्रैः संयोजयिता) स विनयः (=संयुतानां मन्त्रैर्वियोजयिता) पुरोहितः (=पुरतः स्थापितः प्रतिनिधिः) स सुस्तुतः (=शोभनं यथा स्तुतः) स युधि (=युद्धे) [सहायो भवति] । चाक्ष्मः (=दयार्द्रदृष्टिः) [स] यद् (=यस्मात्) मती (=मत्या=स्तुत्या) [यजमानाय] वाजं धना (=अन्नं धनानि च) भरते (=आनयति) आदित् (=अतः कारणादेव) तप्यतुः सूर्यः (=तापकः सूर्यो) वृथा (=अनायासेन) तपति (=दीप्यते) ॥

१०. मेहनावतः (=वृष्टिप्रदस्य=उदारस्य) बृहस्पते राध्या (=राध्यानि=साध-

९. तो ब्रह्मणस्पति एकत्र करणारा, [आणि] तो वेगळे वेगळे करणारा पुरोहित [होय]; तो चांगला स्तविलेला, तो युद्धामध्यें [साहाय्य करणारा होय]. दयाळू [ब्रह्मणस्पति] स्तुतीच्या योगानें [उपासकाला] अन्न आणि संपत्ति आणितो म्हणूनच धगधगणारा सूर्य अनायासेंकरून तापत असतो.

9. He is a representative that brings together, he [a representative] that separates; he most praised; Brahmaṇaspati [is a friend] in battle. Inasmuch as he the gracious one brings through the hymn food and wealth, therefore does the glowing sun burn with ease.

१०. प्रबळ [आणि] उदार बृहस्पतीच्या देणग्या मोठ्या, प्रौढ, श्रेष्ठ [आणि] सुलभ [होत]. जेणेंकरून उभय मनुष्यजन भोग भोगितात त्या ह्या प्रिय बळवान् बृहस्पतीच्याच देणग्या [होत].

10. The gifts of bounteous Bṛihaspati are great, powerful, excellent [and] easily obtainable. These are the gifts of adorable [and] mighty [Bṛihaspati], whereby both kinds of men are happy.

---

९. 'जे मित्रादिक एकमेकांपासून निराळे झाले असतील त्यांस एकत्र मिळविणारा, आणि जे वैरी वगैरे एकत्र मिळाले असतील त्यांस वेगवेगळे करणारा ब्रह्मणस्पति स्तोत्रानें प्रसन्न होऊन उपासकांस धनसंपन्न करितो म्हणूनच सूर्य नित्य सहज आकाशांत तापत असतो.'

'स्तुतीच्या योगानें अन्न आणि संपत्ति आणितो' ='वाजं भरते मती धना.' म्हणजे उपासकाला. पण याचा अर्थ, स्तोत्रासह हविरन्न आणि आहुत्या [देवांस] अर्पण करितो म्हणून, असाहि होऊं शकेल.

१०. 'उभय मनुष्य जन.' म्हणजे स्तोते आणि यजमान हे, असें सायण म्हणतात.

योऽवरे वृजने विश्वथा विभुर्महामु रण्वः शवसा ववक्षिथ ।
स देवो देवान्प्रति पप्रथे पृथु विश्वेदु ता परिभूर्ब्रह्मणस्पतिः॥ ११॥

यः । अवरे । वृजने । विश्वऽथा । विऽभुः । महाम् । ऊं इति ।
रण्वः । शवसा । ववक्षिथ ।
सः । देवः । देवान् । प्रति । पप्रथे । पृथु । विश्वा । इत् । ऊं इति ।
ता । परिऽभूः । ब्रह्मणः । पतिः ॥ ११ ॥

विश्वं सत्यं मघवाना युवोरिदापश्चन प्र मिनन्ति व्रतं वाम् ।
अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम् ॥१२॥

विश्वम् । सत्यम् । मघऽवाना । युवोः । इत् । आपः । चन । प्र ।
मिनन्ति । व्रतम् । वाम् ।
अच्छ । इन्द्राब्रह्मणस्पती इति । हविः । नः । अन्नम् । युजाऽइव ।
वाजिना । जिगातम् ॥ १२ ॥

नीयानि=धनानि) विभु (=विभूनि=महान्ति) प्रभु (=प्रभूणि=प्रौढानि) प्रथमं (=प्रथमानि=श्रेष्ठानि) सुविदत्राणि (=सुष्ठु लब्धव्यानि=अनायासेन प्राप्तव्यानि) [भवन्ति] । उभये विशो जनाः (=उभावपि मनुष्याणां प्रकारौ=उभयप्रकारा मनुष्याः="स्तोतारो यजमानाश्च") येन भुञ्जते (=यैर्भोगान् लभन्ते) इमा (=तानि) वेन्यस्य (=कमनीयस्य) वाजिनः (=बलवतो) [बृहस्पतेः] सातानि (=दानानि) [भवन्ति] ॥

तत्सर्वं ब्रह्मणस्पतिना दत्तमित्यर्थः इति सायणः ॥

भाषायाम्.

११. यस् [त्वम्] अवरे वृजने (=निकृष्टे पृथिव्यां प्रवर्तमाने संग्रामे) महां शवसा (=महतां देवानां बलेन) विश्वथा (=सर्वैः प्रकारैर्) विभुः (=व्याप्तो) रण्वः (=रणशूरो) ववक्षिथ (=प्रवृद्धो जातोसि=जातोसि) स देवस् [त्वं] देवान् प्रति पृथु पप्रथे (=देवानां प्रतिनिधिर्भूत्वा पृथुकीर्तिर्बभूव=भूतोसि) । ब्रह्मणस्पतिस्ता विश्वा इत् उ परिभूः (=अत एव सर्वाणि भूतजातानि परिभूय रक्षति) ॥

१२. हे मघवाना (=धनयुक्ताविन्द्राब्रह्मणस्पती), युवोरिद्विश्वं सत्यं (=युवयोरेव सर्वं सत्यं यथार्थं) [भवति] । वां व्रतमापश्चन प्र मिनन्ति (=युवयोः कर्म उदकान्यपि न हिंसन्ति) । हे इन्द्राब्रह्मणस्पती, अन्नं युजा वाजिनेव (=युजौ वा-

११. जो ऐहिक संग्रामांत सर्व प्रकारांनीं महान् [देवां]च्या बळानिशीं मोठा [आणि] शूर असा वाढलास, तो [तूं] देव [ब्रह्मणस्पति] देवांचा प्रति[निधि होऊन] प्रख्यातकीर्ति झालास; त्या सर्वांचाहि संभाळ करणारा तूं ब्रह्मणस्पति [होस].

11. [Thou Brahmaṇaspati] who hast grown altogether mighty [and] brave with the strength of the great [gods] in earthly battle—[thou] a god hast made thyself widely famous as a representative of the gods.—Brahmaṇaspati protects all.

१२. हे धनवंत [इन्द्र आणि ब्रह्मणस्पती] हो, तुमचेंच सर्व सत्य [होय]. उदकें सुद्धा तुमच्या कामाला प्रत्यवाय आणीत नाहींत. हे इन्द्र आणि बृहस्पती हो, एकमेकाला जोडिलेले दोन घोडे अन्नाप्रत [गेल्या]प्रमाणें तुम्ही आमच्या हवीप्रत या.

12. Every thing of you and of none else is real, o rich [Indra and Brahmaṇaspati] ! Not even the waters interfere with your ordinance. Come to our oblation, o Indra and Brahmaṇaspati, even as a pair of horses joined each to the other [should go] to [their] food.

---

११. 'ऐहिक संग्रामांत'='अवरे वृजने.' अक्षरशः खालच्या संग्रामांत. हे शब्द कठिण आहेत.

'त्या सर्वांचा.' म्हणजे देवादिक आणि मनुष्यादिक जे आणि जीं दुसरीं भूतें त्यांचा.

१२. 'तुमचेंच सर्व.'='युवोरित् विश्वम्.' म्हणजे तुम्ही जें वृत्रहननादिक अथवा मनुष्यरक्षणादिक करितां तें जसें खरें तसें दुसऱ्या कोणत्याच देवाचें काम खरें नाहीं.

उताशिष्ठा अनु शृण्वन्ति वह्नयः सभेयो विप्रो भरते मती धना ।
वीळुद्वेषा अनु वश ऋणमाददिः स ह वाजी समिथे ब्रह्मणस्पतिः
॥ १३ ॥

उत । आशिष्ठाः । अनु । शृण्वन्ति । वह्नयः । सभेयः । विप्रः । भरते । मती । धना ।
वीळुऽद्वेषाः । अनु । वशा । ऋणम् । आऽददिः । सः । ह । वाजी । सम्ऽइथे । ब्रह्मणः । पतिः ॥ १३ ॥

ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः ।
यो गा उदाजत्स दिवे वि चाभजन्महीव रीतिः शवसासरत्पृथक् १४

ब्रह्मणः । पतेः । अभवत् । यथाऽवशम् । सत्यः । मन्युः । महि । कर्म । करिष्यतः ।
यः । गाः । उत्ऽआजत् । सः । दिवे । वि । च । अभजत् । महीऽइव । रीतिः । शवसा । असरत् । पृथक् ॥ १४ ॥

जिनाविव=परस्परं युक्तावश्वावन्नं प्रति यथा गच्छतां तथा) [युवां] नो हविरच्छ जिगातम् (=अस्माकं हविरभिलक्ष्यागच्छतम्) ॥

भाषायाम्.

१३. उत (=अपि च) [तस्य] आशिष्ठा वह्नयः (=वेगवत्तमा अश्वा) अनु शृण्वन्ति (=आनुकूल्येन ब्रह्मणस्पतेराज्ञां शृण्वन्ति) । सभेयो विप्रः (=? सभायां साधुर्मेधावी स्तोता) मती (=मत्या=स्तुत्या) धना (=धनानि) भरते (=संपादयति=प्राप्नोति) । वीळुद्वेषाः (=दृढान् प्रबलान् राक्षसादीन् द्वेष्टीति तादृशो) [ब्रह्मणस्पतिर्] अनु वशा (=अनुवशान्=काममनु=यथेच्छम्) ऋणम् आददिः (=यजमानैर्दत्तहवीरूपस्य ऋणस्य प्रतिग्रहीता) [भवति] । स ब्रह्मणस्पतिर्ह समिथे (=संग्रामे) वाजी (=बलवान् जेता) [भवति] ॥

१४. महि कर्म (=महद् वीरकर्म) करिष्यतः (=कर्तुमिच्छतो) ब्रह्मणस्पतेर्मन्युः (=मन्त्रो) यथावशं सत्योभवत् (=यथेच्छमवितथोभवत् पूर्णकामोभवद्) । यो [ब्रह्मणस्पतिर्] गा उदाजत् (=मेघोदकरूपा गा निरगमयत्) स दिवे [ता] वि अभजत् (=द्युलोकाय=तत्स्थाय देवसंघाय विभक्ता अकरोद्) । मही रीतिरिव

१३. आणि अत्यंत वेगवंत जे त्याचे अश्व ते लक्ष देऊन [आज्ञा] ऐकितात. सभ्य मेधावी [स्तोता] स्तोत्राच्या योगानें संपत्तींप्रत पावतो. प्रबळद्वेषी [ब्रह्मणस्पति] यथेच्छ ऋण घेतो. संग्रामांत तो ब्रह्मणस्पतिच बळवान् होतो.

१४. महा पराक्रम करूं इच्छिणाऱ्या ब्रह्मणस्पतीचा मंत्र इच्छेप्रमाणें खरा होतो. जो [ब्रह्मणस्पति] गाईंला मोकळ्या करिता झाला, तो द्युलोकाला त्या वांटून देता झाला. महा नदीप्रमाणें [गाईंचा समूह] जोरानें वेगवेगळा वाहून गेला.

13. And the most swift horses [of Brahmaṇaspati] heed the command. The polite poet receives wealth for [his] hymn. Brahmaṇaspati who has those that are powerful for his enemies accepts the debts. That Brahmaṇaspati indeed is powerful in battle.

14. The hymn of Brahmaṇaspati when he wishes to achieve a great deed, becomes fulfilled according to his wish. He who set free the cows divided [them] among the gods. [The herd] flowed separately with speed like a vast river.

---

१३. 'ब्रह्मणस्पतीचे घोडे ब्रह्मणस्पतीला सत्वर यज्ञास घेऊन येतात आणि मग ब्रह्मणस्पति स्तोत्र म्हणणाऱ्याला संपत्ति देतो. तो हविर्दात्या यजमानाकडून हवि हेंच ऋण घेतो आणि युद्धांत त्यास यश देतो.'

१४. 'करूं इच्छिणाऱ्या.'='करिष्यतः.' म्हणजे जेव्हां तो करावयास इच्छितो तेव्हां.

'द्युलोकाला त्या वांटून देता झाला.' म्हणजे मेघोदकरूप गाई निरनिराळ्या देवांस वांटून देता झाला, असें सायणाचार्य म्हणतात.

'गाईंचा समूह.' या गाई म्हणजे मेघोदकरूपच होत.

'वेगवेगळा वाहून गेला'='पृथक् असरत्.' म्हणजे निरनिराळ्या देवांस निरनिराळ्या गाई वांटून दिल्या त्या त्याच्या त्याच्याकडे गेल्या असें सायण म्हणतात.

ब्रह्मणस्पते सुयमस्य विश्वहा रायः स्याम रथ्यो३ वयस्वतः ।
वीरेषु वीराँ उप पृङ्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवम् १५

ब्रह्मणः । पते । सुऽयमस्य । विश्वहा । रायः । स्याम । रथ्यः । वयस्वतः ।

वीरेषु । वीरान् । उप । पृङ्धि । नः । त्वम् । यत् । ईशानः । ब्रह्मणा । वेषि । मे । हवम् ॥ १५ ॥

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः॥ १६॥ ३ ॥

ब्रह्मणः । पते । त्वम् । अस्य । यन्ता । सुऽउक्तस्य । बोधि । तनयम् । च । जिन्व ।

विश्वम् । तत् । भद्रम् । यत् । अवन्ति । देवाः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १६ ॥ ३ ॥

(=महती स्रुतिरिव=महान् प्रवाह इव) [गोसंघः] शवसा (=बलेन) पृथक् असरत् (=पृथगवहत्) ॥

भाषायाम्.

१५. हे ब्रह्मणस्पते, [वयं] विश्वहा (=नित्यं) सुयमस्य (=सुष्ठुनियन्तव्यस्य=शोभनं यथा तथा नियमवशंगतस्य) वयस्वतः (=बलयुक्तस्य) रायो रथ्यः स्याम (=धनस्याधिपतयो भवेम)। [हे ब्रह्मणस्पते], नो वीरेषु वीरान् उप पृङ्ग्धि (=वीर्यवत्सु अस्माकं पुत्रेषु वीर्ययुक्तान् वीरान् पौत्रान् उत्पादय) यद् (=यस्मात् कारणाद्) ईशानः (=ईश्वरस्त्वं) ब्रह्मणा (=स्तोत्रेण) मे हवं (=ममाह्वानं) वेषि (=कामयसे) ॥

१६. हे ब्रह्मणस्पते, त्वमस्य सूक्तस्य यन्ता बोधि (=नियामको भव=रथस्य यन्ता यथा रथं सम्यक्प्रेर्य अभिलषितं स्थानं प्रति नयति तथास्य सूक्तस्य देवान् प्रति नेता भव) तनयं च जिन्व (=पुत्रपौत्रादिलक्षणं संतानं च प्रीणय=सुखं प्रापय)। यत् [किमपि] देवा अवन्ति (=रक्षन्ति) तत् भद्रं (=कल्याणं) [भवति]। सुवीराः (=शोभनवीर्योपेतपुत्रपौत्रैः सहिता) विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=ब्रूयाम) ॥

१५. हे ब्रह्मणस्पती, जी सहज आज्ञा ऐकेल आणि जी बलयुक्त, अशा संपत्तीचे आम्ही नित्य धनी होऊं असें कर. आमच्या शूर पुत्रांच्या पोटीं शूर पौत्र उत्पन्न कर, कीं ज्यापेक्षां प्रभु होत्साता तूं स्तोत्राच्या योगानें माझी हाक ऐकितोस.

१६. हे ब्रह्मणस्पती, तूं या सूक्ताचा नियामक हो आणि [आमच्या] पुत्रपौत्रादिकांचें बरें कर. जें देव रक्षितात तें सर्व कल्याण [होतें]. चांगल्या वीरांनीं युक्त होत्साते आम्ही यज्ञांत तुझी मोठी कीर्ति गाऊं असें कर.

15. O Brahmaṇaspati, may we ever be the masters of wealth easily controlled [and] full of strength. Do thou produce brave grandsons from our sons, inasmuch as thou the lord lovest my invocation through [my] hymn.

16. O Brahmaṇaspati, be thou the director of this hymn, and prosper our posterity. Blessed is everything that the gods protect. May we, accompanied by brave sons, chant great praises [to thee] in the sacrifice.

सूक्तम् २५–२१६.

गृत्समद ऋषिः । ब्रह्मणस्पतिर्देवता । जगती छन्दः ॥

इन्धा॑नो अ॒ग्निं व॑नवद्वनुष्य॒तः कृ॒तब्र॑ह्मा शूशुवद्रा॒तह॑व्य॒ इत् ।
जा॒तेन॑ जा॒तमति॒ स प्र स॑र्सृते॒ यंयं॑ युजं॑ कृणु॒ते ब्रह्म॑ण॒स्पतिः॑ ॥१॥

इन्धा॑नः । अ॒ग्निम् । व॒न॒वत् । व॒नु॒ष्य॒तः । कृ॒तऽब्र॑ह्मा । शू॒शु॒व॒त् । रा॒तऽह॑व्यः । इत् ।

जा॒तेन॑ । जा॒तम् । अति॑ । सः । प्र । स॒र्सृ॒ते॒ । यम्ऽय॑म् । यु॒ज॑म् । कृ॒णु॒ते । ब्रह्म॑णः । पतिः॑ ॥ १ ॥

वी॒रेभि॑र्वी॒रान्व॑नवद्वनुष्य॒तो गोभी॑ र॒यिं प॑प्रथ॒द्बोध॑ति॒ त्मना॑ ।
तो॒कं च॒ तस्य॒ तन॑यं च वर्धते॒ यंयं॑ युजं॑ कृणु॒ते ब्रह्म॑ण॒स्पतिः॑ ॥२॥

वी॒रेभिः॑ । वी॒रान् । व॒न॒व॒त् । व॒नु॒ष्य॒तः । गोभिः॑ । र॒यिम् । प॒प्र॒थ॒त् । बोध॑ति । त्मना॑ ।

तो॒कम् । च॒ । तस्य॑ । तन॑यम् । च॒ । व॒र्ध॒ते॒ । यम्ऽय॑म् । यु॒ज॑म् । कृ॒णु॒ते । ब्रह्म॑णः । पतिः॑ ॥ २ ॥

भाषायाम्.

१. यंयं [यजमानं] ब्रह्मणस्पतिर्युजं कृणुते (=स्वकीयं मित्रं करोति) [स सः] अग्निं समिन्धानः (=यज्ञार्थमग्निं प्रज्वलितं कुर्वन्) [यजमानो] वनुष्यतो वनवत् (=शत्रून् विजेतुं शक्नोति) [स स] कृतब्रह्मा (=कृतस्तोत्रो) रातहव्यः (=दत्तहविष्कश्च सन्) शूशुवत् (=प्रवृद्धो भवितुं शक्नोति) [स स च] जातेन जातम् अति प्र सर्सृते (=पुत्रेणोत्पादितं पौत्रम् अतीत्य भृशं प्रसरति=पौत्रमपि पश्यंश्चिरकालं जीवेत्) ॥

२. यंयं [यजमानं] ब्रह्मणस्पतिर्युजं कृणुते (=स्वकीयं मित्रं करोति) [स स] वीरेभिः (=वीरैः शूरैः स्वकीयैः पुत्रादिभिर्) वीरान् वनुष्यतः (=शूरान् शत्रून्) वनवत् (=जेतुं शक्नोति) [स स] गोभी रयिं (=धनं) पप्रथत् (=विस्तारयति) [स स] त्मना बोधति (=स्वयं तं रयिं जानाति अनुभवति) । तस्य [तस्य] तोकं च तनयं च (=पुत्रादीनि अपत्यानि पुत्रादीनां चापत्यानि पौत्रसंतानानि च) वर्धते (=वर्धयति=प्रकर्षं नयति) ॥

सूक्त २५–२१६.

ऋषि–गृत्समद. देवता–ब्रह्मणस्पति. वृत्त–जगती.

१. ज्या ज्या [यजमाना]ला ब्रह्मणस्पति [आपला] मित्र करितो [तो तो] अग्नीला प्रज्वलित करणारा [यजमान] हिंसेच्छू [शत्रूं]चा पराजय करूं शकतो, [तो तो] [यजमान] स्तोत्रें म्हणून [आणि] हव्यें देऊन उत्कर्षाप्रत पावूं शकतो, [आणि] तो तो यजमान पौत्राच्या पलीकडे जगूं शकतो.

२. ज्या ज्या [यजमाना]ला ब्रह्मणस्पति [आपला] मित्र करितो [तो तो] शूर पुत्रांच्या योगानें शूर शत्रूंस जिंकूं शकतो, [तो तो] गाईंनीं संपत्तीची वृद्धि करितो, [आणि] [तिला] स्वतः अनुभवितो; त्याच्या मुलांला आणि नातवांला ब्रह्मणस्पति वाढवितो.

Hymn 25–216.

To *Brahmaṇaspati*. By *Gṛitsamada*. Metre—*Jagatî*.

1. Every one whom Brahmaṇaspati makes [his] friend shall, having kindled Agni, conquer the enemies, [and] shall, having chanted hymns [and] offered oblations, grow prosperous, [and] shall prolong his life beyond his son's son.

2. Every one whom Brahmaṇaspati makes [his] friend shall vanquish hostile heroes with [his own] heroes, [and] shall extend [his] wealth with cows and enjoy [it] himself, and [Brahmaṇaspati] prospers his children and grandchildren.

---

१. ब्रह्मणस्पतीचा प्रसाद झाल्यापासून काय लाभ आहे तें यांत सांगितलें आहे. पुढच्या तीन मंत्रांतहि हेंच सांगितलें आहे.

२. ‘ गाईंनीं ’ इ०. म्हणजे त्याला गाई मिळतात, आणि त्यांच्या योगानें त्याची संपत्ति वाढते.

‘ स्वतः अनुभवितो.’=‘ बोधति त्मना.’ अक्षरशः ‘ स्वतः जाणतो.’

सिन्धुर्न क्षोदः शिमीवाँ ऋघायतो वृषेव वध्रीँरभि वष्ट्योजसा ।
अग्नेरिव प्रसितिर्नाह वर्तवे यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ ३ ॥

सिन्धुः । न । क्षोदः । शिमीऽवान् । ऋघायतः । वृषाऽइव । वध्रीन् । अभि । वष्टि । ओजसा ।
अग्नेःऽइव । प्रऽसितिः । न । अह । वर्तवे । यम्ऽयम् । युजम् । कृणुते । ब्रह्मणः । पतिः ॥ ३ ॥

तस्मा अर्षन्ति दिव्या असश्चतः स सत्वभिः प्रथमो गोषु गच्छति ।
अनिभृष्टतविषिर्हन्त्योजसा यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ ४ ॥

तस्मै । अर्षन्ति । दिव्याः । असश्चतः । सः । सत्वऽभिः । प्रथमः । गोषु । गच्छति ।
अनिभृष्टऽतविषिः । हन्ति । ओजसा । यम्ऽयम् । युजम् । कृणुते । ब्रह्मणः । पतिः ॥ ४ ॥

भाषायाम्.

३. यंयं [यजमानं] ब्रह्मणस्पतिर्युजं कृणुते (=स्वकीयं मित्रं करोति) [स स] शिमीवान् (=उपासनाकर्मयुक्तो यजमानः) सिन्धुर्न क्षोदः (=नदः कूलं यथा) [अथवा] वृषा वध्रीनिव (=सेचनसमर्थः=वीर्यवान् पुरुषो यथा वीर्यरहितान् पुरुषांस्तथा) ओजसा (=तेजसा=पराक्रमेण) ऋघायतः अभि वष्टि (=शत्रून् हन्तुमभितः कामयते=हन्तुं समर्थो भवति) [स सः] अग्नेः प्रसितिरिव वर्तवे न ह [भवति] (=अग्नेर्ज्वाला यथा वारयितुं नैव शक्यते तथा न वारयितुं शक्यो भवति)॥

वध्रयो निष्पिष्टमुष्का निर्वीर्या बलीवर्दाः । तान् यथा वृषा सेचनसमर्थः सवीर्यो वृषभोऽभिभवति तद्वच्छत्रूनभिभवतीत्यर्थः ॥ इति सायणः ॥

४. यंयं [यजमानं] ब्रह्मणस्पतिर्युजं कृणुते (=स्वकीयं मित्रं करोति) तस्मै [तस्मै] दिव्या असश्चतः (=द्युसंबन्धिन्यो नद्यः मेघोदकरूपा नद्यः) अर्षन्ति (=प्राप्नुवन्ति) स [स] सत्वभिः (=शूरैर्वीरैः) प्रथमो गोषु गच्छति (=सर्वेभ्यो मनुष्येभ्यः प्रथमं गाः प्राप्नोति) [सस च] अनिभृष्टतविषिः (=अबाधितबलः सन्) ओजसा (=पराक्रमेण) हन्ति (=शत्रून् हिनस्ति) ॥

३. ज्या ज्या [यजमाना]ला ब्रह्मणस्पति [आपला मित्र करितो [तो तो] उपासनावान् [यजमान] [आपल्या] शत्रूंला, जसा एकादा नद कांठाला [अथवा] वीर्यवान् पुरुष जसा नपुंसकांला जिंकितो तसा, शौर्यानें जिंकितो, [आणि] अग्नीची ज्वाला जशी [हठवितां येत नाहीं] तसा हठविला जात नाहीं.

४. ज्या ज्या [यजमाना]ला ब्रह्मणस्पति [आपला] मित्र करितो त्या [त्या] [यजमाना]साठीं दिव्य नद्या धांवून येतात, तो [तो] [सर्वां] अगोदर शूर पुत्रांच्या योगेंकरून गाईंप्रत पावतो, तो तो अबाधितबल [होत्साता] पराक्रमानें [शत्रूंचें] हनन करितो.

3. Every worshipper whom Brahmaṇaspati makes [his] friend, beats with [his] valour [his] enemies even as a river [its] bank, even as a brave hero beats those that are emasculated, and is irresistible like a flame of Agni.

4. For every one whom Brahmaṇaspati makes [his] friend, the heavenly rivers flow, he is the first to attain to cows, he kills [the enemy] with his might, being of power that is uninjured.

४. ‘ दिव्य नद्या ’ म्हणजे मेघोदकें.

तस्मा इद्विश्वे धुनयन्त सिन्धवोऽच्छिद्रा शर्म दधिरे पुरूणि ।
देवानां सुम्ने सुभगः स एधते यंयं युजं कृणुते ब्रह्मणस्पतिः॥५॥४

तस्मै । इत् । विश्वे । धुनयन्त । सिन्धवः । अच्छिद्रा । शर्म । दधिरे । पुरूणि ।
देवानाम् । सुम्ने । सुऽभगः । सः । एधते । यम्ऽयम् । युजम् । कृणुते । ब्रह्मणः । पतिः ॥ ९ ॥ ४ ॥

भाषायाम्.

५. यंयं [यजमानं] ब्रह्मणस्पतिर्युजं कृणुते (=स्वकीयं मित्रं करोति) तस्मै इत् (=तस्मा एव) विश्वे सिन्धवः (=सर्वा अपि नद्यो) धुनयन्त (=प्रवहन्ति) । [तस्मा एव] पुरूणि (=बहूनि) अच्छिद्राणि (=संततानि) शर्म (=शर्माणि =सुखानि) दधिरे (=धीयन्ते=दीयन्ते) । स [एव] देवानां सुम्ने (=देवानां तद्दत्ते सुखे=प्रसादे) सुभगः (=सुभाग्यशाली) [सन्] एधते (=वर्धते) ॥

सूक्तम् २६-२१७.

गृत्समद ऋषिः । ब्रह्मणस्पतिर्देवता । जगती छन्दः ॥

ऋजुरिच्छंसो वनवद्वनुष्यतो देवयन्निददेवयन्तमभ्यसत् ।
सुप्रावीरिद्वनवत्पृत्सु दुष्टरं यज्वेदयज्योर्वि भजाति भोजनम् ॥१॥

ऋजुः । इत् । शंसः । वनवत् । वनुष्यतः । देवऽयन् । इत् । अदेवऽयन्तम् । अभि । असत् ।
सुप्रऽअवीः । इत् । वनवत् । पृत्ऽसु । दुस्तरम् । यज्वा । इत् । अयज्योः । वि । भजाति । भोजनम् ॥ १ ॥

भाषायाम्.

१. ऋजुः शंस इत् (=आर्जवयुक्तः=ऋतकारी स्तोतैव) वनुष्यतो वनवत् (=शत्रून् जेतुं शक्नोति) । देवयन् इत् अदेवयन्तम् अभि असत् (=देवानिच्छन्मनुष्य एव देवाननिच्छन्तम् अभिभूयात्) । सुप्रावीरित् (=सुरक्षणवानेव=ब्रह्मणस्पत्यादिभिः संरक्षितो मनुष्य एव) दुष्टरं (=दुःखेन तरीतुं जेतुं शक्यं शत्रुं) पृत्सु (=संग्रामेषु)

५. ज्या ज्या [यजमाना]ला ब्रह्मणस्पति [आपला] मित्र करितो त्यासाठींच सर्व नद्या वाहतात, [त्यालाच] पुष्कळ अक्षय सुखें देण्यांत येतात, [तो तोच] देवांच्या कृपेंत [राहून] सौभाग्यशाली [होत्साता] वाढतो.

5. For every one whom Brahmaṇaspati makes [his] friend, all the rivers flow, [to him] are given many uninterrupted blessings, he prospers, fortunate in the favour of the gods.

सूक्त २६–२१७.

ऋषि–गृत्समद. देवता–ब्रह्मणस्पति. वृत्त–जगती.

१. खरा स्तोताच शत्रूंला जिंकूं शकेल, देवेच्छु [जन]च अदेवेच्छु [जनां]चा पाडाव करूं शकेल, चांगला रक्षिलेला [जन]च दुस्तर शत्रूला संग्रामांत जिंकूं शकेल, यजन करणारा मनुष्यच यजन न करणाऱ्या मनुष्याचें धन उपभोगील.

Hymn 26–217.

To *Brahmaṇaspati*. By *Gṛitsamada*. Metre–*Jagatî*.

1. None but the honest praiser shall conquer the enemies, none but the god-loving man shall defeat the godless man, none but the well-protected man shall conquer the invincible man in battles, none but the sacrificing man shall enjoy the wealth of the unsacrificing one.

---

१. यांत देवोपासनेचें फळ सांगितलें आहे.

'यजन न करणाऱ्या' इ०. म्हणजे नास्तिकाचें धन देवभक्तासच मिळेल, दुसऱ्यास मिळणार नाहीं.

यजस्व वीर प्र विहि मनायतो भद्रं मनः कृणुष्व वृत्रतूर्ये ।
हविष्कृणुष्व सुभगो यथासंसि ब्रह्मणस्पतेरव आ वृणीमहे ॥ २॥

यजस्व । वीर । प्र । विहि । मनायतः । भद्रम् । मनः । कृणुष्व । वृत्रऽतूर्ये ।
हविः । कृणुष्व । सुऽभगः । यथा । असंसि । ब्रह्मणः । पतेः । अवः । आ । वृणीमहे ॥ २ ॥

स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः।
देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम्॥३

सः । इत् । जनेन । सः । विशा । सः । जन्मना । सः । पुत्रैः । वाजम् । भरते । धना । नृऽभिः ।
देवानाम् । यः । पितरम् । आऽविवासति । श्रद्धाऽमनाः । हविषा । ब्रह्मणः । पतिम् ॥ ३ ॥

वनवत् (=हिंसात्) । यज्वा इत् (=यजनकर्तैव अयज्योर्भोजनम् (=यजनहीनस्य धनं) वि भजाति (=विशेषेण भजेत) ॥

भाषायाम्.

२. हे वीर (=शूर पुत्र), यजस्व (=ब्रह्मणस्पतेर्यजनं कुरु) [अपि च] मनायतः प्र विहि (=शीघ्रं प्रवर्तमानान् शत्रून् प्रकर्षेण युद्धार्थं गच्छ) । वृत्रतूर्ये (=संग्रामे) मनो भद्रं कृणुष्व (=धाष्टर्ययुक्तं कुरु) । हविः कृणुष्व सुभगो यथासंसि (=येन सौभाग्यशाली भवेस्तथा ब्रह्मणस्पतेरर्थे हविः सिद्धं कुरु) । [वयं] ब्रह्मणस्पतेरवः (=संरक्षणम्) आ वृणीमहे (=प्रार्थयामहे) ॥

मनायतो मन इव शीघ्रं प्रवर्तमानान् हिंसकान् । यद्वा अभिमन्यमानान् शत्रून् । इति सायणः ॥

३. श्रद्धामनाः (=श्रद्धा मनसि यस्य स) यो [यजमानो] देवानां पितरं (=देवपितृभूतं) ब्रह्मणस्पतिं हविषा आविवासति (=परिचरति) स इत् (=स एव) जनेन (=सर्वेण लोकेन) [वाजं धना च भरते=धनानि संपादयति] स [एव] विशा (=आत्मीयेन बन्धुजनेन) [वाजं धनानि च भरते] स [एव] जन्मना (=स्वकी-

२. हे वीरा, तूं यजन कर [आणि] वेगवान् शत्रूंवर चालून जा. विजय मिळविण्याविषयीं मन धैर्ययुक्त कर. सुभाग्यवान् होण्यासाठीं हवि सिद्ध कर. आम्ही ब्रह्मणस्पतीची कृपा याचितों.

३. जो कोण श्रद्धाळु अंतःकरणानें हवि अर्पण करून देवांचा पिता जो ब्रह्मणस्पति त्याची सेवा करील तोच लोकांच्या योगेंकरून, तोच आपल्या प्रजेच्या योगेंकरून, तोच आप्तांच्या योगेंकरून, तोच पुत्रांच्या योगेंकरून [आणि] तोच शूर योद्धयांच्या योगेंकरून अन्न [आणि] संपत्ति यांजप्रत पावेल.

2. Perform worship, o hero, attack the violent [enemies]. Make thy mind valorous for victory. Offer an oblation that thou mayest be fortunate. We implore the protection of Brahmaṇaspati.

3. He who, with faith in his heart, worships with oblation Brahmaṇaspati, the father of the gods—he alone attains to food [and] riches by the people, he [alone] by his kin, he [alone] by his relations, he [alone] by his sons [and] warriors.

---

२. यांत जो वीर सांगितला आहे तो सूक्तवक्त्याचा पुत्र किंवा दुसरा कोणी पुत्राप्रमाणें मानिलेला मनुष्य असावा. अथवा सूक्तकर्ता कवि यजमानास बोलत आहे असें समजावें. त्याला स्तोता म्हणतो कीं, तूं ब्रह्मणस्पतीचें स्तवन कर म्हणजे तो संग्रामांत यश मिळविणारें धैर्य देईल.

३. 'श्रद्धाळु अंतःकरणानें' ='श्रद्धामनाः'. विश्वास ठेवून भक्ति केली तर सफल होते ही जी समजूत ती आलिकडची आहे असें जें कितीएक लोक म्हणत असतात, तें म्हणणें बरोबर नाहीं असें या मंत्रावरून सिद्ध होतें.

यो अस्मै हव्यैर्घृतवद्भिरविधत्प्र तं प्राचा नयति ब्रह्मणस्पतिः ।
उरुष्यतीमंहसो रक्षती रिषोऽहोश्चिदस्मा उरुचक्रिरद्भुतः ॥४॥५॥

यः । अस्मै । हव्यैः । घृतवत्ऽभिः । अविधत् । प्र । तम् । प्राचा ।
नयति । ब्रह्मणः । पतिः ।
उरुष्यति । ईम् । अंहसः । रक्षति । रिषः । अंहोः । चित् । अस्मै ।
उरुऽचक्रिः । अद्भुतः ॥ ४ ॥ ५ ॥

यैर्जनैः) स [एव च] पुत्रैर्नृभिः (=पुत्रद्वारा इतरैः शूरैर्द्वारा च) वाजम् (=अन्नं) धना (=धनानि च) भरते (=संपादयति =प्राप्नोति) ॥

भाषायाम्.

४. यो घृतवद्भिर्हव्यैः (=आज्येनोपेतैर्हविर्भिर्) अस्मै (=तस्मै ब्रह्मणस्पतये) अविधत् (=परिचरति) तं [यजमानं] ब्रह्मणस्पतिः प्राचा प्र नयति (=ऋजुना मार्गेण प्रणयति=प्रकृष्टफलं प्रापयति) । [अपि च] ईम् अंहसः उरुष्यति (=पापाद्रक्षति) रिषः अंहोश्चित् रक्षति (=हिंसकाद्दारिद्र्याच्च रक्षति) । अस्मै (=तस्मै यजमानाय) [ब्रह्मणस्पतिर्] उरुचक्रिः (=धनादेः प्रभूतस्य कर्ता) अद्भुतः (=महांश्च) [भवति] ॥

अंहोश्चित् उरुचक्रिः दुःखात् मोचनकर्तेति पाश्चात्याः केचित् ॥

सूक्तम् २७–२१८.

गृत्समदस्य पुत्रः कूर्म ऋषिः । गृत्समद एव वा । आदित्यो देवता । त्रिष्टुप् छन्दः ॥

इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः ॥१॥

इमाः । गिरः । आदित्येभ्यः । घृतऽस्नूः । सनात् । राजऽभ्यः । जुह्वा ।
जुहोमि ।
शृणोतु । मित्रः । अर्यमा । भगः । नः । तुविऽजातः । वरुणः ।
दक्षः । अंशः ॥ १ ॥

४. जो कोण घृतयुक्त हव्यांच्या योगेंकरून ब्रह्मणस्पतीची सेवा करितो त्याला ब्रह्मणस्पति चांगल्या मार्गानें घेऊन जातो, त्याला तो पापापासून रक्षितो, हानीपासून आणि दारिद्र्यापासून रक्षितो. त्यासाठीं तो पुष्कळ पराक्रम करणारा आणि आश्चर्यकृत्यकारी [होतो].

4. Brahmaṇaspati leads by the right path him who may serve him with oblations mixed with clarified butter. He preserves him from distress, he saves him from harm and need. For him he is the performer of great deeds, [and is] wonderful.

सूक्त २७–२१८.

ऋषि–गृत्समदाचा पुत्र कूर्म, अथवा गृत्समदच. देवता–आदित्य. वृत्त–त्रिष्टुभ्.

१. ह्या घृतस्रावी स्तुति आदित्यराजांप्रत मी नित्य जिह्वेनें अर्पण करितों. मित्र, अर्यमा, भग, प्रबळ वरुण, दक्ष, [आणि] अंश [हे] आमचें ऐकोत.

Hymn 27–218.

To the *Âdityas*, i.e. the sons of *Aditi*. By *Kûrma* the son of *Gṛitsamada*, or by *Gṛitsamada* himself. Metre–*Trishṭubh*.

1. I always offer with [my] tongue these praises from which clarified butter is dropping, to the kings, the sons of Aditi. May Mitra, Aryamâ, Bhaga, mighty Varuṇa, Daksha [and] Aṁs'a hear us.

---

१. आदित्य (अदितीचे पुत्र) म्हणजे कोण कोणते देव समजावयाचे त्याविषयीं सू. १४ मं. ३ आणि टीप पहा.

'दक्ष' आणि 'अंश' यांविषयीं सू. २१८ मं. १ आणि सू. १९२ मं. ४ आणि टीप पहा.

'घृतस्रावी स्तुति '=' घृतस्नूः गिरः' म्हणजे ज्यांजपासून तूप गळत आहे. हें वास्तविक म्हटलें म्हणजे हवीचें विशेषण आहे. पण स्तुतिहि हवीप्रमाणें अर्पण करण्यांत येत आहेत म्हणून, अथवा स्तुतीबरोबर हविसुद्धा अर्पण केलें असेल म्हणून, त्या विशेषणाचा प्रयोग केला आहे.

ह्या सूक्ताच्या शांतिसूक्तांत, आणि तुळापुरुषांत पाठ म्हणण्याचा प्रचार आहे.

इमं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा वरुणो जुषन्त ।
आदित्यासः शुचयो धारपूता अवृजिना अनवद्या अरिष्टाः ॥ २॥

इमम् । स्तोमम् । सऽक्रतवः । मे । अद्य । मित्रः । अर्यमा । वरुणः । जुषन्त ।
आदित्यासः । शुचयः । धारऽपूताः । अवृजिनाः । अनवद्याः । अरिष्टाः ॥ २

त आदित्यास उरवो गभीरा अदब्धासो दिप्सन्तो भूर्यक्षाः ।
अन्तः पश्यन्ति वृजिनोत साधु सर्वं राजभ्यः परमा चिदन्ति ॥ ३॥

ते । आदित्यासः । उरवः । गभीराः । अदब्धासः । दिप्सन्तः । भूरिऽअक्षाः ।
अन्तरिति । पश्यन्ति । वृजिना । उत । साधु । सर्वम् । राजऽभ्यः । परमा । चित् । अन्ति ॥ ३ ॥

---

१. घृतस्नूः (=घृतप्रस्राविणीर्) इमा गिरः (=स्तुतिरूपा वाचो) राजभ्य आदित्येभ्यः (=राजभूतेभ्योदितिपुत्रेभ्यः) सनात् (=सदा) जुह्वा (=जिह्वया) जुहोमि (=प्रयच्छामि)। मित्रः अर्यमा भगः तुविजातः (=प्रबलजातः=प्रबलो) वरुणः दक्षः अंशः [एते देवाः प्रत्येकं] नः शृणोतु (=अस्मान् शृणोतु=अस्माकं स्तोत्राणि शृणोतु) ॥

भाषायाम्.

२. सक्रतवः (=समानकर्माणो) मित्रः, अर्यमा, वरुणः [इत्येते] शुचयः (=दीप्तिमन्तो) धारपूताः (=उदकधाराभिरिव पूताः शोधिता) अवृजिनाः (=निष्पापा) अनवद्याः (=निर्दोषा) अरिष्टाः (=अहिंसिता) आदित्यासः (=अदितेः पुत्रा) अद्य इमं मे स्तोमम् (=इदं मम स्तोत्रं) जुषन्त (=सेवन्ताम्) ॥

३. उरवः (=महान्तो) गभीराः (=गाम्भीर्योपेता) अदब्धासः (=स्वयम् अहिंसिता) दिप्सन्तः (=हिंसितुमिच्छन्तः=अन्येषां हिंसाकरणसमर्था) भूर्यक्षाः (=बहुनयनास्) ते (=पूर्वोक्ता आदित्या) वृजिना उत साधु (=वृजिनानि साधूनि च=जनैः कृतानि यानि पापानि पुण्यानि च तानि) अन्तः पश्यन्ति (=कानि पापानि कानि पुण्यानि भवन्तीति जानन्ति)। राजभ्यस् [तेभ्यः] सर्वं परमा चिद् अन्ति (=सर्वाणि परमाण्यपि अन्तिकानि समीपानि=यानि कान्यपि वस्तूनि दूरे स्थितानि तान्यपि सर्वाणि समीपतराणि) [भवन्ति] ॥

२. समानपराक्रम [जे] मित्र, अर्यमा [आणि] वरुण [ते] आज हें माझें स्तोत्र सेवोत. तेजस्वी, निर्मल, निष्पाप, निर्दोष, हानिरहित [असे जे] अदितीचे पुत्र [ते माझें स्तोत्र सेवोत].

३. ते जे महान्, गंभीर, अक्षय, क्षयकारी, पुष्कळ डोळ्यांचे अदितीचे पुत्र ते वाईट [कोणतें] आणि बरें [कोणतें] तें पाहत असतात. [त्या आदित्य]राजांला सर्व कांहीं अत्यंत दूर असलेलेंहि समीपच [होय].

2. May Mitra, Aryamâ, [and] Varuṇa, of the same valour, hear to-day this my hymn—they the bright, the pure, the sinless, the stainless [and] the perfect sons of Aditi.

3. Those sons of Aditi great, deep, themselves unharmed [but] harming [the enemy], distinguish between that which is wrong and that which is right. To those kings every thing is near that is even most distant.

धारयन्त आदित्यासो जगत्स्था देवा विश्वस्य भुवनस्य गोपाः ।
दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि ॥ ४ ॥
धारयन्तः । आदित्यासः । जगत् । स्थाः । देवाः । विश्वस्य । भुवनस्य । गोपाः ।
दीर्घऽधियः । रक्षमाणाः । असुर्यम् । ऋतऽवानः । चयमानाः । ऋणानि ॥ ४ ॥
विद्यामादित्या अवसो वो अस्य यदर्यमन्भय आ चिन्मयोभु ।
युष्माकं मित्रावरुणा प्रणीतौ परि श्वभ्रेव दुरितानि वृज्याम्॥५॥६
विद्याम् । आदित्याः । अवसः । वः । अस्य । यत् । अर्यमन् । भये । आ । चित् । मयःऽभु ।
युष्माकम् । मित्रावरुणा । प्रऽनीतौ । परि । श्वभ्राऽइव । दुःऽइतानि । वृज्याम् ॥ ५ ॥ ६ ॥

भाषायाम्.

४. आदित्यास् (=तेदितेः पुत्रा) जगत् स्थाः (=जङ्गमं स्थावरं च भूतजातं) धारयन्तः (=स्थापयन्तः) विश्वस्य भुवनस्य देवा गोपाः (=सर्वस्य लोकस्य दीप्तिमन्तो रक्षितारो) दीर्घधियः (=दीर्घबुद्धयः) असुर्यं रक्षमाणाः (=? बलस्य रक्षितार) ऋतावानः (=सत्यवन्त) ऋणानि चयमानाः (=ऋणान्यपगमयन्तश्) [च भवन्ति] ॥

५. हे आदित्याः, हे अर्यमन्, यत् वः (=युष्माकम्) [अवो] भये आ चित् (=भयेपि) मयोभु (=सुखयितृ) [भवति] अस्य अवसो विद्यां (=तद् रक्षणं लभेय) । हे मित्रावरुणा (=मित्रावरुणौ), युष्माकं प्रणीतौ (=युवयोः प्रणयने प्रकृष्टे नयने सति) श्वभ्रेव दुरितानि परि वृज्यां (=स्थातुमयोग्यानि गर्तवन्ति स्थलानीव पापानि परित्यजेयम्) ॥

४. [ते] अदितीचे पुत्र स्थावर-जंगमातें धारण करणारे, सकळ भुवनाचे देदीप्यमान रक्षक, दीर्घ बुद्धि असलेले, बलाचें संरक्षण करणारे, सत्यवंत [आणि] ऋण फेडणारे [होत].

५. हे आदित्य हो, हे अर्यमा, जो तुमचा आधार भयप्रसंगांतहि सुखकारक [होतो] तो तुमचा आधार मला मिळो. हे मित्रावरुण हो, तुमच्या आश्रयाखालीं मी खळगे [टाळिल्या]-प्रमाणें पापें टाळीन असें करा.

4. The Âdityas [are] the supporters of the moveable and the immoveable [world], the divine preservers of every creature, possessed of far-reaching wisdom, protectors of the power, full of truth,] and] repayers of debts.

5. O sons of Aditi, o Aryaman, may I obtain that help of yours which is a source of comfort even in danger. O Mitra and Varuṇa, may I under your guidance avoid sins like pits.

---

४. 'बळाचें रक्षण करणारे'=' असुर्यं रक्षमाणाः'. सायणाचार्य 'असुर्य' म्हणजे येथें उदक असा अर्थ करितात. कितीएक पाश्चात्य 'देवसमूह' अथवा 'देवजाति' असा अर्थ करितात. हा शेवटील अर्थ संभवतो, कारण कीं असुर म्हणजे 'बळवान् होत्साता देव' हा अर्थ वेदांत प्रसिद्ध आहे. आम्हीं अर्थ अक्षरशः दिला आहे.

सुगो हि वो अर्यमन्मित्र पन्था अनृक्षरो वरुण साधुरस्ति ।
तेनादित्या अधि वोचता नो यच्छता नो दुष्परिहन्तु शर्म ॥ ६ ॥

सुऽगः । हि । वः । अर्यमन् । मित्र । पन्थाः । अनृक्षरः । वरुण । साधुः । अस्ति ।
तेन । आदित्याः । अधि । वोचत । नः । यच्छत । नः । दुःऽपरिहन्तु । शर्म ॥ ६ ॥

पिपर्तु नो अदिती राजपुत्राति द्वेषांस्यर्यमा सुगेभिः ।
बृहन्मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः ॥ ७ ॥

पिपर्तु । नः । अदितिः । राजऽपुत्रा । अति । द्वेषांसि । अर्यमा । सुऽगेभिः ।
बृहत् । मित्रस्य । वरुणस्य । शर्म । उप । स्याम । पुरुऽवीराः । अरिष्टाः ॥ ७ ॥

भाषायाम्.

६. हे अर्यमन्, हे मित्र, हे वरुण, वः (=युष्माकं) पन्थाः (=मार्गः) सुगः (=सुगम्यः) अनृक्षरः (=कण्टकरहितः) साधुः (=ऋजुश्) [च] अस्ति। हे आदित्याः, तेन [पथा] नः अधि वोचत (=अस्माकम् अधिवक्तारो भवत)। नः (=अस्मभ्यं) दुष्परिहन्तु शर्म (=विनाशयितुमशक्यं सुखं प्रयच्छत)॥

७. राजपुत्रा (=राजान आदित्याः पुत्रा यस्याः सा) अदितिः अर्यमा [च] सुगेभिः (=सुगम्यैर्मार्गैर्) नो द्वेषांसि अति पिपर्तु (=शत्रूनतिक्रम्यास्मान् पारयतु तद्रहितं देशं प्रापयतु)। मित्रस्य वरुणस्य [च] शर्म (=आश्रयः) बृहत् (=महान्) [भवति]। [वयं] पुरुवीराः (=वीर्योपेतबहुपुत्रैरुपेता) अरिष्टाः (=अहिंसिताः सन्तस्) [तच्छर्म=तमाश्रयम्] उप स्याम (=उपगता भवेम=लभेमहि)॥

६. हे अर्यमा, हे मित्रा, हे वरुणा, तुमचा मार्ग सुगम्य, निष्कंटक [आणि] सरळ आहे. तर हे आदित्य हो, त्या मार्गानें तुम्ही आमचे कैवारी व्हा. आम्हांला अक्षय सुख द्या.

७. राजे आदित्य जिचे पुत्र होत ती अदिति, आणि अर्यमा, हे चांगल्या मार्गांनीं आम्हांला द्वेष्ट्यांच्या पार पाडोत. मित्राचा आणि वरुणाचा जो आश्रय तो मोठा होय; वीर्यवान् पुष्कळ पुत्रांनीं संपन्न आणि हानिरहित होत्साते आम्ही [त्या आश्रया]प्रत पावूं असें ते करोत.

6. O Aryaman, o Mitra, o Varuṇa, safe and thornless and straight is your path. Be our champions therewith, o Âdityas. Give us indestructible happiness.

7. May Aditi the mother of the kings, and may Aryamâ carry us by safe roads across the enemies. Great is the support of Mitra and Varuṇa. May we, blessed with many brave sons [and] free from harm, possess that support.

तिस्रो भूमीर्धारयन् त्रीँरुत द्यून्त्रीणि व्रता विदथे अन्तरेषाम् ।
ऋतेनादित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु ॥ ८ ॥

तिस्रः । भूमीः । धारयन् । त्रीन् । उत । द्यून् । त्रीणि । व्रता । विदथे । अन्तः । एषाम् ।
ऋतेन । आदित्याः । महि । वः । महिऽत्वम् । तत् । अर्यमन् । वरुण । मित्र । चारु ॥ ८ ॥

त्री रोचना दिव्या धारयन्त हिरण्ययाः शुचयो धारपूताः ।
अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ॥ ९ ॥

त्री । रोचना । दिव्या । धारयन्त । हिरण्ययाः । शुचयः । धारऽपूताः । अस्वप्नऽजः । अनिऽमिषाः । अदब्धाः । उरुऽशंसाः । ऋजवे । मर्त्याय ॥ ९ ॥

भाषायाम्.

८. [आदित्यास्] तिस्रो भूमीः (=त्रीन् लोकान्) उत त्रीन् द्यून् (=त्रीन् द्युलोकान्) [च] धारयन् (=धारयन्ति)। विदथे अन्तः (=यज्ञे) एषां (=तेषां) व्रता (=व्रतानि) त्रीणि [सन्ति]। हे आदित्याः, ऋतेन (=सत्यरूपेण यज्ञेन) वो महित्वं महि (=युष्माकं महत्त्वं महत्) [भवति]। हे अर्यमन्, हे वरुण, हे मित्र, तद् [वो महित्वं] चारु (=सर्वोत्कृष्टं) [भवति]॥

तिस्रो भूमीः। अत्र भूमिशब्दो लोकत्रये वर्तते। यो द्वितीयस्यां तृतीयस्यां पृथिव्यामित्यत्र यथा पृथिवीशब्दः। भूम्यन्तरिक्षस्वर्गास्त्रीन् लोकान् आदित्या धारयन्। वृष्टिप्रदानादिना धारयन्ति। उत अपि च द्यून् दीप्तान् तत उपरितनान् महरादिकानपि त्रीन् लोकान् धारयन्ति।......। अपि चैषामादित्यानां विदथे यज्ञेऽन्तर्मध्ये त्रीणि व्रता सवनत्रयनिष्पाद्यानि त्रीणि कर्माणि सन्ति। यद्वा एषां लोकानामन्तर्मध्ये विदथे यज्ञे निमित्तभूते सति एषामादित्यानां त्रीणि कर्माणि रसादानधारणविसर्जनलक्षणानि सन्ति। इति सायणः॥

९. हिरण्ययाः (=हिरण्यवच्छोभमानाः) शुचयः (=तेजस्विनो) धारपूताः (=उदकधाराभिः शोधिता इव निर्मला) अस्वप्नजः (=स्वापरहिता) अनिमिषाः (=निमेषरहिता) अदब्धाः (=अहिंसिता) उरुशंसाः (=प्रभूतस्तोत्रा) [आदित्यास्] त्री

८. [आदित्य] तीन भूलोकांला आणि तीन द्युलोकांला धारण करितात. यज्ञांत जीं त्यांचीं कामें तीं तीन आहेत. हे आदित्य हो, सत्याच्या योगानें तुमचा महिमा मोठा आहे. हे अर्यमा, हे वरुणा, हे मित्रा, तो महिमा सर्वोत्तम [आहे].

8. Three earths and three heavens do they support. Three are their deeds in the sacrifice. Through truth, o Âdityas, is your greatness great. That [greatness] o Aryaman, o Varuṇa, o Mitra, [is] excellent.

९. सुवर्णमय, कांतिमान्, शुद्ध, न निजणारे, अनिमेष, अहिंसित, बहुस्तुत [असे जे आदित्य, ते] पुण्यवान् मर्त्यासाठीं तीन दिव्य लोकांला धारण करितात.

9. The Âdityas, golden, bright, pure, never sleeping, unwinking, perfect, praised by many, support the three heavenly regions for the righteous mortal.

---

८. 'तीन भूलोक आणि तीन द्युलोक'. सायण म्हणतात तीन भूलोक म्हणजे भूमि, अंतरिक्ष आणि स्वर्ग हे; आणि तीन द्युलोक म्हणजे त्याच्याहि वरचे जे महरादि तीन लोक ते होत. तीन कामें म्हणजे काय याविषयीं सायणाचार्य निश्चयानें सांगत नाहींत; तीन सवनांमध्यें करावयाचीं जीं कर्में तीं असतील अथवा रस घेणें, धारण करणें आणि सांडणें हीं तीन कर्में असतील असें ते म्हणतात.

'सत्याच्या योगानें'='ऋतेन.' म्हणजे सत्यरूप जो यज्ञ त्याच्या योगेंकरून, आर्यलोक यज्ञाला सत्य असें म्हणत असत.

९. 'न निजणारे'='अस्वप्नजः'. न निजणारे हें देवांचें विशेषण उत्तम शोभतें. कारण देव जर निजतील तर त्यांच्या हातून जगताचें सर्वदा व्हावयाचें जें कल्याण तें होणार नाहीं. आणि वस्तुतः खरेंच आहे कीं सूर्यादिक जे (आणि तेच देव) ते कधींहि निजत नाहींत, सर्वदा मार्गक्रमण करीत असतात.

'अनिमेष.' म्हणजे डोळ्यांचीं पातीं एकमेकांस न लावणारे. हेंहि देवांचें एक योग्य विशेषण आहे. त्यांचे डोळे सदैव उघडेच असतात, लवत नाहींत.

त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः ।
शतं नो रास्व शरदो विचक्षेऽश्यामायूंषि सुधितानि पूर्वा॥१०॥७

त्वम् । विश्वेषाम् । वरुण । असि । राजा । ये । च । देवाः । असुर । ये । च । मर्ताः ।
शतम् । नः । रास्व । शरदः । विऽचक्षे । अश्याम । आयूंषि । सुऽधितानि । पूर्वा ॥ १० ॥ ७ ॥

न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा।
पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम् ॥११॥

न । दक्षिणा । वि । चिकिते । न । सव्या । न । प्राचीनम् । आदित्याः । न । उत । पश्चा ।
पाक्या । चित् । वसवः । धीर्या । चित् । युष्माऽनीतः । अभयम् । ज्योतिः । अश्याम् ॥ ११ ॥

दिव्या रोचना (=त्रीणि द्युसंबन्धीनि रोचमानानि स्थानानि=द्युलोकस्य त्रीन् भागान्) ऋजवे मर्त्याय (=ऋजुकर्मणे पुण्यवते मरणधर्मणे मनुष्याय) धारयन्त (=धारयन्ति)॥

भाषायाम्.

१०. हे असुर (=प्रबल) वरुण, ये च देवा येच मर्ताः (=मर्त्याः) [सन्ति] [तेषां] विश्वेषां त्वं राजासि । नः (=अस्मभ्यं) विचक्षे शतं शरदो रास्व (=दर्शनाय शतं वर्षाणि देहि=शतं वर्षाणि अस्मान् जीवय) । पूर्वा सुधितानि (=पुरातनानि सुष्टु हितानि=पुरातनात्कालात् सुष्टु प्रकल्पितानि शतसंवत्सरलक्षणानि) आयूंषि अश्याम (=प्राप्नुयाम)॥

११. न दक्षिणा वि चिकिते (=मया दक्षिणे भागे न दृश्यते किमपि) न सव्या (=वामभागेपि न किमपि) [वि चिकिते=दृश्यते] । हे आदित्याः, न प्राचीनं नोत पश्चा (=न पुरतो न पश्चादपि) [दृश्यते=द्रष्टुं शक्नोमि] । हे वसवः (=साधवः), पाक्या चित् धीर्या चित् (=!" अज्ञानोपि कातरोपि ") युष्मानीतः (=युष्माभिर्नीतः सन्नहम्) अभयं ज्योतिः (=भयरहितं प्रकाशं=" सौरं तेजः आन्तरं वा ज्ञानात्मकम् ") अश्यां (=प्राप्नुयाम्)॥

१०. हे प्रबळ वरुणा, जे देव आणि मर्त्य त्या सर्वांचा तूं राजा आहेस. आम्ही शंभर वर्षें पाहूं असें तूं कर. पूर्वींपासून नेमिलेलें जें आयुष्य त्याजप्रत आम्ही पावूं असें कर.

११. मला उजवीकडे दिसत नाहीं, डावीकडे [दिसत] नाहीं, हे आदित्य हो, पुढें [दिसत] नाहीं आणि मागेंहि [दिसत] नाहीं. हे साधूंनो, मी जरी मूढ आणि जरी भितरा आहें तरी तुम्ही जर मला मार्ग दाखवाल तर मी निर्भय प्रकाशाप्रत पावेन.

10. Thou, o mighty Varuṇa, art the king of all, [of those] that are gods and [of those] that are mortals. Give us a hundred years to see, may we attain to the life-times anciently appointed.

11. Not to the right do I see nor to the left, neither in front, o sons of Aditi, nor behind. Guided by you may I attain the light that is free from fear, though [I am] ignorant, o good [gods], [and] though [I am] timid.

---

१०. कृत, त्रेत, आणि द्वापर या युगांत मनुष्यांचें आयुष्य अथवा जीवित शंभर वर्षांवर नसे असें दाखविण्याला प्रमाण जर पाहिजे असेल तर तें या मंत्रांत आहे. शंभर वर्षें जगणें म्हणजे शिकस्त झाली अशी प्राचीन लोकांची अवस्था या ऋचेवरून उघड दिसून येते.

११. ऋषि म्हणतो, 'मला मागें, पुढें किंवा इकडे तिकडे दिसत नाहीं, आणि प्रकाश कसा प्राप्त करून घ्यावा तेंहि कळत नाहीं. तर हे देवहो, तुम्ही माझा हात धरून मला चालवा म्हणजे अंधकाराच्या पलीकडे मी जाईन.'

यांत जो प्रकाश सांगितला तो ज्ञानरूप प्रकाश होय असें दिसतें.

यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयन्ति पुष्टयश्च नित्याः ।
स रेवान्याति प्रथमो रथेन वसुदावा विदथेषु प्रशस्तः ॥ १२ ॥

यः । राजऽभ्यः । ऋतनिऽभ्यः । ददाश । यम् । वर्धयन्ति । पुष्टयः । च । नित्याः ।
सः । रेवान् । याति । प्रथमः । रथेन । वसुऽदावा । विदथेषु । प्रऽशस्तः ॥ १२ ॥

शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः ।
नकिष्टं घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्रणीतौ ॥ १३ ॥

शुचिः । अपः । सुऽयवसाः । अदब्धः । उप । क्षेति । वृद्धऽवयाः । सुऽवीरः ।
नकिः । तम् । घ्नन्ति । अन्तितः । न । दूरात् । यः । आदित्यानाम् । भवति । प्रऽनीतौ ॥ १३ ॥

भाषायाम्.

१२. य ऋतनिभ्यः (=ऋतनेतृभ्यः=यज्ञरूपस्य सत्यस्य नायकेभ्यो) राजभ्य [आदित्येभ्यो] ददाश (=हविर्ददाति) यं च पुष्टयः (=पोषका) नित्याः (=शाश्वताश्च) [आदित्या] वर्धयन्ति स रेवान् (=धनवान्) वसुदावा (=धनदाता) विदथेषु प्रशस्तः (=सभासु स्तुतः सन्) प्रथमो रथेन याति (=रथमास्थितः सर्वेभ्यः पूर्वं गच्छति) ॥

१३. य आदित्यानां प्रणीतौ भवति (=प्रणयने भवति=आदित्यैर्दर्शितमार्गो भवति) [स यजमानः] शुचिः (=तेजस्वी) अदब्धः (=केनाप्यहिंसितो) वृद्धवयाः (=प्रभूतान्नः) सुवीरः (=शोभनवीर्योपेतपुत्रपौत्रादिभिरुपेतः सन्) सूयवसा अपः (=शोभनघासयुक्तानि जलानि) उप क्षेति (=तेषां समीपे निवसति=सुयवसयुक्तानां नद्यादीनां तीरेषु निवसति) । [अपि च] तम् अन्तितो नकिर्न दूरात् (=तं न समीपे नापि दूराच्च कुत्रापि) [केपि] घ्नन्ति (=हिंसन्ति) ॥

१२. जो [कोणी] सत्यनायक [आदित्य]राजांला हवि देतो, आणि ज्याला पोषक [आणि] शाश्वत [आदित्य] वाढवितात, तो धनवान्, उदार [आणि] सभेंत वाखाणिलेला [असा होत्साता] प्रथम रथांत बसून जातो.

१३. जो आदित्यांच्या कृपेंत असतो तो तेजस्वी, दुःखरहित, अन्नसंपन्न [आणि] चांगल्या वीर्यसंपन्न पुत्रपौत्रांनीं भरलेला असा होऊन जेथें पुष्कळ चांगलें गवत आहे अशा पाण्याजवळ वास करितो, [आणि] त्याला [कोणी] जवळून मारीत नाहींत [आणि] दूरूनहि [मारीत] नाहींत.

12. He who has sacrificed to the kings the leaders of Truth, and whom the nourishing [and] eternal [Âdityas] promote, is the first to go in a chariot, being wealthy, bounteous [and] renowned in assemblies.

13. He who is under the guidance of the Âdityas lives on the banks of waters having good grass, being brilliant, unhurt, affluent with food and blessed with many good heroes, [and] [enemies] do not kill him from near, nor from afar.

---

१२. 'सत्यनायक'='ऋतनिभ्यः.' म्हणजे यज्ञरूप सत्याचा प्रतिपाळ करणारे; आर्यधर्माचें संरक्षण करणारे.

१३. 'ज्यावर आदित्यांची कृपा होते त्याला उत्तम नद्या प्राप्त होतात आणि त्यांच्या कांठावर गवत, धान्य वगैरे पुष्कळ मिळतें आणि तेथें त्याला राहवयास जागा मिळते.' आर्यलोक जसजसे आर्यावर्तांत येऊं लागले तसतसे ते उत्तम नद्यांच्या तीरांवर शहरें वसविण्याचे प्रयत्न करूं लागले; आणि ते प्रयत्न कोळी इत्यादिक जे अनार्यजन त्यांनीं निरर्थक करूं नयेत म्हणून ते आपल्या देवांची प्रार्थना करीत, आणि आदित्यादिक देवांची सेवा केली म्हणजे ते प्रयत्न व्यर्थ जाणार नाहींत असें समजत असत. त्याचें एक उत्तम उदाहरण या मंत्रांत आहे. आर्यलोकांचीं गुरें पुष्कळ असत त्यांस खावयास गवत पाहिजे म्हणून 'सूयवसा अपः' असें म्हटलें आहे.

अदि॑ते॒ मित्र॒ वरु॑णो॒त मृ॑ळ॒ यद्वो॑ व॒यं च॑कृ॒मा कच्चि॒दाग॑: ।
उ॒र्व॑श्या॒मभ॑यं॒ ज्योति॑रिन्द्र॒ मा नो॑ दी॒र्घा अ॒भि न॑श॒न्तमि॑स्राः ॥१४

अदि॑ते । मित्र॑ । वरु॑ण । उ॒त । मृ॒ळ । यत् । व॒ः । व॒यम् । च॒कृ॒म ।
कत् । चि॒त् । आग॑ः ।

उ॒रु । अ॒श्या॒म् । अभ॑यम् । ज्योति॑ः । इ॒न्द्र॒ । मा । न॒ः । दी॒र्घाः ।
अ॒भि । न॒श॒न् । तमि॑स्राः ॥ १४ ॥

उ॒भे अ॑स्मै पीपयतः सम॒ीची॑ दि॒वो वृ॒ष्टिं सु॒भगो॒ नाम॒ पुष्य॑न् ।
उ॒भा क्षया॑वा॒जय॑न्याति पृ॒त्सू॒भाव॒र्धौ॑ भवतः सा॒धू अ॑स्मै ॥१५॥

उ॒भे इति॑ । अ॒स्मै॒ । पी॒प॒य॒तः॒ । स॒मीची इति॑ स॒म्ऽई॒ची । दि॒वः ।
वृ॒ष्टिम् । सु॒ऽभग॑ः । नाम॑ । पुष्य॑न् ।

उ॒भा । क्षयौ॑ । आ॒ऽजय॑न् । या॒ति॒ । पृ॒त्ऽसु॒ । उ॒भौ । अ॒र्धौ । भ॒व॒तः॒ । सा॒धू इति॑ । अ॒स्मै॒ ॥ १५ ॥

भाषायाम्.

१४. हे अदिते, हे मित्र, उत (=अपि च) हे वरुण, यत् कत् चित् (=यत् किंचित्) व आगः (=युष्माकमपराधं) चकृम (=कृतवन्तः स्मः) तत् मृळ (=क्षमस्व)। हे इन्द्र, उरु (=विस्तीर्णम्) अभयं (=भयरहितं) ज्योतिः (=प्रकाशम्) अश्यां (=प्राप्नुयाम्)। दीर्घास्तमिस्रा नो माभि नशन् (=दीर्घा निशा अस्मान् मा प्राप्नुयुः) ॥

१५. [य आदित्यानां प्रणीतौ भवति] अस्मै (=तस्मै) उभे समीची (=संगच्छमाने उभे द्यावापृथिव्यौ) पीपयतः (=प्याययतः=कामान् वर्धयतः) [स] सुभगः (=सुभाग्यशाली) दिवो वृष्टिं नाम पुष्यन् (=द्युलोकस्य वर्षणं =द्युलोकाज्जातां मेघवृष्टिं प्राप्नुवन्)। उभा क्षयौ आजयन् पृत्सु याति (=उभौ निवासौ भूलोकस्वर्गलोकलक्षणौ जयन् युद्धेषु गच्छति)। अस्मै (=तस्मै) उभौ अर्धौ (=उभावपि अर्धभागौ (=?"जगतो भागौ चराचरात्मकौ मर्त्यामर्त्यात्मकौ वा") साधू भवतः (=सुलभौ भवतः) ॥

१४. हे अदिती, हे मित्रा, आणि हे वरुणा, आम्हीं कांहीं तरी तुमचा अपराध केला असेल, त्याची तुम्ही क्षमा करा. हे इन्द्रा, भयरहित जो विस्तीर्ण प्रकाश त्याप्रत मला पावूं दे. लांब लांब रात्री आम्हांप्रत न येओत.

१५. [ज्यावर आदित्यांची कृपा असते] त्याचे मनोरथ द्यावापृथिवी ह्या दोघीहि पूर्ण करितात; तो सुभाग्यशाली [मनुष्य] द्यूच्या वृष्टीला पावतो आणि तो उभयलोकांला जिंकणारा होत्साता लढाईंत जातो; त्याला दोन्ही भाग सुगम होतात.

14. O Aditi, o Mitra, and o Varuṇa, pardon us whatever fault we have committed against you. May I obtain, o Indra, the broad light free from fear. May long nights never come upon us.

15. [He who is under the guidance of the Âdityas], to him both the worlds afford nourishment; he a fortunate man receives the rain of heaven, [and] he goes into battles, winning both places of residence; to him both the halves become accessible.

१४. 'अदिति' कोण याविषयीं सू. ७२ मं. ९ आणि टीप पहा.

१५. 'उभय लोकांला' म्हणजे भूलोक आणि द्युलोक या दोघांला. 'दोन्ही भाग'='उभौ अर्धौ.' हे दोन भाग कोणते तें स्पष्ट समजत नाहीं. सायण काय अर्थ करितात तो भाषेंत पहा.

या वो माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे विचृत्ताः
अश्वीव ताँ अति येषं रथेनारिष्टा उरावा शर्मन्त्स्याम ॥ १६ ॥

याः । वः । मायाः । अभिऽद्रुहे । यजत्राः । पाशाः । आदित्याः । रिपवे । विऽचृत्ताः ।
अश्वीऽइव । तान् । अति । येषम् । रथेन । अरिष्टाः । उरौ । आ । शर्मन् । स्याम ॥ १६ ॥

माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः॥१७॥८

मा । अहम् । मघोनः । वरुण । प्रियस्य । भूरिऽदाव्नः । आ । विदम् । शूनम् । आपेः ।
मा । रायः । राजन् । सुऽयमात् । अव । स्थाम् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १७ ॥ ८ ॥

भाषायाम्.

१६. हे यजत्राः (=पूजनीया) आदित्याः, या वो मायाः पाशाश् [च] अभिद्रुहे (=अभिद्रोहं कुर्वते) रिपवे विचृत्ताः (=प्रसारितास्) तान् अश्वीव (=अश्वी कश्चिद् यथा तथा) रथेन अति येषम् (=अतिक्रम्य गच्छेय)। अरिष्टाः (=अहिंसिता) [वयं] [च] उरौ शर्मन् आ (=उरुणि शर्मणि=विस्तीर्णे आश्रयस्थाने) स्याम ॥

१७. हे वरुण, मघोनः (=धनवतो) भूरिदाव्नः (=प्रभूतस्य दातुः) प्रियस्य आपेः (=ज्ञातेः) शूनं (=मम दारिद्र्यं) माहम् आ विदं (=माहं तस्य विज्ञापनं करवाणि)। हे राजन् [वरुण], सुयमात् रायः (=सुष्ठु नियम्याद्धनात्) माहम् अव स्थां (=मा विहीनः स्याम्)। सुवीराः (=शोभनवीर्योपेतपुत्रादिभिरुपेता) [वयं] विदथे (=यज्ञे) बृहद् वदेम (=तव महत् स्तोत्रं ब्रूयाम) ॥

एतदुक्तं भवति अस्मदीयाः पुत्रादयः क्षुधिता इति धनप्रभुसमीपेऽभिधाय याचमानो मा भूवमिति ॥

१६. हे पूज्य आदित्य हो, तुमच्या ज्या माया [आणि] [जे] पाश द्वेष करणाऱ्या शत्रूसाठीं पसरिलेले [असतात], त्यांस मी घोड्यावर बसून [तरून गेल्या]प्रमाणें रथानें तरून जाईन असें करा. कोणाचाहि उपद्रव न पोंहचतां आम्ही [तुमच्या] मोठ्या आश्रयाखालीं राहूं असें करा.

१७. हे वरुणा, श्रीमान् [आणि] उदार जो प्रिय आप्त त्याला मी आपलें दैन्य न सांगावें असें कर. हे राजा [वरुणा], ज्यावर सहज अधिकार चालवितां येतो अशा धनापासून मी पृथक् न होईन असें कर. चांगल्या वीरांनीं युक्त होत्साते यज्ञांत आम्ही तुझी मोठी स्तुति गाऊं असें कर.

16. O adorable Âdityas, may I with the chariot safely cross over, like one mounted on a horse, those your schemes [and] snares which [are] spread for the spiteful enemy. May we, free from harm, be under [your] wide protection.

17. May I never tell, o Varuṇa, my poverty to a rich [and] bounteous dear relation. May I never be, o king, without controllable wealth. May we, accompanied by brave sons, chant great praises [of thee] in the sacrifice.

---

१७. ‘ दैन्य ’ इ०. अद्यापिहि समजूत अशी आहे कीं, आपला कितीहि वाईट वेळ आला तरी आपलें दैन्य आपल्या सग्यांपुढें सांगावयाचें नाहीं, परक्या पुढें सांगितलें तरी चिंता नाहीं.

‘ ज्यावर सहज अधिकार चालवितां येतो ’=‘ सुयमात्. ’ म्हणजे जें अखंड, स्थिर, अचल, हुकुमांत राहणारें धन तें.

सूक्तम् २८-२१९.

कूर्मो गृत्समदो वा ऋषिः । वरुणो देवता । त्रिष्टुप् छन्दः ॥

इदं कवेरादित्यस्य स्वराजो विश्वानि सान्त्यभ्यस्तु मह्ना ।
अति यो मन्द्रो यजथाय देवः सुकीर्तिं भिक्षे वरुणस्य भूरेः ॥१॥

इदम् । कवेः । आदित्यस्य । स्वऽराजः । विश्वानि । सन्ति । अभि । अस्तु । मह्ना ।
अति । यः । मन्द्रः । यजथाय । देवः । सुऽकीर्तिम् । भिक्षे । वरुणस्य । भूरेः ॥ १ ॥

तव व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः ।
उपायन उषसां गोमतीनामग्नयो न जरमाणा अनु द्यून् ॥ २ ॥

तव । व्रते । सुऽभगासः । स्याम । सुऽआध्यः । वरुण । तुस्तुऽवांसः ।
उपऽअयने । उषसाम् । गोऽमतीनाम् । अग्नयः । न । जरमाणाः । अनु । द्यून् ॥ २ ॥

भाषायाम्.

१. कवेः (=मेधाविनः) स्वराजः (=स्वयं राजमानस्य =स्वतन्त्रराज्यकर्तुर्) आदित्यस्य [वरुणस्य] इदं (=मया कृतं) [स्तोत्रं भवति] । [स] मह्ना (=स्वमहिम्ना) विश्वानि सन्ति (=सर्वाणि भूतानि) अभि अस्तु (=अभिभवतु) । यो यजथाय (=यष्ट्रे पुरुषाय=तदर्थम्) अति मन्द्रः (=अतिशयेन हर्षयिता) देवः (=देदीप्यमानो) [वरुणस्तस्य] भूरेः (=महतो वरुणस्य) सुकीर्तिं भिक्षे (=शोभनां स्तुतिं याचे) ॥

२. हे वरुण, स्वाध्यः (=शोभनध्यानास्) तुष्टुवांसः (=त्वां स्तुतवन्तो वयं) सुभगासः (=शोभनभाग्याः सन्तस्) तव व्रते स्याम (=तव कर्मणि भवेम=त्वदर्थं यज्ञादि कर्म कुर्वन्तो भवेम) । गोमतीनाम् उषसाम् उपायने (=गवादिधनवतीनामुषसामुपागमने सति) अग्नयो न (=यथा कर्मार्थमग्नयः समिध्यन्ते तथा) अनु द्यून् जरमाणाः (=दिनेदिने स्तुवन्तः=प्रतिदिनमुषःकाले स्तोत्रं कुर्वन्तो वयं) [सुभगास्तव व्रते स्याम] ॥

सूक्त २८–२१९.

ऋषि–कूर्म अथवा गृत्समद. देवता–वरुण. वृत्त–त्रिष्टुभ्.

१. मेधावी [आणि] स्वतंत्र राज्यकारी जो आदित्य त्याचें हें [स्तोत्र] [होय]. तो [आपल्या] मोठेपणानें सकळ विश्वाला जिंकितो. जो देदीप्यमान [वरुण] उपासकाला अत्यंत हर्षकारक [होय], त्या महान् वरुणाची प्रशंसा मी याचितों.

२. हे वरुणा, चांगलें ध्यान करणारे आणि स्तुति करीत राहणारे असे जे आम्ही ते तुझ्या सेवेंत सुभाग्यसंपन्न राहूं असें तूं कर. गोसंपन्न उषांचें आगमन होतांच जसे अग्नि [पेटविले जातात त्या]-प्रमाणें प्रतिदिनीं स्तव करणारे [जे आम्ही ते तुझ्या सेवेंत सुभाग्यसंपन्न राहूं असें तूं कर].

HYMN 28–219.

To *Varuṇa*. By *Kûrma* or *Gṛitsamada*. Metre—*Trishṭubh*.

1. This [hymn] [is] for the wise son of Aditi, the independent king. May he by his greatness overpower all things. I seek the high commendation of that great Varuṇa, who is the great divine gratifier of the sacrificer.

2. May we, full of great devotion [and] having chanted thy praises, be happy in thy service—we who at the approach of the bountiful Ushases sing hymns from day to day even as fires [are kindled].

---

१. 'महान् वरुणाची प्रशंसा याचितों.'=' भूरेर्वरुणस्य सुकीर्तिं भिक्षे.' म्हणजे मोठा जो वरुण त्याणें हें फार चांगलें स्तोत्र केलें अशी मला शाबासकी द्यावी असें इच्छितों.

तव॑ स्याम पुरु॒वीर॑स्य॒ शर्म॑न्नुरु॒शंस॑स्य वरुण प्रणेतः ।
यू॒यं नः॑ पुत्रा अदि॑तेरदब्धा अ॒भि क्ष॑मध्वं॒ युज्या॑य देवाः ॥ ३ ॥

तव॑ । स्याम॒ । पुरु॒ऽवीर॑स्य । शर्म॑न् । उ॒रु॒ऽशंस॑स्य । व॒रु॒ण॒ । प्र॒ने॒त॒-
रिति॑ प्रऽनेतः ।

यू॒यम् । नः॒ । पु॒त्राः॒ । अ॒दि॒तेः॒ । अ॒द॒ब्धाः॒ । अ॒भि । क्ष॒म॒ध्व॒म् । यु॒-
ज्या॑य । दे॒वाः॒ ॥ ३ ॥

प्र सी॑मादि॒त्यो अ॑सृजद्विध॒र्ता ऋ॒तं सिन्ध॑वो॒ वरु॑णस्य यन्ति ।
न श्रा॑म्यन्ति॒ न वि मु॑चन्त्ये॒ते वयो॒ न प॑प्तू रघु॒या परि॑ज्मन् ॥४॥

प्र । सी॒म् । आ॒दि॒त्यः॒ । अ॒सृ॒ज॒त् । वि॒ऽध॒र्ता । ऋ॒तम् । सिन्ध॑वः ।
वरु॑णस्य । य॒न्ति॒ ।

न । श्रा॒म्य॒न्ति॒ । न । वि । मु॒च॒न्ति॒ । ए॒ते । वयः॑ । न । प॒प्तुः॒ । र॒घु॒-
ऽया । परि॑ऽज्मन् ॥ ४ ॥

भाषायाम्.

३. हे वरुण, हे प्रणेतः (=प्रकर्षेण नेतर्नायक) पुरुवीरस्य (=बहुवीरोपेतस्य=बहून् वीर्योपेतान् पुत्रपौत्रादीन् ददत) उरुशंसस्य (=प्रभूतस्तोत्रस्य) तव शर्मन् (=शर्मणि सुखे) स्याम । हे अदब्धाः (=अहिंसिता) अदितेः पुत्राः (=आदित्याः), हे देवाः (=देदीप्यमानाः), यूयं युज्याय (=सख्याय) नः (=अस्मान्) अभि क्षमध्वम् (=अपराधकृतः सहध्वम्) ॥

४. विधर्ता (=जगतो धारक) अदित्यः (=अदितेः पुत्रो वरुणः) सी (=तान् वक्ष्यमाणान् सिन्धून् नदान्) प्रासृजत् (=प्रकर्षेण सृष्टवान्) । [ते] सिन्धवः (=ता नद्य) ऋतं यन्ति (=सत्यं यथा तथा गच्छन्ति) । एते [सिन्धवो] न श्राम्यन्ति (=श्रान्तिं न प्राप्नुवन्ति) न वि मुचन्ति (=उपरता न भवन्ति) [अपि तु] परिज्मन् (=परिज्मनि=भूम्यां) वयो न (=पक्षिण इव) रघुया पप्तुः (=शीघ्रम् उत्पतन्ति) ॥

३. हे श्रेष्ठ नायका वरुणा, बहुवीरसंपन्न आणि बहुस्तोत्रसंपन्न असा जो तूं, त्या तुझ्या आश्रयाखालीं आम्हांस राहूं दे. हे अदितीचे देदीप्यमान [आणि] क्षतिरहित पुत्र हो, तुम्ही आम्हांला क्षमा करून आमचे मित्र व्हा.

३. May we, o Varuṇa, o excellent leader, be under thy protection—thou, who givest numerous brave sons and who art offered exceeding praise. Do you, o divine and perfect sons of Aditi, pardon us for [your] friendship.

४. [जगाचा] धर्ता असा जो अदितीचा पुत्र वरुण तो नद्यांचे प्रवाह सोडितो. वरुणाच्या नद्या यथासत्य वाहतात. त्या [नद्या] थकत नाहींत, थांबत नाहींत; त्या पृथिवीवर पक्ष्यांप्रमाणें वेगानें धांवतात.

4. [Varuṇa], the great supporter, the son of Aditi, sends forth the rivers. The rivers of Varuṇa flow truthfully. They do not tire, they do not stop, they flow on earth swiftly like birds.

---

३. 'बहुवीरसंपन्न' आणि 'बहुस्तोत्रसंपन्न.' म्हणजे उपासकाला पुष्कळ वीर्यवान् पुत्र देणारा, आणि ज्याला बहुत लोक स्तवितात असा.

'क्षतिरहित.' म्ह. ज्यांला कोणी उपद्रव करूं शकत नाहींत असे.

४. 'वरुणाच्या नद्या यथासत्य वाहतात'='ऋतं सिन्धवो वरुणस्य यन्ति.' म्ह. मेघोदकरूप ज्या नद्या सोडितो, त्या सतत वाहतात, सरळ रस्त्यानें नित्य जात असतात, आज आहेत आणि उद्यां नाहींत अशा होत नाहींत.

वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य ।
मा तन्तुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः ॥
॥ ५ ॥ ९ ॥

वि । मत् । श्रथय । रशनाम्ऽइव । आगः । ऋध्याम । ते । वरुण । खाम् । ऋतस्य ।
मा । तन्तुः । छेदि । वयतः । धियम् । मे । मा । मात्रा । शारि । अपसः । पुरा । ऋतोः ॥ ५ ॥ ९ ॥

अपो सु म्यक्ष वरुण भियसं मत्सम्राळृतावोऽनु मा गृभाय ।
दामेव वत्साद्वि मुमुग्ध्यंहो नहि त्वदारे निमिषश्चनेशे ॥ ६ ॥

अपो इति । सु । म्यक्ष । वरुण । भियसम् । मत् । सम्ऽराट् । ऋतऽवः । अनु । मा । गृभाय ।
दामऽइव । वत्सात् । वि । मुमुग्धि । अंहः । नहि । त्वत् । आरे । निऽमिषः । चन । ईशे ॥ ६ ॥

भाषायाम्.

५. हे वरुण, रशनाम् इव आगो मत् वि श्रथय (=रज्जुमिव पापं मत्सकाशात्) शिथिलीकुरु=विमोचय) । ते (=तव) ऋतस्य खाम् ऋध्याम (=सत्यस्य नदीं लभेमहि) [अपि च] धियं वयतो मे (=कर्म संतन्वतो मम) तन्तुः (="कर्मसंततिर्") मा छेदि (=छिन्ना मा भूत्) अपसो मात्रा (=कर्मणः शरीरं=यज्ञस्य शरीरम् अभिषवणादिका क्रिया) ऋतोः पुरा (=समाप्तिकालात् पूर्वं) मा शारि (=शीर्णा विकला मा भूत्) ॥

६. हे वरुण, भियसं (=भयं) मत् (=मत्सकाशात्) अपो सु म्यक्ष (=सुष्ठु यथा तथापगमय) । हे सम्राट् (=सम्यग्राजमान), हे ऋतावः (=सत्यवन्) [वरुण], [त्वं] मा अनु गृभाय (=माम् अनुगृहाण) । वत्साद् दामेव (=गोवत्साद् यथा रज्जुं विमुञ्चन्ति तथा) [मत्] अंहो वि मुमुग्धि (=पापं मत्सकाशादपगमय) । हि (=यस्मात् कारणात्) त्वद् आरे (=त्वत्सकाशाद् दूरे=त्वदपेक्षया) [कोपि] निमिषश्चन नेशे (=निमेषस्यापि नेश्वरो भवति) ॥

५. पाश सोडून टाकिल्याप्रमाणें मजपासून पाप सोडून घे. हे वरुणा, आम्हांस तुझ्या सत्याचा प्रवाह प्राप्त करून दे. मी कर्म-[रूप वस्त्र] विणीत असतां माझा तंतु तुटूं देऊं नको. समाप्तिकाळापूर्वी [माझ्या] उपासनेचें अंग क्षीण होऊं देऊं नको.

६. हे वरुणा, मजपासून भय अगदी काढून टाक. हे साम्राज्य-कर्त्या, हे सत्यवान् [वरुणा], तूं मजवर कृपा कर. वत्साचें दावें [दूर केल्या]प्रमाणें तूं माझें पाप दूर कर. कांकीं, तुझ्या शिवाय कोणी एका निमिषाचाहि धनी नाहीं.

5. Remove from me [all] sin like a cord. May we, o Varuṇa, obtain the stream of thy truth. May the thread never be broken when I am weaving my cloth [of sacrifice]. May the body of my work never be broken before the time.

6. Remove altogether fear from me, o Varuṇa! Be kind to me, o Universal king, o truthful one! Remove the sin from me even as the cord from a calf. For, without thee no one is the master of even a twinkling of an eye.

---

५. ‘ तुझ्या सत्याचा प्रवाह प्राप्त करून दे. ’=‘ ऋध्याम ते ऋतस्य खाम्.’ म्हणजे वरुणाचें जें सर्व सत्य तें प्राप्त करून दे. अखंड सत्याची प्राप्ति होओ.

या मंत्राचें तात्पर्य असें दिसतें कीं, वरुणाची उपासना चालली असतांना अनार्य लोकांनीं वगैरे विघ्न करूं नये.

मा नो॑ व॒धैर्व॑रुण॒ ये त॑ इ॒ष्टावेनः॑ कृ॒ण्वन्त॑मसुर भ्री॒णन्ति॑ ।
मा ज्योति॑षः प्रवस॒थानि॑ गन्म॒ वि षू मृधः॑ शिश्रथो जी॒वसे॑ नः
॥ ७ ॥

मा । नः॒ । व॒धैः । व॒रु॒ण॒ । ये । ते॒ । इ॒ष्टौ । एनः॑ । कृ॒ण्वन्त॑म् । अ॒सु॒र॒ । भ्री॒णन्ति॑ ।

मा । ज्योति॑षः । प्र॒ऽव॒स॒थानि॑ । ग॒न्म॒ । वि । सु । मृधः॑ । शि॒श्र॒थः॒ । जी॒वसे॑ । नः॒ ॥ ७ ॥

नमः॑ पु॒रा ते॑ वरुणो॒त नू॒नमु॒ताप॒रं तु॑विजात ब्रवाम ।
त्वे हि कं॒ पर्व॑ते॒ न श्रि॒तान्यप्र॑च्युतानि दूळभ व्र॒तानि॑ ॥ ८ ॥

नमः॑ । पु॒रा । ते॒ । व॒रु॒ण॒ । उ॒त । नू॒नम् । उ॒त । अ॒प॒रम् । तु॒वि॒ऽजा॒त॒ । ब्र॒वा॒म॒ ।

त्वे इति॑ । हि । क॒म् । पर्व॑ते । न । श्रि॒तानि॑ । अप्र॑ऽच्युतानि । दु॒ःऽद॒भ॒ । व्र॒तानि॑ ॥ ८ ॥

भाषायाम्.

७. हे असुर (=बलवन्) वरुण, ये [वधाः] (=शस्त्राणि) ते इष्टौ (=तव प्रेषणे सति=त्वया प्रेषिता) एनः कृण्वन्तं (=पापं कुर्वन्तं) भ्रीणन्ति (=हिंसन्ति) [तैर्] वधैः (=शस्त्रैर्) मा नो [वधीः] (=अस्मान् मा वधीः)। [वयं] ज्योतिषः प्रवसथानि (=प्रकाशात् प्रवासान्) मा गन्म (=मा गच्छेम) । जीवसे नः (=अस्माकं जीवनाय) मृधः (=शत्रून्) वि षु शिश्रथः (=सुष्टु पृथक् कुरु=अस्मत्सकाशादपगमय)॥

८. हे वरुण, ते (=तुभ्यं) पुरा (=पूर्वम्) उत नूनम् (=अपि चेदानीं) [तथा] हे तुविजात (=प्रबलत्वेन सह प्रादुर्भूत), अपरम् (=अपरगामिन्यपि काले) ब्रवाम (=उच्चारयाम) । हे दूळभ (=दुःखेन हिंस्य), त्वे श्रितानि व्रतानि पर्वते न अप्रच्युतानि हि कं (=त्वयि स्थितानि यानि कर्माणि तानि पर्वते स्थितानीव च्युतिरहितानि) [भवन्ति] ॥

७. हे बलवान् वरुणा, पाप करणाऱ्याला तुझ्या आज्ञेवरून जीं शस्त्रें मारितात त्यांहीं तूं आम्हांस [मारूं] नको. तूं आम्हांस प्रकाशापासून भटकूं देऊं नकोस. आम्हीं जगावें म्हणून तूं शत्रूंचा अगदी नाश करून टाक.

7. Do not [kill] us, o Varuṇa, with those weapons which at thy bidding strike him who commits sin. May we never go to regions far removed from light. Remove [our] enemies that we may live.

८. हे प्रबला, [आम्हीं] तुला पूर्वीं नमस्कार [केला] आणि आतां [करितों] आणि पुढेंहि करूं. कारण कीं, हे क्षतिहीन [वरुणा], तुझ्या ठायीं अर्पिलेलीं [जीं] कर्में [तीं] पर्वताच्या ठायीं ठेविल्याप्रमाणें अचल [होत].

8. We [chanted] thy hymn before and [we chant it] now and, o mighty one, we will chant it in future. For those works [which are] offered to thee, o thou impossible to harm, [are] unshakeable as if placed on a mountain.

---

७. 'पाप करणाऱ्याला...मारितात.' ='एनः कृण्वन्तं भ्नोणन्ति.' जो मनुष्य पाप करितो त्याला शासन करणें हें वरुणाचें काम होय असें वेदांत सांगितलें आहें. सू. २४ मं. ८ आणि सू. २५ मं. १ पहा.

'तुझ्या आज्ञेवरून' ='ते इष्टौ'. या ठिकाणीं सायणांनीं 'इष्टौ एनः' हे शब्द एकत्र घेऊन 'यज्ञांत पाप' असा अर्थ केला आहे तो चिंत्य दिसतो. त्यापेक्षां त्यांणींच सू. ६२ मं. ३ यांत केलेला 'इष्टौ' याचा 'प्रेरणेवरून' असा जो अर्थ, तो अधिक योग्य आहे.

या मंत्रांत जो प्रकाश सांगितला, तो ज्ञानरूप होय यांत संशय नाहीं. आणि त्यावांचून भटकूं नये म्हणजे अज्ञानामुळें अपराध अथवा पाप घडूं नये असा अभिप्राय आहे.

८. नमस्कार=नमः म्हणजे येथें नमस्कारयुक्त स्तोत्र असें समजावयाचें आहे.

'तुझ्या ठायीं अर्पिलेलीं जीं कर्में' 'त्वे श्रितानि व्रतानि.' म्ह. वरुणास अनुलक्षून केलेलीं जीं यजनादिक कर्में तीं. अथवा पाप्याला दंड करणें आणि पुण्यवंतावर अनुग्रह करणें इत्यादिक जीं कामें वरुण करीत असतो तीं. तीं पर्वताच्या गुणांप्रमाणें अचल होत, असें तात्पर्य.

परं ऋणा सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजम् ।
अव्युष्टा इन्नु भूयसीरुषास आ नो जीवान्वरुण तासु शाधि ॥९॥

परा । ऋणा । सावीः । अध । मत्ऽकृतानि । मा । अहम् । राजन् । अन्यऽकृतेन । भोजम् ।

अविऽउष्टाः । इत् । नु । भूयसीः । उषसः । आ । नः । जीवान् । वरुण । तासु । शाधि ॥ ९ ॥

यो मे राजन्युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह ।
स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् १०

यः । मे । राजन् । युज्यः । वा । सखा । वा । स्वप्ने । भयम् । भीरवे । मह्यम् । आह ।

स्तेनः । वा । यः । दिप्सति । नः । वृकः । वा । त्वम् । तस्मात् । वरुण । पाहि । अस्मान् ॥ १० ॥

भाषायाम्.

९. अध (=अपि च) मत्कृतानि ऋणा (=ऋणानि) परा सावीः (=परा सुव=अपगमय) । हे राजन् [वरुण], अहम् अन्यकृतेन [धनेन] मा भोजं (=भोगं मा लभेयम्) । हे वरुण, अव्युष्टा इत् [या] भूयसीः उषसः (=अद्यनाप्यनुदिता याः प्रभूता उषासः सन्ति=आगामिनो दिवसा भवन्ति) तासु नो जीवान् आ शाधि (=तासु अस्मान् जीवतोऽनुशिष्टान् कुरु=तासु वयं यथा जीवेम तथाज्ञापय) ॥

१०. हे राजन्, यो मे युज्यो वा सखा वा (=यो मम पित्रादिर्वा बान्धवादिर्वा) स्वप्ने भयं भीरवे मह्यम् आह (=?स्वप्ने दृष्टं भयकरं किमपि वस्तु कातराय मह्यं विवृणोति) यः स्तेनो वा वृको वा नो दिप्सति (=चौरो वा हिंसको वास्मान् हिंसितुमिच्छति) तस्माद् [भयात् स्तेनाद्वृकाच्च] हे वरुण, त्वमस्मान् पाहि ॥

९. मी केलेलीं ऋणें काढून टाक; हे राजा, मी दुसऱ्यानें मिळविलेल्या धनावर पोट न भरावें असें कर. हे वरुणा, अजून उगवल्याच नाहींत अशा [ज्या] पुष्कळ उषा त्यांप्रत आम्ही जीवंतपणीं पावूं असें कर.

१०. हे राजा [वरुणा], जो माझा सगा अथवा मित्र स्वप्नांत [पाहिलेलें] भय मज भितऱ्याला घालील, अथवा जो चोर कींवा हिंसक आमची हानि करूं इच्छील, त्यापासून, हे वरुणा, तूं आम्हांला रक्ष.

9. And remove the debts contracted by me. May I never feed on the gains of another, o king [Varuṇa]! Order, o Varuṇa, that we shall be alive on the numerous Ushases that have not yet shone.

10. Whatever relation or friend of mine tells me, a timid one, of an ill omen [seen] in a dream, or whatever thief or wolf desires to hurt me—from him save us thou, o Varuṇa!

---

९. ऋणांत राहूं नये, परान्न भक्षण करूं नये आणि पुष्कळ जगण्याची इच्छा करणें, हें जसें आतां इष्ट आहे तसेंच वेदकाळींहि असे असें या ऋचेवरून दिसून येतें.

१०. 'स्वप्नांत पाहिलेलें भय मज भितऱ्याला घालितो '=' स्वप्ने भयं भीरवे मह्यमाह.' म्हणजे एकादें अनिष्ट मी स्वप्नांत पाहिलें असेल आणि त्याचा अर्थ भयप्रद आहे असें माझे सगे सोयरे सांगतील, तर त्या भयापासून मला रक्ष.

माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ११॥१०

मा । अहम् । मघोनः । वरुण । प्रियस्य । भूरिऽदाव्नः । आ । विदम् ।
शूनम् । आपेः ।
मा । रायः । राजन् । सुऽयमात् । अव । स्थाम् । बृहत् । वदेम ।
विदथे । सुऽवीराः ॥ ११ ॥ १० ॥

भाषायाम्.

११. हे वरुण, मघोनः (=धनवतो) भूरिदाव्नः (=प्रभूतस्य दातुः) प्रियस्य आपेः (=ज्ञातेः) शूनं (=मम दारिद्र्यं) माहम् आ विदं (=माहं तस्य विज्ञापनं करवाणि)। हे राजन् [वरुण], सुयमाद् रायः (=सुष्ठु नियम्याद्धनात्) माहम् अव स्थां (=मा विहीनः स्याम्)। सुवीराः (=शोभनवीर्योपेतपुत्रादिभिरूपेता) [वयं] विदथे (=यज्ञे) बृहद् वदेम (=तव महत् स्तोत्रं ब्रूयाम)॥

सूक्तम् २९–२२०.

कूर्मो गृत्समदो वा ऋषिः। विश्वे देवा देवता। त्रिष्टुप् छन्दः॥

धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः ।
शृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः ॥१॥

धृतऽव्रताः । आदित्याः । इषिराः । आरे । मत् । कर्त । रहसूःऽइव ।
आगः ।
शृण्वतः । वः । वरुण । मित्र । देवाः । भद्रस्य । विद्वान् । अवसे ।
हुवे । वः ॥ १ ॥

भाषायाम्.

१. हे धृतव्रताः (=धृतकर्माण) इषिराः (=गमनशीलास्त्वराशीला) आदित्याः (=अदितेः पुत्रा इन्द्रादयः), रहसूरिव मत् आगः आरे कर्त (=व्यभिचा-

११. हे वरुणा, श्रीमान् [आणि] उदार जो प्रिय आप्त त्याला मी आपलें दैन्य न सांगावें असें कर. हे राजा [वरुणा], ज्यावर सहज अधिकार चालवितां येतो अशा धनापासून मी पृथक् न होईन असें कर. चांगल्या वीरांनीं युक्त होत्साते यज्ञांत आम्ही तुझी मोठी स्तुति गाऊं असें कर.

11. May I never tell, o Varuṇa, my poverty to a rich [and] bounteous dear relation. May I never be, o king, without controllable wealth. May we, accompanied by brave sons, chant great praises [of thee] in the sacrifice.

सूक्त २९–२२०.

ऋषि–कूर्म अथवा गृत्समद. देवता–विश्वे देव. वृत्त–त्रिष्टुभ्.

१. हे कर्मधारक, हे वेगवंत आदित्य हो, व्यभिचारिणीप्रमाणें [माझें] पाप मजपासून दूर करा. हे वरुणा, हे मित्रा, हे देव हो, [तुम्हांपासून होणारें] कल्याण जाणणारा जो मी, तो तुम्हां [स्तोत्र] ऐकणाऱ्यांस तुमच्या प्रसादासाठीं येथें बोलावितों.

HYMN 29–220.

To *Vis've Devas.* By *Kûrma* or *Gṛitsamada.* Metre—*Trishṭubh.*

1. O swift sons of Aditi, o supporters of the rite, remove the sin away from us, even as a woman giving secret birth to a child. O Varuṇa, o Mitra, o gods, I who know [your] blessing invoke for your protection you who hear.

---

१. 'व्यभिचारिणी स्त्रीप्रमाणें' म्हणजे व्यभिच्यारिणी स्त्री गर्भिणी राहिल्यानंतर गर्भ पाडून जसा दूर टाकिते त्याप्रमाणें आमचें पातक दूर नेऊन टाकून दे. हा अर्थ सायणास अनुसरून केला आहे. आणि तो योग्य दिसतो. याजवरून व्यभिचारादिक पापें आणि गर्भपातरूप जो लाज राखण्याचा राक्षसी उपाय तो जसा प्रस्तुत काळीं चालू आहे तसाच वेदकाळींहि प्रसिद्ध होता असें सिद्ध होतें.

यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषांसि सनुतर्युयोत ।
अभिक्षत्तारो अभि च क्षमध्वमद्या च नो मृळयतापरं च ॥ २ ॥
यूयम् । देवाः । प्रऽमतिः । यूयम् । ओजः । यूयम् । द्वेषांसि । सनुतः । युयोत ।
अभिऽक्षत्तारः । अभि । च । क्षमध्वम् । अद्य । च । नः । मृळयत । अपरम् । च ॥ २ ॥

किमू नु वः कृणवामापरेण किं सनेन वसव आप्येन ।
यूयं नो मित्रावरुणादिते च स्वस्तिमिन्द्रामरुतो दधात ॥ ३ ॥
किम् । ऊं इति । नु । वः । कृणवाम । अपरेण । किम् । सनेन । वसवः । आप्येन ।
यूयम् । नः । मित्रावरुणा । अदिते । च । स्वस्तिम् । इन्द्रामरुतः । दधात ॥ ३ ॥

रिणी यथा गर्भं पातयित्वा दूरदेशे परित्यजति तद्वत् पापं मत्तः सकाशात् दूरे कुरुत)। हे वरुण, हे मित्र, हे देवाः, भद्रस्य विद्वान् (=युष्माभिः करणीयं श्रेयो जानन्) [अहं] शृण्वतः (=मम स्तोत्रं शृण्वतो) वः (=युष्मान्) वः अवसे (=युष्माकं रक्षणाय=युष्मत्कर्तृकाय रक्षणाय) हुवे (=आह्वयामि) ॥

रहसूरिव । रहस्यन्यैरज्ञाते प्रदेशे सूयत इति रहसूर्व्यभिचारिणी । सा यथा गर्भं पातयित्वा दूरदेशे परित्यजति तद्वत् । इति सायणः ॥

भाषायाम्.

२. हे देवाः, यूयं प्रमतिः (=प्रकृष्टा मतिः प्रसादरूपा बुद्धिर्यस्य स पालको यूयमेव)। यूयम् ओजः (=बलं यूयमेव) । यूयम् [एव] द्वेषांसि सनुतर्युयोत (=द्वेष्टॄन् शत्रून् अन्तर्हितं यथा तथा पृथक्कुरुत)। अभिक्षत्तारः (=शत्रोरभिहिंसका) [यूयम्] अभि च क्षमध्वम् (=अस्मान् सहध्वं च) अद्य च अपरं च नो मृळयत (=अपि च अद्य दिने आगामिनि च काले अस्मभ्यं मृडयत=अस्मान् सुखयत च) ॥

३. हे वसवः (=साधवो) [विश्वे देवाः], वः अपरेण [आप्येन] किम् ऊ [नु] करवाम [अथवा] सनेन आप्येन [किं करवाम] (=युष्माकं यत् पुरातनकाले

२. हे देव हो, तुम्ही संरक्षक [व्हा]. तुम्ही बळ [व्हा]. तुम्ही शत्रूंला नाहींसे करा. [शत्रु]घातक [असे जे तुम्ही ते] आम्हांला क्षमा करा आणि आम्हांवर आतां आणि पुढेंहि कृपा करा.

३. हे वसू हो, तुमचें पुरातन आप्तपण आणि अर्वाचीन आप्तपण घेऊन काय करावयाचें आहे? हे मित्र आणि वरुण हो, हे अदिती, हे इंद्र आणि मरुत् हो, तुम्ही आमचें कल्याण करा [म्हणजे झालें].

2. Do you, o gods, [be] the protector. [Be] you the power. Do you free us from the haters. Do you who destroy [the enemy] pardon [us]. And be kind to us now as well as in the future.

3. What now shall we do, o good [gods], with your future [friendship], what with your ancient friendship? Do you good to us, o Mitra and Varuṇa and o Aditi, o Indra and Maruts!

---

३. 'तुमचें आमचें जुनें सख्य आहे आणि अजून झालें तरी सख्य आहेच अशी ख्याति आहे; तो घेऊन काय करावयाची आहे? तुम्हीं आमचें कल्याण केलें म्हणजे झालें.'

हये देवा यूयमिदापयः स्थ ते मृळत नाधमानाय मह्यम् ।
मा वो रथो मध्यमवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म ॥४॥

हये । देवाः । यूयम् । इत् । आपयः । स्थ । ते । मृळत । नाधमानाय । मह्यम् ।
मा । वः । रथः । मध्यमऽवाट् । ऋते । भूत् । मा । युष्मावत्ऽसु । आपिषु । श्रमिष्म ॥ ४ ॥

प्र व एको मिमय भूर्यागो यन्मा पितेव कितवं शशास ।
आरे पाशा आरे अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट ॥५

प्र । वः । एकः । मिमय । भूरि । आगः । यत् । मा । पिताऽइव । कितवम् । शशास ।
आरे । पाशाः । आरे । अघानि । देवाः । मा । मा । अधि । पुत्रे । विम्ऽइव । ग्रभीष्ट ॥ ५ ॥

प्रसिद्धं सख्यं यद्यागामिनि काले भवितव्यं सख्यं तेन किं करवाम ?=तद्ब्रूहीत्वा किं करवाम ?) । हे मित्रावरुणा (=मित्रावरुणौ), हे अदिते च, हे इन्द्रामरुतः, यूयं नः (=अस्मभ्यं) स्वस्ति दधात (=स्वस्ति कुरुत=कल्याणं प्रयच्छत) ॥

कल्याणकरणमेव युष्माकं सख्यस्य प्रयोजनमिति भावः ॥

भाषायाम्.

४. हये देवाः (=हे इन्द्रादयो देवाः), यूयम् इत् आपयः स्थ (=यूयमेव बान्धवाः स्थ) । ते [यूयम्] (=अतः कारणाद्यूयं) नाधमानाय मह्यं मृळत (=अभिमतफलं याचमानाय मह्यं स्तोत्रे=मां स्तोतारं सुखयत) । ऋते (=अस्माकं यज्ञे) वो रथो मध्यमवाट् मा भूत् (=मन्दगमनेन वाहको=मन्दगतिर्मा भवतु) । युष्मासु आपिषु (=युष्मत्सदृशेषु बन्धुषु सत्सु) [वयं] मा श्रमिष्म (=श्रान्ता मा भूम) ॥

५. [हे देवाः], यत् (=यस्मात्) पिता कितवम् इव मा शशास (=यथा कश्चित् पिता कैतवकारिणं स्वकीयं पुत्रमनुशास्ति शोभनं मार्गं प्रवर्तयति तथा मां शशास पापमार्गात्परावर्तयत) [तस्मात्] व एकः (=युष्माकं मध्य एकोहं युष्माभिः सर्वैरनुशिष्ट एकोहं) भूरि आगः (=मम प्रभूतं पापं) प्र मिमय (=प्रकर्षेण हिंसितवानस्मि) । हे देवाः, [युष्मदीयाः] पाशा आरे (=दूरे) [सन्तु] अघानि

४. हे देव हो, तुम्हीच [आमचे] बांधव आहां. तर तुम्ही मज याचकावर कृपा करा. तुमचा रथ [आमच्या] यज्ञांत मंदगामी न होओ. तुम्हांसारिखे बांधव असतांना आम्हांला कष्ट न होओत.

५. [हे देव हो], ज्यापेक्षां [एकादा] बाप दुर्व्यसनी [पुत्रा]ला [उपदेश करितो] तसे तुम्ही मला उपदेश करिते झालां, त्यापेक्षां तुम्हां सर्वांमुळें मी एकटा पुष्कळ पापाचा नाश करिता झालों आहें. [तर] हे देव हो, पाश दूर [होओत], पापें दूर [होओत]. पिल्लाच्या समक्ष पक्ष्याला [धरिल्या]प्रमाणें तुम्ही मला धरूं नका.

4. You alone, o gods, are our relations. Be ye therefore kind to me, a suppliant. May your chariot never be slow in [our] sacrifice. May we never tire when we have relations like you.

5. I a single one belonging to you [who are many] have destroyed much sin, since you have instructed me even as a father [instructs] a profligate [son]. Away with fetters, away with sins, o gods! Do not seize me as [they seize] a bird before [its] young.

---

५. पहिल्या अर्धाचा अर्थ कठिण आहे. सायणाप्रमाणें केलेल्या अर्थाचा भाव असा आहे कीं ' हे देव हो, तुम्हीं सर्व देव मिळून मज एकट्यावर कृपा करून एकादा बाप आपल्या दुर्व्यसनी पुत्राला उपदेश करितो तसा मला उपदेश केला त्यामुळें मी आपल्या सर्व पापांचा नाश केला; तर मजपासून पाश सोडावा.'

अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥६॥

अर्वाञ्चः । अद्य । भवत । यजत्राः । आ । वः । हार्दि । भयमानः । व्ययेयम् ।

त्राध्वम् । नः । देवाः । निऽजुरः । वृकस्य । त्राध्वम् । कर्तात् । अवऽपदः । यजत्राः ॥ ६ ॥

माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः॥७॥११

मा । अहम् । मघोनः । वरुण । प्रियस्य । भूरिऽदाव्नः । आ । विदम् । शूनम् । आपेः ।

मा । रायः । राजन् । सुऽयमात् । अव । स्थाम् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ७ ॥ ११ ॥

(=पापानि) [च] आरे (=दूरे) [सन्तु] । अधि पुत्रे विम् इव (=बाले संनिहिते सति पक्षिणं यथा=बालस्य समीपे वर्तमानं पक्षिणं यथा व्याधा गृह्णन्ति तद्वत्) मा (=मां) मा ग्रभीष्ट (=मा गृह्णीध्वं=मा हिंसत) ॥

भाषायाम्.

६. हे यजत्राः (=यजनीया देवाः), [यूयम्] अद्य अर्वाञ्चो भवत (=अस्मदभिमुखा भवत) । भयमानः (=बिभ्यदहं) वो हार्दि आ व्ययेयं (=युष्माकं हृदयसंबन्धि रक्षणम् आभिमुख्येन प्राप्नुयाम्) । हे देवाः, वृकस्य निजुरः (=हिंसकस्य निहननात्) नस्त्राध्वम् । हे यजत्राः, कर्तात् अवपदः (=यस्मिन् अवपदनीयं तस्माद् गर्तात्=कर्ते अवपदः=गर्ते अवपतनात्) [अस्मान्] त्राध्वं (=पालयत) ॥

७. हे वरुण, मघोनः (=धनवतो) भूरिदाव्नः (=प्रभूतस्य दातुः) प्रियस्य आपेः (=ज्ञातेः) शूनं (=मम दारिद्र्यं) माहम् आ विदं (=माहं तस्य विज्ञापनं करवाणि । हे राजन् [वरुण], सुयमात् रायः (=सुष्ठु नियम्याद्धनात्) माहम् अव स्थां (=मा विहीनः स्याम्) । सुवीराः (=शोभनवीर्योपेतपुत्रादिभिरुपेता) [वयं] विदथे (=यज्ञे) बृहद् वदेम (=तव महत् स्तोत्रं ब्रूयाम) ॥

६. हे पूजनीय [देव] हो, तुम्ही आज आम्हांकडे तोंड करा. भ्यालेला जो मी त्या मला तुमच्या कृपेला शरण जाऊं द्या. हे देव हो, तुम्ही हिंसकाच्या हननापासून आम्हांला रक्षा, हे पूजनीय [देव] हो, तुम्ही आम्हांला खळग्यांत पडूं देऊं नका.

७. हे वरुणा, श्रीमान् [आणि] उदार जो प्रिय आप्त त्याला मी आपलें दैन्य न सांगावें असें कर. हे राजा [वरुणा], ज्यावर सहज अधिकार चालवितां येतो अशा धनापासून मी पृथक् न होईन असें कर. चांगल्या वीरांनीं युक्त होत्साते यज्ञांत आम्ही तुझी मोठी स्तुति गाऊं असें कर.

6. O worshipful [gods], do you turn yourselves in this direction. May I, who am terrified, take shelter under thy brave protection. Save us, o gods, from the harm of the wolf, save [us], o adorable ones, from falling into the pit.

7. May I never tell, o Varuṇa, my poverty to a rich [and] bounteous dear relation. May I never be, o king, without controllable wealth. May we, accompanied by brave sons, chant great praises [of thee] in the sacrifice.

सूक्तम् ३०-२२१.

गृत्समद ऋषिः । प्र हि क्रतुमित्येषेन्द्रासोमदेवताका । सरस्वति त्वमस्मानित्यर्धर्चः सारस्वतः । यो नः सनुत्य इत्येषा बार्हस्पत्या । अन्त्या मारुती । शिष्टा ऐन्द्र्यः ॥ जगती छन्दः ॥

ऋतं देवाय कृण्वते सवित्र इन्द्रायाहिघ्ने न रमन्त आपः ।
अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसाम् ॥ १ ॥

ऋतम् । देवाय । कृण्वते । सवित्रे । इन्द्राय । अहिऽघ्ने । न । रमन्ते । आपः ।

अहःऽअहः । याति । अक्तुः । अपाम् । कियति । आ । प्रथमः । सर्गः । आसाम् ॥ १ ॥

यो वृत्राय सिनमत्राभरिष्यत्प्र तं जनित्री विदुष उवाच ।
पथो रदन्तीरनु जोषमस्मै दिवेदिवे धुनयो यन्त्यर्थम् ॥ २ ॥

यः । वृत्राय । सिनम् । अत्र । अभरिष्यत् । प्र । तम् । जनित्री । विदुषे । उवाच ।

पथः । रदन्तीः । अनु । जोषम् । अस्मै । दिवेऽदिवे । धुनयः । यन्ति । अर्थम् ॥ २ ॥

भाषायाम्.

१. ऋतं कृण्वते (=?उदकवृष्टिं कुर्वते) देवाय सवित्रे (=दीप्ताय सवित्रे=सर्वेषां प्रेरकाय) अहिघ्ने (=वृत्रस्य हननं कुर्वते) इन्द्राय (=एतादृशादिन्द्राद्भीत्वा) आपो न रमन्ते (=उदकप्रवाहा नोपरता भवन्ति=नित्यं गच्छन्ति) । अहरहः (=प्रत्यहम्) अपाम् अक्तुः (=उदकानां "सेचकं स्रोतो") याति (=गच्छति) । आसां (=तासामपां) प्रथमः सर्गः कियति आ (=प्रथमा सृष्टिः कस्मिन् काले जाता?=कदा ताः प्रथममजायन्त)?

यावति काले ता अजायन्त स कालः कियान् । किं परिमाणं तस्य कालस्य । न किमपि । नित्या एव हि ता इत्यर्थः । इति ॥

२. अत्र (=तस्मिन् प्रसङ्गे) यः [पुरुषो] वृत्राय सिनम् अभरिष्यत् (=वृत्राय दातुं हविरन्नरूपं धनं संपादितवान्) तं [पुरुषं] जनित्री (=इन्द्रमाता अदितिर्)

सूक्त ३०–२२१.

ऋषि–गृत्समद. देवता– १-५ इन्द्र; ६ इन्द्र आणि सोम; ७ इन्द्र; ८वीच्या प्रथमार्धाची देवता सरस्वती, उत्तरार्धाची इन्द्र; ९ बृहस्पति; १० इन्द्र; ११ मरुत्. वृत्त–जगती.

१. उदकवृष्टि करणारा, देदीप्यमान, सर्वांचा प्रेरक आणि अहीला मारणारा असा जो इन्द्र, त्याला भिऊन उदकें थांबत नाहींत. उदकांचा प्रवाह नित्य चालत असतो. त्यांजला प्रथम कोणत्या [काळीं] निर्माण केलें ?

२. जो [मनुष्य] त्या प्रसंगीं वृत्राला [देण्यासाठीं] हविरन्न आणिता झाला त्याचें नांव माता [आपल्या] जाणणाऱ्या पुत्रापाशीं सांगती झाली. त्याच्या इच्छेनुरूप त्याजकरितां मार्ग खोदणाऱ्या ज्या नद्या, त्या प्रतिदिनीं इष्ट स्थळीं जात असतात.

HYMN 30–221.

To *Indra* (*vs.*1–5); *Indra* and *Soma* (*v.* 6); *Indra* (*v.*7); *Sarasvatî* (the first half of *v.* 8), and *Indra* (second half of the 8th *v.*) ; *Bṛihaspati* (*v.* 9); *Indra* (*v.*10) and the *Maruts* (*v.* 11). By *Gṛitsamada*. Metre—*Jagatî*.

1. The waters do not stop for fear of Indra, the sender of rain, the brilliant, the inspiring, the killer of Vṛitra. The stream of the waters flows from day to day. When was their first birth?

2. The mother declared to [her] knowing [son] him who had then prepared to offer oblation to Vṛitra. The rivers, digging out channels for him according to his wish, daily run to their destination.

---

१. ‘त्याला भिऊन उदकें थांबत नाहींत’ =‘न रमन्ते आप:’ म्हणजे उदकें नित्य वाहत असतात, गतिभंग केला तर इंद्राचा कोप होईल म्हणून उगी राहत नाहींत. आणि हीं निरंतर चालतच आलीं आहेत. प्रथम त्यांजला केव्हां निर्माण केलें हें कोणास ठाऊक आहे ?

२. ‘ माता [आपल्या] जाणणाऱ्या पुत्रापाशीं सांगती झाली.’=‘ जनित्री वि-

ऊर्ध्वो ह्यस्थादध्यन्तरिक्षेऽधा वृत्राय प्र वधं जभार ।
मिहं वसान उप हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिन्द्रः ॥ ३ ॥
ऊर्ध्वः । हि । अस्थात् । अधि । अन्तरिक्षे । अध । वृत्राय । प्र । वधम् । जभार ।
मिहम् । वसानः । उप । हि । ईम् । अदुद्रोत् । तिग्मऽआयुधः । अजयत् । शत्रुम् । इन्द्रः ॥ ३ ॥
बृहस्पते तपुषाश्नेव विध्य वृकद्वरसो असुरस्य वीरान् ।
यथा जघन्थ धृषता पुरा चिदेवा जहि शत्रुमस्माकमिन्द्र ॥ ४ ॥
बृहस्पते । तपुषा । अश्नाऽइव । विध्य । वृकऽद्वरसः । असुरस्य । वीरान् ।
यथा । जघन्थ । धृषता । पुरा । चित् । एव । जहि । शत्रुम् । अस्माकम् । इन्द्र ॥ ४ ॥

विदुषे (=विज्ञानयुक्तायेन्द्राय) प्रोवाच (=कथितवती=अमुकः पुरुषस्तुभ्यं हविरदत्त्वा वृत्राय ददातीति प्रोवाच) । अनु जोषम् (=अनुकामम्=इच्छामनुसृत्य) अस्मै (=तस्यार्थे) पथो रदन्तीः (=मार्गान् विलिखन्त्यो मार्गान् कुर्वन्त्यो) धुनयः (=नद्यो) दिवेदिवे (=नित्यम्) अर्थं यन्ति (=गन्तव्यं स्थानं समुद्रं गच्छन्ति) ॥

भाषायाम्.

३. [इन्द्रः] अधि अन्तरिक्षे (=अन्तरिक्ष) ऊर्ध्वोऽस्थात् (=हननाय सिद्धो भूत्वा उदतिष्ठत्) अध (=अनन्तरं) वृत्राय वधं प्र जभार (=शस्त्रं वृत्रस्योपरि प्रहृतवान्) । मिहं वसानः (=मेघमाच्छादयन्) [इन्द्र] उप ईम् अदुद्रोत् (=तं वृत्रमुपागमत्) । तिग्मायुधः (=तीक्ष्णशस्त्र) इन्द्रः शत्रुमजयत् (=वृत्रं जितवान्)॥

४. हे बृहस्पते, तपुषा अश्नेव (=तापकेन तेजस्विना वज्रेणेव) वृकद्वरसः असुरस्य वीरान् (=हिंसकद्वारवतो बलवतः शत्रोर्वीरान्) विध्य (=ताडय) । हे इन्द्र, यथा [त्वं] पुरा (=पूर्वं) धृषता (=धर्षकेण बलेन) [शत्रुं] जघन्थ (=हतवान्) एव चित् (=तथैव) अस्माकं शत्रुं [सांप्रतं] जहि (=नाशय) ॥

वृकद्वरसः संवृतद्वारस्यासुरस्य वीरान्... । यद्वा संवृतद्वारानसुरस्य वीरान् । इति सायणः ॥

३. नंतर [इंद्र] अंतरिक्षांत उभा राहिला आणि वृत्रावर शस्त्राचा प्रहार करिता झाला. [इंद्र] मेघ परिधान करून त्याजवर धांवला [आणि] तीक्ष्ण शस्त्र घेऊन त्या शत्रूला जिंकिता झाला.

४. हे बृहस्पती, तूं दारावर घातक वीर ठेवणाऱ्या प्रबळ असुराच्या वीरांस तेजःपुंज वज्रानें मारिल्याप्रमाणें मार. हे इन्द्रा, तूं धैर्यानें जसा पूर्वीं मारिता झालास तसा आतांहि आमच्या शत्रूला मार.

3. He then stood ready in the firmament and struck the thunderbolt on Vṛitra. [Indra] having clothed himself with a cloud ran against him : Indra armed with the sharp weapons vanquished the enemy.

4. O Bṛihaspati, strike as with the burning thunderbolt the brave sons of the powerful enemy who keeps dangerous warriors in his door. Kill, o Indra, our enemy even as thou didst before with courage.

दुषे प्रोवाच.' म्ह. वृत्रवध होण्याच्या पूर्वीं कोणी इंद्राला टाकून वृत्राला भजूं लागले होते, तेव्हां इंद्राला सोडून वृत्राला कोण कोण हवि देत आहेत तें इंद्राची आई अदिति इनें इंद्राला सांगितलें, असा सायणाचा भावार्थ दिसतो.

'मार्ग खोदणाऱ्या' म्हणजे खोल वाहून पात्र मोठें करणाऱ्या.

इष्ट स्थळीं म्ह. समुद्रांत.

---

३. 'मेघ परिधान करून'=म्ह. मेघरूप कवच घालून.

४. 'दारावर घातक वीर ठेवणाऱ्या'= 'वृकद्वरसः.' हा शब्द कठिण आहे. दुसरे प्रयोग सांपडत नसल्यामुळें अर्थ काय आहे तें निश्चयानें सांगवत नाहीं. केलेल्या भाषांतराचें तात्पर्य, जो आपल्या दरवाज्यावर घातक म्हणजे शूर असे योद्धे ठेवितो तशा, असें आहे.

अव॑ क्षिप दि॒वो अश्मा॑नमु॒च्चा येन॒ शत्रुं॑ मन्दसा॒नो नि॒जूर्वाः॑ ।
तो॒कस्य॑ सा॒तौ तन॑यस्य॒ भूरे॑र॒स्माँ अ॒र्धं कृ॑णुतादिन्द्र॒ गोना॑म् ॥५॥१२

अव॑ । क्षि॒प । दि॒वः । अश्मा॑नम् । उ॒च्चा । येन॑ । शत्रु॑म् । म॒न्द॒सा॒नः ।
नि॒ऽजूर्वाः॑ ।
तो॒कस्य॑ । सा॒तौ । तन॑यस्य । भूरेः॑ । अ॒स्मान् । अ॒र्धम् । कृ॒णु॒ता॒त्
इ॒न्द्र॒ । गोना॑म् ॥ ५ ॥ १२ ॥

प्र हि क्रतुं॑ वृ॒हथो॒ यं व॑नु॒थो र॒ध्रस्य॑ स्थो॒ यज॑मानस्य चो॒दौ ।
इन्द्रा॑सोमा यु॒वम॒स्माँ अ॑वि॒ष्टम॒स्मिन्भ॒यस्थे॑ कृणुतमु लो॒कम् ॥ ६ ॥

प्र । हि । क्रतु॑म् । वृ॒हथः॑ । यम् । व॒नु॒थः । र॒ध्रस्य॑ । स्थः॒ । यज॑मान-
स्य । चो॒दौ ।
इन्द्रा॑सोमा । यु॒वम् । अ॒स्मान् । अ॒वि॒ष्टम् । अ॒स्मिन् । भ॒यऽस्थे॑ । कृ॒णु॒-
त॒म् । ऊं॒ इति॑ । लो॒कम् ॥ ६ ॥

भाषायाम्.

५. [हे इन्द्र], मन्दसानः (=स्तोत्रेण हर्षितः सन्) [त्वं] येन [अश्मना= वज्रेण] शत्रुं निजूर्वाः (=न्यहिंसीस्) [तं] दिवः (=द्युलोकस्य) अश्मानं (=वज्रम्) उच्चा अव क्षिप (=उच्चैः स्थितः सन् द्युसकाशाद् अवक्षिप) । हे इन्द्र, भूरेस्तोकस्य तनयस्य सातौ (=प्रभूतस्य संतानस्य संतानसंतानस्य च प्राप्तौ विषये) अस्मान् गोनामर्धं कृणुतात् (=?अस्मान् गवां भोक्तॄन् कुरु=अस्मान् गोभुजः लब्धगोधनान् कुरु) ॥

प्रभूतपुत्रपौत्रादिभाजो गोधनभाजश्च कुर्वित्यर्थः ॥

६. यं [क्रतुं] वनुथः (=कामयेथे) तं क्रतुं (=यज्ञं) प्र वृहथो हि (=प्रगमयथो हि प्रकृष्टं प्राप्तफलं कुरुथः खलु) । [युवां] रध्रस्य यजमानस्य (=राधकस्य =हविर्ददत उपासकस्य) चोदौ स्थः (=प्रेरकौ भवथः=प्रकर्षं प्रापयितारौ भवथः) । हे इन्द्रासोमा (=इन्द्रासोमौ), अस्मिन् भयस्थे (=भयकारके प्रसङ्गे) युवम् अस्मान् अविष्टं (=युवामस्मान् रक्षतम्) [अपि च] उ लोकं कृणुतं (=भयरहितं स्थानं कुरुतम्=अस्मभ्यं भयरहितत्वं प्रयच्छतम्) ॥

उलोकमित्येकमेव पदं न तु पदद्वयमिति सम्यक्पाश्चात्याः ॥

५. [हे इन्द्रा], तुला हर्ष झाला म्हणजे तूं ज्या [वज्रा]नें शत्रूवर प्रहार करितोस तें आकाशचें वज्र तूं उंचीवरून खालीं फेक. हे इन्द्रा, तूं आम्हांला पुष्कळ अपत्यें आणि संतति आणि गाई यांची समृद्धि दे.

६. [हे इन्द्र आणि सोम हो], तुम्हांला जो यज्ञ आवडतो त्याचा तुम्ही उत्कर्ष करितां. तुम्ही भाविक उपासकाचें बरें करणारे आहां. हे इन्द्र आणि सोम हो, तुम्ही या भयंकर प्रसंगांत आम्हांला रक्षा. आमची मुक्तता करा.

5. Throw down from high the thunderbolt of heaven with which thou strikest the enemy [when thou art] exhilarated. Make us prosper, o Indra, in the possession of children, of grand-children, and of cows.

6. You promote [that] sacrifice which you love. You are the promoters of the pious sacrificer. O Indra and Soma, do you preserve us in this crisis. Effect [our] freedom.

---

५. 'आम्हांला.........समृद्धि दे.' मूळ शब्द 'अस्मात् अर्धं कृणुतात्' अक्षरशः 'आम्हांला भागीदार कर', असे आहेत. यासारिखा आणखी एक मंत्र आहे तो असा:- 'अपां तोकस्य तनयस्य जेषे इन्द्र सूरीन् कृणुहि स्म नः अर्धम्' ऋ. ६.४४.१८; यांतहि ज्यांस द्यावयाचें तद्वाचक पद द्वितीयान्त आहे आणि 'अर्धं' शब्दहि द्वितीयान्तच आहे.

६. हा मंत्र इन्द्र आणि सोमरसरूप जो देव त्यांविषयीं आहे.

न मा तमन्न श्रमन्नोत तन्द्रन्न वोचाम मा सुनोतेति सोमम् ।
यो मे पृणाद्यो ददद्यो निबोधाद्यो मा सुन्वन्तमुप गोभिरायत् ॥७

न । मा । तमत् । न । श्रमत् । न । उत । तन्द्रत् । न । वोचाम ।
मा । सुनोत । इति । सोमम् ।
यः । मे । पृणात् । यः । ददत् । यः । निऽबोधात् । यः । मा ।
सुन्वन्तम् । उप । गोभिः । आ । अयत् ॥ ७ ॥

सरस्वति त्वमस्माँ अविड्ढि मरुत्वती धृषती जेषि शत्रून् ।
त्यं चिच्छर्धन्तं तविषीयमाणमिन्द्रो हन्ति वृषभं शण्डिकानाम् ॥८

सरस्वति । त्वम् । अस्मान् । अविड्ढि । मरुत्वती । धृषती । जेषि ।
शत्रून् ।
त्यम् । चित् । शर्धन्तम् । तविषीऽयमाणम् । इन्द्रः । हन्ति । वृषभम् ।
शण्डिकानाम् ॥ ८ ॥

भाषायाम्.

७. [अभिषवणादि कर्म] न मा तमत् (=मां न तमयतु न ग्लपयतु) । [तन्मां] न श्रमत् (=श्रान्तं मा करोतु) उत न तन्द्रत् (=न तन्द्रयेत्) सोमम् [इन्द्रार्थं] मा सुनोत (=माभिषुणुतेति) न वोचाम (=न ब्रवाम) । यो मे पृणात् (=स हि मां पूर्णकामं करोति) यो ददत् (=स हि मह्यं धनं ददाति) यो निबोधात् (=स हि मम स्तोत्रमवगच्छति) यः सुन्वन्तं मा गोभिः उप आ अयत् (=स हि सोममभिषुण्वन्तं मां गोभिः सह आगच्छति) ॥

८. हे सरस्वति, त्वमस्मान् अविड्ढि (=रक्ष) । धृषती (=धर्षयन्ती त्वं) मरुत्वती (=मरुद्युक्ता सती) शत्रून् जेषि (=जय) । इन्द्रस्त्यं चित् (=तमपि प्रसिद्धं) शर्धन्तं (=बलवन्तं) तविषीयमाणं (=बलमिवाचरन्तं=बलमाविष्कुर्वन्तं) शण्डिकानां वृषभं (=शण्डवंश्यानां मध्ये प्रधानं कंचिच्छत्रुं) हन्ति [स्म] ॥

शण्डामर्कावसुरपुरोहितौ । इति सायणः ॥

७. [इन्द्रसेवेचा] मला कंटाळा न येओ; [इन्द्रसेवेनें] मी थकलों असें न होओ अथवा त्रासलों असें न होओ. तुम्ही सोम काढूं नका असें आमच्या तोंडांतून न येओ. कारण तो आमचे मनोरथ पूर्ण करितो. तो धन देतो, तो [माझें] स्तोत्र ऐकून घेतो, तो गाईला घेऊन मज सोमयागीप्रत येत असतो.

7. Let not [the worship of Indra] fatigue me, let it not tire [me] and let it not trouble [me]; let us not say : do not extract soma ; since he fulfils [my desire], since he gives, since he accepts [my prayer], since he comes to me, a soma-sacrificer, with cows.

८. हे सरस्वती, तूं आम्हांला रक्ष. धैर्यसंपन्न अशी जी तूं ती मरुतांसह शत्रूंला जिंक. तो जो बळवान् [आणि] धैर्यसंपन्न असा शंडिकांचा प्रभु त्यालाहि इंद्र मारिता झाला.

8. O Sarasvatî, do thou preserve us. Accompanied by the Maruts do thou, [who art] brave, vanquish the enemies. Indra killed even the lord of the S'aṇḍikas, him who was strong [and] courageous.

---

७. 'पृणात्' 'ददत्' 'निबोधात्' आणि 'अयत्' हे भावे-प्रयोग आहेत असें किती एक पाश्चात्य विद्वानांचें म्हणणें आहे.

८. 'सरस्वती.' सू.3 मं. १० आणि टीप पहा.

'शंडिकांचा प्रभु'='शण्डिकानां वृषभम्.' हा कोण होता आणि त्याजविषयीं काय कथा आहे ती कळत नाहीं. सायण म्हणतात कीं 'शंडिक' म्हणजे 'शण्ड' नांवाच्या कोणा एकाचे वंशज. पण शण्ड कोण हें ठाऊक नाहीं, आणि त्याच्या वंशजांचा प्रभु येथें सांगितला तो कोण तेंहि कळत नाहीं. हीं नांवें पुनः ऋग्वेदांत आलेलीं नाहींत.

यो नः सनुत्य उत वा जिघत्नुरभिख्याय तं तिगितेन विध्य ।
बृहस्पत आयुधैर्जेषि शत्रून्द्रुहे रीषन्तं परि धेहि राजन् ॥ ९ ॥

यः । नः । सनुत्यः । उत । वा । जिघत्नुः । अभिऽख्याय । तम् । तिगितेन । विध्य ।
बृहस्पते । आयुधैः । जेषि । शत्रून् । द्रुहे । रिषन्तम् । परि । धेहि । राजन् ॥ ९ ॥

अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि ।
ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि ॥ १० ॥

अस्माकेभिः । सत्वऽभिः । शूर । शूरैः । वीर्या । कृधि । यानि । ते । कर्त्वानि ।
ज्योक् । अभूवन् । अनुऽधूपितासः । हत्वी । तेषाम् । आ । भर । नः । वसूनि ॥ १० ॥

भाषायाम्.

९. यो नः सनुत्यः (=अस्माकमन्तर्हितः शत्रुः) उत वा जिघत्नुः (=अथवा जिघांसुर्) [भवति] तम् अभिख्याय (=संवीक्ष्य) तिगितेन (=तीक्ष्णेनायुधेन) विध्य (=ताडय) । हे बृहस्पते, आयुधैः शत्रून् जेषि (=जय) । हे राजन्, द्रुहे (=द्रोग्ध्रे=शत्रोरुपरि) रिषन्तं (=हिंसन्तं) [वज्रं] परि धेहि (=प्रक्षिप) ॥

१०. हे शूर [? इन्द्र], यानि वीर्या (=वीरकर्माणि) ते कर्त्वानि (=तव कर्तव्यानि) [भवन्ति] [तानि] अस्माकेभिः सत्वभिः शूरैः (=अस्मदीयैर्विजयिभिर्वीरैः सहायैः) कृधि (=कुरु) । [अस्माकं शत्रवो] ज्योक् (=चिरकालम्) अनुधूपितासोभूवन् (=" धूपायमानहृदयाः"=हृष्टहृदया अभूवन्) । [तान्] हत्वी (=हत्वा) तेषां वसूनि (=धनानि) नः (=अस्मभ्यम्) आ भर (=आनय) ॥

९. जो आमचा गुप्त शत्रु [असेल] अथवा [जो] घात करूं इच्छिणारा [असेल] त्याला पाहून घेऊन तूं तीक्ष्ण शस्त्रानें मार. हे बृहस्पती, तूं आयुधांनीं शत्रूंला जिंक. हे राजा [बृहस्पती], तूं शत्रूच्या अंगावर घातक [वज्र] टाक.

१०. हे शूरा, आमच्या विजयी शूरांच्या योगानें तूं जे पराक्रम तुला करावयाचे असतील ते कर. [शत्रु] पुष्कळ दिवस आनंदी झाले आहेत. [त्यांस] मारून त्यांच्या संपत्ति आम्हांला आणून दे.

9. Find out and strike with the sharp weapon him who [is] our secret [enemy] or [who is] desirous of killing us. O Bṛihaspati, conquer the enemies with [thy] weapons. Throw on the spiteful foe the destructive [thunderbolt], o king [Bṛihaspati] !

10. O hero, do thou achieve with our victorious heroes whatever deeds thou hast to achieve. [Our enemies] have been pleased for a long time. Kill them and bring their wealth to us.

---

१०. जीं पराक्रमाचीं कृत्यें इन्द्र करणार आहे तीं त्याणें ऋषीच्या पुत्रांचें साहाय्य घेऊन करावीं अशी प्रार्थना आहे. उत्तरार्धांत प्रार्थना किती चमत्कारिक आहे पहा !

तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनम् ।
यथा रयिं सर्ववीरं नशामहा अपत्यसाचं श्रुत्यं दिवेदिवे॥११॥१३

तम् । वः । शर्धम् । मारुतम् । सुम्नऽयुः । गिरा । उप । ब्रुवे । नमसा । दैव्यम् । जनम् ।
यथा । रयिम् । सर्वऽवीरम् । नशामहै । अपत्यऽसाचम् । श्रुत्यम् । दिवेऽदिवे ॥ ११ ॥ १३ ॥

भाषायाम्.

११. [हे मरुतः], वस्तं मारुतं शर्धं (=युष्माकं प्रसिद्धं मरुत्संबन्धिनं गणं) सुम्नयुः (=सुखेच्छुरहं) गिरा (=स्तुत्या) उप ब्रुवे (=उपेत्य स्तौमि)—दैव्यं जनं नमसा [उपब्रुवे] (=देवसंबन्धिनं जनं मरुद्रूपं नमस्कारेण उपेत्य स्तौमि) । यथा (=येन प्रकारेण) सर्ववीरं (=सर्वैर्वीरैरुपेतम्) अपत्यसाचं (=संततियुक्तं) श्रुत्यं (=प्रशस्तभूतं) रयिं (=धनं) दिवेदिवे (=प्रतिदिनं) नशामहै (=प्राप्नवाम) ॥

सूक्तम् ३१–२२२.

गृत्समद ऋषिः । विश्वे देवा देवता । अन्त्या त्रिष्टुप् । शिष्टा जगत्यः ॥

अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा ।
प्र यद्वयो न पप्तन्वस्मनस्परि श्रवस्यवो हृषीवन्तो वनर्षदः ॥ १ ॥

अस्माकम् । मित्रावरुणा । अवतम् । रथम् । आदित्यैः । रुद्रैः । वसुऽभिः । सचाऽभुवा ।
प्र । यत् । वयः । न । पप्तन् । वस्मनः । परि । श्रवस्यवः । हृषीवन्तः । वनऽसदः ॥ १ ॥

भाषायाम्.

१. हे मित्रावरुणा (=मित्रावरुणौ), आदित्यै रुद्रैः (=“एकादशसंख्याकैः”) वसुभिः (=? एतन्नामकैर्देवैश्च) [च] सचाभुवा (=सहितौ) [युवाम्] अस्माकं रथम् अवतं (=रक्षतम्) यत् (=यदा) श्रवस्यवः (=अन्नेच्छवो) हृषीवन्तः (=प्राप्तहर्षा) वनर्षदः (=वृक्षादौ निषण्णा) वयः (=पक्षिणो) वस्मनः परि न (=निवासस्थानादिव) [अस्माकमश्वाः] प्र पप्तन् (=प्रपतन्ति=उत्पतन्ति) ॥

११. [हे मरुतांनो], तुमचा जो तो मरुद्गण त्याला सुखेच्छु असा जो मी तो स्तुतीनें– [तुम्हां] दिव्य जनाला मी नमस्कारानें स्तवितों; कीं जेणेंकरून आम्ही सर्व वीरांनीं युक्त, अपत्यसंपन्न [आणि] स्तुत्य अशा संपत्तीला प्रतिदिनीं पावूं.

11. I desirous of happiness approach and pray to your troop of the Maruts with a hymn—[pray to] the celestial race with an obeisance ; so that we may obtain day to day a prosperity full of all brave heroes, blessed with progeny, [and] deserving to be renowned.

---

११. यांत ऋषि मरुतांशीं बोलतो आहे. म्हणून 'तुमचा जो मरुद्गण' याचा अर्थ 'तुम्ही जे मरुद्गण' असा आहे.

सूक्त ३१–२२२.

ऋषि–गृत्समद. देवता–विश्वे देव. वृत्त–शेवटची त्रिष्टुभ्, उरलेल्या जगती छंदाच्या.

Hymn 31–222.

To *Vis've Devas.* By *Gṛitsamada.* Metre—*Jagatî*, except in the last verse where it is *Trishṭubh.*

१. हे मित्रावरुण हो, आदित्य [आणि] रुद्र [आणि] वसु यांसहित जे तुम्ही ते अन्नेच्छु, आनंदी, [आणि] वृक्षसादी पक्षी आपल्या घरट्यापासून [उडाल्या]प्रमाणें आमचे घोडे उडतात तेव्हां आमचा रथ रक्षा.

1. O Mitra and Varuṇa, do you, accompanied by the Âdityas, the Rudras, [and] the Vasus, do you preserve our chariot when [our horses] have flown away even as birds from their nest in quest of food, full of joy and perching on trees.

---

१. हें सूक्त चमत्कारिक आहे. त्याचा भावार्थ देवांनीं सूक्तवत्तयाच्या रथास रक्षावें असा आहे. हा रथ म्हणजे कोणता घ्यावयाचा तें सायण सांगत नाहींत. लढाईला अथवा देशांतरीं जावयाला निघालेल्या रथाला रक्षावयाचें असेल; यज्ञरूप रथ घ्यावयाचा नसेल. [पुढचा मंत्र पहा].

अध स्मा न उदवता सजोषसो रथं देवासो अभि विक्षु वाजयुम् ।
यदाशवः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जङ्घनन्त पाणिभिः ॥ २ ॥

अध । स्म । नः । उत् । अवत । सऽजोषसः । रथम् । देवासः । अभि । विक्षु । वाजऽयुम् ।
यत् । आशवः । पद्याभिः । तित्रतः । रजः । पृथिव्याः । सानौ । जङ्घनन्त । पाणिऽभिः ॥ २ ॥

उत स्य न इन्द्रो विश्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः ।
अनु नु स्थात्यवृकाभिरूतिभी रथं महे सनये वाजसातये ॥ ३ ॥

उत । स्यः । नः । इन्द्रः । विश्वऽचर्षणिः । दिवः । शर्धेन । मारुतेन । सुऽक्रतुः ।
अनु । नु । स्थाति । अवृकाभिः । ऊतिऽभिः । रथम् । महे । सनये । वाजऽसातये ॥ ३ ॥

भाषायाम्.

२. यद् (=यदा) आशवः (=अस्माकमश्वाः) पद्याभिः (=पदगतिभी) रजस्तित्रतः (=मार्गं क्रममाणाः सन्तः) पाणिभिः (=पादैः) पृथिव्याः सानौ जङ्घनन्त (=अत्यन्तगमनेन नादं कुर्वन्ति) अध स्म (=तदानीं) नो वाजयुम् (=अस्माकम् अन्नेच्छुं वेगवन्तं) रथम् अभि विक्षु उद् अवत (=प्रजासु जनपदेषु प्रादुर्भावयत)॥

३. उत (=अपि च) विश्वचर्षणिः (=सर्वज्ञः) [अपि च] दिवो मारुतेन शर्धेन (=द्युलोकस्य संबन्धी यो मरुद्गणस्तेन) सुक्रतुः (=शोभनपराक्रमकर्मा) स्य (=स) इन्द्रः महे सनये वाजसातये (=महते धनाय संपदे च=धनं संपदं च यथा वयं लभेमहि तथा) अवृकाभिरूतिभिः (=अहिंसकाभी रक्षाभिर्) नो रथम् अनु नु स्थाति (=अनुकूलो भूत्वा रक्षणाय तस्य समीपे तिष्ठतु) ॥

'रुद्र' हे कोण आणि वसु ते कोण व ते किती किती आहेत याविषयीं सू. ४५ मं. १ आणि टिपा पहा.

२. हे सर्व देव हो, जेव्हां [आमचे] घोडे पायांनीं मार्ग क्रमण करीत करीत [आपल्या] पायांनीं पृथिवीच्या उंचवट्यावर दणदणाट करितात, तेव्हां आमचा वेगवान् रथ लोकवस्तींत येई असें तुम्ही करा.

३. आणि स्वर्गींच्या मरुद्गणाच्या योगानें महापराक्रमी असा तो विश्वदर्शी इन्द्र आम्हांला मोठें धन [आणि] संपत्ति मिळावी म्हणून आमच्या रथाला निर्भय रक्षणांनीं रक्षो.

2. When [our] horses traversing the space with [their] paces stump with [their] hoofs on the summit of the earth, make then our racing chariot, o you united gods, to come among the people.

3. And may that Indra, all seeing, [and] powerful through the heavenly troop of the Maruts, support our chariot with beneficent helps, that we may obtain great wealth [and] affluence.

---

२. 'आमचे घोडे जेव्हां रथाला घेऊन खडकांवरून वगैरे जात असतात आणि लोकांची वस्ति सांपडत नाहीं, तेव्हां आमच्या रथाला वस्तींत घेऊन ये' असा या मंत्राचा भावार्थ दिसतो.

३. आमच्या रथाचें रक्षण करावें म्हणून इंद्र आमच्या रथाच्या मागें उभा राहो; म्हणजे मग आम्हांला पुष्कळ धन आणि संपत्ति मिळेल असा भावार्थ.

'स्वर्गींच्या'='दिवः'. ही षष्ठी अडचणीमुळें मान्य करावयाची. सायण 'स्वर्गापासून येऊन' असा अर्थ करण्यासाठीं दिवः ही पंचमी आहे असें म्हणतात.

उत स्य देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथम् ।
इळा भगो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विनावधा पती ॥ ४ ॥
उत । स्यः । देवः । भुवनस्य । सक्षणिः । त्वष्टा । ग्नाभिः । सऽजोषाः ।
जूजुवत् । रथम् ।
इळा । भगः । बृहत्ऽदिवा । उत । रोदसी इति । पूषा । पुरम्ऽधिः ।
अश्विना । अध । पती इति ॥ ४ ॥
उत त्ये देवी सुभगे मिथूदृशोषासानक्ता जगतामपीजुवा ।
स्तुषे यद्वां पृथिवि नव्यसा वचः स्थातुश्च वयस्त्रिवया उपस्तिरे ॥५॥
उत । त्ये इति । देवी इति । सुभगे इति सुऽभगे । मिथुऽदृशा । उ-
षसानक्ता । जगताम् । अपिऽजुवा ।
स्तुषे । यत् । वाम् । पृथिवि । नव्यसा । वचः । स्थातुः । च । वयः ।
त्रिऽवयाः । उपऽस्तिरे ॥ ५ ॥

भाषायाम्.

४. उत (=अपि च) स (=स=प्रसिद्धो) देवः (=दीप्तिमान्) भुवनस्य सक्षणिः (=जगतः सेव्यः स्वामिभूतस्) त्वष्टा ग्नाभिः सजोषाः (=देवपत्नीभिः संगतस्ताभिः सहितः सन्) [अस्माकं] रथं जूजुवत् (=अतिशयेन प्रेरयतु=चोदयतु)। [तथा] इळा भगः उत (=अपि च) बृहद्दिवा (=बृहद्दिवे दीप्तिमत्यौ) रोदसी (=द्यावापृथिव्यौ) पुरंधिः (=मेधावी) पूषा अध (=अपि च) पती अश्विनै (=भर्तारावश्विनौ) [रथं जूजुवत्] ॥

बृहद्दिवेति काचिद्देवीति पाश्चात्याः। बृहद्दिवा बृहद्दिवो भग इति सायणाभिप्रायः॥

५. उत (=अपि च) त्ये (=प्रसिद्धे) देवी (=दीप्तिमत्यौ) सुभगे (=सुभाग्यशालिन्यौ) मिथूदृशा (=मिथः परस्परं पश्यन्त्यौ) जगताम् अपीजुवा (=गतिमतां मनुष्यादीनां प्रेरयित्र्यौ) उषासानक्ता (=उषाश्च रात्रिश्च) [अस्माकं रथं प्रेरयन्तु]। [अपि च] हे [द्यौः] पृथिवि [च], यत् (=यस्मात्) वां नव्यसा वचः (=अतिनूतनेन स्तोत्रेण) स्तुषे (=स्तौमि) च (=अपि च) त्रिवयाः (=? "ओषधिपशुसोमात्मकानि हविर्लक्षणान्यन्नानि यस्य तादृशोहं") स्थातुर्वयः (=? स्थावरस्या-

४. आणि जगताचा प्रभु [असा] तो देदीप्यमान त्वष्टा देवपत्नींनिशीं [आमच्या] रथाला हांको. इळा, भग, आणि महातेजस्वी द्यावापृथिवी, मेधावी पूषा आणि अश्वी प्रभु [आमच्या रथाला हांकोत].

५. आणि देदीप्यमान, सौभाग्यशाली, परस्पर अदलाबदलीनें दृष्टीस पडणाऱ्या [आणि] सकळ जंगमांला प्रेरणाऱ्या त्या उषा आणि रात्र [आमच्या रथाला हांकोत]. हे [द्यावा]पृथिवी हो, ज्यापेक्षां मी अति नूतन स्तोत्रानें तुम्हांला स्तवितों आणि त्रिविध हवि घेऊन स्थावराचें अन्न [तुम्हां]पुढें ठेवितों, [त्यापेक्षां तुम्ही आमचा रथ हांका].

4. And may that brilliant Tvashṭâ, the lord of the world, together with the goddesses, drive [our] chariot. [May] Iḷâ, Bhaga, and resplendent Earth and Heaven, wise Pûshâ and the masters As'vins [drive our chariot].

5. And [may] those brilliant, blessed Ushas and Night, that appear by turns [and are] the inspirers of [all] creatures, [drive our chariot]. [And do you], o Earth [and Heaven, drive our chariot], since I praise you with a new hymn, and carrying the three kinds of food, spread before [you] the food of the moveable.

---

४. इंद्राची जशी रथाचें पाठबळ करण्याविषयीं प्रार्थना वरच्या मंत्रांत केली तशी यांत इळा, भग, द्यावापृथिवी, पूषा आणि अश्वी यांनीं रथ हांकावा अशी त्यांची प्रार्थना केली आहे.

५. या ऋचेचा उत्तरार्ध कठिण आहे. पूर्वार्धांत उषा आणि रात्र यांस रथ हांकण्याविषयीं प्रार्थना केली आहे. तशीच उत्तरार्धांतहि द्यावापृथिवींस तीच प्रार्थना केली आहे असें समजून आम्हीं भाषांतर केलें आहे. तरी ‘ त्रिविध हविरन्न घेऊन ’ (=‘ त्रिवयाः’) आणि ‘ स्थावराचें अन्न ’ यांचा अर्थ निर्विवाद रीतीनें करणें कठिण आहे. सायणांचा अर्थ भाषेखालीं दिला आहे. ‘स्थावराचें अन्न’ म्हणजे धान्यरूप अन्न असें ते म्हणतात.

उत वः शंसमुशिजामिव श्मस्यहिर्बुध्न्योऽज एकपादुत ।
त्रित ऋभुक्षाः सविता चनो दधेऽपां नपादाशुहेमा धिया शमि ६

उत । वः । शंसम् । उशिजाम्ऽइव । श्मसि । अहिः । बुध्न्यः । अजः ।
एकऽपात् । उत ।

त्रितः । ऋभुक्षाः । सविता । चनः । दधे । अपाम् । नपात् । आशुऽहेमा । धिया । शमि ॥ ६ ॥

एता वो वश्म्युद्यता यजत्रा अतक्षन्नायवो नव्यसे सम् ।
श्रवस्यवो वाजं चकानाः सप्तिर्न रथ्यो अह धीतिमश्याः॥७॥१४

एता । वः । वश्मि । उत्ऽयता । यजत्राः । अतक्षन् । आयवः । नव्यसे । सम् ।

श्रवस्यवः । वाजम् । चकानाः । सप्तिः । न । रथ्यः । अह । धीतिम् । अश्याः ॥ ७ ॥ १४ ॥

न्नम्) उपस्तिरे (=युवाभ्यां प्रयच्छामि) [अस्मात् कारणाद्युवामपि अस्माकं रथं प्रेरयतम्] ॥

स्तुषे इत्याद्युत्तरार्धो दुर्बोधः । स्थातुः स्थावरस्य व्रीह्यादेः संबन्धि वयोन्नं चरुपुरोडाशादिलक्षणमिति सायणः ॥

भाषायाम्.

६. उत (=अपि च) [हे देवाः], उशिजामिव वः शंसं श्मसि (=स्तोत्रकामिनामिव युष्माकं स्तोत्रम् उश्मसि कामयामहे=स्तोत्रकामिनो यस्माद्यूयं तस्माद्युष्मान्स्तोतुमिच्छामः) । अहिर्बुध्न्यः उत (=अपि च) अज एकपाद् त्रितः (=एतन्नामको देवः) ऋभुक्षाः (=ऋभुर्नाम देवः) सविता [तथा] आशुहेमा (=शीघ्रगामी) अपां नपात् (=उदकानां पुत्रोग्निः) शमि (=अस्मिन् यज्ञकर्मणि) धिया (=स्तोत्रेण द्वारा [अस्मभ्यं] चनो दधे (=अन्नं ददातु) ॥

शमि शमी शम्या कर्मणेति पाश्चात्याः ॥ चनस्तृप्तिरिति च त एव ॥

७. हे यजत्राः (=पूजनीया) [देवाः], एता व उद्यता [स्तोत्राणि] वश्मि (=एतानि उच्चारितानि स्तोत्राणि कामये=एतानि स्तोत्राण्युच्चारयितुमहं कामये) ।— आयवः (=यजमाना) नव्यसे (=अतिशयेन स्तुत्याय तुभ्यं देवगणाय) [तानि] सम्

६. आणि तुम्ही [स्तोत्र]-सकाम असल्यामुळें तुमचें स्तोत्र करणें आम्हांला आवडतें. अहिर्बुध्न्य आणि अज एकपाद्, त्रित, ऋभुक्षा, सविता, [आणि] शीघ्रगामी अपां-नपात् [हे] स्तुतीच्या योगानें या उपासनेंत [आम्हांला] अन्न देओत.

६. And we love to praise you as those who love [the hymn]. May Ahirbudhnya, and Aja Ekapâd, Trita, Ṛibhukshâ, Savitâ and the impetuous son of the waters give us food through our hymn in this rite.

७. हे पूजनीय [देव] हो, तुमचीं हीं [स्तोत्रें] उच्चारावयास मला आवडतें. अत्यंत स्तुत्य जे तुम्ही त्या तुम्हांप्रीत्यर्थ तीं उपासक जन रचिते झाले आहेत. हविरन्न मिळवूं इच्छिणारे [आणि] आहुतीची वांछा करणारे [जे तुम्ही, ते] रथास जोडिलेल्या अश्वाप्रमाणें [ह्या आमच्या] कर्माप्रत पावा.

7. I love to proclaim, o adorable ones, these your [praises]. The worshippers have composed them for [you] most deserving to be praised. May you, who are desirous of the sacrificial food [and] love the oblation, come to [this our] worship like a chariot-horse.

---

६. 'अहिर्बुध्न्य.' सू. १८६ मं. ५ आणि टीप पहा.

'अज एकपाद्' हें एका देवाचें नांव आहे. 'जन्मरहित आणि एकला जातो' म्हणून अज एकपाद् हें नांव पडलें आहे असें सायण म्हणतात. ह्या देवाचा निर्देश द्यावापृथिवींबरोबर येतो. अथवा 'अहिर्बुध्न्य' याजबरोबर येतो. केव्हां केव्हां दुसऱ्या देवांबरोबरहि येतो.

'त्रित' याविषयीं सू. ५२ मं. ५ आणि टीप पहा. 'ऋभुक्षा' आणि ऋभु एकच; ऋभु कोण तें सू. २० मं. १ आणि त्याजवरील टीप यांत पहा. 'अपां नपात्,' याविषयीं सू. १४३ मं. १ आणि टीप पहा.

सूक्तम् ३२–२२३.

गृत्समद ऋषिः। प्रथमा द्यावापृथिवीया। द्वे ऐन्द्र्यौ त्वाष्ट्र्यौ वा। ततो द्वे राकादेवत्ये। द्वे सिनीवालीदेवत्ये। अन्त्या गुङ्ग्वादिषड्देवताका॥ षष्ठ्याद्यास्तिस्रोऽनुष्टुभः। शिष्टाः पञ्च जगत्यः॥

अस्य मे द्यावापृथिवी ऋतायतो भूतमवित्री वचसः सिषासतः।
ययोरायुः प्रतरं ते इदं पुर उपस्तुते वसूयुर्वां महो दधे॥ १॥

अस्य। मे। द्यावापृथिवी इति। ऋतऽयतः। भूतम्। अवित्री इति। वचसः। सिसासतः।
ययोः। आयुः। प्रऽतरम्। ते इति। इदम्। पुरः। उपस्तुते इत्युपऽस्तुते। वसुऽयुः। वाम्। महः। दधे॥ १॥

अतक्षन् (=सम्यग्रचितवन्तः)। अह (=अध=अधुना) श्रवस्यवः (=हविरन्नेच्छवो) वाजं चकानाः (=उपासकैर्दत्तम् अन्नं कामयमाना) [यूयं] रथ्यः सप्तिर्न (=रथे युक्तोऽश्व इव) धीतिम् (=अस्माभिः क्रियमाणामिमामुपासनाम्) अश्याः (=प्राप्नुयाः =प्राप्नुत)॥

देवगणस्यैकत्वापेक्षया नव्यसे इत्यत्र अश्या इत्यत्र चैकवचनप्रयोगः। पाश्चात्यास्तु नव्यसे नवतरं यथा तथेति॥

भाषायाम्.

१. हे द्यावापृथिवी (=द्यावापृथिव्यौ), ऋतायतः (=सत्यं यज्ञमिच्छतः) सिषासतः (=वां संभक्तुमिच्छतो) मे (=मम) अस्य [क्रियमाणस्य] वचसः (=स्तोत्रस्य) अवित्री (=अवित्र्यौ=पालयित्र्यौ) भूतं (=भवतम्)। ययोर् [युवयोर्द्यावापृथिव्योर्] आयुः (=बलं) प्रतरं (=प्रकृष्टतरं महत्तरं) [भवति] ते उपस्तुते (=उपेत्य सर्वैः स्तुते) वां वसूयुः (=धनेच्छुरहम्) इदं पुरः (=अस्मिन् स्थाने सर्वेषां पुरतो) महो दधे (=बहु विदधे=बहु करोमि=बहुमन्ये)॥

सूक्त ३२–२२३.

ऋषि– गृत्समद. देवता १ली द्यावापृथिवी यांविषयीं; २ आणि ३ या इन्द्राविषयीं अथवा त्वष्ट्याविषयीं असें समजावें; ४ आणि ५ ह्या दोन राका देवीविषयीं; ६ आणि ७ ह्या सिनीवाली ह्या देवीविषयीं; ८वी ऋचा गुंगू, सिनीवाली, राका, सरस्वती, इन्द्राणी आणि वरुणानी या सहा देवींविषयीं. वृत्त– सहावी, सातवी आणि आठवी ह्या तीन अनुष्टुभ्, उरलेलें सर्व सूक्त जगती छंदाचें.

१. हे द्यावापृथिवी हो, मज उपासनेच्छूचें [आणि तुम्हांला] भजूं इच्छिणाऱ्याचें [जें] हें स्तोत्र [त्या]च्या तुम्ही रक्षक व्हा. ज्यांचें बळ अतिशय मोठें त्या तुम्हां [सर्व]स्तुत [द्यावापृथिवीं]ला धनेच्छु मी हा येथें पूजितों.

Hymn 32–223.

To *Heaven* and *Earth* (verse 1); *Indra* or *Tvashṭâ* (vs. 2, 3); *Râkâ* (4, 5); *Sinîvâlî* (6,7); to *Gungû*, *Sinîvâlî*, *Râkâ*, *Sarasvatî*, *Indrâṇî* and *Varuṇâṇî* (v. 8). Metre—*Jagatî* except in the last three verses where it is *Anushṭubh*.

1. Be you the championesses, o Heaven and Earth, of this hymn of mine who am desirous of sacrificing, [and] desirous of worshipping. I who am desirous of wealth thus honour you here—you whose might [is] exceeding great, [and] who are praised [by all].

---

१. 'बळ'='आयुः'. आयुष्य असाहि अर्थ चालेल.

'पूजितों'='महो दधे.' अक्षरशः अर्थ, मोठ्या अथवा पूज्य रीतीनें ठेवितों, मनांत धरितों; अर्थात् बहुमान देतों. सू. १५३ मं. १ आणि त्याजवरील 'अत्यंत' याविषयींची टीप पहा.

मा नो गुह्या रिप आयोरहन्दभन्मा न आभ्यो रीरधो दुच्छुनाभ्यः ।
मा नो वि यौः सख्या विद्धि तस्य नः सुम्नायता मनसा तत्त्वेमहे २

मा । नः । गुह्याः । रिपः । आयोः । अहन् । दभन् । मा । नः । आभ्यः । रीरधः । दुच्छुनाभ्यः ।

मा । नः । वि । यौः । सख्या । विद्धि । तस्य । नः । सुम्नऽयता । मनसा । तत् । त्वा । ईमहे ॥ २ ॥

अहेळता मनसा श्रुष्टिमा वह दुहानां धेनुं पिप्युषीमसश्चतम् ।
पद्याभिराशुं वचसा च वाजिनं त्वां हिनोमि पुरुहूत विश्वहा ॥३॥

अहेळता । मनसा । श्रुष्टिम् । आ । वह । दुहानाम् । धेनुम् । पिप्युषीम् । असश्चतम् ।

पद्याभिः । आशुम् । वचसा । च । वाजिनम् । त्वाम् । हिनोमि । पुरुऽहूत । विश्वहा ॥ ३ ॥

भाषायाम्.

२. आयोः (=शत्रुलक्षणस्य मनुष्यस्य) गुह्या रिपः (=ज्ञातुमशक्या हिंसारूपा माया) अहन् (=अहनि कस्मिन्नपि दिने) मा नो दभन् (=अस्मान् मा हिंसिषुः) । नः (=अस्मान्) आभ्यो दुच्छुनाभ्यः (=तादृशीनां दुःखकर्त्रीणाम् अरातीनां वशं मा नैषीः) । नः सख्या (=अस्माकं सख्यानि त्वत्सदृशैः सह सखित्वानि) मा वि यौः (=मा वियुक्तानि कार्षीः=मा नाशय) । सुम्नायता मनसा (=सुम्नम् आत्मन इच्छता मनसा) त्वत् त्वा ईमहे (=यत्त्वां याचामहे) तस्य नो विद्धि (=अस्माकं तस्य प्रार्थनस्य जानीहि=अनुग्रहात्मिकया बुद्ध्या तद्बोध) ॥

३. अहेळता मनसा (=अक्रुध्यता=अनुग्रहात्मिकया बुद्ध्या) श्रुष्टिं (=सुखकरीं) दुहानां (=दोग्ध्रीं) पिप्युषीं (=पीनाम्) असश्चतम् (=असङ्गां=सततधारायुक्तां) धेनुं (=गाम्) आ वह (=आनय) । हे पुरुहूत (=बहुभिराहूत) [इन्द्र], पद्याभिराशुं (=? पादगतिभिः शीघ्रगामिनं) वचसा च वाजिनं (=? शब्देन वेगवन्तं) त्वां विश्वहा हिनोमि (=विश्वेषु दिनेषु प्रीणयामि) ॥

पद्याभिराशुं वचसा च वाजिनम् इत्यतिशयेन दुर्बोधम् ।

२. शत्रूच्या गुप्त माया [कोणत्याहि] दिवशीं आमचा घात न करोत; तसल्या दुःखकारी शत्रूच्या स्वाधीन आम्हांस करूं नको. तूं आमची मैत्री तोडूं नको. सुखाची इच्छा करणाऱ्या अंतःकरणानें आम्ही तुजकडे मागून घेत आहों, तर आमची ही [प्रार्थना] तूं मनास आण.

३. क्रोध न करणाऱ्या मनानें सुखदायक, दूध देणारी, पुष्ट आणि समृद्धिकारक [अशी] गाय तूं आम्हांला घेऊन ये. पायांच्या चालींनीं शीघ्रगामी आणि ध्वनीनें वेगवान् असा जो तूं त्या तुला, हे पुरुहूता, मी प्रतिदिनीं भजतों.

2. May the secret intrigues of the [hostile] man never hurt us on any day. Do not subject us to such evil-doers. Do not deprive us of our friendships. Grant the prayer which we are advancing with a heart wishing for thy blessing.

3. With a pleased heart bring [us] a useful, milching, fat and prosperous cow. I propitiate daily, o thou invoked by many, thee impetuous with thy movements and swift with thy sound.

२. 'शत्रूच्या गुप्त माया'='आयोगुह्या रिपः'. म्हणजे शत्रूंनीं आमच्या नाशासाठीं जे गुह्य पाश रचिले असतील किंवा जे गुह्य उपाय योजिले असतील ते.

३. 'पायांच्या चालीनें शीघ्रगामी आणि ध्वनीनें वेगवान्'='पद्याभिराशुं वचसा च वाजिनम्'. हें भाषांतर अक्षरशः आम्हीं केलें आहे, परंतु त्याच्या भावार्थाविषयीं संशय आहे. कदाचित् मोठ्या वेगानें चालणाऱ्या आणि ओरडणाऱ्या घोड्याप्रमाणें लवकर धांवून येतो असा जो इंद्र त्याला मी भजतों असा भावार्थ असावा.

राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ॥४॥
राकाम् । अहम् । सुऽहवाम् । सुऽस्तुती । हुवे । शृणोतु । नः । सुऽभगा । बोधतु । त्मना ।
सीव्यतु । अपः । सूच्या । अच्छिद्यमानया । ददातु । वीरम् । शतऽदायम् । उक्थ्यम् ॥ ४ ॥
यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥ ५ ॥
याः । ते । राके । सुऽमतयः । सुऽपेशसः । याभिः । ददासि । दाशुषे । वसूनि ।
ताभिः । नः । अद्य । सुऽमनाः । उपऽआगहि । सहस्रऽपोषम् । सुऽभगे । रराणा ॥ ५ ॥

भाषायाम्.

४. सुहवां (=सुलभाह्वानां) राकां [नाम देवीं] सुस्तुती (=शोभनया स्तुत्या) हुवे (=आह्वयामि) सुभगा (=शोभनभाग्यवती) [सा] नः शृणोतु बोधतु त्मना (=अस्माकं स्तोत्रं शृणोतु तच्च जानातु)। अच्छिद्यमानया (=अच्छिन्नया) सूच्या अपः सीव्यतु (=अस्माकं कर्म संतनोतु)। शतदायं (=शतधनदायिनम्) उक्थ्यं (=प्रशस्यं) वीरं (=वीर्यवन्तं पुत्रं) ददातु [च] ॥

संपूर्णचन्द्रा पौर्णमासी तदभिमानिनी देवीति सायणस्याभिप्रायः ॥

५. हे राके यास्ते (=तव) सुपेशसः सुमतयः (=शोभनरूपा अनुग्रहात्मिका बुद्धयः) [सन्ति] याभिश् [च] दाशुषे वसूनि ददासि (=हविर्दत्तवते यजमानाय धनानि प्रयच्छसि) ताभिः [सुमतिभिस्] [त्वम्] अद्य [दिने] सुमनाः [सती] [अपि च] हे सुभगे (=शोभनभाग्यवति), सहस्रपोषं रराणा (=सहस्रसंख्याकां वृद्धिं ददती सती) नः उपागहि (=अस्मान् प्रति आगच्छ) ॥

४. जिचें आह्वान करणें सुलभ होय त्या राकेला मी चांगल्या स्तुतीनें बोलावितों, ती सौभाग्यशाली [राका] आमची [स्तुति] ऐको [आणि] मनास आणो. न मोडणाऱ्या सुईनें ती [आमची] उपासना सिवो. [आणि] शेकडो संपत्ति मिळविणारा आणि स्तुतियोग्य असा शूर पुत्र देओ.

4. I invoke with an excellent hymn Râkâ, easy to be invoked. May blessed [Râkâ] hear and grant our [prayer]. May she sew our rite with a needle that does not break. May she give us a brave son that shall win hundreds of riches and shall be deserving of praise.

५. हे राके, तुझे जे सुंदर प्रसाद, [कीं] ज्यांहीं तूं हविर्दात्या यजमानाला धनें देतीस त्यांसहित तूं आज प्रसन्न होत्साती आम्हांजवळ ये, आणि हे सुभाग्यसंपन्न [राके], हजारो प्रकारच्या संपत्ति पुष्कळ दे.

5. O Râkâ, come thou this day to us, being gracious [towards us] with those beautiful favours which belong to thee [and] with which thou givest wealth to the sacrificer, granting, o blessed one, abundance consisting of a thousand gifts.

---

४. 'न मोडणाऱ्या सुईनें आमची उपासना सिवो '=' सीव्यतु अपः सूच्या अच्छिद्यमानया.' म्हणजे आमचें जें यज्ञरूप कर्म त्याचे निरनिराळे भाग अशा रीतीनें रचो कीं, ते विलग आहेत असें न दिसतां सर्व कर्म सांग आणि पूर्ण आहे असें दिसेल.

५. ' राका ' ही एक क्षुद्र देवी वेदांत केव्हां केव्हां येते. सायण म्हणतात, ही पौर्णमासीरूप देवी होय. परंतु वेदकाळीं तसा अर्थ होत होता असें ' राका ' हें नांव जेथें जेथें येतें त्या त्या वाक्यांवरून दिसतें असें नाहीं.

सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।
जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥ ६ ॥

सिनीवालि । पृथुऽस्तुके । या । देवानाम् । असि । स्वसा ।
जुषस्व । हव्यम् । आऽहुतम् । प्रऽजाम् । देवि । दिदिड्ढि । नः ॥६॥

या सुबाहुः स्वङ्गुरिः सुषूमा बहुसूवरी ।
तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ॥ ७ ॥

या । सुऽबाहुः । सुऽअङ्गुरिः । सुऽसूमा । बहुऽसूवरी ।
तस्यै । विश्पत्न्यै । हविः । सिनीवाल्यै । जुहोतन ॥ ७ ॥

या गुङ्गूर्या सिनीवाली या राका या सरस्वती ।
इन्द्राणीमह्व ऊतये वरुणानीं स्वस्तये ॥ ८ ॥ १५ ॥ ३ ॥

या । गुङ्गूः । या । सिनीवाली । या । राका । या । सरस्वती ।
इन्द्राणीम् । अह्वे । ऊतये । वरुणानीम् । स्वस्तये ॥ ८ ॥ १५ ॥३॥

भाषायाम्.

६. हे पृथुस्तुके (=बहुकेशसंघाते) सिनीवालि [नाम देवि], या [त्वं] देवानां स्वसासि [सा त्वम्] आहुतं हव्यम् (=अस्माभिर्दत्तं हविर्) जुषस्व (=सेवस्व)। हे देवि, नः प्रजां दिदिड्ढि (=दर्शय=देहि) ॥

दृष्टचन्द्रामावास्या सिनीवाली । इति सायणः ॥

७. [हे यजमानाः], या सुबाहुः (=शोभनबाहुः) [या] स्वङ्गुरिः (=शोभनाङ्गुलियुक्ता) [या] सुषूमा (=सुष्ठु प्रसवित्री) [या] बहुसूवरी (=बह्वीनां प्रजानां सवित्री) [च भवति] तस्य विश्पत्न्यै (=विशां स्वामिन्यै) सिनीवाल्यै हविर्जुहोतन (=हविर्जुहुत) ॥

८. या गुङ्गूर् [नाम देवी] या सिनीवाली या राका या सरस्वती [तामाह्वयामि] [अपि च] इन्द्राणीं [नाम देवीं] वरुणानीं [च नाम देवीम्] ऊतये स्वस्तये (=रक्षणाय कल्याणाय च) अह्वे (=आह्वयामि) ॥

अत्र गुङ्गूशब्देन राकासिनीवाल्योः साहचर्यात्कुहूरुच्यते । इति सायणः ॥

६. हे सुकेशभार सिनीवाली, जी देवांची बहीण होस ती तूं [हें आम्हीं] अर्पण केलेलें हवि सेव. हे देवी, तूं आम्हांला संतति दे.

६. O Sinîvâlî of plentiful hair, do thou who art the sister of the gods enjoy the proffered oblation. Give us progeny, o goddess!

७. जी चांगल्या बाहूंची, चांगल्या अंगुल्यांची, जिचा प्रसव चांगला, जी पुष्कळ मुलांला जन्म देणारी, त्या विश्वस्वामिनी सिनीवालीला, [हे उपासक हो], तुम्ही हव्य अर्पण करा.

7. She who has good arms, she who has good fingers, she who is of easy parturition, she who gives birth to many [children] —to that Sinîvâlî, offer oblation, [o sacrificers]!

८. जी गुंगू, जी सिनीवाली, जी राका, जी सरस्वती, [त्यांला] [आणि] इन्द्राणीला [आणि] वरुणानीला, मी रक्षणासाठीं [आणि] कल्याणासाठीं बोलावितों.

8. [She] who [is] Gungû, [she] who [is] Sinîvâlî, [she] who [is] Râkâ, [she] who [is] Sarasvatî, [her] I have invoked for protection [and] for prosperity.

६. ‘सिनीवाली.’ हेंहि एका क्षुद्र देवतेचें नांव आहे. सायण म्हणतात कीं ही अमावास्यारूप देवी होय. हिजविषयीं ज्ञाला तरी विशेष कांहीं इतिहास ठाऊक नाहीं.

८. ‘गुंगू.’ ह्या देवीच्या स्वरूपाविषयीं कांहीं ठाऊक नाहीं. हें नांव ऋग्वेदांत पुनः आलेलें नाहीं. सायण म्हणतात ‘कुहू’ नांवाची देवी आणि ही एकच होय. कुहू म्हणजे ज्या दिवशीं चंद्रकला दिसत नाहीं तशी अमावास्या.

‘सरस्वती.’ सू. ३ मं. १० आणि टीप पहा.

‘इन्द्राणी’ आणि वरुणानी’ यांविषयीं सू. २२ मं. १२ पहा.

सूक्तम् ३३–२२४.

गृत्समद ऋषिः । रुद्रो देवता । त्रिष्टुप् छन्दः ॥

आ ते॑ पितर्मरुतां सु॒म्नमे॑तु॒ मा नः॒ सूर्य॑स्य सं॒दृशो॑ युयोथाः ।
अ॒भि नो॑ वी॒रो अर्व॑ति क्षमेत॒ प्र जा॑येमहि रुद्र प्र॒जाभिः॑ ॥ १ ॥

आ । ते॒ । पि॒तः॒ । म॒रु॒ता॒म् । सु॒म्नम् । ए॒तु॒ । मा । नः॒ । सूर्य॑स्य । सम्ऽदृशः॑ । यु॒यो॒थाः॒ ।
अ॒भि । नः॒ । वी॒रः । अर्व॑ति । क्ष॒मे॒त॒ । प्र । जा॒ये॒म॒हि॒ । रु॒द्र॒ । प्र॒ऽजाभिः॑ ॥ १ ॥

त्वाद॑त्तेभी रुद्र॒ शंत॑मेभिः श॒तं हिमा॑ अशीय भेष॒जेभिः॑ ।
व्य१॒॑स्मद्द्वेषो॑ वित॒रं व्यंहो॒ व्यमी॑वाश्चातयस्वा॒ विषू॑चीः ॥ २ ॥

त्वाऽद॑त्तेभिः । रु॒द्र॒ । शम्ऽत॑मेभिः । श॒तम् । हिमाः॑ । अ॒शी॒य॒ । भे॒ष॒जेभिः॑ ।
वि । अ॒स्मत् । द्वेषः॑ । वि॒ऽत॒रम् । वि । अंहः॑ । वि । अमी॑वाः । चा॒त॒य॒स्व॒ । विषू॑चीः ॥ २ ॥

भाषायाम्.

१. हे मरुतां पितः [रुद्र], ते सुम्नं (=तव सुखम्) आ एतु (=अस्मान् आगच्छतु)। सूर्यस्य संदृशः (=दर्शनात्) नः (=अस्मान्) मा युयोथाः (=मा पृथक्कार्षीः) सूर्यदर्शनमस्माकं मा भूदिति कदापि मा कार्षीः)। नो वीरः (= अस्माकं वीर्यवान् पुत्रः) अर्वति अभि क्षमेत (=शत्रौ अभिभवतु=शत्रून् अभिभवतु)। हे रुद्र, प्रजाभिः (=पुत्रपौत्रैः) प्र जायेमहि (=प्रभूताः स्याम) ॥

२. हे रुद्र, त्वादत्तेभिः (=त्वया दत्तैः) शंतमेभिः (=अतिशयेन सुखकरैर्) भेषजेभिः (=औषधैः) शतं हिमाः (=शतं संवत्सरान्) अशीय (=प्राप्नुयाम्)। अस्मत् द्वेषः (=शत्रुं) वि [चातयस्व] (=विनाशय) अंहः (=पापं) वितरम् (=अत्यन्तं) वि [चातयस्व] विषूचीः (=नानाञ्चतीर्) अमीवाः (=रोगान्) वि चातयस्व (=विनाशय) ॥

सूक्त ३३–२२४.

ऋषि–गृत्समद. देवता–रुद्र. वृत्त–त्रिष्टुभ्.

१. हे मरुतांच्या पित्या, तुझें कल्याण येऊं दे. सूर्याच्या दर्शनाचा आणि आमचा वियोग तूं करूं नको. आमचा वीर्यवान् पुत्र शत्रूचा पराभव करो. हे रुद्रा, आम्ही पुत्रपौत्रांनीं वाढूं असें कर.

२. हे रुद्रा, त्वां दिलेलीं जीं अत्यंत सुखकारक औषधें त्यांहीं मी शंभर वर्षांप्रत पावेन असें तूं कर. तूं आम्हांपासून शत्रूला [नाहींसा कर], पाप अगदी ना[हींसें कर], सर्वत्र पसरणारे रोग नाहींसे कर.

HYMN 33–224.

To *Rudra.* By *Gritsamada.* Metre—*Trishtubh.*

1. May thy blessing come, o father of the Maruts! Do not separate us from the sight of the sun. May our brave son subdue the enemy. May we be multiplied with sons and grandsons.

2. May we attain, o Rudra, a hundred winters by the most healing medicaments given by Thee. [Drive] away enemies from us, [drive] sin far away, drive away disease reaching everywhere.

---

१. हें सूक्त ‘ रुद्र ’ या देवाविषयीं आहे. रुद्र हा देव कोण आहे त्याविषयीं सू. ४३ मं. १ आणि टीप पहा.

‘ तुझें कल्याण ’=‘ ते सुम्नम्.’ म्हणजे जें कल्याण तूं करित असतोस तें आम्हांप्रत येओ.

‘ शत्रूचा पराभव करो ’=‘ अर्वति अभि क्षमेत.’ हा अर्थ सायणानुसार केला आहे आणि आम्हांला वाटतें तो निराधार नाहीं. ‘ अर्वन् ’ शब्दाचा अर्थ घोड्यावर बसलेला मनुष्य, घोडेसवार असा वेदांत प्रसिद्ध आहे. त्यावरून घोड्यावर बसलेला शत्रु असा अर्थ संभवतो.

हें सूक्त वैदिक कर्म करणाऱ्या लोकांत प्रसिद्ध आहे. तें ‘ ग्रहयज्ञ ’, ‘गर्भाधान’, ‘ शांतिसूक्त ’, ‘ तुळापुरुष ’; ‘ दुष्टजननशांति ’, ‘ मूळशांति ’, ‘अंत्येष्टी ’मधील ‘ एकादशाह-वृषोत्सर्ग ’ यांत वगैरे म्हणण्याची चाल पडली आहे.

२. रोग बरे करणें हें रुद्राचें काम आहे याविषयीं सू. ४३ मं. १ पहा.

या मंत्रावरून प्राचीन म्हणजे कृतयुगांतील ऋषि शंभर वर्षें मनुष्य जगलें म्ह-

श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो ।
पर्षि णः पारमंहसः स्वस्ति विश्वा अभीती रपसो युयोधि ॥ ३ ॥

श्रेष्ठः । जातस्य । रुद्र । श्रिया । असि । तवःऽतमः । तवसाम् । वज्रबाहो इति वज्रऽबाहो ।
पर्षि । नः । पारम् । अंहसः । स्वस्ति । विश्वाः । अभिऽइतीः । रपसः । युयोधि ॥ ३ ॥

मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती ।
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ॥ ४ ॥

मा । त्वा । रुद्र । चुक्रुधाम । नमःऽभिः । मा । दुःऽस्तुती । वृषभ । मा । सऽहूती ।
उत् । नः । वीरान् । अर्पय । भेषजेभिः । भिषक्ऽतमम् । त्वा । भिषजाम् । शृणोमि ॥ ४ ॥

भाषायाम्.

३, हे रुद्र, [त्वं] श्रिया (=ऐश्वर्येण) जातस्य श्रेष्ठोसि (=जगतः प्रशस्यतमो भवसि) । हे वज्रबाहो, [त्वं] तवसां तवस्तमः (=प्रबलानां मध्ये प्रबलतमो) [भवसि] नः (=अस्मान्) अंहसः पारम् (=पापस्यापरतीरं) स्वस्ति (=क्षेमेण) पर्षि (=नय) । रपसः (=व्याधेर्) विश्वा अभीतीः (=सर्वाण्यभिगमनानि) युयोधि (=अस्मत् पृथक्कुरु=अपगमय) ॥

४. हे रुद्र, त्वा (=त्वां) नमोभिः (=नमनैर्) मा चुक्रुधाम (=क्रुद्धं मा कार्ष्म)। हे वृषभ (=स्वामिन्), दुष्टुती (=दुःस्तुत्या) मा [क्रोधयाम] । सहूती (=अन्यैर्देवैः सह सामान्येनाह्वानेन) मा [क्रोधयाम] । नो वीरान् (=अस्माकं पुत्रपौत्रादीन् रोगेण भूमौ पतितान्) भेषजेभिरुदर्पय (=औषधैरुन्नमय=नीरोगान् कुरु) । त्वा (=त्वां) भिषजां भिषक्तमं शृणोमि (=त्वं वैद्यानां मध्ये श्रेष्ठो वैद्यो भवसीति शृणोमि) ॥

३. हे रुद्रा, तूं यशानें जगतांत श्रेष्ठ आहेस; हे वज्रबाहू [रुद्रा], तूं बळवंतांत अत्यंत बळवान् [आहेस]. तूं आम्हांला सुखरूपपणानें पापाच्या पार ने. तूं व्याधीची सर्व प्राप्ति नाहींशी कर.

४. हे रुद्रा, तूं आमच्या नमनांनीं क्रुद्ध होऊं नको; हे प्रभू, आमच्या वाईट स्तुतीनें अथवा [दुसऱ्या देवां]बरोबर आह्वान केलें म्हणून तूं क्रुद्ध होऊं नको. तूं औषधांनीं आमच्या वीरांला उठीव. तूं वैद्यांमध्यें श्रेष्ठ वैद्य [आहेस] असें मी ऐकिलें आहे.

3. Thou, o Rudra, art the greatest in creation with [thy] glory, the mightiest of the mighty, o wielder of the thunderbolt! Take us safely to the end of sin. Take away all approaches of disease.

4. May we never offend thee, o Rudra, with [our] adorations, [may we] never [offend thee] with a bad praise, never with a joint invocation. Raise up our heroes with medicaments. I have heard thee [to be] the best physician of physicians.

णजे मोठें भाग्य झालें असें मानीत ही गोष्ट स्पष्ट होते, दहा हजार वर्षें जगणें शक्य आहे असें त्यांस वाटत नसे.

हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै॥५॥१६

हवीमऽभिः । हवते । यः । हविःऽभिः । अव । स्तोमेभिः । रुद्रम् । दिषीय ।
ऋदूदरः । सुऽहवः । मा । नः । अस्यै । बभ्रुः । सुऽशिप्रः । रीरधत् । मनायै ॥ ५ ॥ १६ ॥

उन्मा ममन्द वृषभो मरुत्वान्त्वक्षीयसा वयसा नाधमानम् ।
घृणीव छायामरपा अशीया विवासेयं रुद्रस्य सुम्नम् ॥ ६ ॥

उत् । मा । ममन्द । वृषभः । मरुत्वान् । त्वक्षीयसा । वयसा । नाधमानम् ।
घृणिऽइव । छायाम् । अरपाः । अशीय । आ । विवासेयम् । रुद्रस्य । सुम्नम् ॥ ६ ॥

भाषायाम्.

५. यो [रुद्रो] हवीमभिर्हविर्भिः (=आह्वानैर्हव्यैश्च) हवते (=हूयते) [तं] रुद्रं स्तोमेभिः अव दिषीय (=स्तोत्रैरपगतक्रोधं करवाणि)। ऋदूदरः (=? मृदूदरः =कोमलान्तःकरणः) सुहवः (=शोभनाह्वानः=सुलभाह्वानो) बभ्रुः (=बभ्रुवर्णः) सुशिप्रः (=सुवदनः) [स] नः (=अस्मान्) अस्यै मनायै (=तस्यै मनायै=तस्मै स्वकीयाय प्रसिद्धाय क्रोधाय) मा रीरधत् (=मा वशं नयतु)॥

६. वृषभः (=प्रभुर्) मरुत्वान् (=मरुद्भिर्युक्तो) [रुद्रो] नाधमानं (=नाथमानं याचमानं) मा (=मां) त्वक्षीयसा वयसा (=दीप्तेनान्नेन) उन्ममन्द (=उत्कर्षेण तर्पयतु)। घृणीव छायां [रुद्रस्य सुम्नम्] अरपा अशीय (=यथा कश्चित् सूर्यकिरणसंतप्तश्छायां प्रविशति तथा रुद्रदत्तं सुखम् अहं प्रविश्य अपापो भवेयम्)। रुद्रस्य सुम्नम् आ विवासेयं (=रुद्रदत्तं सुखं परिचरणेन प्राप्नुयाम्)॥

घृणीवेति पदं घृणिरिवेत्यर्थकम्॥

५. ज्या रुद्राला आह्वानांनीं आणि हवींनीं आळवितात [तो] रुद्र माझ्या स्तोत्रांनीं शांत होओ. कोमळ अंतःकरणाचा, आह्वानांनीं सहज प्राप्त होणारा, बभ्रु वर्णाचा, [आणि] सुवदन असा जो रुद्र तो आम्हांला आपल्या क्रोधाच्या स्वाधीन न करो.

5. May I pacify with hymns Rudra who is invoked with calls [and] offerings. May he of the kind heart, easy to be invoked, of tawny colour, of beautiful features, never surrender us to his wrath.

६. मरुद्युक्त [रुद्र] प्रभु मज याचकाला महाप्रबळ अन्नाच्या योगें तृप्त करो. संतापलेला [मनुष्य] जसा छायेप्रत पोंहचून निर्दुःख होतो तसा मी छायेप्रत पावेन असें होओ. रुद्राच्या प्रसादाला माझी उपासना मिळवील असें होओ.

6. May the Lord [Rudra], accompanied by the Maruts, gratify me the supplicant with splendid food. May I harmless enter [into Rudra's blessing] even as one [enters] the shade [when] oppressed by the sun : may I gain Rudra's blessing by worshipping.

---

५. 'कोमळ अंतःकरणाचा '=' ऋदूदरः' हा शब्द कठिण आहे. परंतु दुसरे ठिकाणीं आला आहे तीं ठिकाणें पाहून अर्थ केला आहे. आम्हांला वाटतें कीं तो बरोबर आहे.

'आपल्या क्रोधाच्या स्वाधीन ' इ. 'असै मनायै.' अक्षरशः 'त्या क्रोधाच्या स्वाधीन.' म्हणजे तो जो रुद्राचा प्रसिद्ध क्रोध त्याच्या स्वाधीन.

क्वं१ स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः ।
अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः ॥ ७ ॥

क्वं । स्यः । ते । रुद्र । मृळयाकुः । हस्तः । यः । अस्ति । भेषजः । जलाषः ।

अपऽभर्ता । रपसः । दैव्यस्य । अभि । नु । मा । वृषभ । चक्षमीथाः॥७॥

प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि ।
नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम ॥ ८ ॥

प्र । बभ्रवे । वृषभाय । श्वितीचे । महः । महीम् । सुऽस्तुतिम् । ईरयामि ।

नमस्य । कल्मलीकिनम् । नमःऽभिः । गृणीमसि । त्वेषम् । रुद्रस्य । नाम ॥ ८ ॥

भाषायाम्.

७. हे रुद्र, यो भेषजः (=औषधकृत्) जलाषः (=सुखकरश्) [च] अस्ति स्य ते मृळयाकुर्हस्तः (=स तव सुखयिता हस्तः) क्व [भवति] ? दैव्यस्य रपसः (=देवकृतस्य दुःखस्य) अपभर्ता (=अपगमयिता) [त्वं] मा (=मां) हे वृषभ (=प्रभो), नु (=क्षिप्रम्) अभि चक्षमीथाः (=अभिक्षमस्व) ॥

८. बभ्रवे (=बभ्रुवर्णाय) श्वितीचे (=शुचये) वृषभाय (=प्रभवे रुद्राय) महो महीं सुस्तुतिं प्रेरयामि (=महतोपि यन्महत्तरं स्तोत्रं तादृशं तदर्थमुच्चारयामि) । [हे मित्र], कल्मलीकिनं (=ज्वलन्तं=दीप्तिमन्तं) [रुद्रं] नमोभिर्नमस्य (=स्तोत्रैः पूजय) । रुद्रस्य त्वेषं नाम (=दीप्तिमन्तं प्रतापं) गृणीमसि (=स्तुमः) ॥

७. हे रुद्रा, तुझा तो सुख देणारा हस्त कोठें [आहे] कीं जो बरें करणारा [आणि] सुख देणारा होय? हे प्रभू, दैविक दुःखाचा अपहर्ता असा तूं मजवर कृपा कर.

८. पीत वर्णाचा [आणि] सोज्वळ असा जो प्रभु [रुद्र] त्याप्रीत्यर्थ मी मोठ्यापेक्षांहि मोठी स्तुति उच्चारितों. दीप्तिमान् [रुद्रा]ला तूं स्तवनांनीं पूज. रुद्राचा तेजस्वी प्रताप आम्ही वर्णितों.

7. Where, o Rudra, is that beneficent hand of thine which cures and which comforts? Remover of celestial distress do thou, o lord, be gracious unto me.

8. I send forth a hymn greater than a great one for the tawny and resplendent lord. Worship, [o friend], the burning Rudra with supplications. We praise the mighty valour of Rudra.

---

७. 'बरें करणारा आणि सुख देणारा हस्त'='भेषजो जलाषः.' म्हणजे औषध देऊन बरें करून त्याच्या योगें सुख होई असें करणारा.

'दैविक दुःखाचा'='दैव्यस्य रपसः'. जें दुःख अथवा प्रसंग देवांच्या क्रोधामुळें आला असेल त्याला नाहींसा करणारा.

स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम् ॥ ९ ॥

स्थिरेभिः । अङ्गैः । पुरुऽरूपः । उग्रः । बभ्रुः । शुक्रेभिः । पिपिशे । हिरण्यैः ।
ईशानात् । अस्य । भुवनस्य । भूरेः । न । वै । ऊं इति । योषत् । रुद्रात् । असुर्यम् ॥ ९ ॥

अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम् ।
अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति १०।१७

अर्हन् । बिभर्षि । सायकानि । धन्व । अर्हन् । निष्कम् । यजतम् । विश्वऽरूपम् ।
अर्हन् । इदम् । दयसे । विश्वम् । अभ्वम् । न । वै । ओजीयः । रुद्र । त्वत् । अस्ति ॥ १० ॥ १७ ॥

भाषायाम्.

९. पुरुरूपः (=बहुभी रूपैरूपेत) उग्रः (=प्रबलो) बभ्रुः (=बभ्रुवर्णो) [रुद्रः] स्थिरेभिः (=दृढतरैः) शुक्रेभिः (=दीप्तिमद्भिर्) हिरण्यैः (=हिरण्मयैर्) अङ्गैः (=अवयवैः) पिपिशे (=दीप्यते)। अस्य भुवनस्य भूरेरीशानात् (=अस्य जगतो महतः प्रभो) रुद्रात् असुर्यं न वा उ योषत् (=बलं नैव पृथग्भवतु विनश्यतु) ॥

वृत्रादीनां हननाय व्याधीनां चापहरणाय सदैव प्रबलोस्त्विति भावः ॥

१०. [हे रुद्र], अर्हन् सायकानि धन्व बिभर्षि (=स्थाने धनुर्बाणांश्च धारयसि)। अर्हन् यजतं विश्वरूपं निष्कं [बिभर्षि] (=स्थाने पूजनीयं बहुविधरूपयुक्तं हारं धारयसि)। अर्हन्निदम् अभ्वं विश्वं दयसे (=स्थाने इदमपि विस्तीर्णं जगद्रक्षसि)। हे रुद्र, त्वत् न वा ओजीयः अस्ति (=त्वद् बलवत्तरं किमपि नास्त्येव) ॥

९. बहुरूप, पीत वर्णाचा [आणि] बलवान् [असा जो रुद्र तो] दृढ, दीप्तिमान् [आणि] सुवर्णमय अंगांनीं शोभतो. या जगताचा महा ईश्वर जो रुद्र त्यापासून बळ कधींहि दूर न होओ.

१०. [हे रुद्रा], तूं जो बाण आणि धनुष्य धारण करितोस त्याला तूं योग्य आहेस. तूं जो पूजनीय [आणि] बहुरूप हार घालितोस त्याला तूं योग्य आहेस. तूं जो हें विस्तीर्ण विश्व रक्षितोस त्याला तूं योग्य आहेस. हे रुद्रा, तुजपेक्षां अधिक प्रबल कांहीं नाहीं.

9. Of many forms, mighty, of tawny colour, he shines with limbs solid, bright and golden. From Rudra, the great lord of this world may power never be taken away.

10. Deservedly dost thou carry a bow [and] arrows. Deservedly [dost thou wear] the adorable [and] omniform necklace. Deservedly dost thou protect this vast universe. Nothing, indeed, is mightier than thee, o Rudra.

---

९. ‘बळ त्यापासून कधींहि दूर न होओ’=‘न वा उ योषत् रुद्रात् असुर्यम्.’ म्ह० राक्षसादिकांस मारावयास आणि रोग नाहींसे करावयास वगैरे जें बळ पाहिजे तें रुद्राच्या अंगीं सदैव राहो.

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपन्तु सेनाः ॥ ११ ॥

स्तुहि । श्रुतम् । गर्तऽसदम् । युवानम् । मृगम् । न । भीमम् । उपऽहत्नुम् । उग्रम् ।
मृळ । जरित्रे । रुद्र । स्तवानः । अन्यम् । ते । अस्मत् । नि । वपन्तु । सेनाः ॥ ११ ॥

कुमारश्चित्पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम् ।
भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे ॥ १२ ॥

कुमारः । चित् । पितरम् । वन्दमानम् । प्रति । ननाम । रुद्र । उपऽयन्तम् ।
भूरेः । दातारम् । सत्ऽपतिम् । गृणीषे । स्तुतः । त्वम् । भेषजा । रासि । अस्मे इति ॥ १२ ॥

भाषायाम्.

११. [हे स्तोतः], श्रुतं (=प्रख्यातं) गर्तसदं (=रथे निषण्णं) युवानम् (=अजरं) मृगं न भीमं (=सिंहमिव भयंकरम्) उपहत्नुं (=शत्रुघातकम्) उग्रं (=बलवन्तम्) [एतादृशं रुद्रं] स्तुहि । हे रुद्र, स्तवानः (=स्तुतः सन्) जरित्रे मृळ (=स्तोत्रे सुखकरो भव) । ते (=तव) सेना अस्मदन्यं नि वपन्तु(=निघ्नन्तु)॥ सेना बाणा इति पाश्चात्याः ॥

१२. हे रुद्र, उपयन्तं वन्दमानं पितरं कुमारश्चित् (=उपेत्य आयुष्मान् भव सौम्येति स्तुवन्तं पितरं यथा पुत्रो नमति तथा) [त्वां] प्रति ननाम (=अहं प्रतिनतोस्मि) । भूरेर्दातारं (=प्रभूतस्य धनस्य दातारं) सत्पतिं (=सतां प्रभुं) [त्वां] गृणीषे (=अहं स्तौमि) । स्तुतस्त्वम् अस्मे (=अस्मभ्यं) भेषजा रासि (=औषधानि देहि) ॥

११. कीर्तिमान्, रथावर बसलेला, अजर, सिंहाप्रमाणें भयंकर, शत्रुघातक आणि बलवान् अशा रुद्राला स्तव. हे रुद्रा, स्तविला होत्साता तूं स्तोत्यावर कृपा कर. तुझ्या सेना आम्हांहून दुसऱ्यांना मारोत.

११. Praise him who is renowned, who sits high in his chariot, who is ever young, awful like the lion, destructive, mighty. Being praised, do thou favour the poet, o Rudra! Let thy armies cut down one other than us.

१२. जवळ येऊन कुर्वाळणाऱ्या पित्याला जसा पुत्र [नमन करितो त्या]प्रमाणें हे रुद्रा, मी तुला नमन केलें आहे. महा संपत्ति देणाऱ्या तुज सत्पतीला मी स्तवीत आहें. स्तविला होत्साता तूं आम्हांस औषधें दे.

12. I have bowed to thee, o Rudra, even as a son [bows] to his father who comes to him and blesses him. I praise [thee] the giver of much and the lord of the good. Being praised do thou give healing remedies unto us.

या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु ।
यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि॥१३॥

या । वः । भेषजा । मरुतः । शुचीनि । या । शम्ऽतमा । वृषणः । या । मयःऽभु ।
यानि । मनुः । अवृणीत । पिता । नः । ता । शम् । च । योः । च । रुद्रस्य । वश्मि ॥ १३ ॥

परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्मही गात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥१४॥

परि । नः । हेतिः । रुद्रस्य । वृज्याः । परि । त्वेषस्य । दुःऽमतिः । मही । गात् ।
अव । स्थिरा । मघवत्ऽभ्यः । तनुष्व । मीढ्वः । तोकाय । तनयाय । मृळ ॥ १४ ॥

भाषायाम्.

१३. हे मरुतः, वः (=युष्मदीयानि) या भेषजा शुचीनि (=यानि भेषजानि आरोग्यहेतुभूतान्यौषधानि निर्मलानि सन्ति) या शंतमा (=यानि शंतमानि आरोग्यकरतमानि) [अपि च] हे वृषणः (=वीर्यवन्तो मरुतः), या मयोभु (=यानि मयोभूनि=सुखकर्तॄणि) यानि नः पिता मनुः (=अस्माकं मनुष्याणां मनुर्नाम पिता) अवृणीत (=अकामयत) ता रुद्रस्य शं च योश्च (=सुखं च कल्याणं च सुखरूपाणि कल्याणरूपाणि च) [भेषजानि] वश्मि (=अहं कामये)॥

१४. रुद्रस्य हेतिः (=आयुधं) नः परि वृज्याः (=अस्मान् परि वर्जयतु=अस्मदुपरि मा पततु)। त्वेषस्य (=दीप्तस्य) [रुद्रस्य] मही दुर्मतिः (=महती क्रोधात्मिका मतिः) परि गात् (=अस्मान्वर्जयित्वान्यत्र गच्छतु)। हे मीढ्वः (=दाता रुद्र), मघवद्भ्यः (=हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्यः) स्थिरा (=स्थिराणि त्वदीयानि धनूंषि) अव तनुष्व (=अवततज्यानि कुरु=शिथिलज्यानि कुरु=मा बाणान् प्रक्षिप)। तोकाय तनयाय मृळ (=अस्मत्पुत्राय तत्पुत्राय च सुखकरो भव)॥

१३. हे मरुतांनो. जीं तुमचीं निर्मळ औषधें, जीं अत्यंत सुख देणारीं, [आणि] हे प्रबळ मरुत् हो, जीं बरें करणारीं, जीं आमचा पिता मनु वरिता झाला, तीं रुद्राचीं सुखदायक आणि कल्याणकारक औषधें मी याचितों.

१४. रुद्राचें शस्त्र आम्हांला सोडो, तेजस्वी [रुद्रा]चा महा क्रोध अन्यत्र जाओ. हे महोदार [रुद्रा], तूं हविर्दात्या उपासकांसाठीं [तुझीं] धनुष्यें सैल कर, [आणि] आमच्या मुलांवर आणि नातवंडांवर कृपा कर.

13. Those medicaments of yours, o Maruts, which [are] pure, which, o brave ones, [are] most healing, which [are] givers of comfort, those which our father Manu prayed for, those healing and comforting [medicaments] of Rudra I desire.

14. May the missile of Rudra pass by us, may the great wrath of resplendent [Rudra] go elsewhere.—Slacken, o bounteous [Rudra], the radius of thy bow for the sacrificing worshippers and be gracious to [our] children and to [our] grandchildren.

---

१३. 'आमचा पिता मनु'='नः पिता मनुः'. म्हणजे मनुष्याचा मूळपुरुष मनु या नांवाचा सू. ३६ मं. १० पहा.

f 3

एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि ।
हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः ॥ १५ ॥१८॥

एव । बभ्रो इति । वृषभ । चेकितान । यथा । देव । न । हृणीषे ।
न । हंसि ।
हवनऽश्रुत् । नः । रुद्र । इह । बोधि । बृहत् । वदेम । विदथे ।
सुऽवीराः ॥ १९ ॥ १८ ॥

भाषायाम्.

१५. हे बभ्रो (=बभ्रुवर्ण) चेकितान (=सर्वज्ञ) देव (=दीप्तिमन्) [रुद्र], यथा [त्वं] न हृणीषे न हंसि [च] एव [त्वां स्तुतवन्तः स्मः] (=त्वं यथा न क्रुध्यसि न च हंसि तथा त्वामेवं प्रकारेण स्तुतवन्तः स्मः-) । इह (=एवं सति) हे रुद्र, [त्वं] नो हवनश्रुत् बोधि (=आह्वानश्रोता भव) । [तथा सति] सुवीराः (=शोभनवीर्योपेतपुत्रपौत्रैः सहिता वयं) विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=ब्रूयाम) ॥

सूक्तम् ३४–२२५.

गृत्समद ऋषिः । मरुतो देवता । अन्त्या त्रिष्टुप् शिष्टा जगत्यः ॥

धारावरा मरुतो धृष्ण्वोजसो मृगा न भीमास्तविषीभिरर्चिनः ।
अग्नयो न शुशुचाना ऋजीषिणो भृमिं धमन्तो अप गा अवृण्वत
॥ १ ॥

धारावराः । मरुतः । धृष्णुऽओजसः । मृगाः । न । भीमाः । तवि-
षीभिः । अर्चिनः ।
अग्नयः । न । शुशुचानाः । ऋजीषिणः । भृमिम् । धमन्तः । अप ।
गाः । अवृण्वत ॥ १ ॥

भाषायाम्.

१. धारावराः (=वृष्टिधारया सर्वमावृण्वन्तो) धृष्ण्वोजसः (=शत्रूणां धर्षकेण बलेन युक्ता) मृगा न भीमाः (=सिंहा इव भयंकरास्) तविषीभिरर्चिनः (=तेजो-

१५. हे बभ्रुवर्ण, सर्वज्ञ, देदीप्यमान प्रभू [रुद्रा], तूं रागावूं नयेस [आणि] तूं मारूं नयेस म्हणून [आम्हीं तुला स्तविलें आहे]. तर हे रुद्रा, तूं आमचें आह्वान ऐकणारा हो. चांगल्या वीरांनीं युक्त होत्साते आम्ही यज्ञांत तुझी मोठी कीर्ति गाऊं असें कर.

15. Thus [have we praised thee], o tawny-coloured lord, o all-knowing [and] resplendent one, that thou mayest not be angry, that thou mayest not kill. Be, therefore, o Rudra, the hearer of our invocation. [And] may we, accompanied by brave sons, chant great praises [to thee] in the sacrifice.

---

१५. या सूक्ताविषयीं शौनक असें म्हणतात कीं, "कृष्ण पक्षांतील चतुर्दशी दिवशीं उपोषण करून 'आ ते' हें जें रुद्राविषयींचें सूक्त त्यांतील एकेक ऋचा म्हणून प्रतिऋचेला शुचिर्भूत आणि वाग्यत होऊन चरु अर्पण करावा; पूर्वी तुपाच्या आहुति देऊन आणि शंकराची उपासना करून जें हवीचें शेष राहील तें भक्षून राहावें म्हणजे तसें करणारा पौर्णिमेच्या दिवशीं मृत्यूला जिंकून रोगांपासून मुक्त होईल." अशा प्रकारांनींच बहुतकरून या सूक्ताचें महत्त्व वाढलें आहे. अजूनहि शौनकाची उक्ति जागृत आहे.

सूक्त ३४–२२५.

ऋषि–गृत्समद. देवता–मरुत्. वृत्त–शेवटची ऋचा त्रिष्टुभ्; उरलेलें सर्व सूक्त जगती वृत्ताचें.

Hymn 34–225.

To the *Maruts*. By *Gṛitsamada*. Metre—*Jagatî*, except in the last verse where it is *Trishṭubh*.

१. वृष्टिधारेनें सर्व आच्छादणारे, शत्रूचा उपमर्द करणाऱ्या बळानें युक्त, सिंहांप्रमाणें भयंकर, तेजांनीं देदीप्यमान, अग्नींप्रमाणें तेजःपुञ्ज, [आणि] सोमपान करणारे मरुत् वादळ फुंकून गाई मोकळ्या करिते झाले.

1. The Maruts blew the whirlwind and set the cows free,—they who cover [everything] with rain, who are endowed with overpowering strength, terrific like lions, [and] brilliant with splendors, glowing like fires, drinkers of the soma.

द्यावो न स्तृभिश्चितयन्त खादिनो व्य१भ्रिया न द्युतयन्त वृष्टयः ।
रुद्रो यद्वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र ऊधनि २

द्यावः । न । स्तृऽभिः । चितयन्त । खादिनः । वि । अभ्रियाः । न । द्युतयन्त । वृष्टयः ।
रुद्रः । यत् । वः । मरुतः । रुक्मऽवक्षसः । वृषा । अजनि । पृश्न्याः । शुक्रे । ऊधनि ॥ २ ॥

भिर्दीप्ता) अग्नयो न शुशुचानाः (=अग्नय इव ज्वलन्तः) ऋजीषिणः (=अपगत-सारसोमयुक्ताः=सोमयुक्ता) मरुतो भृमिं धमन्तः (=भ्रममाणं मेघं प्रेरयन्तः सन्तो) गा अपावृण्वत (=अब्रूपा गा उदघाटयन्) ॥

भाषायाम्.

२. हे रुक्मवक्षसः (=आभरणं वक्षसि येषां तादृशा) मरुतः, यद् (=यदा) वृषा (=वीर्यवान्) रुद्रो वः (=युष्मान्) पृश्न्याः (=पृश्निनाम्न्या युष्माकं मातुः) शुक्रे ऊधनि (=दीप्ते योनौ) अजनि (=उदपादयत्) [तदा] खादिनः (=कटकयुक्ता यूयं) द्यावः स्तृभिर्न (=द्युप्रदेशा नक्षत्रैरिव) चितयन्त (=अशोभध्वम्) [अपि च] वृष्टयः (=१ वृष्टिकर्तारो यूयम्) अभ्रिया न (=विद्युत इव) द्युतयन्त (=जगत्प्राकाशयत) ॥

१. ' सोमपान करणारे '=' ऋजीषिणः'. सू. ६४ मं.१२ आणि टीप पहा.
' गाई.' म्हणजे मेघोदकरूप गाई. त्यांची मोकळीक वृत्राच्या प्रतिबंधापासून बहुतकरून इंद्र करितो; पण केव्हां-केव्हां मरुतांसारिखे दुसरेहि देव करितात.

२. हे साभरणवक्ष मरुतांनो, जेव्हां वीर्यवान् रुद्र तुम्हांला पृश्नीच्या शुद्ध पोटीं उत्पन्न करिता झाला, तेव्हां तुम्ही द्युलोक जसा नक्षत्रांनीं शोभतो तसे आपल्या कड्यांनीं शोभलां, वृष्टिकारक तुम्ही विजांप्रमाणें [जगताला] प्रकाशविते झालां.

2. When, o ye Maruts wearing golden ornaments on your breasts, puissant Rudra begot you in the brilliant womb of Pris'ni, you adorned with the rings shone even as does the firmament with the stars, you the makers of rain illuminated [the world] like lightnings.

---

२. रुद्र हा मरुतांचा पिता आणि पृश्नि ही त्यांची आई होय याविषयीं सू. ३८ मं. ४,७ पहा.

रुद्रापासून मरुतांची उत्पत्ति प्रश्नीच्या उदरीं झाली तेव्हां मरुत् कसे शोभले तें यांत सांगितलें आहे.

'साभरणवक्ष'='रुक्मवक्षसः'. सू. १६६ मं. १० पहा.

'कड्यांनीं.' मरुत् आपल्या अंगावर कडीं (खादयः) घालितात याविषयीं सू. १६६ मं. ९ आणि टीप पहा.

उक्षन्ते अश्वाँ अत्याँ इवाजिषु नदस्य कर्णैस्तुरयन्त आशुभिः ।
हिरण्यशिप्रा मरुतो दविध्वतः पृक्षं याथ पृषतीभिः समन्यवः ३

उक्षन्ते । अश्वान् । अत्यान्ऽइव । आजिषु । नदस्य । कर्णैः । तुरयन्ते । आशुऽभिः ।
हिरण्यऽशिप्राः । मरुतः । दविध्वतः । पृक्षम् । याथ । पृषतीभिः । सऽमन्यवः ॥ ३ ॥

पृक्षे ता विश्वा भुवना ववक्षिरे मित्राय वा सदमा जीरदानवः ।
पृषदश्वासो अनवभ्रराधस ऋजिप्यासो न वयुनेषु धूर्षदः ॥ ४ ॥

पृक्षे । ता । विश्वा । भुवना । ववक्षिरे । मित्राय । वा । सदम् । आ । जीरऽदानवः ।
पृषत्ऽअश्वासः । अनवभ्रऽराधसः । ऋजिप्यासः । न । वयुनेषु । धूःऽसदः ॥ ४ ॥

भाषायाम्.

३. आजिषु अत्यान् इव [मरुतः] अश्वान् उक्षन्ते (=यथा पणधावनेषु शीघ्रगामिनोश्वान् उक्षितान् बलवतः कुर्वन्ति=वेगवतः कुर्वन्ति तथा मरुतः स्वकीयान् अश्वान् बलवतः कुर्वन्ति) । नदस्य कर्णैराशुभिः (=महतो नादस्य करणैः कर्तृभिः शीघ्राश्वैस्) तुरयन्ते (=वर्षणार्थं त्वरितं गच्छन्ति) । हे हिरण्यशिप्राः (=सुवर्णमयशिरस्त्राणा) मरुतः, हे समन्यवः (=समानबुद्धयः), दविध्वतः (=सर्वेषां कम्पयितारो यूयं) पृषतीभिः (=श्वेतबिन्द्वङ्किताभिर्मृगीभिः) पृक्षं याथ (=हविरन्नवन्तं यजमानं गच्छथ) ॥

४. सदम् आ (=सदैव) जीरदानवः (=क्षिप्रदाना) [मरुतो] मित्राय वा पृक्षे (=मित्रायेव हविर्दत्तवते यजमानाय) ता विश्वा भुवना (=तानि विश्वानि भुवनानि=सर्वमिदं जगत्) ववक्षिरे (=प्रवृद्धं चक्रुः=सुखकरैः पदार्थैर्युक्तं कुर्वन्ति) । पृषदश्वासः (=श्वेतबिन्दुयुक्ता मृग्य एवाश्वा येषां ते) अनवभ्रराधसः (=भ्रंशनरहितं धनं येषां ते) वयुनेषु ऋजिप्यासो धूर्षदो न (=यज्ञकर्मसु धुरंधरा ऋजुगामिनोश्वा इव गच्छन्तो) [मरुतो विश्वानि भुवनानि ववक्षिरे] ॥

३. [मरुत्] शर्यतींत वारूला [चेतविल्या]प्रमाणें [आपल्या] अश्वांला चेतवितात. महानाद करणारे जे त्यांचे चपळ घोडे त्यांहीं ते धांवतात. हे सुवर्णशिरस्त्र मरुतांनो, हे समानबुद्धीचे [मरुत हो], सर्वांला कांपवून टाकणारे असे जे तुम्ही ते तुमच्या पांढरे ठिबके असलेल्या हरिणींनीं हविर्दात्याप्रत जात असतां.

3. [The Maruts] inspirit their horses as people inspirit their chargers in races. They rush with steeds that make the roar. You, o Maruts, o you who wear golden crowns, o you who possess a common intellect, you go to the sacrificer with your spotted deer, you the violent shakers.

४. सदैव शीघ्रधन [असे मरुत्] एकाद्या मित्रासाठीं केल्याप्रमाणे हविर्दात्या यजमानासाठीं या सर्व विश्वाचा उत्कर्ष करितात. श्वेतबिंदुहरिणाश्व, अक्षय संपत्ति देणारे [आणि] कर्मांमध्यें सरळ धांवणाऱ्या धुरंधर अश्वांसारिखे मरुत् [सकळ विश्वाचा उत्कर्ष करितात].

4. The [Maruts], ever the givers of quick wealth, prosper this world for the sacrificer as for a friend,—they who have the spotted deer for their horses, who give eternal gifts, [and] who run straight to the rites like horses joined to the pole.

---

३. मरुतांविषयीं सूक्तें आलीं म्हणजे तीं कठिण असतात असा जो नियम त्याप्रमाणें हें सूक्त ही कठिण आहे. हा मंत्रहि त्यांत कठिण आहे. याच्या पूर्वार्धांत 'उक्षन्ते' आणि 'नदस्य कर्णैः' या शब्दांचा अर्थ निर्विवाद अशा रीतीनें सांगवत नाहीं; त्यामुळेंच ही ऋचा कठिण आहे. तात्पर्य असें दिसतें: 'शर्यतींत घोडे जसे धांववितात त्याप्रमाणें मरुत् आपल्या घोड्यांस मोठे (म्ह. बळवान्) करून हांकितात. ते गर्जना करणाऱ्या घोड्यांनीं धांवतात आणि यजमानाकडेस जात असतात.'

'चेतवितात'='उक्षन्ते.' 'वक्ष' धातूचा अर्थ वाढणें असा वेदांत होतो त्याचें हें रूप आहे असें समजल्याशिवाय उपाय नाहीं. त्यापासून, 'वाढविणें' 'बळवान् करणें,' 'वेगवान् करणें.'

इन्धन्वभिर्धेनुभी रप्शदूधभिरध्वस्मभिः पथिभिर्भ्राजदृष्टयः ।
आ हंसासो न स्वसराणि गन्तन मधोर्मदाय मरुतः समन्यवः ॥ ५ ॥ १९ ॥

इन्धन्वऽभिः । धेनुऽभिः । रप्शदूधऽभिः । अध्वस्मऽभिः । पथिऽभिः । भ्राजत्ऽऋष्टयः ।
आ । हंसासः । न । स्वसराणि । गन्तन । मधोः । मदाय । मरुतः । सऽमन्यवः ॥ ५ ॥ १९ ॥

आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि गन्तन ।
अश्वामिव पिप्यत धेनुमूधनि कर्ता धियं जरित्रे वाजपेशसम् ॥ ६ ॥

आ । नः । ब्रह्माणि । मरुतः । सऽमन्यवः । नराम् । न । शंसः । सवनानि । गन्तन ।
अश्वाम्ऽइव । पिप्यत । धेनुम् । ऊधनि । कर्त । धियम् । जरित्रे । वाजऽपेशसम् ॥ ६ ॥

भाषायाम्.

५. हे भ्राजदृष्टयः (=दीप्यमानायुधाः) समन्यवः (=समानमनस्का) मरुतः, इन्धन्वभिः (=समिन्धनवतीभिस्तेजस्विनीभी) रप्शदूधभिः (=महोधस्काभिर्) धेनुभिः (=गोभिर्युक्ताः सन्तस्तादृशीर्धेनूरुपासकेभ्यो दातव्या गृहीत्वा यूयम्) अध्वस्मभिः पथिभिः (=ध्वंसनरहितैर्मार्गैः) हंसासः स्वसराणि न (=हंसा यथा स्वावासस्थानानि गच्छन्ति तथा) मधोर्मदाय आ गन्तन (=मधुरस्य सोमस्य हर्षाय आगच्छत=आगच्छत आगम्य च सोमपानेन हृष्टा भवत) ॥

६. हे समन्यवः (=समानमनस्का) मरुतः, नरां न शंसः (=नृभिर्मनुष्यैः शंसनीयः स्तवनीय इन्द्रो यथागच्छति तथा) नः ब्रह्माणि (=स्तोत्राणि) सवनानि (=सोमाभिषवणानि=अभिषुतान् सोमान्) आ गन्तन (=आगच्छत)। अश्वामिव धेनुम् (=? अस्माकं गाम्) ऊधनि पिप्यत (=पीनावयवां कुरुत)। जरित्रे (=स्तोतुरर्थं च) धियं (=तत्कृतं कर्म) वाजपेशसं कर्ता (=अन्नरूपम्=अन्नाङ्कितम्=अन्नयुक्तं कुरुत) ॥

५. हे देदीप्यमान भाले धारण करणारे [मरुत्] हो, तुम्ही तेजःपुंज, [आणि] मोठ्या कासांच्या धेनु घेऊन पतनरहित मार्गांनीं, हंस आपल्या घरट्यांप्रत धांवल्याप्रमाणें, हे समानमनस्क मरुतांनो, मधुर सोमरसाच्या हर्षासाठीं इकडे या.

5. O Maruts, who carry burning spears, come ye, for the exhilaration of the sweet soma along safe roads even as flamingoes [run] to their nests, bringing with you flaming cows of great udders, o ye Maruts who have one common mind.

६. हे समानमनस्क मरुतांनो, मनुष्यांनीं स्तवनीय [इन्द्र] जसा [येतो] तसे तुम्ही आमच्या स्तोत्रांप्रत [आणि] सोमांप्रत या. घोडीप्रमाणें गाईला तिचे कासेंत पुष्ट करा. स्तोत्रकर्त्या उपासकाची उपासना अन्नसंपन्न करा.

6. O Maruts who have one common mind, do you come to our hymns and libations like [Indra] the praised of men. Fatten the cow in the udder like a mare, [and] make the worship of the poet rich in food.

'सुवर्णशिरस्त्र'='हिरण्यशिप्राः' म्हणजे ज्यांला सोन्याचे मुकुट आहेत असे.

'कांपविणारे'='दविध्वतः'. सू. ८७ मं. ३ आणि टीप पहा.

'पांढरे ठिबके असलेल्या हरिणी='पृषतीभिः'. सू. ३७ मं. २ आणि टीप पहा.

४. 'कर्मामध्यें सरळ धांवणाऱ्या अश्वांसारिखे'=ऋजिप्यासो न वयुनेषु धूर्षदः'. म्हणजे रथास जोडिलेले घोडे जसे सरळ येतात त्याप्रयाणें यजमानाचें यजनकर्म होत असेल तेथें सरळ आणि त्वरित धांवत येणारे.

---

५. 'धेनु घेऊन'='धेनुभिः.' म्हणजे आम्हां उपासकांस देण्याकरितां तेजस्वी आणि मोठ्या कासेचा (पुष्कळ दूध देणाऱ्या) गाई घेऊन ये.'

'समानमनस्क'='समन्यवः'. म्हणजे सर्व मिळून एकाच मनानें जणुं वागणारे.

'सोमरसाच्या हर्षासाठीं'. म्हणजे सोमरस पिऊन हर्ष पावावा म्हणून.

६. 'नरांनीं स्तवनीय [इन्द्र]'=

तं नो॑ दात मरुतो वा॒जिनं॒ रथ॑ आपा॒नं ब्रह्म॑ चि॒तय॑द्दि॒वेदि॑वे ।
इषं॑ स्तो॒तृभ्यो॑ वृ॒जने॑षु का॒रवे॑ स॒निं मे॒धामरि॑ष्टं दु॒ष्टरं॒ सहः॑ ॥ ७ ॥

तम् । नः॒ । दा॒त॒ । म॒रु॒तः॒ । वा॒जिन॑म् । रथे॑ । आ॒पा॒नम् । ब्रह्म॑ । चि॒तय॑त् । दि॒वेऽदि॑वे ।
इष॑म् । स्तो॒तृऽभ्यः॑ । वृ॒जने॑षु । का॒रवे॑ । स॒निम् । मे॒धाम् । अरि॑ष्टम् । दु॒स्तर॑म् । सहः॑ ॥ ७ ॥

यद्यु॒ञ्जते॑ म॒रुतो॑ रु॒क्मव॑क्षसोऽश्वा॒न्रथे॑षु॒ भग॒ आ सु॒दान॑वः ।
धे॒नुर्न शिश्वे॒ स्वस॑रेषु पिन्वते॒ जना॑य रा॒तह॑विषे म॒हीमिष॑म् ॥८॥

यत् । यु॒ञ्जते॑ । म॒रुतः॑ । रु॒क्मऽव॑क्षसः । अश्वा॑न् । रथे॑षु । भगे॑ । आ । सु॒ऽदान॑वः ।
धे॒नुः । न । शिश्वे॑ । स्वस॑रेषु । पि॒न्व॒ते॒ । जना॑य । रा॒तऽह॑विषे । म॒हीम् । इष॑म् ॥ ८ ॥

भाषायाम्.

७. हे मरुतः, नः (=अस्मभ्यं) रथे तं वाजिनं (=रथे योज्यं प्रसिद्धबलम् अश्वं) दात (=प्रयच्छत) [तथा] दिवेदिवे (=प्रतिदिनं) [देवान्] आपानं चित्यत् (=प्राप्नुवत् प्रख्यापयच्च) ब्रह्म (=स्तोत्रं) [शिक्षयत] । स्तोतृभ्य इषं (=स्तोत्रकृद्भ्योऽन्नं) वृजनेषु (=संग्रामेषु च) कारवे (=कवये) सनिं (=धनं) मेधां (=युद्धप्रज्ञानम्) अरिष्टं दुस्तरं सहः (=अहिंसितम् अजेतव्यं च बलं) [दात=प्रयच्छत]॥

८. रुक्मवक्षसः (=रोचमानाभरणोरस्काः) सुदानवः (=शोभनदाना) मरुतो यत् (=यदा) भगे आ रथेषु (=? भगभूतेषु रथेषु=भाग्ययुक्तेषु रथेषु) अश्वान् युञ्जते [तदा] स्वसरेषु शिश्वे धेनुर्न (=गोष्ठेषु प्रस्नुतस्तनी धेनुर्यथा शिशवे वत्साय पिनुते पयःपूर्णा भवति दुग्धं ददाति तथा) रातहविषे जनाय (=दत्तहविष्काय यजमानाय) महीम् इषं (=महतीमिषं विपुलमन्नं) पिन्वते (=सिञ्चन्ति=दुग्धधारावत् प्रयच्छन्ति)॥

७. हे मरुतांनो, तुम्ही आम्हांस रथाला वारू द्या. [आणि] नित्य देवांप्रत पोंहचणारें आणि [त्यांची] ख्याति करणारें स्तोत्र [शिकवा]. स्तोत्यांला अन्न आणि उपासकांला युद्धांत धन, बुद्धि आणि अप्रतिहत आणि अजिंक्य बळ [द्या].

८. ज्यांच्या वक्षःस्थळीं अलंकार आहेत आणि जे चांगल्या देणग्या देणारे, ते मरुत् जेव्हां आपल्या सौभाग्य-रथाला घोडे जोडितात तेव्हां एकादी धेनु जशी गोठयांमध्यें वत्सासाठीं पान्हा सोडिते त्याप्रमाणें ते हवि देत असणाऱ्या जनासाठीं विपुळ अन्नाचा पान्हा सोडितात.

7. Give, o Maruts, to us the mighty horse for our chariot and [teach us] a hymn that shall daily reach and praise [the gods]. [Give] food to the praisers, [and] to the worshipper [give] in battles wealth, wisdom and strength irresistible and unconquerable.

8. When the Maruts, who wear ornaments on their breasts and who bestow excellent gifts, join their horses to their blissful chariots, they give copious food to the man who has offered an oblation, even as a milch-cow gives milk to her calf in the cow-fold.

'नरां शंसः'. नराशंसः म्हणजे अग्नि किंवा इन्द्र होईल. परंतु मरुतांचा संबंध इन्द्राशीं विशेष असल्यामुळें, इंद्र येईल आणि तुम्हीहि या, अशा अर्थासाठीं इंद्र असा अर्थ करावा.

यो नो मरुतो वृकताति मर्त्यो रिपुर्दधे वसवो रक्षता रिषः ।
वर्तयत तपुषा चक्रियाभि तमव रुद्रा अशसो हन्तना वधः ॥९॥

यः । नः । मरुतः । वृकऽताति । मर्त्यः । रिपुः । दधे । वसवः । रक्षत । रिषः ।
वर्तयत । तपुषा । चक्रिया । अभि । तम् । अव । रुद्राः । अशसः । हन्तन । वधरिति ॥ ९ ॥

चित्रं तद्वो मरुतो याम चेकिते पृश्न्या यदूधरप्यापयो दुहुः ।
यद्वा निदे नवमानस्य रुद्रियास्त्रितं जराय जुरतामदाभ्याः॥१०॥२०

चित्रम् । तत् । वः । मरुतः । याम । चेकिते । पृश्न्याः । यत् । ऊधः । अपि । आपयः । दुहुः ।
यत् । वा । निदे । नवमानस्य । रुद्रियाः । त्रितम् । जराय । जुरताम् । अदाभ्याः ॥ १० ॥ २० ॥

भाषायाम्.

९. हे वसवः (=साधवो) मरुतः, यो मर्त्यो नो वृकताति (=? अस्माकं धनानाम् अपहर्ता सन्) रिपुर्दधे (=शत्रुः क्रियते भवति) [तस्य] रिषः (=हिंसाया) [अस्मान्] रक्षत । तं तपुषा चक्रिया (=तापयित्र्या ऋष्टयाख्यया शक्त्या) अभि वर्तयत (=अस्मत्पराङ्मुखं निवर्तयत) । हे रुद्राः (=रुद्रस्य पुत्रा मरुतः), अशसः (=निन्दकस्य जनस्य) वधः (=घातकम् आयुधम्) अव हन्तन (=हत्वा अपक्षिपत) ॥

१०. हे मरुतः, यत् (=यदा) आपयः (=बन्धवो भवन्तः) पृश्न्या ऊधः (=अन्तरिक्षरूपाया गोरूधः) अपि दुहुः (=दुहन्ति) [तथा] यत् (=यदा) वा हे रुद्रियाः (=रुद्रपुत्रा मरुतः), नवमानस्य (=युष्माकं स्तोतुर्) निदे (=निन्दकाय) निन्दकस्य शासनार्थं [याथ] [यदा च] हे अदाभ्याः (=अहिंसा मरुतः), त्रितं जुरतां जराय (=त्रितनामर्षिं हिंसतां हिंसनाय) [याथ] तत् (=तदानीं) वो याम चित्रं चेकिते (=युष्माकं गमनं मनोहरं दृश्यते) ॥

९. हे कल्याणकारक मरुत् हो, जो मर्त्य आमचा अपहारकर्ता होऊन शत्रु होतो त्या घातकापासून तुम्ही आमचें संरक्षण करा. त्याला तुमच्या जाज्वल्य चक्रानें मागें फिरवा; हे रुद्रपुत्रांनो, निंदकाचें मारक शस्त्र तोडून खालीं पाडा.

9. O beneficent Maruts, preserve us from that maleficent mortal, who robbing us becomes our enemy. Turn him back with your burning disc; cut down, o sons of Rudra, the deadly weapon of the reviler.

१०. हे मरुतांनो, तुम्ही सर्व बंधु मिळून जेव्हां पृश्नीच्या कासेचें दोहन करितां आणि जेव्हां हे रुद्रपुत्र हो, तुमच्या स्तोत्याची निंदा करणाऱ्या जनाच्या शासनाला जातां, आणि हे अहिंस्य [मरुतांनो], त्रिताला उपद्रव करणाऱ्या लोकांच्या शासनासाठीं जेव्हां तुम्ही जातां, तेव्हां तुमचें गमन रमणीय दिसतें

10. Your march, o Maruts, appears wonderful when you brothers milk the udder of Pris'ni, when, o sons of Rudra, [you go forth] for punishing] the reviler of your praiser, [and when], o irresistible ones, [you go] for punishing the oppressors of Trita.

---

९. 'निंदकाचें मारक शस्त्र तोडून खालीं पाडा.'='अशसः वधः अव हन्तन.' म्हणजे देवांची आणि देवभक्तांची स्तुति न करितां उलटी त्यांची निंदा करणारे जे देवशत्रु, त्यांणीं आम्हांला मारण्यासाठीं शस्त्रप्रहार केला असतां तें शस्त्र आम्हांवर पडूं देऊं नका, तर मध्येंच त्याचे तुकडे करून फेकून द्या.

१०. 'पृश्नीचे कासेचें दोहन करितां'='पृश्न्या ऊधः अपि दुहुः'. म्हणजे सर्व मरुत् हेच जे बंधु ते मिळून अंतरिक्षरूप गाईला दोहतात; म्ह० मेघवृष्टि करितात इतकेंच तात्पर्य. पृश्नीविषयीं सू. २३ मं. १० पहा.

'रुद्रपुत्र.' सू. ३८ मं. ४,७ पहा.

'त्रित' हा कोणी एक ऋषि होय असें सायण म्हणतात.

तान्वो महो मरुत एवयाव्नो विष्णोरेषस्य प्रभृथे हवामहे ।
हिरण्यवर्णान्ककुहान्यतस्रुचो ब्रह्मण्यन्तः शंस्यं राध ईमहे ॥११॥

तान् । वः । महः । मरुतः । एवऽयाव्नः । विष्णोः । एषस्य । प्रऽभृथे । हवामहे ।
हिरण्यऽवर्णान् । ककुहान् । यतऽस्रुचः । ब्रह्मण्यन्तः । शंस्यम् । राधः । ईमहे ॥ ११ ॥

ते दशग्वाः प्रथमा यज्ञमूहिरे ते नो हिन्वन्तूषसो व्युष्टिषु ।
उषा न रामीररुणैरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा॥१२॥

ते । दशऽग्वाः । प्रथमाः । यज्ञम् । ऊहिरे । ते । नः । हिन्वन्तु । उषसः । विऽउष्टिषु ।
उषाः । न । रामीः । अरुणैः । अप । ऊर्णुते । महः । ज्योतिषा । शुचता । गोऽअर्णसा ॥ १२ ॥

भाषायाम्.

११. विष्णोः (=व्यापकस्य) एषस्य (=गमनवतो=वेगवतः) [सोमस्य] प्रभृथे (=प्रार्पणे सति=तादृशं सोमम् अर्पयित्वा) महः (=महत) एवयाव्नः (=अश्वगामिनस्) तान् वः (=तानि युष्मान्) मरुतो [वयं] हवामहे (=आह्वयामः) । यतस्रुचः (=आहुतित्यागायोद्यतस्रुचो) ब्रह्मण्यन्तः (=स्तोत्रमिच्छन्तः स्तुवन्तो) [वयं] हिरण्यवर्णान् (=सुवर्णवर्णान्) ककुहान् (=श्रेष्ठान्) [युष्मान्] शंस्यं राधः (=प्रशंसनीयं धनम्) ईमहे (=याचामहे) ॥

१२. ते दशग्वाः (=दशग्वरूपाः) प्रथमाः (=सर्वेभ्योपि पूर्वा) यज्ञमूहिरे (=यज्ञमवहन्=इन्द्रादिभ्यः प्रार्पयन्) । ते नः (=अस्मान्) उषसो व्युष्टिषु (=प्रभातेषु सत्सु) हिन्वन्तु (=प्रेरयन्तु यज्ञस्य स्तोत्रस्य च करणे) । उषा॰अरुणैः (=आरोचमानैः स्वकीयैस्तेजोभी) रामीर्न अप ऊर्णुते (=रात्रीर्यथा अपसारयति तथा) महः (=महान्तो) [मरुतः] शुचता (=दीप्यमानेन) गोअणसा (=गोसंपन्नेन) ज्योतिषा [रात्रीरपावृण्वन्ति] ॥

११. तर तुम्ही जे महान् [आणि] अश्वगामी मरुत्, त्यांस मी व्यापक आणि वेगवान् [सोम] अर्पण करून बोलावितों. सुवर्णवर्णाचे [आणि] श्रेष्ठ असे जे तुम्ही, त्या तुम्हांस आम्ही आहुति देऊन आणि स्तोत्र म्हणून वर्णनीय धनाची प्रार्थना करितों.

11. We, therefore, invoke you Maruts who are great and swift with horses, after offering the penetrating and quick [soma]. With libations and with prayers we pray for praiseworthy wealth [you] who are gold-coloured and high.

१२. ते दशग्व [होत्साते] प्रथम यज्ञ अर्पण करिते झाले. ते उषःकाळीं आम्हांस प्रेरणा करोत. महा [मरुत्], उषा जशी आरक्तवर्ण तेजांनीं रात्रींला नाहींशी करिते त्याप्रमाणे, प्रकाशमान आणि गोसंपन्न तेजानें [रात्रीला नाहींशी करितात].

12. They [as] Das'agvas were the first to bring sacrifice. May they inspire us on the daily dawning of Ushas. They the great ones [remove] the nights with brilliant [and] cow-giving light, even as Ushas removes them with [her] tawny rays.

---

१२. 'मरुतांनींच सर्वां अगोदर यज्ञ केला. ते प्रतिदिनीं उषःकाळीं येऊन उषेप्रमाणें रात्रींचा नाश करोत, आणि आम्हांला यज्ञाची आणि स्तोत्राची प्रेरणा करोत.'

'दशग्व [होत्साते].' सायण म्हणतात कीं मरुतांनीं दशग्वांचें म्हणजे अंगिरसांचें रूप घेऊन सर्वां अगोदर यज्ञ केला. 'दशग्व' याविषयीं सू. ३३ मं. ६ पहा.

'गोसंपन्न'='गोअर्णसा'. म्हणजे जेणेंकरून सूर्यकांतिरूप गाई मिळतात अशा. प्रकाश पडला म्हणजे अंधकार नाहींसा होतो हें उघडच होय.

ते क्षोणीभिररुणेभिर्नाञ्जिभी रुद्रा ऋतस्य सदनेषु वावृधुः ।
निमेघमाना अत्येन पाजसा सुश्चन्द्रं वर्णं दधिरे सुपेशसम् ॥१३॥

ते । क्षोणीभिः । अरुणेभिः । न । अञ्जिऽभिः । रुद्राः । ऋतस्य । सदनेषु । ववृधुः ।
निऽमेघमानाः । अत्येन । पाजसा । सुऽचन्द्रम् । वर्णम् । दधिरे । सुऽपेशसम् ॥ १३ ॥

ताँ इयानो महि वरूथमूतय उप घेदेना नमसा गृणीमसि ।
त्रितो न यान्पञ्च होतॄनभिष्टय आववर्तदवराञ्चक्रियावसे ॥१४॥

तान् । इयानः । महि । वरूथम् । ऊतये । उप । घ । इत् । एना । नमसा । गृणीमसि ।
त्रितः । न । यान् । पञ्च । होतॄन् । अभिष्टये । आऽववर्तत् । अवरान् । चक्रिया । अवसे ॥ १४ ॥

भाषायाम्.

१३. ते रुद्राः (=रुद्रपुत्राः) क्षोणीभिः (="वीणाख्यैर्वीणाविशेषैः") अरुणैर्न अञ्जिभिः (=आरक्तवर्णैरलंकारैश्च) [सहिताः सन्त] ऋतस्य सदनेषु (=सत्यस्य स्थानेषु "उदकस्य निवासभूतेषु मेघेषु") वावृधुः (=वर्धन्ते)। निमेघमानाः (=नितरामुदकवृष्टिं कुर्वन्तो) [मरुतः] अत्येन (=शीघ्रं व्याप्नुवता) पाजसा (=आत्मीयेन बलेन) सुश्चन्द्रं (=शोभनाह्लादनं) सुपेशसं (=शोभनरूपं) वर्णं (=कान्तिं) दधिरे (=धारयन्ति)॥

१४. अवरान् (=श्रेष्ठान्) यान् पञ्च होतॄन् (=पञ्चसंख्याकान् कांश्चिद् होतृकान्) त्रितो न (=त्रितनामा महर्षिरपि) अभिष्टये अवसे (=अभिलषितसिद्ध्यर्थं रक्षणाय च) चक्रिया आववर्तत् (=चक्रायुधेन सहितान् स्वात्माभिमुखम् आवर्तयत्) तान् [पञ्च होतॄन्] महि वरूथं (=महद्रक्षणम्) इयानः (=इयाना याचमाना) [वयम्] ऊतये (=रक्षणार्थम्) एना नमसा (=अनेन स्तोत्रेण) उप घ इत् गृणीमसि (=उपेत्यैव स्तुमः)॥

नेति पदम् अप्यर्थकम् । पादपूरणं वा ।

१३. ते रुद्राचे पुत्र वाद्यांच्या योगानें आणि आरक्त अलंकारांच्या योगानें सत्याच्या स्थानीं वाढत असतात. सततगामी सामर्थ्यानें व्याप्त असे जे मरुत् ते आह्लादकारक आणि सुंदर कांति धारण करितात.

13. They, the sons of Rudra, have prospered in the Home of Truth, with [their] harps and [their] yellow ornaments. They, suffused with all penetrating power, put on an agreeable and beautiful appearance.

१४. ज्या श्रेष्ठ पांच होत्यांला साहाय्यासाठीं आणि रक्षणासाठीं त्रित आपणाकडे चक्रासहित वळविता झाला, त्यांजला मोठ्या संरक्षणाची प्रार्थना करून आम्ही संरक्षणासाठीं या स्तोत्रानें स्तवितों.

14. We pray those five excellent invokers for great protection and praise them with this hymn for support, the five invokers whom Trita turned towards himself with their disc for protection and support.

---

१३. हाहि मंत्र कठिण आहे. यांत ‘क्षोणि’ शब्दाचा अर्थ ‘वाद्यें’ असा आम्हीं सायणास अनुसरून केला आहे. पण त्या अर्थाला सायणभाष्याशिवाय दुसरें प्रमाण ऋग्वेदांत मिळत नाहीं. वर केलेल्या अर्थाच्या अभिप्रायासाठीं, मरुत् आपल्या वाद्यांसह आणि अलंकारांसह अंतरिक्षांत वाढत असतात, म्हणजे अंतरिक्षांमधील जे देव, त्यांत मरुत् आपल्या वाद्यांसहित आणि अलंकारांसहित श्रेष्ठ होत, आणि ते मेघवृष्टि करून सर्वत्र पसरणाऱ्या तेजानें तेथें कांतियुक्त शोभा धारण करितात असें समजलें पाहिजे.

‘सत्याच्या स्थानीं’=‘ऋतस्य सदनेषु’. याचा जो अंतरिक्ष असा अर्थ केला आहे, तो सायणांस अनुसरून केला आहे. ऋत शब्दाचा सायणांनीं पुष्कळ ठिकाणीं केलेला ‘उदक’ असा जो अर्थ तो पाश्चात्य विद्वानांनीं घेतलेला नाहीं तरी वस्तुतः संभवतो खरा, याविषयीं सू. १०५ मं. १२ आणि टीप पहा.

१४. हाहि मंत्र कठिण आहे. शब्दाकडेस पाहिलें असतां ज्या पांच होत्यांला त्रित नांवाच्या महर्षीनें पूर्वीं आपल्या रक्षणासाठीं बोलाविलें, त्यांची मी रक्षणासाठीं प्रार्थना करून त्यांला या स्तोत्रानें स्तवितों असा अर्थ उघड दिसतो. परंतु यांत सांगितलेले पांच होते म्हणजे कोण तें स्पष्ट समजत नाहीं. त्रित म्हणून एक अतिप्राचीन महर्षि होता असें सायणाचार्य म्हणतात तें खरें असेल.

यया रध्रं पारयथात्यंहो यया निदो मुञ्चथ वन्दितारम् ।
अर्वाची सा मरुतो या व ऊतिरो षु वाश्रेव सुमतिर्जिगातु ॥
॥ १५ ॥ २१ ॥

यया । रध्रम् । पारयथ । अति । अंहः । यया । निदः । मुञ्चथ । वन्दितारम् ।

अर्वाची । सा । मरुतः । या । वः । ऊतिः । ओ इति । सु । वाश्राऽइव । सुऽमतिः । जिगातु ॥ १५ ॥ २१ ॥

भाषायाम्.

१५. हे मरुतः, यया [ऊत्या] रध्रम् (=आराधकं यजमानम्) अंहः अति पारयथ (=पापम् अतिक्रमयथ) यया [च] वन्दितारं (=स्तोतारं) निदो मुञ्चथ (=निन्दकात् मोचयथ) [एतादृशी] या व ऊतिः (=युष्माकं रक्षणबुद्धिः) सा अर्वाची (=अस्मदभिमुखा) [भवतु] । [युष्माकं] सुमतिः (=अनुग्रहात्मिका शोभना मतिर्) वाश्रेव (=हम्भारवं कुर्वती धेनुरिव) ओ सु जिगातु (=त्वरया अत्रागच्छतु) ॥

सूक्तम् ३५–२२६.

गृत्समद ऋषिः । अपां नपाद्देवता । त्रिष्टुप् छन्दः ॥

उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे ।
अपां नपादाशुहेमा कुवित्स सुपेशसस्करति जोषिषद्धि ॥ १ ॥

उप । ईम् । असृक्षि । वाजऽयुः । वचस्याम् । चनः । दधीत । नाद्यः । गिरः । मे ।

अपाम् । नपात् । आशुऽहेमा । कुवित् । सः । सुऽपेशसः । करति । जोषिषत् । हि ॥ १ ॥

भाषायाम्.

१. वाजयुः (=धनेच्छुरहम्) ईं वचस्याम् (=इमां स्तुतिम्) उप असृक्षि (=उपेत्य उच्चारयामि) । नाद्यः (=नदीनां पुत्रः) [स] गिरो मे (=स्तोतुर्मम) चनो

१५. हे मरुतांनो, जिच्या योगानें तुम्ही उपासकाला संकटाच्या पार पाडितां [आणि] जिच्या योगानें स्तोत्याला निंदकापासून मुक्त करितां, ती तुमची कृपा इकडे येओ. तुमची ममता हंभारणाऱ्या गाईप्रमाणें धांवत इकडे येओ.

15. May your grace come hither, o Maruts, with which you carry the worshipper safe over danger, with which you free your servant from the reviler. May your benevolence run hither like a cow lowing [for her calf].

सूक्त ३५–२२६.

ऋषि–गृत्समद. देवता–उदकांचा पुत्र, या नांवाचा वैद्युत अग्नि. वृत्त–त्रिष्टुभ्.

१. धनाची वांछा करून मी ही स्तुति उच्चारीत आहें. [तर] तो नदीपुत्र मज स्तोत्याला अन्न देओ. तो उदकांचा वेगवान् पुत्र [आमच्या स्तुति] बहुत सुंदर करो, कारण त्याला [स्तुति] अत्यंत आवडत असतात.

HYMN 35–226.

To *Apâm Napât* (i. e., the son of the heavenly waters, Agni as lightning). By *Gṛitsamada.* Metre—*Trishṭubh.*

1. Desirous of wealth I proclaim this praise. May the Son of the Rivers grant food to me the poet. May he the impetuous son of the waters make [our prayers] exceedingly beautiful. For he very much loves [praises].

---

१. 'नदीपुत्र'='नाद्यः' म्ह० अपां नपात् अथवा मेघोदकांचा पुत्र जो विद्युद्रूप अग्नि, तो. हें सूक्त वीज हाच जो उदकपुत्र, त्याजविषयीं आहे. विद्युद्रूप अग्नीला 'अपां नपात्' अथवा उदकांचा पुत्र म्हणणें हें साहजिक आहे. कारण कीं तो मेघोदकांच्या पोटीं अंतरिक्षांत जणुं उत्पन्न झाल्याप्रमाणें दिसतो.

अपां नपात् याविषयीं सू. १४३ मं. १ आणि टीप पहा.

इमं स्वस्मै हृद आ सुतष्टं मन्त्रं वोचेम कुविदस्य वेदत् ।
अपां नपादसुर्यस्य मह्ना विश्वान्यर्यो भुवना जजान ॥ २ ॥

इमम् । सु । अस्मै । हृदः । आ । सुऽतष्टम् । मन्त्रम् । वोचेम । कुऽवित् । अस्य । वेदत् ।
अपाम् । नपात् । असुर्यस्य । मह्ना । विश्वानि । अर्यः । भुवना । जजान ॥ २ ॥

समन्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति ।
तमू शुचिं शुचयो दीदिवांसमपां नपातं परि तस्थुरापः ॥ ३ ॥

सम् । अन्याः । यन्ति । उप । यन्ति । अन्याः । समानम् । ऊर्वम् । नद्यः । पृणन्ति ।
तम् । ऊं इति । शुचिम् । शुचयः । दीदिऽवांसम् । अपाम् । नपातम् । परि । तस्थुः । आपः ॥ ३ ॥

दधीत(=अन्नं विदधीत=प्रयच्छतु) । स आशुहेमा (=वेगवान्) अपां नपात् कुवित् (=बहु) [अस्माकं स्तुतीः] सुपेशसः करति (=सुरूपाः करोतु) । जोषिषत् हि (=यस्मात्कारणात् स स्तुतीरतिशयेन सेवते) ॥

भाषायाम्.

२. हृद आ सुतष्टं (=हृदयात् समीचीनं रचितं=महतादरेण निर्मितम्) इमं मन्त्रं (=स्तोत्रम्) अस्मै सु वोचेम (=तस्मा अपां नप्त्रे सुष्ठु यथा तथा वदेम) । [स] कुवित् अस्य वेदत् (=बहु तस्य स्तोत्रस्य जानीयात्=बहुमन्येत) । अर्यः (=स्वामी) अपां नपात् (=उदकपुत्रो वैद्युतोऽग्निर्) असुर्यस्य मह्ना (=बलस्य महत्त्वेन) विश्वानि भुवना (=भुवनानि=भूतजातानि) जजान (=जनयामास) ॥

३. [तम्] अन्याः सं यन्ति (=काश्चिन्नद्यः संगता भूत्वा गच्छन्ति) अन्याः (=काश्चिच्च) उप यन्ति (=भिन्ना भूत्वा गच्छन्ति) । समानम् (=एकम्) ऊर्वम् (=अपां नपातं नाम जलसमूहं) नद्यः पृणन्ति (=पूरयन्ति) । तम् उ दीदिवांसम् (=अतिशयेन दीप्तिमन्तं) शुचिं (=शुद्धम्) अपां नपातं शुचयः (=शुद्धा) आपः (=आपो देव्यः) परि तस्थुः (=पर्युपासते) ॥

२. हा अंतःकरणापासून रचिलेला मंत्र त्याजकरितां आपण उत्तम रीतीनें म्हणूं. त्याला तो बहुमान्य करून घेओ. उदकांचा श्रेष्ठ पुत्र [आपल्या] बळाच्या महत्त्वेंकरून सकळ जगताला उत्पन्न करिता झाला.

३. एकच जो डोह त्याप्रत कितीएक नद्या मिळून जातात, कितीएक निरनिराळ्या जातात— त्याला नद्या भरून टाकितात. त्या तेजस्वी [आणि] अत्यंत दीप्तिमंताला तेजस्वी आपो[देवी वेष्टितात], उदकांच्या पुत्राला आपो[देवी] वेष्टितात.

2. Let us chant in honour of him this praise well composed from the heart. May he accept it well. The excellent son of the waters created all beings with the greatness of [his] power.

3. Some [of the rivers] go to him together, some go separately: the rivers fill the common reservoir. The bright waters stand round him the son of the waters, who is bright [and] resplendent.

---

३. 'अपां नपात् हाच जो एक उदकांचा डोह त्यांत कितीएक नद्या एकत्र मिळून जातात, व कितीएक निरनिराळ्या जाऊन मिळतात. तेजस्वी अपां नपाताला तेजस्वी आपो देवी भजतात.'

तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः ।
स शुक्रेभिः शिक्वभी रेवदस्मे दीदायानिध्मो घृतनिर्णिगप्सु ॥४॥

तम् । अस्मेराः । युवतयः । युवानम् । मर्मृज्यमानाः । परि । यन्ति । आपः ।
सः । शुक्रेभिः । शिक्वऽभिः । रेवत् । अस्मे इति । दीदाय । अनिध्मः । घृतऽनिर्निक् । अप्ऽसु ॥ ४ ॥

अस्मै तिस्रो अव्यथ्याय नारीर्देवाय देवीर्दिधिषन्त्यन्नम् ।
कृता इवोप हि प्रसर्स्रे अप्सु स पीयूषं धयति पूर्वसूनाम् ॥५॥२२

अस्मै । तिस्रः । अव्यथ्याय । नारीः । देवाय । देवीः । दिधिषन्ति । अन्नम् ।
कृताःऽइव । उप । हि । प्रऽसर्स्रे । अप्ऽसु । सः । पीयूषम् । धयति । पूर्वऽसूनाम् ॥ ५ ॥ २२ ॥

भाषायाम्.

४. युवानं तं युवतय आपः अस्मेराः (=अस्मयनाना) मर्मृज्यमानाः (=अतिशयेन अलंकुर्वाणाः सत्यः) परि यन्ति (=परिचरन्ति)। अनिध्मः (=काष्ठरहितो) घृतनिर्णिक् (=दीप्तरूपः) स शुक्रेभिः शिक्वभिः (=दीप्तैस्तेजोभिर्) अस्मे रेवत् (=अस्मदर्थं सधनं यथा तथा) अप्सु दीदाय (=आन्तरिक्षेषूदकेषु=अन्तरिक्षप्रदेशेषु दीप्यताम्) ॥

५. अव्यथ्याय (=अव्यथनाय=दुःखरहिताय) देवाय (=दीप्तिमते) अस्मै (=तस्मा अपां नपाते) तिस्रो देवीर्नारीः (=दीप्तिमत्यो युवतयः="इळासरस्वतीभारत्याख्या") अन्नं दिधिषन्ति (=धातुमिच्छन्ति=दित्सन्ति)। [ता] अप्सु (=अन्तरिक्षे) कृता इव (=?) उप प्रसर्स्रे हि (=तस्य समीपे प्रकर्षेण गच्छन्ति)। स पूर्वसूनां (=पुरातनानां=मातॄणां तासां) पीयूषं धयति (=रसं पिबति) ॥

कृता इवेति अनवगतार्थम्। न सायणेनापि व्याख्यातम्। अत्र कृताशब्दः कृधातूत्पन्नकृतशब्दादन्यत् पदं स्यात् कृता इत्याद्युदात्तत्वात् ॥

४. तो जो तरुण त्याजप्रत तरुण आपो [देवी] न हसतां जातात आणि अलंकृत करितात. तो काष्ठरहित आणि दीप्त रूपाचा [देव] उदकांमध्यें चकचकीत तेजांनीं प्रकाशो, कीं जेणेंकरून आम्हांस संपत्ति मिळेल.

४. Him the youthful one, the youthful Waters without smiling surround and vie in adorning. May he, having no fuel and of brilliant form, shine in the waters with his brilliant splendors, so that we may obtain wealth.

५. दुःखरहित आणि देदीप्यमान जो हा त्याला तिघी देदीप्यमान नारी अन्न देण्यास तयार असतात. अंतरिक्षामध्यें त्या पुढें सरसावतात. तो त्या आदिमातांचा रस पितो.

5. To him the happy and resplendent one, the three resplendent females are anxious to give nourishment. They run forward in the firmament. He drinks the nectar of the ancient mothers.

---

४. 'वीज हाच जो अंतरिक्षांतील तरुण अग्नि, त्याला तरुण आपो देवी (म्ह० अंतरिक्षांत मेघोदकरूपांनीं असणारीं उदकें) सेवितात. त्या अग्नीला लांकडें नसतांहि त्याचें तेज मोठें असतें. तो प्रकाशो आणि आम्हांस धन देओ.'

५. 'अंतरिक्षांत अपां नपात् या बाळाला तीन पुरातन माता खाऊं घालितात. (सायणाप्रमाणें तीन माता म्ह० इळा, सरस्वती आणि भारती या देवी). तो त्यांचें दुध पितो' असा या मंत्राचा भावार्थ आहे.

यांत 'कृता इव' अशी जी उपमा आहे ती अगदी दुर्बोध आहे. 'कृता'-शब्द येथें आद्युदात्त असल्यामुळें 'कृ' धातूपासून 'कृत' (म्ह० झालेलें) असें हें रूप नसेल. अर्थ समजत नसल्यामुळें 'कृता इव' या शब्दांचा अर्थ आम्हीं भाषांतरांत केला नाहीं.

अश्वस्यात्र जनिमास्य च स्वर्द्रुहो रिषः संपृचः पाहि सूरीन् ।
आमासु पूर्षु परो अप्रमृष्यं नारातयो वि नशन्नानृतानि ॥ ६ ॥

अश्वस्य । अत्र । जनिम । अस्य । च । स्वः । द्रुहः । रिषः । सम्ऽपृचः । पाहि । सूरीन् ।
आमासु । पूर्षु । परः । अप्रऽमृष्यम् । न । अरातयः । वि । नशन् । न । अनृतानि ॥ ६ ॥

स्व आ दमे सुदुघा यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्ति ।
सो अपां नपादूर्जयन्नप्स्वं१तर्वसुदेयाय विधते वि भाति ॥ ७ ॥

स्वे । आ । दमे । सुऽदुघा । यस्य । धेनुः । स्वधाम् । पीपाय । सुऽभु । अन्नम् । अत्ति ।
सः । अपाम् । नपात् । ऊर्जयन् । अप्ऽसु । अन्तः । वसुऽदेयाय । विधते । वि । भाति ॥ ७ ॥

भाषायाम्.

६. अत्र (=तत्र=अपांनपात्संज्ञके देवे) अश्वस्य जनिम (=अश्वस्य सूर्यरूपस्य जन्म) [भवति]। अस्य च स्वः (=अस्य च तेजोमयस्य जगतो) [जन्म तत्र भवति]।—हे अपां नपात्, सूरीन् (=अस्माद् कवीन्) द्रुहः (=द्रोग्धॄ) रिषः (=हिंसकस्य) संपृचः (=संपर्कात्) पाहि। आमासु पूर्षु (=मेघोदकेषु) परः (=परस्तात्=अतिदूरे मेघोदकेषु) अप्रमृष्यम् (=अप्रधृष्यमाणं) [तम्] अरातयो न विनशन् (=शत्रवः प्राप्तुं न शक्नुवन्ति) न अनृतानि [विनशन्] (=मायावीनि रक्षांसि च न प्राप्नुयुः)॥

७. यस्य सुदुघा धेनुः (=सुखेन दोग्धव्या मध्यमवाग्रूपा गौः) स्वे आ दमे (=अन्तरिक्षलक्षणे स्वकीये अपांनपात्संबन्धिनि गृहे) स्वधां पीपाय (=वृष्ट्युदकरूपं गोरसं वर्धयति प्रयच्छति) [यश्च] सुभु अन्नम् अत्ति (=सुष्टुभूतम् उत्तमम् अन्नं भक्षयति) सः अपां नपात् ऊर्जयन् (=बलं कुर्वन्=प्रबलः सन्) अप्सु अन्तः (=अन्तरिक्षे) विधते वसुदेयाय (=परिचरते धनं दातुं) वि भाति (=विशेषेण प्रकाशते)॥

६. तेथें अश्वाचें जन्म [होतें] आणि या तेज:पुंजाचें [जन्म होतें]. [हे अपां नपात्], दुष्टाच्या [आणि] हिंसकाच्या संपर्कापासून तूं आम्हां स्तोत्यांला संभाळ. मेघमंडळापलीकडे ज्याला कोणी हटकूं शकत नाहीं अशा [अपां नपाता]प्रत शत्रु पोंहचणार नाहींत, मायावी [राक्षस]हि पोंहचणार नाहींत.

6. Here is the birth of the horse and of this effulgence. Preserve the poets from the touch of the hater [and] of the harmer. Neither the enemies nor the untruthful [demons] can reach him who is unharmable beyond the clouds.

७. ज्याची सुदुघा धेनु त्याच्या घरींच पायस देते, [आणि जो] उत्तम अन्न भक्षितो, तो बळवान् उदकपुत्र उपासकाला संपत्ति देण्यासाठीं अंतरिक्षांत प्रकाशतो.

7. That mighty son of the waters, whose easily milked cow yields the fat offering in his own house, [and who] consumes excellent food, shines in the firmament to give wealth to the worshipper.

---

६. अपां नपात् मेघमंडळाच्याहि वर असल्यामुळें तेथें त्याला कोणापासूनच उपद्रव होत नाहीं. तर तो आमचें रक्षण नास्तिकांपासून आणि राक्षसांपासून करो.

'घोड्याचें जन्म'='अश्वस्य जनिम.' म्हणजे हा जो सूर्यरूप घोडा आकाशांत चालतो तो आणि हें चकचकित जग तेजोमय अग्नीपासून झालें आहे.

७. 'अपां नपाताला अंतरिक्षांत त्याची गाय गोरस पाजिते, तो तेथें प्रकाशून तेणेंकरून उपासक जनांला धनाची प्राप्ति करून देतो.'

यांत अपां नपाताची गाय म्हणजे मेघगर्जनारूप हंभारवातें करणारी आणि मेघोदकरूप दुधाचा पान्हा सोडणारी मेघवृष्टिरूपच गाय समजावयाची आहे.

यो अप्स्वा शुचिना दैव्येन ऋतावाजस्त्र उर्विया विभाति ।
वया इदन्या भुवनान्यस्य प्र जायन्ते वीरुधश्च प्रजाभिः ॥ ८ ॥

यः । अप्ऽसु । आ । शुचिना । दैव्येन । ऋतऽवा । अजस्रः । उर्वि-
या । विऽभाति ।
वयाः । इत् । अन्या । भुवनानि । अस्य । प्र । जायन्ते । वीरुधः ।
च । प्रऽजाभिः ॥ ८ ॥

अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः ।
तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः ॥ ९॥

अपाम् । नपात् । आ । हि । अस्थात् । उपऽस्थम् । जिह्मानाम् ।
ऊर्ध्वः । विऽद्युतम् । वसानः ।
तस्य । ज्येष्ठम् । महिमानम् । वहन्तीः । हिरण्यऽवर्णाः । परि । यन्ति ।
यह्वीः ॥ ९ ॥

भाषायाम्.

८. ऋतावा (=सत्यवान्) अजस्रः (=नित्यो) यो दैव्येन शुचिना (=देवसंबन्धिना शुद्धेन तेजसा) अप्सु आ (=अन्तरिक्षे) उर्विया विभाति (=विस्तीर्णं यथा तथा प्रकाशते) अन्या भुवनानि (=अन्यानि भूतजातानि) अस्य वया इत् (=तस्य शाखा एव) [भवन्ति] च (=अपि च) वीरुधः प्रजाभिस् [तस्मादेव] प्र जायन्ते (=ओषधयश्च तस्मादेव पल्लवपत्रादिभिः प्रादुर्भवन्ति) ॥

९. अपां नपात् विद्युतं वसानः (=परिदधानो) जिह्मानाम् उपस्थम् ऊर्ध्वः आ अस्थात् हि (=कुटिलानाम् अपां मातृणाम् उदरम् उच्छ्रित आरूढवान् हि) । तस्य [अपां नपातो] ज्येष्ठं महिमानं वहन्तीः (=प्रशस्यतमं महत्त्वं वहन्त्यो) हिरण्यवर्णा यह्वीः (=यह्व्यो नद्यस्) [तं] परि यन्ति (=परितो गच्छन्ति) ॥

८. जो सत्यवान् आणि नित्य [अपां नपात्] अंतरिक्षांत शुद्ध आणि देवांच्या तेजानें विस्तीर्ण प्रकाशतो, त्याच्या सर्व भूतें शाखाच होत, आणि त्यापासूनच वनस्पतींला अंकुर फुटून त्या वाढत असतात.

९. अपां नपात् वीज पांघरून वांकड्या आयांच्या उदरीं उभा बसतो, त्याचा अत्यंत मोठा महिमा वाहणाऱ्या ज्या सुवर्णवर्ण नद्या त्या त्याला वेष्टितात.

8. Of him the true and the eternal one, who in the firmament shines far and wide with celestial brightness, other beings are only branches; and [from him] are the plants multiplied through their off-shoots.

9. The son of the waters, clad in lightning, rides upright in the womb of the oblique [waters]. The streams of golden colour surround him, carrying with them his greatest magnitude.

---

८. 'अंतरिक्षांत नित्य विस्तीर्ण प्रकाशणारा जो अपां नपात् त्यापासूनच सर्व कांहीं पदार्थ उत्पन्न होतात. वृक्षवनस्पत्यादि त्याच्याच योगानें वाढतात.'

९. 'आकाशांत आडवे तिडवे असणारे जे ढग त्याच अपां नपाताच्या वांकड्या आया; त्यांच्या पोटीं विजेच्या रूपानें उभा दिसणारा जो अपां नपात् तो जन्मतांच, त्याचा महिमा जिकडे तिकडे पसरणाऱ्या अशा ज्या मेघोदक प्रवाहरूप नद्या त्या त्याला वेष्टितात.' वीज कडकडून पडली म्हणजे तोच अपां नपाताचा प्रादुर्भाव; आणि तो झाला म्हणजे वृष्टि होत असते, हें प्रसिद्ध आहे.

हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः ।
हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥ १० ॥ २३ ॥

हिरण्यऽरूपः । सः । हिरण्यऽसंदृक् । अपाम् । नपात् । सः । इत् । ऊं इति । हिरण्यऽवर्णः ।
हिरण्ययात् । परि । योनेः । निऽसद्य । हिरण्यऽदाः । ददति । अन्नम् । अस्मै ॥ १० ॥ २३ ॥

तदस्यानीकमुत चारु नामापीच्यं वर्धते नप्तुरपाम् ।
यमिन्धते युवतयः समित्था हिरण्यवर्णं घृतमन्नमस्य ॥ ११ ॥

तत् । अस्य । अनीकम् । उत । चारु । नाम । अपीच्यम् । वर्धते । नप्तुः । अपाम् ।
यम् । इन्धते । युवतयः । सम् । इत्था । हिरण्यऽवर्णम् । घृतम् । अन्नम् । अस्य ॥ ११ ॥

भाषायाम्.

१०. स हिरण्यरूपो [भवति] अपां नपात् हिरण्यसंदृक् (=हिरण्यसदृशो) [भवति] । स इत् उ (=स एव) हिरण्यवर्णो [भवति] । हिरण्ययात् योनेः परिनिषद्य (=सुवर्णमयाज्जन्मस्थानात् प्रादुर्भूय) हिरण्यदाः (=हिरण्यस्य दाता) [भवति] । अस्मै (=तस्मै) अन्नं ददति (=हविरन्नं प्रयच्छन्ति) ॥

११. हिरण्यवर्णं (=सुवर्णरूपं) यं युवतयः इत्था सम् इन्धते (=यदा तं तरुण्योन्तरिक्षसंबन्धिन्य आपो देव्यः सत्यं दीपयन्ति) तत् (=तदा) अस्य (=तस्य) अपां नप्तुः अनीकं (=शरीरम्) उत (=अपि च) चारु (=शोभनम्) अपीच्यं (=गुह्यं) नाम वर्धते । घृतं (=घृतवद्वृष्टिजलम्) अस्य (=तस्य) अन्नं [भवति] ॥

१०. तो अपां नपात् हिरण्यरूप [आणि] हिरण्यसदृश होय. तोच हिरण्यकांतीचा आहे. तो हिरण्मय योनीपासून खालीं प्रादुर्भूत होऊन हिरण्य देणारा होतो. त्याला [उपासक] अन्न देतात.

११. जेव्हां सुवर्णवर्णाच्या त्या अपां नपाताला तरुणी खरोखर प्रज्वलित करितात तेव्हां त्याचें अंग [आणि] सुंदर गुह्य नाम हीं वाढतात. त्याचें अन्न घृत होय.

10. He is of golden form, the son of the waters is like gold. He alone is of golden colour. Being born of the golden womb he [is] the giver of gold. To him they offer food.

11. When the young females truly kindle the golden-coloured one, the person of him, the son of the waters, and his dear secret name are increased. His food is clarified butter.

---

१०. 'हिरण्यरूप अपां नपात् हिरण्यरूप उदरांतून उत्पन्न होऊन हिरण्य देणारा होतो, तरीहि मनुष्यें त्याला हविरन्नाहून अधिक कांहीं अर्पण करीत नाहींत.'

'हिरण्मय योनीपासून'=' हिरण्ययात् योनेः परि.' म्ह० हिरण्यरूप जें अन्तरिक्षरूप जन्मस्थान त्यापासून.

११. 'अंतरिक्षांत आपो देवी त्याला प्रज्वलित करितात. त्या वेळीं त्याचें शरीर आणि महत्त्व हीं मोठीं होतात. आपो देवी त्याला घृतासारिखें जें वृष्टिजल तेंच अन्न पाजितात.'

अस्मै बहूनामवमाय सख्ये यज्ञैर्विधेम नमसा हविर्भिः ।
सं सानु मार्ज्मि दिधिषामि बिल्मैर्दधाम्यन्नैः परि वन्द ऋग्भिः १२

अस्मै । बहूनाम् । अवमाय । सख्ये । यज्ञैः । विधेम । नमसा । हविःऽभिः ।

सम् । सानु । मार्ज्मि । दिधिषामि । बिल्मैः । दधामि । अन्नैः । परि । वन्दे । ऋक्ऽभिः ॥ १२ ॥

स ईं वृषाजनयत्तासु गर्भं स ईं शिशुर्धयति तं रिहन्ति ।
सो अपां नपादनभिम्लातवर्णोऽन्यस्येवेह तन्वा विवेष ॥ १३ ॥

सः । ईम् । वृषा । अजनयत् । तासु । गर्भम् । सः । ईम् । शिशुः । धयति । तम् । रिहन्ति ।

सः । अपाम् । नपात् । अनभिम्लातऽवर्णः । अन्यस्यऽइव । इह । तन्वा । विवेष ॥ १३ ॥

भाषायाम्.

१२. बहूनां [देवानाम्] अवमाय (=अधस्तमाय) सख्ये (=मित्राय) [अपां नपाते] यज्ञैर्नमसा (=नमस्कारेण) हविर्भिश् [च] विधेम (=परिचरेम) । [तस्य] सानु (=शिरः) सं मार्ज्मि (=अलंकरोमि) [तं] बिल्मैर्दिधिषामि (=धारयामि) । [तम्] अन्नैर्दधामि (=पुष्टं करोमि) ऋग्भिः (=स्तोत्रैश्च) परि वन्दे (=स्तौमि) ॥

१३. स ईं वृषा (=स एव रेतःसेचनसमर्थः सन्) तासु (=अप्सु देवीषु स्वीयासु मातृषु) गर्भम् अजनयत् (=" स्वात्मानमेव गर्भरूपेण वर्षणार्थं कृतवान् ") । स ईं शिशुर्धयति (=स शिशुस्तासां पयः पिबति) । तं [ता] रिहन्ति (=लिहन्ति) सः अपां नपात् अनभिम्लातवर्णः (=अक्षीणतेजस्कः सन्) इह [भूमौ] अन्यस्य तन्वा विवेष इव (=पार्थिवस्यैवाग्नेः शरीरेण व्याप्तः संयुक्तो भवतीव) ॥

१२. बहुतांमध्यें अत्यंत जवळचा जो हा त्या मित्राची आम्ही यज्ञांनीं, नमस्कारानें [आणि] हवींनीं सेवा करूं. मी [त्याचें] शिखर अलंकृत करितों; काष्ठांनीं मी [त्यास] धारण करितों, अन्नांनीं पोषितों, [आणि] स्तोत्रांनीं नमितों.

१३. तोच वीर्यवान् [होत्साता] त्या [स्वकीय मातां]च्या पोटीं गर्भ उत्पन्न करितो. तो बाळ त्यांचें थान पितो. त्या त्याला चाटितात. तो अक्षीणतेजस्वी अपां नपात् दुसऱ्याच्या शरीराशीं जणुं येथें मिळून जातो.

12. Let us worship the friend the nethermost of many, with sacrifices, with adoration, with oblations. I adorn [his] head, support [him] with fuel, feed [him] with food [and] adore [him] with hymns.

13. He himself, the progenitor, begets an embryo in those [his mothers]. He, the boy, sucks them. Him they lick. He, the son of the waters, being of unfaded effulgence, here unites as it were with the body of the other.

---

१२. ‘ बहुतांमध्यें अत्यंत जवळचा ’ =‘ अवमाय बहूनाम्.’ ‘ अवम ’ हें विशेषण वास्तविक म्हटलें म्हणजे भूमीवरील जो अग्नि त्याला लागू आहे. कारण तो सकळ देवांत अत्यंत जवळचा होय, म्हणजे त्याला शोधण्याला अंतरिक्षांत अथवा स्वर्गांत जावें लागत नाहीं; परंतु ‘ अपां नपात् ’ म्हणजे पर्यवसानीं अग्निच असल्यामुळें त्याला येथें लाविलें आहे.

१३. ‘ अपां नपात् आपो देवींच्या (म्हणजे आपल्याच मातांच्या) उदरीं गर्भ स्थापितो. तो जो पुत्र उत्पन्न होतो तो त्यांचें पुनः दूध पितो. त्या त्याला चाटितात. आणि तो जेव्हां पृथिवीवर उतरतो, तेव्हां पृथिवीवरील अग्नीशीं तो मिळून जातो.’

अस्मिन्पदे परमे तस्थिवांसमध्वस्माभिर्विश्वहा दीदिवांसम् ।
आपो नप्त्रे घृतमन्नं वहन्तीः स्वयमत्कैः परि दीयन्ति यह्वीः॥१४॥

अस्मिन् । पदे । परमे । तस्थिऽवांसम् । अध्वस्मऽभिः । विश्वहा ।
दीदिऽवांसम् ।
आपः । नप्त्रे । घृतम् । अन्नम् । वहन्तीः । स्वयम् । अत्कैः । परि ।
दीयन्ति । यह्वीः ॥ १४ ॥

अयांसमग्ने सुक्षितिं जनायायांसमु मघवद्भ्यः सुवृक्तिम् ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥१५॥२४॥

अयांसम् । अग्ने । सुऽक्षितिम् । जनाय । अयांसम् । ऊं इति । मघवत्ऽभ्यः । सुऽवृक्तिम् ।
विश्वम् । तत् । भद्रम् । यत् ।अवन्ति । देवाः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १५ ॥ २४ ॥

भाषायाम्.

१४. यह्वीः (=यह्वयो महत्य) आपः (=आपो देव्यो) नप्त्रे (=स्वपुत्राय) घृतमन्नं वहन्तीः (=घृतसदृशमुदकरूपमन्नं वहन्त्यः सत्यः) परमे अस्मिन् पदे (=उत्कृष्टे तस्मिन् स्थाने=अन्तरिक्षे) तस्थिवांसं (=स्थितवन्तं) विश्वहा (=नित्यम्) अध्वस्मभिर्दीदिवांसं (=तेजोभिर्दीप्यमानं) [तं नपातं] स्वयमत्कैः (=वस्त्रैः) परि दीयन्ति (=परिगच्छन्ति=सर्वतो वेष्टयन्ति) ॥

१५. हे अग्ने, जनाय (=अस्मज्जनहितार्थं) [तुभ्यं] सुक्षितिं (=शोभनमासनम्) अयांसम् (=अप्रयच्छम्) उ (=उत=अपि च) मघवद्भ्यः (=हविर्लक्षणधनवद्यजमानहितार्थं) सुवृक्तिं (=शोभनरचनं स्तोमं स्तोत्रम्) अयांसं (=तुभ्यमप्रयच्छम्) । यद् (=यद्धविरादिकं यजमानैः प्रार्पितं) देवा अवन्ति (=कामेन सेवन्ते) तद् विश्वं भद्रं (=कल्याणकरं) [भवति] । सुवीराः (=शोभनवीर्योपेतपुत्रैरुपेता) [वयं] विदथे (=यज्ञे) बृहद् (=महद् स्तोत्रं) वदेम (=ब्रूयाम) ॥

१४. त्या अत्यंत उंच स्थानीं बसलेला [आणि] नित्य तेजांनीं अत्यंत प्रकाशणारा जो पुत्र त्यासाठीं महा आपो[देवी] घृतमय अन्न वाहणाऱ्या होत्सात्या स्वतः वस्त्रांनीं वेष्टितात.

१५. हे अग्नी, [ह्या] जनासाठीं मी [तुला] चांगलें आसन अर्पण केलें आहे, आणि हविर्दायक उपासकांसाठीं [तुला] मी चांगलें स्तोत्र अर्पण केलें आहे. जें देवांला आवडतें तें सर्व कल्याणकारक [होतें]. उत्तम वीर्यवान् पुत्रांसहित आम्ही यज्ञांत [तुझें] मोठें स्तोत्र म्हणूं असें कर.

14. The great waters, bearing the rich food for their son, themselves surround with raiments him who is established in that highest seat [and] who always shines with brightness.

15. I have offered [to thee], o Agni, a good seat on behalf of [these] people, and I have offered [to thee] a good hymn on behalf of the sacrificers. All that [becomes] beneficial which the gods accept. May we, accompanied by brave sons, chant a great hymn in the sacrifice.

---

१४. ' आपो देवी अंतरिक्षांत आपल्या मुलाचें लालन करितात, आणि त्याला अन्न घालून आपल्या हातानें वस्त्रें नेसवितात.'

१५. '[ह्या].' म्हणजे जे हें सूक्त म्हणून उपासना करीत आहेत त्या. म्हणजे ' हविर्दायक उपासक ' म्हणून जे खालीं सांगितले तेच.

सूक्तम् ३६–२२७.

गृत्समद ऋषिः। प्रथमाया इन्द्रो मधुश्च देवता। द्वितीयाया मरुतो माधवश्च। तृतीयायास्त्वष्टा शुक्रश्च। चतुर्थ्या अग्निः शुचिश्च। पञ्चम्या इन्द्रो नभश्च। षष्ठ्या मित्रावरुणौ नभस्यश्च। इति संप्रदायादृतव्यमिदम्। वस्तुतस्तु यस्यामृचि या देवता दृश्यते सा तस्य देवता॥ जगती छन्दः॥

तुभ्यं॑ हिन्वा॒नो व॑सिष्ट॒ गा अ॒पोऽधु॑क्षन्त्सी॒मवि॑भि॒रद्रि॑भि॒र्नरः॑।
पिबे॑न्द्र॒ स्वाहा॒ प्रहु॑तं॒ वष॑ट्कृतं हो॒त्रादा सोम॑ं प्रथ॒मो य ईशि॑षे॥१॥

तुभ्य॑म्। हि॒न्वा॒नः। व॒सि॒ष्ट॒। गाः। अ॒पः। अधु॑क्षन्। सी॒म्। अवि॑ऽभिः। अद्रि॑ऽभिः। नरः॑।
पिब॑। इ॒न्द्र॒। स्वाहा॑। प्रऽहु॑तम्। वष॑ट्ऽकृतम्। हो॒त्रात्। आ। सोम॑म्। प्र॒थ॒मः। यः। ईशि॑षे॥ १॥

भाषायाम्.

१. [हे इन्द्र], तुभ्यं हिन्वानः (=त्वदर्थं प्रेर्यमाणः=प्रार्थ्यमाणोयं सोमो) गा अपश् [च] वसिष्ट (=दधिपयःप्रभृतीनि श्रपणद्रव्याणि वसतीवर्याख्या अपश्च वस्ते=तैः संयुज्यते)। नरः (=वीरा अध्वर्यवः) सीम् (=एतम्) अविभिः (=दशापवित्रैर्) अद्रिभिः (=ग्रावभिश्च) अधुक्षन् (=अक्षारयन् सिद्धमकारयन्)। हे इन्द्र, य ईशिषे (=स्वामी भवसि) [स त्वं] प्रथमः (=सर्वेभ्योपि प्रथमः सन्) स्वाहा प्रहुतं (=स्वाहेति शब्देन सहार्पितं) वषट्कृतं (=वषट् इति शब्देन सह प्रसृष्टं) सोमं होत्रात् (=होतुः पात्रात्) पिब॥

होत्राद्धोतुर्यागात् इति सायणः॥ अपाद्धोत्रादुत (२२८.४) इत्यादि मन्त्रदर्शनात्तु होत्रं पोत्रं नेष्ट्रमित्यादीनि तत्तदृत्विक्संबन्धीनि पात्राणि भवन्तीति मन्तव्यम्॥

सूक्त ३६–२२७.

ऋषि–गृत्समद. देवता–पहिलीची इंद्र आणि मधु; दुसरीची मरुत् आणि माधव, तिसरीची त्वष्टा आणि शुक्र, चवथीची अग्नि आणि शुचि, पांचवीची इंद्र आणि नभ, सहावीची मित्र आणि वरुण आणि नभस्य. असा संप्रदाय; परंतु वस्तुतः पहिलीची देवता इन्द्र आणि उरलेल्या ऋचांच्या देवता क्रमानें मरुत्, त्वष्टा, अग्नि, इंद्र आणि मित्रावरुण ह्या होत. वृत्त–जगती.

१. [हे इंद्रा], तुझ्या प्रीत्यर्थ ओतलेला [हा सोम] गोरसांनीं [आणि] उदकांनीं युक्त आहे. [हे] उपासक त्याला दशापवित्रांनीं [आणि] पाषाणांनीं काढिते झाले आहेत. हे इंद्रा, स्वाहा म्हणून अर्पण केलेला आणि वषट् असें म्हणून दिलेला [हा] सोम होत्याच्या पात्रांतून प्रभु असा जो तूं, तो प्रथम पी.

HYMN 36–227.

Traditionally verse 1 is dedicated to *Indra* and *Madhu* (the first month, Chaitra) Verse 2 to the *Maruts* and *Mâdhava* (the second month, Vais'âkha), v. 3 to *Tvashṭâ* and *S'ukra* (3rd month, Jyeshṭha), v. 4 to *Agni* and *S'uchi* (4th month, S'râvaṇa), v. 5 to *Indra* and *Nabha*, (fifth month, Bhâdrapada), v.6 *Mitrâvaruṇau* and *Nabhasya* (the sixth month, Âs'vina). Metre—*Jagatî.*

1. Poured out for thee [this soma] contains milk and the water. The heroes have prepared it with woollen strainers and the pressing-stones. Thou, o Indra, who art the lord, drink thou first from the cup of the Hotâ (invoker) the soma offered with the exclamation Svâhâ, and poured out with the exclamation Vashaṭ.

---

१. 'दशापवित्रांनीं'=' अविभिः' म्हणजे बकऱ्याच्या लोकरीचीं जीं गाळणी कीं ज्यांतून सोम गाळीत असत त्यांनीं, आणि पाषाणांनीं म्ह० ग्राव्यांनीं.

यज्ञैः संमिश्लाः पृषतीभिर्ऋष्टिभिर्यामञ्छुभ्रासो अञ्जिषु प्रिया उत ।
आसद्या बर्हिर्भरतस्य सूनवः पोत्रादा सोमं पिबता दिवो नरः॥२॥

यज्ञैः । सम्ऽमिश्लाः । पृषतीभिः । ऋष्टिऽभिः । यामन् । शुभ्रासः । अञ्जिषु । प्रियाः । उत ।
आऽसद्य । बर्हिः । भरतस्य । सूनवः । पोत्रात् । आ । सोमम् । पिबत । दिवः । नरः ॥ २ ॥

अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मन्दस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः॥३

अमाऽइव । नः । सुऽहवाः । आ । हि । गन्तन । नि । बर्हिषि । सदतन । रणिष्टन ।
अथ । मन्दस्व । जुजुषाणः । अन्धसः । त्वष्टः । देवेभिः । जनिऽभिः । सुमत्ऽगणः ॥ ३ ॥

भाषायाम्.

२. यज्ञैः संमिश्लाः (=यागैर्युक्ता) यामन् (=यामनि=गमने) पृषतीभिर्ऋष्टिभिश् [च] शुभ्रासः (=श्वेतबिन्द्वङ्किताभिर्हरिणीभिः स्वकीयैरायुधैश्च शोभमाना) उत (=अपि च) अञ्जिषु प्रियाः (=आभरणेषु कृतप्रीतयः) [एतादृशा यूयं] हे भरतस्य सूनवः (=रुद्रपुत्राः), हे दिवो नरः (=द्युलोकस्य सूनवः), बर्हिरासद्य (=दर्भेषूपविश्य) पोत्रात् आ (=पोतृपात्रात्) सोमं पिबत ॥

३. हे सुहवाः (=शोभनाह्वानास्त्वष्टृप्रभृतयः), अमेव नः आ हि गन्तन (=सहैवास्मान् आगच्छत) बर्हिषि (=दर्भेषु) नि सदतना (=निषीदत)। [अपि च] रणिष्टन (=रमध्वम्)। अथ (=अपि च) हे त्वष्टः, देवेभिर्जनिभिः सुमद्गणः (=देवैर्देवपत्नीभिश्च युक्तस्त्वम्) अन्धसो जुषाणो मन्दस्व (=सोमरूपमन्नं सेवमानो हृष्टो भव) ॥

२. यज्ञांहीं युक्त [आणि] गमन करूं लागलां म्हणजे पांढऱ्या ठिबक्यांच्या हरिणींनीं [आणि] भाल्यांनीं शोभणारे आणि अलंकारांहीं आनंद पावणारे [असे जे तुम्ही ते], हे भरतपुत्र हो, हे द्यूचे पुत्र हो, दर्भांवर बसून पोत्याच्या पात्रापासून सोम प्या.

2. Rich in sacrifices and on your marches adorned with the speckled deer and the javelins, and loving the ornaments do you, o sons of Bharata, o heroes of Dyaus, sit on the grass and drink the soma from the cup of the Potâ.

३. हे शोभनाह्वान [देव] हो, तुम्ही मिळूनच आम्हांप्रत या. दर्भांवर बसा. रममाण व्हा. आणि हे त्वष्ट्या, देवगणांहीं आणि देवीगणांहीं युक्त होत्साता तूं रस पिऊन आनंद पाव.

3. O ye, easy to be invoked, come unto us all together. Sit ye on the grass and be happy. And joined by all the gods and by all the goddesses, do thou, o Tvashtâ, enjoy the drink and be delighted.

---

२. ‘ पोत्याच्या ’= पोता हें एका ऋत्विजाचें नांव आहे. सू. ७६ मं. ४ पहा.

३. ‘ देवगणांहीं आणि देवीगणांहीं युक्त ’= ‘देवेभिर्जनिभिः सुमद्गणः’. म्हणजे सर्व देवगण आणि सर्व देवीगण यांस बरोबर घेऊन.

‘ शोभनाह्वान ’=‘ सुहवाः ’ म्हणजे ज्यांना बोलाविणें सुलभ आहे, जे बोलाविले असतां सहज येतात. येथें त्वष्टा आणि त्या बरोबरचे जे देव त्यांचें हें विशेषण आहे असें सायण म्हणतात तें युक्त आहे.

आ वक्षि देवाँ इह विप्र यक्षि चोशन्होतर्नि षदा योनिषु त्रिषु ।
प्रति वीहि प्रस्थितं सोम्यं मधु पिबाग्नीध्रात्तव भागस्य तृप्णुहि॥४॥

आ । वक्षि । देवान् । इह । विप्र । यक्षि । च । उशन् । होतः । नि । सद । योनिषु । त्रिषु ।

प्रति । वीहि । प्रऽस्थितम् । सोम्यम् । मधु । पिब । आग्नीध्रात् । तव । भागस्य । तृप्णुहि ॥ ४ ॥

एष स्य ते तन्वो नृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर्हितः ।
तुभ्यं सुतो मघवन्तुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृपत्पिब ॥ ५ ॥

एषः । स्यः । ते । तन्वः । नृम्णऽवर्धनः । सहः । ओजः । प्रऽदिवि । बाह्वोः । हितः ।

तुभ्यम् । सुतः । मघऽवन् । तुभ्यम् । आऽभृतः । त्वम् । अस्य । ब्राह्मणात् । आ । तृपत् । पिब ॥ ५ ॥

भाषायाम्.

४. हे विप्र (=मेधाविन्नग्ने), देवान् इह आ वक्षि यक्षि च (=अत्रावह तान् यज च)। हे होतः (=देवानामाह्वातः), उशन् (=अस्मान् कामयमानः सन्) त्रिषु योनिषु (=गार्हपत्यादिलक्षणेषु त्रिषु स्थानेषु) नि षद (=निषीद)।प्रस्थितं सोम्यं मधु प्रति वीहि (=आनीतं सोममयं मधु प्रतिकामयस्व)। तव भागस्य आग्नीध्रात् पिब (=अग्नीध्रपात्रात् तव भागं पिब) तृप्णुहि (=तृप्तो भव) [च]॥

५. [हे इन्द्र], ते तन्वो नृम्णवर्धनः (=तव शरीरस्य बलवर्धनो) [यः] प्रदिवि सह ओजो बाह्वोर्हितः (=यः सोमः पूर्वेष्वहःसु पुरा तव बाह्वोः सामर्थ्यं बलं च हितवान् स्थापितवान्) स्यः (=स प्रसिद्ध) एष [सोमस्] तुभ्यं सुतः (=त्वदर्थमभिषुतोस्ति) हे मघवन्, तुभ्यम् आभृतः (=त्वदर्थं समर्पितोस्ति च)। अस्य तृपत् ब्राह्मणात् आ पिब (=एनं तृपद्यथा तथा तृप्तिपर्यन्तं ब्राह्मणनामर्त्विक्पात्रात् पिब)॥

४. हे मेधावी अग्नी, तूं देवांस येथें घेऊन ये आणि पूज. हे होत्या, तूं प्रीतीनें तिन्ही ठिकाणीं बैस. पुढें ठेविलेलें सोमरूपी मधु स्वीकारून घे. अग्नीध्राच्या पात्रांतून आपला भाग पी. आणि तृप्त हो.

4. Bring the gods hither, o wise [Agni], and sacrifice to them. Lovingly do thou, o invoker, sit in the three places. Accept the sweet soma placed before. Drink thou thy portion from the cup of the Agnîdhra [priest] and be thou satisfied.

५. [ज्याणें] पुरातन काळीं [तुझ्या] बाहूंच्या ठायीं सामर्थ्य [आणि] बळ स्थापिलें, तो हा तुझ्या शरीराचें बल वाढविणारा सोम, हे मघवन्, तुजकरितां काढिला आहे, [आणि] तुझ्या पुढें ठेविला आहे. तो तूं तृप्ति होईपर्यंत ब्रह्याच्या पात्रांतून पी.

5. This [soma], the promoter of thy body's strength, which in ancient times placed might [and] strength in [thy] arms, is extracted for thee, o Maghavan, [and] is offered to thee. Drink thou it to thy satisfaction from the cup of the Brahmâ [priest].

---

४. 'तीन्ही ठिकाणीं '=' त्रिषु योनिषु.' म्हणजे गार्हपत्य, आहवनीय इत्यादिक जीं अग्नीचीं यज्ञमंडपांतील स्थानें तीं.

' अग्नीध्र ' हें पोता यासारिखें एका ऋत्विजाचें नांव आहे.

५. ' पुरातन काळीं ' इ० म्हणजे जे सोम पिऊन तूं पुरातन काळीं बळवान् आणि सामर्थ्यवान् झालास आणि वृत्रादिकांस मारिता झालास असा सोमरस

जुषेथां यज्ञं बोधतं हवस्य मे सत्तो होता निविदः पूर्व्या अनु ।
अच्छा राजाना नम एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु
॥ ६ ॥ २५ ॥ ७ ॥

जुषेथाम् । यज्ञम् । बोधतम् । हवस्य । मे । सत्तः । होता । निऽविदः । पूर्व्याः । अनु ।
अच्छ । राजाना । नमः । एति । आऽवृतम् । प्रऽशास्त्रात् । आ । पिबतम् । सोम्यम् । मधु ॥ ६ ॥ २९ ॥ ७ ॥

भाषायाम्.

६. [हे मित्रावरुणौ], [इमं] यज्ञं जुषेथां (=सेवेथाम्) । मे हवस्य बोधतम् (=ममाह्वानं जानीतम्) । [अस्माकं] होता सत्तः (=निषण्णः सन्) पूर्व्या निविदः (=पुरातनानि शस्त्राणि) अनु [वदति] (=अनुवादेनोच्चारयति) । नमः (=अस्माभिः कृतो नमस्कारः) अच्छ राजाना (=राजानौ युवां प्रति) आवृतम् एति (=आवर्तयितुं गच्छति=युवयोरत्रानयनाय गच्छति) । सोम्यं मधु (=सोमसंबन्धि मधु) प्रशास्त्रात् आ (=प्रशास्तृपात्रात्) पिबतम् ॥

सूक्तम् ३७–२२८.

गृत्समद ऋषिः । आद्याश्चतस्र ऋचो द्रविणोदादेवताकाः । पञ्चम्याश्विनी । षष्ठ्याग्नेयी । जगती छन्दः ॥

मन्दस्व होत्रादनु जोषमन्धसोऽध्वर्यवः स पूर्णां वष्ट्यासिचम् ।
तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः॥१

मन्दस्व । होत्रात् । अनु । जोषम् । अन्धसः । अध्वर्यवः । सः । पूर्णाम् । वष्टि । आऽसिचम् ।
तस्मै । एतम् । भरत । तत्ऽवशः । ददिः । होत्रात् । सोमम् । द्रविणःऽदः । पिब । ऋतुऽभिः ॥ १ ॥

भाषायाम्.

१. [हे द्रविणोदः], [त्वं] होत्रात् (=होतृपात्रात्) अन्धसः (=सोमरूपमन्नम्) अनु जोषं (=यथेच्छं) मन्दस्व (=सेवस्व) । हे अध्वर्यवः, स [द्रवि-

६. [हे मित्रावरुण हो], दोघे यज्ञाचें सेवन करा, दोघे माझ्या आह्वानाकडे लक्ष्य द्या. [आमचा] होता बसून पुरातन शस्त्रें [म्हणत आहे]. [तुम्हांस] वळविण्याकरितां [तुम्हां] राजांप्रत जात आहे. दोघेहि मधुर सोम प्रशास्त्याच्या पात्रांतून प्या.

6. [O Mitra and Varuṇa], enjoy you [this] sacrifice, attend to my invocation. [Our] invoker having sat down is [repeating] the ancient formulæ. Our obeisance goes unto you the kings to turn [you] hitherwards. Do you drink the nectar of the soma from the cup of the Pras'âstâ.

६. 'पुरातन शस्त्रें'='पूर्व्या निविदः.' म्हणजे ज्यांत देवांचें आह्वान, स्तुति, प्रार्थना इत्यादि आहे असे अत्यंत प्राचीन मंत्र.

'प्रशास्त्याच्या यागापासून.' म्हणजे प्रशास्ता म्हणून जो ऋत्विज त्यानें केलेल्या कर्मापासून.

सूक्त ३७-२२८.

ऋषि- गृत्समद. देवता.- १-४ द्रविणोदा; ५वी, अश्वी; ६ वी, अग्नि. वृत्त- जगती.

१. [हे द्रविणोदा], तूं आपल्या इच्छेप्रमाणें सोम होत्याच्या पात्रांतून पी.-हे अध्वर्यू हो, त्याला भरपूर आहुति आवडते. त्याप्रीत्यर्थ हा [सोम] अर्पण करा. तो त्याविषयीं लंपट [असून] उदार आहे. हे द्रविणोदा, तूं होत्याच्या पात्रांतून योग्य काळीं सोम पी.

Hymn 37-228.

To *Draviṇodas* (*Agni the giver of wealth*) 1-4; the *As'vins* 5; *Agni*, 6. By *Gṛitsamada*. Metre—*Jagatî*.

1. Enjoy the drink from the cup of the invoker to thy satisfaction. O Adhvaryus, he loves a copious oblation. Offer this [soma] to him, he the bounteous one loves it. Do thou, o Draviṇodas, drink in seasons the soma from the cup of the invoker.

यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते ।
अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥२॥

यम् । ऊं इति । पूर्वम् । अहुवे । तम् । इदम् । हुवे । सः । इत् । ऊं इति । हव्यः । ददिः । यः । नाम । पत्यते ।
अध्वर्युऽभिः । प्रऽस्थितम् । सोम्यम् । मधु । पोत्रात् । सोमम् । द्रविणःऽदः । पिब । ऋतुऽभिः ॥ २ ॥

मेद्यन्तु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते ।
आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥३॥

मेद्यन्तु । ते । वह्नयः । येभिः । ईयसे । अरिषण्यन् । वीळयस्व । वनस्पते ।
आऽयूय । धृष्णो इति । अभिऽगूर्य । त्वम् । नेष्ट्रात् । सोमम् । द्रविणःऽदः । पिब । ऋतुऽभिः ॥ ३ ॥

णोदाः] पूर्णाम् आसिचम् (=आहुतिं) वष्टि (=कामयते) । तस्मै एतं [सोमं] भरत (=प्रार्पयत) । ददिः (=दानशीलः स) तद्वशः (=तत्कामो) [भवति] ।— हे द्रविणोदः, होत्रात् (=होतृपात्रात्) सोमम् ऋतुभिः (=कालेषु) पिब ॥

भाषायाम्.

२. यम् उ (=यमेव) पूर्वम् अहुवे (=पुराहूतवानस्मि) तम् इदं हुवे (=तमेवेदानीम् आह्वयामि) । ददिः (=दानशीलो) यो नाम पत्यते (=ईष्टे) स इत् उ हव्यः (=स एवाह्वानयोग्यो) [भवति] । हे द्रविणोदः, अध्वर्युभिः प्रस्थितं (=प्रार्पितं) सोम्यं मधु (=सोमसंबन्धि मधु=मधुरं सोमं) पोत्रात् (=पोतुः पात्रात्) ऋतुभिः (=योग्यकालेषु) पिब ॥

३. [हे द्रविणोदः], येभिरीयसे (=यैरश्वैर्गच्छसि) [ते] ते (=तव) वह्नयः (=अश्वा) मेद्यन्तु (=तृप्यन्तु) । हे वनस्पते (=वनस्पतिविकार रथ), [त्वम्] अरिषण्यन् (=हिंसामप्राप्नुवन् सन्) वीळयस्व (=दृढीभव) । हे धृष्णो (=धर्षक) द्रविणोदः, आयूय (=आगम्य) अभिगूर्य (=सोमं प्रशंस्य) त्वं नेष्ट्रात् (=नेष्टुः पात्रात्) ऋतुभिः (=योग्यकालेषु) सोमं पिब ॥

२. ज्याला मी पूर्वीं बोलावीत होतों त्यालाच आतां बोलावीत आहें. जो उदार द्रविणोदा प्रभु होय तोच आह्वानास योग्य होय. हे द्रविणोदा, अध्वर्यूंनीं अर्पिलेला सोम तूं पोत्याच्या पात्रांतून योग्य काळीं पी.

३. [हे द्रविणोदा], ज्या अश्वांनीं तूं गमन करितोस ते तृप्त होओत. हे लांकडाच्या रथा, तूं मोडूं नको, आणि दृढ राह. हे धैर्यवान् द्रविणोदा, तूं ये, या सोमाची प्रशंसा कर आणि योग्य काळीं नेष्ट्याच्या पात्रांतून [तो] तूं पी.

2. I invoke now the same one that I invoked before. He the bounteous one who is the lord, is alone worthy of being invoked. Drink thou, o Draviṇodas, in seasons from the cup of the Potâ [priest] the sweet soma sacrificed by the Adhvaryus.

3. May those thy horses be gratified with which thou goest, o Draviṇodas! O wooden chariot, be thou strong, and not be broken. Come, o brave Draviṇodas, and commending the soma, do thou drink it in seasons from the cup of the Neshṭâ.

---

१. 'होत्याच्या कर्मापासून.' सू. २२७. मं. १ पहा.

'त्याला'. म्ह० द्रविणोदा याला. द्रविणोदा म्ह० धन देणारा अग्नि. सू. १५ मं. १० पहा.

---

३. 'नेष्ट्याच्या,' इ० 'नेष्टा' या नांवाचा एक ऋत्विज आहे.

अपाद्धोत्रादुत पोत्रादमत्तोत नेष्ट्रादजुषत प्रयो हितम् ।
तुरीयं पात्रममृक्तममर्त्यं द्रविणोदाः पिबतु द्राविणोदसः ॥ ४ ॥

अपात् । होत्रात् । उत । पोत्रात् । अमत्त । उत । नेष्ट्रात् । अजुषत । प्रयः । हितम् ।
तुरीयम् । पात्रम् । अमृक्तम् । अमर्त्यम् । द्रविणःऽदाः । पिबतु । द्राविणःऽदसः ॥ ४ ॥

अर्वाञ्चमद्य यय्यं नृवाहणं रथं युञ्जाथामिह वां विमोचनम् ।
पृङ्क्तं हवींषि मधुना हि कं गतमथा सोमं पिबतं वाजिनीवसू ॥५॥

अर्वाञ्चम् । अद्य । यय्यम् । नृऽवाहनम् । रथम् । युञ्जाथाम् । इह । वाम् । विऽमोचनम् ।
पृङ्क्तम् । हवींषि । मधुना । आ । हि । कम् । गतम् । अथ । सोमम् । पिबतम् । वाजिनीवसू इति वाजिनीऽवसू ॥ ५ ॥

भाषायाम्.

४. [द्रविणोदा] होत्रात् (=होतुः पात्रात्) अपात् (=सोममपिबत्) उत (=अपि च) पोत्रात् अमत्त (=पोतुः पात्रात्पीत्वामाद्यत्) उत (=अपिच) नेष्ट्रात् (=नेष्टुः पात्रात्) हितं प्रयः (=दत्तं सोमरूपमन्नम्) अजुषत (=असेवत) । [अधुना] अमृक्तम् (=अहिंसितं=यस्मिन् पीते सति हिंसारहितत्वं भवति तादृशम्) अमर्त्यम् (=अमरणम्=यस्मिन् पीते अमरणत्वं भवति तादृशं) द्रविणोदा द्राविणोदसः (=हवीरूपस्य धनस्य दातुर्यजमानस्य) तुरीयं पात्रं (=चतुर्थं सोमपात्रम् अच्छावाकनामर्त्विजः पात्रं) पिबतु ॥

५. यय्यं (=यायिं गन्तारं वेगवन्तं) नृवाहणं (=शूरयोर्युवयोर्वाहकं) रथम् अद्य अर्वाञ्चं युञ्जाथाम् (=अर्वाग् अत्र यथायाति तथा अश्वयुक्तं कुरुतम्) । इह वां विमोचनं [भवतु] (=युवाभ्यां यदश्वमोचनं तदद्यात्रैव यज्ञे भवतु) । मधुना हि कं हवींषि पृङ्क्तं (=हवींषि तावत् मधुना युक्तानि कुरुतम्) । गतम् (=युवामागच्छतम्) । अथ (=अपि च) हे वाजिनीवसू (=वाजिवन्तौ=वेगवदश्वयुक्तावश्विनौ), सोमं पिबतम् ॥

४. द्रविणोदा होत्याच्या पात्रापासून पिता झाला आणि पोत्याच्या पात्रापासून पिऊन मदयुक्त झाला आहे, आणि अर्पिलेलें हवि नेष्ट्याच्या पात्रापासून सेवन करिता झाला. [आतां] तो उदार यजमानाचें चवथें अहिंसित [आणि] अमर पात्र पिओ.

५. [हे अश्वी हो], वेगवान्, [आणि] [तुम्हां] शूरांला वाहणारा रथ येथें येण्याकरितां आज तुम्ही जोडा; तुम्ही [आज] येथें [घोडे] सोडा. हव्यें मधानें युक्त करा. तुम्ही येथें या आणि हे चपलाश्वगामी [अश्वी हो], तुम्ही सोम प्या.

4. Dravinodas has drunk from the cup of the invoker, he has exhilarated himself from the cup of the Potâ [priest] and has enjoyed the offered drink from the cup of the Neshtâ [priest]. May he [now] drink the fourth unharmed [and] immortal cup of the bouuteous sacrificer.

5. Prepare for coming here today [your] quick chariot that carries you; let your horses be unharnessed here [today]. Put [your] honey on the oblations. Come you hither and, o A'svins mounted on quick horses, drink the soma.

---

५. अश्वी आले म्हणजे मध घेऊन येतात व त्याणें हव्यें गोड करितात याविषयीं सू. ३४ मं. ३ आणि टीप पहा.

'चपलाश्वगामी'='वाजिनीवसू'. सू. २ मं. ५ आणि त्याजवरील टीप पहा.

जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिम् ।
विश्वेभिर्विश्वाँ ऋतुना वसो मह उशन्देवाँ उशतः पायया हविः ॥ ६ ॥ १ ॥

जोषि । अग्ने । सम्ऽइधम् । जोषि । आऽहुतिम् । जोषि । ब्रह्म । जन्यम् । जोषि । सुऽस्तुतिम् ।
विश्वेभिः । विश्वान् । ऋतुना । वसो इति । महः । उशन् । देवान् । उशतः । पायय । हविः ॥ ६ ॥ १ ॥

भाषायाम्.

६. हे अग्ने, समिधं जोषि (=जुषस्व=सेवस्व) । आहुतिं जोषि (=जुषस्व) । जन्यं (=जनेभ्यो हितं) ब्रह्म (=स्तोत्रं) जोषि (=जुषस्व) । सुस्तुतिं (=शोभनां स्तुतिं) जोषि (=जुषस्व) । हे वसो (=साधोग्ने), उशन् (=अस्मान् कामयमानस्त्वम्) उशतः (=अस्मान् कामयमानान्) विश्वान् (=सर्वान्) महः (=महतो) देवान् विश्वेभिः (=विश्वैर्देवैः सह) ऋतुना (=योग्ये काले) हविः पायय (=सोमं पायय) ॥

सूक्तम् ३८–२२९.

गृत्समद ऋषिः । सविता देवता । त्रिष्टुप् छन्दः ॥

उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निरस्थात् ।
नूनं देवेभ्यो वि हि धाति रत्नमथाभजद्वीतिहोत्रं स्वस्तौ ॥ १ ॥

उत् । ऊं इति । स्यः । देवः । सविता । सवाय । शश्वत्ऽतमम् । तत्ऽअपाः । वह्निः । अस्थात् ।
नूनम् । देवेभ्यः । वि । हि । धाति । रत्नम् । अथ । आ । अभजत् । वीतिऽहोत्रम् । स्वस्तौ ॥ १ ॥

भाषायाम्.

१. तदपाः (=सवकर्मा=जगतः प्रेरणकर्मा) वह्निः (=वोढा=वोढृवद्गन्ता) देवः (=दीप्तिमान्) स्यः (=स प्रसिद्धः) सविता सवाय (=जगतः प्रेरणाय) शश्वत्तमं

६. हे अग्नी, तूं [ही] समिध सेवन कर, [ही] आहुति सेवन कर, [हें] जनहितकारी स्तोत्र सेवन कर. [हें] सुंदर स्तोत्र सेवन कर. हे साधू अग्नी, प्रीति करणारा असा जो तूं तो प्रीति करणाऱ्या सर्व महान् देवांस सर्व देवांसहित योग्य काळीं सोम पाज.

6. Enjoy the fuel, o Agni; enjoy the oblation; enjoy the hymn beneficial to the people; enjoy the good praise. Do thou who lovest us, o good [Agni], make all the great loving gods with all the [gods] drink the offering in season.

६. 'जनहितकारी'=' जन्यं ब्रह्म.' म्ह. यजमानादिक जे जन त्यांचें कल्याण करणारें.

सूक्त ३८–२२९.

ऋषि– गृत्समद. देवता–सविता. वृत्त– त्रिष्टुभ्.

१. जगाला प्रेरणें हें ज्याचें काम आहे असा तो गमनशील देदीप्यमान सविता जगाला प्रेरण्यासाठीं नित्य नेमानें उगवत असतो. तो आज देदीप्यमान उपासकांला उत्तम धन देओ, आणि यज्ञ करावयाची ज्याला आवड आहे अशा यजमानाला क्षेम प्राप्त करून देओ.

Hymn 38–229.

To *Savitâ*. By *Gṛitsamada*. Metre–*Trishṭubh*.

1. That resplendent Savitâ, the traveller, whose business it is to enliven, daily rises to enliven [the world]. May he today give excellent wealth to the brilliant worshippers, and may he bestow prosperity on him who loves to sacrifice.

१. 'प्रेरणें'='प्रसव.' म्हणजे सर्व जगाला जागें करून आपआपल्या कामों पाठविणें.

विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः सिसर्ति ।
आपश्चिदस्य व्रत आ निमृग्रा अयं चिद्वातो रमते परिज्मन् ॥२॥

विश्वस्य । हि । श्रुष्टये । देवः । ऊर्ध्वः । प्र । बाहवा । पृथुऽपाणिः । सिसर्ति ।
आपः । चित् । अस्य । व्रते । आ । निऽमृग्राः । अयम् । चित् । वातः । रमते । परिऽज्मन् ॥ २ ॥

आशुभिश्चिद्यान्वि मुचाति नूनमरीरमदतमानं चिदेतोः ।
अह्यर्षूणां चिन्न्ययाँ अविष्यामनु व्रतं सवितुर्मोक्यागात् ॥ ३ ॥

आशुऽभिः । चित् । यान् । वि । मुचाति । नूनम् । अरीरमत् । अतमानम् । चित् । एतोः ।
अह्यर्षूणाम् । चित् । नि । अयान् । अविष्याम् । अनु । व्रतम् । सवितुः । मोकी । आ । अगात् ॥ ३ ॥

(=नित्यम्) उद् अस्थात् (=उदेति)। नूनम् (=अद्य) देवेभ्यः (=दीप्तिमद्भ्य उपासकेभ्यो) रत्नं वि हि धाति (=विदधातु=करोतु प्रयच्छतु खलु)। अथ (=अपि च) वीतिहोत्रं (=कामो यज्ञे यस्य तं कान्तयज्ञं यजमानं) स्वस्तौ (=क्षेमे) आ अभजत् (=भागिनं करोतु=तस्मै क्षेमं प्रयच्छतु) ॥

भाषायाम्.

२. हि (=यस्मात्) देवः (=दीप्तिमान्) पृथुपाणिः (=महान्तः किरणा यस्य तादृशः) [स] विश्वस्य श्रुष्टये (=सर्वस्य जगतः सुखाय) ऊर्ध्वः (=उद्गतः सन्) बाहवा (=बाहू) प्र सिसर्ति (=प्रसारयति)। अस्य व्रते आ (=सवितुः कर्मणि सति=सविता यस्मात् स्वकर्म प्रसवाख्यं करोति अतः) आपश्चित् (=आपोपि) निमृग्राः (=पावयन्त्यो) [भवन्ति] अपि च] अयं वातश्चित् (=अयं पुरोदर्शी वायुरपि) परिज्मन् (=परिज्मनि=अन्तरिक्षे) रमते ॥

३. आशुभिश्चित् (=वेगवद्भिरश्वैर्) यान् (=गच्छन्) [तानश्वान्] नूनं वि मुचाति (=यदास्तसमये विमुञ्चति रथात्तस्मिन्नेव काले) अतमानं चित् एतोररीरमत् (=अध्वनो गन्तारं गमनादुपरमयति)। अह्यर्षूणां चित् अविष्यां (=शत्रून् अभिगच्छतां गमनेच्छां=युयुत्सूनामपि वेगं) नि अयान् (=नियच्छति) अनु व्रतं सवितुः (=सवितुः कर्मानु पश्चात्) मोकी आ अगात् (=रात्रिरागच्छति) ॥

२. कारण कीं, देदीप्यमान लांब हातांचा सविता जगाच्या सुखाकरितां उगवून आपले बाहू पुढें फेकितो. हा आपलें काम बजावितो म्हणूनच उदकेंहि शुद्ध करण्याचें काम करितात. आणि हा वायुहि अंतरिक्षांत खेळतो.

2. For resplendent Savitâ, of long arms, rising for the good of the world, puts forth his arms. It is owing to his ordinance that the waters purify and the wind tarries in the sky.

३. वेगवान् अश्वांहीं जात असतां त्यांस तो सोडूं लागतो इतक्यांतच तो वाटसराला पुढें न जाऊं देतां थांबवितो; शत्रूंवर चाल करून जाणाऱ्यांचा आवेश तो ओढून धरितो; सवित्याच्याच शासनाला अनुसरून रात्र येत असते.

3. No sooner does he, going on horses, unharness them, than he has stopped the traveller from going [farther], and restrains the eagerness of those that are attacking their enemies; it is after Savitâ has done his work that night comes.

---

२. 'लांब हातांनां'='पृथुपाणि:'. म्ह. किरणरूप ज्याचे हात लांब आहेत ते 'शुद्ध करण्याचें काम करितात.' म्हणजे धुणें, स्वच्छ करणें हें जें पाण्याचें काम तें पाणी करितें.'

३. 'घोड्यांच्या योगानें जाणारा सविता अस्ताचलाप्रत पोंहचतांच वाटेनें चालणारे वाटसरू आपलें चालणें बंद करितात, आणि शत्रूंबरोबर लढत असलेले मनुष्य सायंकाळ झाल्यामुळें लढाई बंद करितात. सूर्यानें आपलें प्रयाण बंद केलें कीं लागलीच रात्र येते तोंपर्यंत येत नाहीं' असें तात्पर्य.

पुनः सम॑व्य॒द्वित॑तं॒ वय॑न्ती म॒ध्या कर्तो॒र्न्य॑धा॒च्छक्म॒ धीरः॑ ।
उत्सं॒हाया॑स्था॒द्व्यृ॒१॒॑तूँर॑दर्धर॒रम॑तिः सवि॒ता दे॒व आगा॑त् ॥ ४ ॥

पुनरिति॑ । सम् । अ॒व्य॒त् । वि॒ऽत॑तम् । वय॑न्ती । म॒ध्या । कर्तोः॑ । नि । अ॒धा॒त् । शक्म॑ । धीरः॑ ।

उत् । स॒म्ऽहाय॑ । अ॒स्था॒त् । वि । ऋ॒तून् । अ॒द॒र्धः॒ । अ॒रम॑तिः । स॒वि॒ता । दे॒वः । आ । अ॒गा॒त् ॥ ४ ॥

नानौको॑ांसि॒ दुर्यो॒ विश्व॒मायु॒र्वि ति॑ष्ठते प्रभ॒वः शोको॑ अ॒ग्नेः ।
ज्येष्ठं॑ मा॒ता सू॒नवे॑ भा॒गमाधा॒दन्व॑स्य॒ केत॑मिषि॒तं स॑वि॒त्रा ॥५॥२॥

नाना॑ । ओका॑ंसि । दुर्यः॑ । विश्व॑म् । आयुः॑ । वि । ति॒ष्ठ॒ते॒ । प्र॒ऽभ॒वः । शोकः॑ । अ॒ग्नेः ।

ज्येष्ठ॑म् । मा॒ता । सू॒नवे॑ । भा॒गम् । आ । अ॒धा॒त् । अनु॑ । अ॒स्य॒ । केत॑म् । इ॒षि॒तम् । स॒वि॒त्रा ॥ ५ ॥ २ ॥

यदा क्षिप्राश्वगामी सविता स्वकीयान् अश्वान् अस्तसमये रथाद्वियोजयति तदानीं सर्वेपि कर्मकारिणो मनुष्या असमाप्तान्येव स्वस्वकर्माणि मुञ्चन्ति युयुत्सवश्च युद्धाद्विरमन्ति रात्रिश्चागच्छतीत्यर्थः ॥

चिच्छब्दद्वयं समकालत्वद्योतकम् ॥

भाषायाम्.

४. विततं वयन्ती (=विस्तीर्णं तमोरूपं वस्त्रं वयन्ती रात्रिः) पुनः सम् अव्यत् (=पुनरपि तद्वस्त्रं समवेष्टयत्)। धीरः (=कुशलः कर्मकारी) शक्म (=स्वकीयमुपक्रान्तं कर्म) मध्या कर्तोः (=मध्येकरणं) नि अधात् (=निहितवान्)। अरमतिः (=सततं गच्छन्) देवः सविता (=द्योतमानः सविता) संहाय (=शय्यां विहाय) उद् अस्थात् (=उदगच्छत्)। ऋतून् वि अदर्धः (=यज्ञकालान् व्यधारयत्=अकरोत्) आ अगात् (=आगच्छच्च) ॥

५. दुर्यः (=गृहे भवः) प्रभवः (=प्रभूतः) अग्नेः शोकः (=प्रकाशो) नाना ओकांसि (=यजमानानां पृथग्भूतान् गृहान्) विश्वमायुः (=सर्वमन्नं च) वि तिष्ठते (=विविधमधितिष्ठति)। अस्य केतम् अनु (=सूनोः प्रज्ञामनुलक्ष्य तस्य प्रज्ञा-

४. पडदा पसरणारी रात्र पुनः पडदा पसरिते. कुशल मनुष्य मध्येंच काम बंद करितो. [दुसऱ्या दिवशीं पुनः] [सविता] जागृत होऊन उगवतो, [आणि] यज्ञकाळ प्राप्त करितो. सतत चालणारा देदीप्यमान सविता पुनः येतो.

५. अग्नीचा गृहसंबन्धी मोठा उजेड अनेक घरांत [आणि] सर्व अन्नावर वेगळा वेगळा पडतो. मोठा [हवीचा] भाग सवित्यानें त्याच्या प्रज्ञेप्रमाणें पाठविलेला आई [आपल्या] पुत्राकरितां धारण करिते.

4. She [the night] that weaves the long shroud has woven it again. The wise man has left his work half done. Resplendent [and] ceaseless Savitâ has [again] awakened and risen : he has come and afforded the sacrificial hours.

5. The great household light of Agni divides itself among numerous houses [and] all food. The mother holds for her son the greatest portion [of the sacrifice] sent by Savitâ, proportionate to his [the son's] wisdom.

---

४. सूर्य मावळल्याबरोबर काय होतें तें यांत सांगितलें आहे; आणि दुसऱ्या दिवशीं पुनः तो उगवतो असें तात्पर्य.

'पडदा.' रात्रीं जो अंधाररूप पडदा सर्व ठिकाणीं पसरलेला असतो, तो पडदा पुनः रात्र पसरिते.

५. ही ऋचा कठिण आहे. तात्पर्य असें दिसतें कीं, 'सविता मावळल्यावर अग्नीचें तेज घरोघर प्रकाशतें, आणि प्रत्येक घरीं त्याजला अन्न अर्पण केलें जातें. सविता जातांना त्याणें अग्नीच्या योग्यतेप्रमाणें हवीचा सर्वांत मोठा भाग त्यासाठीं दिलेला असतो तो, अग्नीची माता जी वेदी तिजवर असतो.'

तथापि 'सर्व अन्नावर' (विश्वमायुः) आणि सगळा उत्तरार्ध हीं कठिण आहेत. 'विश्वमायुः' ह्याचा अर्थ बहुतेक ठिकाणीं 'सर्व आयुष्य' असा होत असतो.

समाववर्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरताममाभूत् ।
शश्वाँ अपो विकृतं हित्व्यागादनु व्रतं सवितुर्दैव्यस्य ॥ ६ ॥

सम्ऽआववर्ति । विऽस्थितः । जिगीषुः । विश्वेषाम् । कामः । चरताम् । अमा । अभूत् ।
शश्वान् । अपः । विऽकृतम् । हित्वी । आ । अगात् । अनु । व्रतम् । सवितुः । दैव्यस्य ॥ ६ ॥

त्वया हितमप्यमप्सु भागं धन्वान्वा मृगयसो वि तस्थुः ।
वनानि विभ्यो नकिरस्य तानि व्रता देवस्य सवितुर्मिनन्ति ॥ ७ ॥

त्वया । हितम् । अप्यम् । अप्ऽसु । भागम् । धन्व । अनु । आ । मृगयसः । वि । तस्थुः ।
वनानि । विऽभ्यः । नकिः । अस्य । तानि । व्रता । देवस्य । सवितुः । मिनन्ति ॥ ७ ॥

यै पर्याप्तं) सवित्रा इषितं (=प्रेषितं) ज्येष्ठं भागं (=बृहत्तमं हविषो भागं) मा (=? वेदी) सूनवे (=पुत्रभूतायाग्नये) आ अधात् (=धारयति) ॥

विश्वमायुरिति दुर्बोधम् । उत्तरार्धोपि दुर्बोधः ॥

भाषायाम्.

६. विस्थितः (=प्रस्थितः=दूरं गतो) जिगीषुः (=जयेच्छुः) समाववर्ति (=स्वगृहमागच्छति)। विश्वेषां (=सर्वेषां) चरतां (=जङ्गमानां) कामः (=इच्छा) अमा अभूत् (=गृहं प्रति भवति=गृहगमनाय भवति) । शश्वान् (=बहुः=सर्वो जनो) विकृतम् (=अर्धकृतम्) अपः (=कर्म) हित्वी (=हित्वा) आ अगात् (=गृहमागच्छति) । [एतत् सर्वं] दैव्यस्य (=दिवि भवस्य) सवितुर्व्रतमनु (=कर्म अन्तरिक्षसंचारसायमस्तरूपमनुसृत्य=तस्य समाप्तौ) [भवति] ॥

७. त्वया अप्सु (=अन्तरिक्षे) हितं (=स्थापितम्) अप्यम् (=अपां संबन्धिनं) भागं (=भाग्यम्=उदकरूपं धनं) मृगयसः (=मृगयमाणा मृगा) धन्वानु आ वि तस्थुः (=निर्जलप्रदेशेषु प्राप्नुवन्ति) । वनानि (=वृक्षा) विभ्यः (=पक्षिभ्यो) [भागत्वेन दत्तानिः] । अस्य (=तस्य) देवस्य (=दीप्तिमतः) सवितुस्तानि व्रतानि (=कर्माणि) नकिर्मिनन्ति (=न केपि हिंसन्ति) ॥

६. जयेच्छु वीर दूर असलेला घरीं येतो, बाहेर फिरणाऱ्या सर्वांचीं मनें घराकडे लागतात, सर्वजण अर्धें केलेलें काम टाकून घरीं येतात; हें सर्व आकाशांत फिरणाऱ्या सवित्याचें काम झाल्यावर होतें.

6. He who is abroad, desirous of victory, returns home. The desire is directed homewards of all who are travelling. Every one abandons his work unfinished and comes [home]. [All this] after the work of celestial Savitâ [is done].

७. त्वां उदक हें जें धन अंतरिक्षांत स्थापिलें आहे, तें मृगांला निर्जल प्रदेशांत प्राप्त होतें. त्वां पक्ष्यांला वृक्ष [हें धन दिलें आहे]. त्या देदीप्यमान सवित्याचीं हीं शासनें कोणीहि मोडीत नाहींत.

7. The wild beasts command in dry waterless regions the wealth of waters which thou hast placed in the sky. [Thou hast provided] the trees for the birds. No one contravenes these ordinances of that resplendent Savitâ.

६. सूर्यास्त झाल्याबरोबर काय काय होतें तें यांत सांगितलें आहे.

७. 'मृगांला निर्जल प्रदेशांत प्राप्त होतें.' म्हणजे पर्जन्यवृष्टि झाल्यानंतर मेघोदक तुझ्या कृपेनें मारवाडा सारिख्या प्रदेशांतहि जनावरांस प्राप्त होतें.

यात्राध्यं॑ वरु॑णो योनि॑मप्य॑मनि॑शितं नि॒मिषि॒ जर्भु॑राणः ।
विश्वो॑ मार्ता॒ण्डो व्र॒जमा प॒शुर्गा॑त्स्थ॒शो जन्मा॑नि सवि॒ता व्याकः॑॥८॥

यात्ऽराध्य॑म् । वरु॑णः । योनि॑म् । अप्य॑म् । अनि॑ऽशितम् । नि॒ऽमिषि॑ ।
जर्भु॑राणः ।
विश्वः॑ । मा॒र्ता॒ण्डः । व्र॒जम् । आ । प॒शुः । गा॒त् । स्थ॒ऽशः । जन्मा॑नि ।
स॒वि॒ता । वि । आ । अ॒क॒रि॒त्यकः ॥ ८ ॥

न यस्येन्द्रो॒ वरु॑णो॒ न मि॒त्रो व्र॒तम॑र्य॒मा न मि॒नन्ति॑ रु॒द्रः ।
नारा॑तय॒स्तमि॒दं स्व॒स्ति हु॒वे दे॒वं स॑वि॒तारं॒ नमो॑भिः ॥ ९ ॥

न । यस्य॑ । इन्द्रः॑ । वरु॑णः । न । मि॒त्रः । व्र॒तम् । अ॒र्य॒मा । न ।
मि॒नन्ति॑ । रु॒द्रः ।
न । अरा॑तयः । तम् । इ॒दम् । स्व॒स्ति । हु॒वे । दे॒वम् । स॒वि॒तार॑म् ।
नम॑ःऽभिः ॥ ९ ॥

भाषायाम्.

८. जर्भुराणः (=अतिशयेन गच्छन् अतिशयेन व्यापनसमर्थो) वरुणो यात्राध्यं (=गच्छतां पक्षिणामपां च राधनीयमिष्टम्) अप्यम् (=अन्तरिक्षसंबन्धिनम्) अनिशितम् (=अतनूकृतं महान्तं) योनिं (=स्थानं सवित्रापहृततेजस्कमाकाशं) निमिषि (=निमेषे) [आ गात्=आगच्छति]। विश्वो मार्ताण्डः पशुः (=सर्वेपि पक्षिणः पशवश्च) व्रजम् आ गात् (=आवासस्थानं गोष्ठं च निवर्तते) । [पुनः परेद्युः] सविता [उदित्य] जन्मानि (=सर्वाणि भूतजातानि) स्थशः वि आ अकः (=स्वस्वस्थानात् पृथक्करोति=स्वस्वस्थानेभ्यो भक्ष्यसंपादनार्थं बहिः प्रेषयति) ॥

९. यस्य व्रतं (=सवाख्यम्) इन्द्रो न [मिनाति=हिनस्ति] [न] वरुणो न मित्रो न अर्यमा रुद्रो [वा] मिनन्ति नारातयो [वा मिनन्ति=हिंसन्ति] तं देवं (=दीप्तिमन्तं) सवितारम् इदं स्वस्ति (=पुरोदर्शिना प्रकारेण कल्याणाय) नमोभिर्हुवे (=नमस्कारैराह्वयामि) ॥

८. अतिशय संचार करणारा वरुण संचार करणाऱ्यांस इष्ट असा अंतरिक्षसंबंधी विस्तीर्ण अवकाश एका निमिषांत [व्यापितो]. पक्षी [आणि] पशु सर्व आपआपल्या स्थानाप्रत जातात. [दुसऱ्या दिवशीं] सविता प्राणीजनांस त्यांच्या त्यांच्या स्थानांतून बाहेर पाठवितो.

8. Varuṇa that comes quickly occupies in a twinkling of the eye the broad space of heaven, dear to those that fly. All birds [and] animals return to their resting places. [Again] Savitâ sends away [all] creatures from their respective homes.

९. ज्याच्या कामाला इंद्र अथवा वरुण अथवा मित्र अथवा अर्यमा अथवा रुद्र हे बाध आणीत नाहींत, आणि शत्रुहि [बाध आणीत] नाहींत, त्या देदीप्यमान सवित्याला हा मी नमस्कारांनीं कल्याणासाठीं बोलावितों.

9. Here I implore with obeisances prosperity from that resplendent Savitâ whose ordinance neither Indra nor Varuṇa, nor Mitra, nor Aryamâ, nor Rudra nor any enemies break.

---

८. 'सविता मावळतांच सर्वव्यापी वरुण सर्व अंतरिक्षाला एका क्षणांत व्यापून टाकितो. आणि पशुपक्षी आपआपल्या स्थानाप्रत जातात. पुनः दुसऱ्या दिवशीं सविता उगवला म्हणजे तो सर्व प्राण्यांला अन्नाच्या शोधार्थ घरांतून बाहेर पाठवितो.'

वरुण हा रात्रीचा अभिमानी देव होय (सू. २ मं. ७ आणि टीप पहा). म्हणून सविता जातांच वरुण अंतरिक्षाला व्यापितो असें सांगितलें आहे.

९. ह्यांत सांगितलेलें काम म्हणजे प्रतिदिनीं प्रकाश पाडणें, अमुक वेळीं उगवून अमुक वेळीं मावळणें आणि हें सर्व नित्य नियमानें घडणें जें तें.

अर्यमा. सू. २६ मं. ४ आणि टीप पहा.

रुद्र. सू. ४३ मं. १ आणि टीप पहा.

भगं धियं वाजयन्तः पुरंधिं नराशंसो ग्नास्पतिर्नो अव्याः ।
आये वामस्य संगथे रयीणां प्रिया देवस्य सवितुः स्याम ॥१०॥

भगम् । धियम् । वाजयन्तः । पुरम्ऽधिम् । नराशंसः । ग्नाःपतिः । नः । अव्याः ।
आऽअये । वामस्य । सम्ऽगथे । रयीणाम् । प्रियाः । देवस्य । सवितुः । स्याम ॥ १० ॥

अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध आ गात् ।
शं यत्स्तोतृभ्य आपये भवात्युरुशंसाय सवितर्जरित्रे ॥ ११ ॥ ३॥

अस्मभ्यम् । तत् । दिवः । अत्ऽभ्यः । पृथिव्याः । त्वया । दत्तम् । काम्यम् । राधः । आ । गात् ।
शम् । यत् । स्तोतृऽभ्यः । आपये । भवाति । उरुऽशंसाय । सवितः । जरित्रे ॥ ११ ॥ ३ ॥

भाषायाम्.

१०. [वयं] भगं (=दातारं) पुरंधिं (=बहुप्रज्ञं) [सवितारं प्रति] धियं (=स्तुतिं) वाजयन्तः (=बलवतीं कुर्वन्तः=वेगेन प्रेषयन्तो) [भवामः] । नराशंसः (=नरैः स्तवनीयो) ग्नाःपतिः (=देव्याः प्रभुः देवी पत्नी यस्य तादृशः) [सविता] नः (=अस्मान्) अव्याः (=अव्यात्=रक्षतु) । वामस्य (=धनस्य) आये (=आगमे) रयीणां संगथे (=संपदां समागमे विषये) [वयं] देवस्य (=द्योतमानस्य) सवितुः प्रियाः स्याम ॥

११. हे सवितः, यद् [राधो धनं] स्तोतृभ्यः (=स्तोत्रं कुर्वद्भ्यः) उरुशंसाय जरित्रे [च] (=प्रभूतं स्तोत्रं कुर्वत उपासकाय) शं (=सुखकरम्) आपये (=बान्धवसदृशं) [च] भवाति (=भवेत्) तत् काम्यं (=कमनीयं) राधः (=धनं) त्वया दत्तं [सत्] अस्मभ्यं दिवः (=द्युलोकात्) अद्भ्यः (=उदकमयप्रदेशाद्धितादन्तरिक्षात्) पृथिव्याश् [च] आ गात् (=आगच्छतु) ॥

१०. आम्ही सौभाग्यदायी [आणि] बहुप्रज्ञ [सवित्या]ला स्तोत्र पाठवीत [आहों]. नरांनीं स्तविण्याला योग्य असा देवपत्नीचा प्रभु आम्हांला संभाळो. संपत्तीच्या प्राप्तीसाठीं [आणि] धनाच्या लाभासाठीं आम्ही देदीप्यमान सवित्याच्या प्रीतींतले होऊं असें घडो.

10. We [are] expediting a hymn to bounteous [and] wise [Savitâ]. May the lord of the goddess, worthy of being praised by men, protect us. May we be dear to resplendent Savitâ in the acquisition of wealth, in the obtaining of riches.

११. हे सवित्या, जें धन स्तोत्यांला [आणि] पुष्कळ स्तोत्र करणाऱ्या कवीला कल्याणकारक [आणि] बंधूप्रमाणें होईल, असें तूं दिलेलें कमनीय धन आम्हांला द्युलोकापासून, अंतरिक्षापासून [आणि] पृथ्वीपासून येओ.

11. May that desirable wealth given by thee come unto us from the heaven, from the sky, from the earth, which, o Savitâ, shall be a source of happiness [and] like a brother to the praisers, to the poet who offers exceeding praise.

---

१०. पहिल्या वाक्यांत जीं सवित्याला विशेषणें दिलीं आहेत त्यांविषयीं व एकंदरींत त्यांच्या अर्थाविषयीं थोडा वाद आहे. सायणांनीं अर्थ किंचित् वेगळा केला आहे. पाश्चात्त्य विद्वान् येथें 'भग' आणि 'पुरंधि,' आणि 'नराशंस' हीं त्या त्या निरनिराळ्या देवांचीं नांवें आहेत असें समजतात. परंतु सवित्या देवाविषयींच्या सूक्तांत मध्येंच भग, पुरंधि (या नांवाचा देव असेलच तर) आणि नराशंस, यांविषयीं निर्देश येण्याचा संभव दिसत नाहीं.

सूक्तम् ३९–२३०.

गृत्समद ऋषिः । अश्विनौ देवता । त्रिष्टुप् छन्दः ॥

ग्रावाणेव तदिदर्थं जरेथे गृध्रेव वृक्षं निधिमन्तमच्छ ।
ब्रह्माणेव विदथ उक्थशासा दूतेव हव्या जन्या पुरुत्रा ॥ १ ॥

ग्रावाणाऽइव । तत् । इत् । अर्थम् । जरेथे इति । गृध्राऽइव । वृक्षम् । निधिऽमन्तम् । अच्छ ।
ब्रह्माणाऽइव । विदथे । उक्थऽशसा । दूताऽइव । हव्या । जन्या । पुरुऽत्रा ॥ १ ॥

प्रातर्यावाणा रथ्येव वीराजेव यमा वरमा सचेथे ।
मेने इव तन्वा३ शुम्भमाने दम्पतीव क्रतुविदा जनेषु ॥ २ ॥

प्रातःऽयावाना । रथ्याऽइव । वीरा । अजाऽइव । यमा । वरम् । आ । सचेथे इति ।
मेने इवेति मेनेऽइव । तन्वा । शुम्भमाने इति । दम्पती इवेति दम्पतीऽइव । क्रतुऽविदा । जनेषु ॥ २ ॥

भाषायाम्.

१. [हे अश्विनौ], ग्रावाणा इव (=वेगेन प्रेषितौ कावापि पाषाणाविव) तद् इत् अर्थम् (=एकमेवार्थं गन्तव्यं स्थानं) जरेथे (=गच्छथः) । गृध्रा इव वृक्षं (=यथा द्वौ गृध्रावेकमेव वृक्षं प्रति गच्छतस्तथा) निधिमन्तमच्छ (=हविर्युक्तं यजमानमच्छ यजमानं प्रति) [जरेथे=गच्छथः] । विदथे उक्थशसा ब्रह्माणेव (=यज्ञे उक्थशंसितारौ ब्रह्मर्त्विजाविव तादृशर्त्विक्सदृशौ) [अपि च] जन्या दूता इव (=जनपदेषु राज्ञा प्रेरितौ दूताविव=तादृशदूतसदृशौ) [युवां] पुरुत्रा (=बहुभिः पुरुषैर्) हव्या (=ह्वातव्यौ) [भवथः] ॥

२. प्रातर्यावाणा (=प्रातर्यावाणौ=प्रातरेव यज्ञार्थं गन्तारौ) रथ्येव वीरा (=रथिनौ वीराविव=रथिवीरसदृशौ) यमा (=यमलौ) अजा इव (=अजाविव=अजसदृशाविव) वरम् आ सचेथे (=इच्छामनुसृत्य=वृतं स्थानं प्रति गच्छथः) । मेने इव तन्वा शुम्भमाने (=शरीरेण शोभमाने नार्याविव तादृङ्नारीसदृशौ) जनेषु [मध्ये] क्रतुविदा (=कर्मज्ञौ) दंपती इव (=दंपतिसदृशौ) [स्थः] ॥

सूक्त ३९–२३०.

ऋषि–गृत्समद्.देवता–अश्वी. वृत्त–त्रिष्टुभ्.

१. [हे अश्वी हो], तुम्ही दोन पाषाणांप्रमाणें एकच उद्देशानें धांवत असतां. दोन गृध्र एकच वृक्षाकडे [धांवल्या]प्रमाणें हविर्युक्त [यजमाना]कडे [धांवत असतां]. यज्ञांत स्तोत्र म्हणणाऱ्या दोन ब्रह्म्यांसारिखे [आणि] देशांत पाठविलेल्या दोन दूतांसारिखे असे जे तुम्ही, ते बहुतांनीं आह्वान करण्यास योग्य [आहां].

२. [हे अश्वी हो], तुम्ही प्रातःकाळीं गमन करणारे, रथी वीरांच्या सारिखे, दोन बकऱ्यांसारिखे जुळे [असे होत्साते], आपल्या इच्छेला अनुसरून जातां. तुम्ही शरीरानें शोभणाऱ्या दोन स्त्रियांसारिखे [आणि] जनांमध्यें कर्मज्ञ [असे आहां].

Hymn 39–230.

To the *As'vins*. By *Gṛitsamada*. Metre—*Trishṭubh*.

1. You both run to the object like two stones. As two vultures [fly] towards a tree, you both [fly] towards the worshipper who gives the oblation. You, [who are] like two Brahmâ-priests that chant the hymns in the sacrifice, like two messengers sent among the people, are deserving of invocation in many places.

2. You, who go forth in the morning, and who are like heroes mounted on chariots, are like two twin goats, you follow the direction of your wish. You are similar to two fair women shining with their persons and similar to a married couple knowing their work among the people.

---

१. या मंत्रांत ‘ दोन पाषाणांप्रमाणें एकच उद्देशानें धांवत असतां ’ असें आहे, त्याचा भावार्थ असा दिसतो कीं, गोफणीनें फेकलेले दोन दगड जसे एकदम एकच ठिकाणाकडे जात असतात, तसे अश्वी एकाच वेगानें एकाच दिशेनें गमन करितात.

‘ ग्रावाणौ ’ (पाषाण) हें नांव ऋग्वेदांत बहुतकरून सोम ज्यांत काढीत त्या दोन पाषाणांचें आहे. परंतु येथें कोणतेहि साधारण दगड घ्यावयाचे आहेत.

दोन ब्रह्म्यांसारिखे. ‘ ब्रह्मा ’ म्हणून

शृङ्गेव नः प्रथमा गन्तमर्वाक् शफाविव जर्भुराणा तरोभिः ।
चक्रवाकेव प्रति वस्तोरुस्रार्वाञ्चा यातं रथ्येव शक्रा ॥ ३ ॥

शृङ्गाऽइव । नः । प्रथमा । गन्तम् । अर्वाक् । शफौऽइव । जर्भुराणा । तरःऽभिः ।
चक्रवाकाऽइव । प्रति । वस्तोः । उस्रा । अर्वाञ्चा । यातम् । रथ्याऽइव । शक्रा ॥ ३ ॥

नावेव नः पारयतं युगेव नभ्येव न उपधीव प्रधीव ।
श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान् ॥४॥

नावाऽइव । नः । पारयतम् । युगाऽइव । नभ्याऽइव । नः । उपधी इवेत्युपधीऽइव । प्रधी इवेति प्रधीऽइव ।
श्वानाऽइव । नः । अरिषण्या । तनूनाम् । खृगलाऽइव । विऽस्रसः । पातम् । अस्मान् ॥ ४ ॥

भाषायाम्.

३. शृङ्गा इव (=द्वे शृङ्गे इव) [युवां] प्रथमा (=प्रथमौ) नः अर्वाक् गन्तम् (=अस्मान् अभिमुखमायातम्) । तरोभिः (=वेगैर्) जर्भुराणा (=जर्भुराणौ अतिशयं गच्छन्तौ) [आयातम्] । हे उस्रा (=उस्रौ=आरक्तौ) शक्रा (=शक्रौ प्रबलौ), चक्रवाकाविव (=एतन्नामानौ पक्षिणाविव) रथ्या इव (=रथिनाविव) [वा] प्रति वस्तोः (=अहः प्रति=प्रत्यहम्) अर्वाञ्चा यातम् (=आयातम्) ॥

४. [हे अश्विनौ], नावेव (=द्वे नावाविव) नः (=अस्मान्) पारयतं (=दुर्गाणां पारं गमयतम्) । युगा इव (=युगे इव) नभ्या इव (=नभ्ये इव=नाभी इव रथचक्रनाभिफलके इव) उपधी इव (=नाभिपार्श्वस्थे फलके इव) [अथवा] प्रधी इव (=परिधी इव चक्रबाह्यवलयाविव) नः [पारयतम्] । तनूनाम् (=अस्माकं शरीराणाम्) अरिषण्या (=तारकौ) श्वाना इव (=श्वानाविव) [अथवा] खृगला इव (=तनुत्राणे इव) विस्रसः (=जराया) अस्मान् पातं (=रक्षतम्) ॥

एक ऋत्विज् आहे. त्याचें काम देखरेख ठेवणें हें होतें.

‘हविर्युक्त ’=‘ निधिमन्तम्.’ ‘निधि’ शब्दाचा हवि अथवा सोम हा अर्थ ऋग्वेदांत प्रसिद्ध आहे.

२. या मंत्रांत केवळ कितीएक च-

३. [हे अश्वी हो], तुम्ही दोन शिंगांसारिखे प्रथम इकडे आम्हांप्रत या; दोन खुरांसारिखे वेगानें धांवत [या]. हे आरक्त, हे प्रबळ [अश्वी] हो, तुम्ही दोन चक्रवाकांसारिखे [अथवा] दोन रथारूढ वीरांसारिखे प्रत्यहीं इकडे या.

४. [हे अश्वी हो], तुम्ही दोन नौकांप्रमाणें आम्हांला पार न्या. तुम्ही दोन जुकडांप्रमाणें, दोन तुंब्यांप्रमाणें, दोन फलकांप्रमाणें, दोन परिधींप्रमाणें आम्हांला [पार न्या]. दोन कुतऱ्यांप्रमाणें शरीरांचें संरक्षण करणारे होत्साते तुम्ही चिलखतांप्रमाणें आम्हांला म्हातारपणापासून रक्षा.

3, Like two horns come you first hither unto us, like two hoofs stamping with velocity. O ruddy coloured mighty [As'vins], come you hither every morning like two geese, like two heroes mounted on chariots.

4. Like two ships save us, [o As'vins]. Like two yokes, like two naves, like two boards, or like two peripheries [of a wheel] [save us, o As'vins] ! Like two dogs the protectors of our persons, like two coats of armour, save us from old age.

मत्कारिक उपमा दिल्या आहेत याशिवाय दुसरें कांहीं विशेष नाहीं. त्यांतून जुळ्या बकऱ्यांसारिखे अशी उपमा दिली आहे, तिचा अर्थ स्पष्ट आहे तरी योग्यता संदिग्ध आहे.

'प्रातःकाळीं गमन करणारे.' म्हणजे सूर्याप्रमाणें पहांटेस उगवून आकाशांतून गमन करीत जाणारे. अश्वींचें वास्तविक स्वरूप काय आहे याविषयीं सू. ३ मं. १ आणि टीप पहा.

---

३. 'शिंगांसारिखे'='शृङ्गेव.' म्हणजे शिंगें जशीं पशूला रक्षितात त्या प्रमाणें आम्हांला रक्षणारे.

'खुरांसारिखे'='शफाविव.' म्हणजे घोड्याच्या खुरांसारिखे.

'चक्रवाक' पक्षी दोघे एकत्र असतात व ते पहांटेस जागृत होतात आणि त्यांच्या जोडप्याची एकमेकांवर प्रीति असते असें आधुनिक संस्कृतांतहि प्रसिद्ध आहे. मात्र आधुनिक समजूत अशी आहे कीं चक्रवाक हा एक कल्पनासिद्ध पक्षी आहे, वास्तविक आहे असें नाहीं.

वातेवाजुर्या नद्येव रीतिरक्षी इव चक्षुषा यातमर्वाक् ।
हस्ताविव तन्वे३ शंभविष्ठा पादेव नो नयतं वस्यो अच्छ ॥५॥४॥

वाताऽइव । अजुर्या । नद्याऽइव । रीतिः । अक्षी इवेत्यक्षीऽइव ।
चक्षुषा । आ । यातम् । अर्वाक् ।
हस्तौऽइव । तन्वे । शम्ऽभविष्ठा । पदाऽइव । नः । नयतम् । वस्यः ।
अच्छ ॥ ५ ॥ ४ ॥

ओष्ठाविव मध्वास्ने वदन्ता स्तनाविव पिप्यतं जीवसे नः ।
नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे ॥ ६ ॥

ओष्ठौऽइव । मधु । आस्ने । वदन्ता । स्तनौऽइव । पिप्यतम् । जी-
वसे । नः ।
नासाऽइव । नः । तन्वः । रक्षितारा । कर्णौऽइव । सुऽश्रुता । भूतम् ।
अस्मे इति ॥ ६ ॥

भाषायाम्.

५. [हे अश्विनौ], वाताविव (=वायू इव) अजुर्या (=अक्षय्यौ) नद्या इव (=नद्याविव) रीतिः (=रीती=शीघ्रं गन्तारौ) अक्षी इव चक्षुषा (=अक्षिणी इव चक्षुषौ दर्शनशक्तिमन्तौ) [युवाम्] अर्वाक् आ यातम् (= अत्रायातम्) । हस्तेव पादेव तन्वे शंभविष्ठा (=हस्ताविव पादाविव वा शरीरायातिशयेन सुखस्य कारयितृतमौ) [युवां] वस्य अच्छ नः नयतम् (=अस्मान् श्रेष्ठं धनं प्रति नयतम्) ॥

६. [हे अश्विनौ], ओष्ठाविव आस्ने (=आस्याय) मधु (=मधुरं) वदन्ता (=वचनं कुर्वन्तौ) [युवां] जीवसे नः स्तनाविव पिप्यतं (=वयं यथा जीवामस्तथा स्तनाविव नः पाययतम्) । नासा इव नस्तन्वो रक्षितारा (=नासिके इवास्माकं शरीरस्य रक्षितारौ) [भूत्वा] कर्णाविव अस्मे (=अस्माकं) सुश्रुता भूतं (=सुष्ठु श्रोतारौ भवतम्) ॥

५. वातांप्रमाणें अक्षय, नद्यांप्रमाणें शीघ्रगामी [आणि] डोळ्यांप्रमाणें पाहणारे [असे जे तुम्ही, ते] इकडे या. हातांप्रमाणें [आणि] पायांप्रमाणें शरीराला अत्यंत सुखकारक जे तुम्ही, ते आम्हांला उत्तम धनाप्रत न्या.

5. Indestructible like two winds, moving rapidly like two rivers, seeing like two eyes, come ye hither [o As′vins] ! Like two hands and like two feet most serviceable to the body, lead us towards the highest good.

६. [हे अश्वी हो], दोन ओठांप्रमाणें तोंडाकरितां मधुर वचन बोला आणि दोन स्तनांप्रमाणें आम्हांला पाजा, कीं जेणेंकरून आम्ही जगूं. दोन नासिकांप्रमाणें आमच्या शरीराचे रक्षिते होऊन दोन कर्णांप्रमाणें आमचें ऐकणारे व्हा.

6. Speak sweetly like the two lips for the mouth, feed us like the two breasts, that we may live. Be the protectors of our person like the two nostrils, and be the hearers of us like the two ears.

त्या समजुतीला अनुसरून हा निर्देश दिसत नाहीं.

४. ' फलकांप्रमाणें '=' उपधीव.' म्हणजे चाकांच्या तुंब्याच्या बाहेरील जें लांकूड त्याचें नांव 'उपधि.' आणि 'प्रधि' म्हणजे चाकांच्या बाहेरील जो घेर तो. या उपमांचा अभिप्राय असा दिसतो कीं, आम्हांला सर्वोपरि रक्षा आणि संकटाच्या पार न्या.

' म्हातारपणापासून '=' विस्रसः'. हा अर्थ सायणास अनुसरून केला आहे. ' दुःखापासून ' असाहि अर्थ केला असतां चालेल.

हस्तेव शक्तिमभि संददी नः क्षामेव नः समजतं रजांसि ।
इमा गिरो अश्विना युष्मयन्तीः क्षणोत्रेणेव स्वधितिं सं शिशीतम्॥७॥
हस्ताऽइव । शक्तिम् । अभि । संददी इति सम्ऽददी । नः । क्षामऽइव ।
नः । सम् । अजतम् । रजांसि ।
इमाः । गिरः । अश्विना । युष्मऽयन्तीः । क्षणोत्रेणऽइव । स्वऽधितिम् ।
सम् । शिशीतम् ॥ ७ ॥
एतानि वामश्विना वर्धनानि ब्रह्म स्तोमं गृत्समदासो अक्रन् ।
तानि नरा जुजुषाणोप यातं बृहद्वदेम विदथे सुवीराः ॥ ८ ॥९॥
एतानि । वाम् । अश्विना । वर्धनानि । ब्रह्म । स्तोमम् । गृत्सऽमदासः ।
अक्रन् ।
तानि । नरा । जुजुषाणा । उप । यातम् । बृहत् । वदेम । विदथे ।
सुऽवीराः ॥ ८ ॥ ९ ॥

भाषायाम्.

७. हस्तेव (=हस्ताविव) नः (=अस्माकं) शक्तिम् अभि संददी (=बलस्य दातारौ) [भवतम्] । क्षाम रजांसि इव (=अन्तरिक्षपृथिव्याविव) नः सम् अजतम् (=अस्मान् संगृह्णीतम्) । हे अश्विना (=अश्विनौ), युष्मयन्तीः (=युष्मान् कामयमाना) इमा गिरः (=स्तुतीः) स्वधितिं क्षणोत्रेणेव (=असिं तेजनशाणे यथा तथा) सं शिशीतं (=सम्यक् तीक्ष्णीकुरुतम्) ॥

८. हे अश्विना (=अश्विनौ), गृत्समदासः (=गृत्समदाः=गृत्समदापत्यभूता अस्मद्रूपा) एतानि वां वर्धनानि (=युवयोर्वृद्धिसाधनानि) ब्रह्म (=ब्रह्माणि स्तोत्राणि) स्तोमं (=स्तुतिं च) अक्रन् (=अकुर्वन्) । हे नरा (=नरौ=शूरौ), जुजुषाणा (=जुजुषाणौ=अत्यन्तं प्रीयमाणौ) [युवां] तानि उप (=तानि प्रति) यातम् (=आयातम्) । [अपि च] सुवीराः (=शोभनवीर्योपेतपुत्रपौत्रैः सहिता वयं) विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=ब्रूयाम) ॥

७. हातांप्रमाणें आम्हांला शक्ति देणारे [व्हा]. तुम्ही पृथिवी आणि अंतरिक्ष यांप्रमाणें आमचा संग्रह करा. हे अश्वी हो, तुमची वांछा करणाऱ्या ज्या ह्या स्तुति, त्या शिळेवर तरवार पाजळल्याप्रमाणें पाजळा.

८. हे अश्वी हो, हीं तुम्हांस बळ आणणारीं सूक्तें [आणि] स्तोत्रें गृत्समदांनीं केलीं आहेत; त्यांजप्रत हे शूर हो, तुम्ही मोठ्या प्रीतीनें या. [आणि] शूर पुत्रपौत्रांसहित आम्ही यज्ञांत मोठें स्तोत्र म्हणूं असें करा.

7. Be the givers of strength to us like two hands. Hold us together like heaven and earth. Sharpen, o As'vins, these hymns which long for you, like a sword on a whetstone.

8. These hymns [and] praises, increasing your strength, the Gritsamadas have made, o As'vins! Come to them, o heroes, with great pleasure. [And] may we, accompanied by brave progeny, chant a great hymn in the sacrifice.

---

७. ‘ पाजळा ’=‘ सं शिशीतम्.’ म्हणजे त्या मंद आहेत त्यांस सोज्वळ करा, तेजस्वी करा, प्रबळ करा.

८. ‘ केलीं आहेत ’=‘ अक्रन्.’ वेदकाळींचे वेदकर्ते ऋषि आपण केलेलीं वेदसूक्तें ईश्वरप्रणीत आहेत असें म्हणत नसत, तर आपण केलीं असें स्पष्ट बोलत असत, त्याचें हें एक उदाहरण होय.

सूक्तम् ४०-२३१.

गृत्समद ऋषिः । सोमापूषणौ देवता । त्रिष्टुप् छन्दः ॥

सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः ।
जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम् ॥१॥

सोमापूषणा । जनना । रयीणाम् । जनना । दिवः । जनना । पृथिव्याः । जातौ । विश्वस्य । भुवनस्य । गोपौ । देवाः । अकृण्वन् । अमृतस्य । नाभिम् ॥ १ ॥

इमौ देवौ जायमानौ जुषन्तेमौ तमांसि गूहतामजुष्टा ।
आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्रियासु ॥२॥

इमौ । देवौ । जायमानौ । जुषन्त । इमौ । तमांसि । गूहताम् । अजुष्टा । आभ्याम् । इन्द्रः । पक्वम् । आमासु । अन्तरिति । सोमापूषऽभ्याम् । जनत् । उस्रियासु ॥ २ ॥

भाषायाम्.

१. हे सोमापूषणा (=सोमापूषणौ), [युवां] रयीणां जनना (=धनानां जनकौ) दिवो जनना (=द्युलोकस्य जनकौ) पृथिव्या जनना (=पृथिव्याश्च जनकौ) [भवथः] । जातौ विश्वस्य भुवनस्य गोपौ (=जातावेव सकलस्य जगतो गोप्तारौ सन्तौ) [वां] देवा अमृतस्य (=अमरत्वस्य) नाभिं (=मध्यदेशं हेतुम्) अकृण्वन् (=अकार्षुः) ॥

२. इमौ देवौ [सोमापूषणौ] जायमानौ (=उत्पद्यमानावेव) [सर्वे देवा] जुषन्त (=असेवन्त) । इमौ [हि] अजुष्टा (=असेवितानि=अप्रियाणि) तमांसि गूहताम् (=अगूहताम् अनाशयताम्) । आभ्यां सोमापूषभ्याम् इन्द्रः पक्वं [पय] आमासु उस्रियासु अन्तः (=अपक्वासु गोषु) जनत् (=अजनयत्) ॥

अन्तः सप्तमीद्योतकम् ॥

सूक्त ४०–२३१.

ऋषि–गृत्समद. देवता–सोम आणि पूषा. वृत्त–त्रिष्टुभ्.

१. हे सोम आणि पूषा हो, तुम्ही संपत्तींचे बाप, द्यूचे बाप, [आणि] पृथ्वीचे बाप [आहां]. तुम्ही उपजतच सकळ भुवनाचे संभाळकर्ते [आहां]. देव [तुम्हांला] अमरत्वाचें मध्यस्थान करिते झाले.

२. हे दोघे देव उपजतां उपजतांच त्यांचें सेवन [इतर देवांनीं] केलें. हे दोघे अप्रिय अंधकाराला नाहींसा करिते झाले. हे जे सोम आणि पूषा यांजकरितां इंद्र कच्च्या गाईंच्या आंगीं पक्व [दूध] उत्पन्न करिता झाला.

HYMN 40-231.

To *Soma* and *Pûshan*. By *Gṛitsamada*. Metre—*Trishṭubh.*

1. O Soma and Pûshan, [you are] the fathers of wealth, the fathers of Dyaus, the fathers of the Earth. You, [who were] born the protectors of all the world, the gods made the centre of immortality.

2. These two gods as they were being born [they the other gods] served. They both made the hated darkness vanish. For these Soma-and-Pûshan Indra created the ripe [milk] in the unripe cows.

---

१. पूषा हा सूर्यरूपीच देव होय. सू. २३ मं. ८ आणि टीपा पहा.

‘अमरत्वाचें मध्यस्थान करिते झाले’=‘अमृतस्य नाभिम् अकृण्वन्.’ म्हणजे अमरत्व जें तें तुम्हांपासून लोकांस प्राप्त होईल असें करिते झाले. तुम्हांला अमरत्वाचें अधिष्ठान करिते झाले.

२. ‘कच्च्या गाईंच्या आंगीं पक्व [दूध]’=‘पक्वमामासु उस्रियासु.’ सू. १८० मं. ३ आणि टीप पहा. येणेंकरून इंद्रादिक देवांनीं हे उपजतांच यांची सेवा कशी केली तें सांगितलें.

सोमापूषणा रजसो विमानं सप्तचक्रं रथमविश्वमिन्वम् ।
विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पञ्चरश्मिम् ॥३॥

सोमापूषणा । रजसः । विऽमानम् । सप्तऽचक्रम् । रथम् । अविश्वऽमिन्वम् ।
विषुऽवृतम् मनसा । युज्यमानम् । तम् । जिन्वथः । वृषणा । पञ्चऽरश्मिम् ॥ ३ ॥

दिव्य१न्यः सदनं चक्र उच्चा पृथिव्यामन्यो अध्यन्तरिक्षे ।
तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं वि ष्यतां नाभिमस्मे ॥ ४ ॥

दिवि । अन्यः । सदनम् । चक्रे । उच्चा । पृथिव्याम् । अन्यः । अधि । अन्तरिक्षे ।
तौ । अस्मभ्यम् । पुरुऽवारम् । पुरुऽक्षुम् । रायः । पोषम् । वि । स्यताम् । नाभिम् । अस्मे इति ॥ ४ ॥

भाषायाम्.

३. हे वृषणा (=वृषणौ=वीर्यवन्तौ सदा तरुणौ) सोमापूषणा (=सोमापूषणौ), रजसो विमानम् (=अन्तरिक्षस्य परिच्छेदकं) सप्तचक्रं (=सप्तचक्रोपेतम्) अविश्वमिन्वं (=विश्वस्यापरिच्छेद्यं) विषूवृतं (=सर्वत्र प्रवर्तमान) मनसा युज्यमानम् (=इच्छामात्रेणैव युज्यमानाश्वं) पञ्चरश्मिं (=पञ्चप्रग्रहैरुपेतं) तं (=प्रसिद्धं युवयोः) रथं जिन्वथः (=अस्मान् प्रति प्रेरयथः=प्रेरयतम्) ॥

सप्तचक्रं सप्तर्तुचक्रम् । त्रयोदशो मासः सप्तमर्तुः । ... पञ्चरश्मिं पञ्चर्तुरश्मिम् । हेमन्तशिशिरयोः समासेनर्तवः पञ्च । इति सायणः ॥

४. अन्यः (=तयोरेकः पूषा) उच्चा दिवि (=उच्छ्रिते द्युलोके) सदनं चक्रे (=स्वसंचारस्थानं चक्रे) । अन्यः (=अपरः सोमः) पृथिव्याम् अन्तरिक्षे अधि (=पृथिव्यां चान्तरिक्षे च) [स्वकीयं सदनं चक्रे] । तौ [सोमापूषणौ] पुरुवारं (=बहुभिर्वरणीयं) पुरुक्षुं (=बह्वन्नं) रायस्पोषं (=धनस्याभिवृद्धिम्) अस्मभ्यं [विष्यतां] नाभिं (=प्रजां) [च] अस्मे (=अस्मभ्यं) वि ष्यतां (=प्रयच्छताम्) ॥

३. हे वीर्यसंपन्न सोम आणि पूष हो, [सर्व] अंतरिक्षाचें उपमान असा जो सात चाकांचा [आणि] विश्वाला अपरिमेय, सर्वत्र फिरणारा, इच्छामात्रें करून जोडिला जाणारा आणि पांच लगामांचा रथ, तो तुम्ही सोडा.

3. O puissant Soma and Pûshan, set in motion that chariot which measures the space, which has seven wheels, which the universe cannot contain, which turns in all directions, which is made ready by a [mere] wish [and] which has five reins.

४. [या दोघांतून] एकाचें स्थान उच्च द्युलोकीं आहे, [आणि] दुसऱ्याचें पृथिवीवर आणि अंतरिक्षांत आहे. तर ते दोघेहि पुष्कळांनीं वांछा करण्यास योग्य आणि अनेकान्नयुक्त असा संपत्तीचा उत्कर्ष आम्हांस [देओत], आणि संतति आम्हांला देओत.

4. One has made his home in the exalted heaven, the other on the earth and in the sky. May they both bestow on us prosperity that many may envy and that contains affluence of food, [and bestow] on us progeny.

---

३. ‘ विश्वाला अपरिमेय ’=‘ अविश्वमिन्वम्.’ म्ह० सकल विश्व ज्याला मापूं शकत नाहीं, म्हणजे जो सकल विश्वापेक्षां मोठा.

४. ‘ उच्च द्युलोकीं ’=‘ उच्चा दिवि.’ पूषा द्युलोकांत. कारण पूषा म्हणजे सूर्यरूपी देव होय. अंतरिक्षांत व पृथिवीवर जो सांगितला तो ‘ सोम;’ पृथिवीवर ओषधीरूपानें आणि अंतरिक्षांत चंद्ररूपानें, असें सायण म्हणतात त्यांत खरेपणा पुष्कळ आहे असें सर्व सूक्ताच्या संदर्भावरून दिसतें. कारण अंधकार नाहींसे करणारे सूर्य आणि चंद्रच होत. अर्वाचीन संस्कृतांत तर सोमशब्दाचा चंद्र हा अर्थ स्पष्टच आहे. परंतु वेदकाळीं सोमशब्दाचा चंद्र हा अर्थ होत नसेल असें जे म्हणतात त्यांविरुद्ध हा मंत्र येतो असें दिसतें.

‘ संपत्तीचा उत्कर्ष ’=‘ रायस्पोषम्.’ म्हणजे ‘ उत्कृष्ट संपत्ति.’ सायण येथें संपत्तीचा उत्कर्ष म्हणजे ‘ गुरें ’ असा अर्थ करितात.

विश्वा॑न्य॒न्यो भुव॑ना ज॒जान॒ विश्व॑म॒न्यो अ॑भि॒चक्षा॑ण एति ।
सोमा॑पूषणा॒वव॑तं॒ धियं॑ मे यु॒वाभ्यां॒ विश्वाः॒ पृत॑ना जयेम ॥ ५ ॥

विश्वा॑नि । अ॒न्यः । भुव॑ना । ज॒जान॑ । विश्व॑म् । अ॒न्यः । अ॒भि॒ऽच॒क्षा॑णः । ए॒ति ।
सोमा॑पूषणौ । अव॑तम् । धिय॑म् । मे॒ । यु॒वाभ्या॑म् । विश्वाः॑ । पृत॑नाः । ज॒ये॒म ॥ ५ ॥

धियं॑ पू॒षा जि॑न्वतु विश्वमि॒न्वो र॒यिं सोमो॑ रयि॒पति॑र्दधातु ।
अव॑तु दे॒व्यदि॑तिरन॒र्वा बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ ६ ॥ ६ ॥

धिय॑म् । पू॒षा । जि॒न्व॒तु॒ । वि॒श्व॒म्ऽइ॒न्वः । र॒यिम् । सोमः॑ । र॒यि॒ऽपतिः॑ । द॒धा॒तु॒ ।
अव॑तु । दे॒वी । अदि॑तिः । अ॒न॒र्वा । बृ॒हत् । व॒दे॒म॒ । वि॒दथे॑ । सु॒ऽवीराः॑ ॥ ६ ॥ ६ ॥

भाषायाम्.

५. [हे सोमापूषणौ], [युवयोर्] अन्यः (=एकः " सोमो ") विश्वानि भुवना[नि] (=सर्वाणि भूतजातानि) जजान (=अजनयत्) । अन्यः (=अपरः =" पूषा ") विश्वम् अभिचक्षाण एति (=सर्वं जगत् अभिपश्यन् गच्छति) । हे सोमापूषणौ, [युवां] मे धियम् अवतं (=मम स्तोत्रं सेवेथाम्) [येन] [वयं] युवाभ्यां [सहायाभ्यां] विश्वाः पृतना जयेम (=सर्वाः शत्रुसेना अभिभवेम) ॥

६. विश्वमिन्वः (=सर्वव्यापी) पूषा [मे] धियं जिन्वतु (=मम स्तुतिं पूरयतु) । रयिपतिः (=रयीणां स्वामी) सोमो रयिं दधातु (=ददातु) । अनर्वा (=अप्रत्यृता केनापि प्रातिकूल्यमप्रापिता) देवी (=द्योतमाना) अदितिः [अस्मान्] अवतु (=रक्षतु) । सुवीराः (=सुष्टुवीर्योपेतपुत्रपौत्रादियुक्ता) [वयं] विदथे (=यज्ञे) बृहत् (=महत् स्तोत्रं) वदेम (=ब्रूयाम) ॥

५. [तुम्हांतून] एकानें सकल भुवनें निर्माण केलीं; दुसरा सकल [भुवना]ला पाहत पाहत जातो. हे सोम आणि पूषा हो, तुम्ही आमचें स्तोत्र स्वीकारून घ्या [कीं जेणेंकरून] आम्ही तुमच्या योगानें सर्व सेना जिंकूं.

5. One [of you] created all beings, the other goes observing all the world. O Soma-and-Pûshan, accept ye my hymn [that] we may vanquish all armies.

६. सर्वव्यापी पूषा [आमची] उपासना सफल करो. संपत्तींचा पति सोम संपत्ति देओ. अप्रतिहत अदिति देवी [आम्हांला] रक्षो. [आणि] शूर पुत्रपौत्रांसहित आम्ही यज्ञांत मोठें स्तोत्र म्हणूं असें होओ.

6. May all-pervading Pûshan fulfil [our] prayer. May Soma, the lord of riches, grant [us] riches. May the irresistible brilliant Aditi preserve [us]. May we, accompanied by brave progeny, chant a great [hymn] in the sacrifice.

---

५. 'एकानें' म्हणजे 'सोमानें' आणि 'दुसरा' म्हणजे 'पूषा' असें सायण म्हणतात.

६. 'अदिति' सू. ७२ मं. ९.

सूक्तम् ४१–२३२.

गृत्समद ऋषिः। वायो ये त इत्यादिके द्वे ऋचौ वायव्यौ। शुक्रस्येत्येषैन्द्रवायवी। अयं वां मित्रावरुणेति पञ्चानां मित्रावरुणावश्विनाविन्द्रो विश्वे देवाः सरस्वतीति क्रमेण देवताः। प्रेतां यज्ञस्येत्यन्त्यस्तृचो द्यावापृथिव्यो हविर्धानदेवत्यो वा। अग्निं च हव्यवाहनमिति पादोऽग्निदेवत्यो वा॥ गायत्री छन्दः। अम्बितम इति षष्ठस्य तृचस्यादितो द्वे अनुष्टुभौ तृतीया बृहती॥

वायो ये ते सहस्रिणो रथासस्तेभिरा गहि।
नियुत्वान्त्सोमपीतये॥ १॥

वायो इति। ये। ते। सहस्रिणः। रथासः। तेभिः। आ। गहि।
नियुत्वान्। सोमऽपीतये॥ १॥

नियुत्वान्वायवा गह्ययं शुक्रो अयामि ते।
गन्तासि सुन्वतो गृहम्॥ २॥

नियुत्वान्। वायो इति। आ। गहि। अयम्। शुक्रः। अयामि। ते।
गन्ता। असि। सुन्वतः। गृहम्॥ २॥

शुक्रस्याद्य गवाशिर इन्द्रवायू नियुत्वतः।
आ यातं पिबतं नरा॥ ३॥

शुक्रस्य। अद्य। गोऽआशिरः। इन्द्रवायू इति। नियुत्वतः।
आ। यातम्। पिबतम्। नरा॥ ३॥

भाषायाम्.

१. हे वायो, ये ते (=तव) सहस्रिणः (=सहस्रसंख्याका) रथासः (=रथास्) तेभिः (=तैर्) नियुत्वान् (=तवाश्वैर्युक्तः सन्) सोमपीतये (=सोमपानाय) आ गहि (=आगच्छ)॥

२. हे वायो, [त्वं] नियुत्वान् (=तवाश्वैर्युक्तः सन्) आ गहि (=आगच्छ)। अयं शुक्रः (=द्योतमानः सोमस्) ते (=तुभ्यम्) अयामि (=प्रार्पितो भवति)। [त्वं] सुन्वतो गृहं (=सोममभिषुण्वतो यजमानस्य गृहं प्रति) गन्तासि॥

३. हे नरा (=नरौ शूरौ) इन्द्रवायू, [युवाम्] अद्य आ यातम् (=आगच्छ-

सूक्त ४१–२३२.

ऋषि–गृत्समद. देवता–१,२ वायु; ३ इन्द्र आणि वायु; ४-६ मित्र आणि वरुण; ७-९ अश्वी; १०-१२ इन्द्र; १३-१५ विश्वे देव; १६-१८ सरस्वती; १९ (पहिले दोन चरण) द्यावापृथिवी अथवा हविर्धान, १९ (तिसरा चरण) वरप्रमाणेंच, अथवा अग्नि; २०,२१ द्यावापृथिवी अथवा हविर्धान. वृत्त–१-१५ गायत्री; १६,१७ अनुष्टुभ्; १८ बृहती; १९-२१ गायत्री.

१. हे वायू, तुझे जे हजारो रथ त्यांहीं तूं आपल्या अश्वांसहित सोम प्यावयाला ये.

२. हे वायू, तूं आपल्या घोड्यांसहित ये. हा देदीप्यमान [सोम] तुला अर्पण केला आहे. तूं सोम काढणाऱ्याच्या घरीं जाणारा आहेस.

३. हे शूर इन्द्र आणि वायू हो, आज तुम्ही या [आणि] दीप्तिमान् [आणि] गोरसयुक्त [आणि] अश्ववान् [सोम] प्या.

Hymn 41–232.

To various deities as follows: 1,2 to *Vâyu*; 3 to *Indra* and *Vâyu*; 4-6 to *Mitra* and *Varuṇa*; 7-9 to the *As'vins*; 10-12 to *Indra*; 13-15 to *Vis've Devas*; 16-18 to *Sarasvatî*; 19 (the first two pâdas) to *Dyâvâpṛithivyau or Havirdhâna*, and (pâda 3) to ditto and *Agni*; 20, 21 to *Dyâvâpṛithivyau* or *Havirdhâna*. By *Gṛitsamada*. Metre—1-15 *Gâyatrî*; 16, 17 *Anushṭubh*; 18 *Bṛihatî*; 19-21 *Gâyatrî*.

1. O Vâyu, come thou, with thy horses, for drinking the soma, in the thousands of chariots which are thine.

2. Come, o Vâyu, with thy horses. This sparkling [soma] is offered to thee. Thou art a visitor of his house who extracts the soma.

3. Come [and] drink you today, o brave Indra and Vâyu, of the sparkling [soma] mixed with milk [and] riding on horses.

१. 'आपल्या अश्वांसहित'='नियुत्वान्.' 'नियुत्' हें वायूच्या घोड्यांचें

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा ।
ममेदिह श्रुतं हवम् ॥ ४ ॥

अयम् । वाम् । मित्रावरुणा । सुतः । सोमः । ऋतऽवृधा ।
मम । इत् । इह । श्रुतम् । हवम् ॥ ४ ॥

राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे ।
सहस्रस्थूण आसाते ॥ ५ ॥ ७ ॥

राजानौ । अनभिऽद्रुहा । ध्रुवे । सदसि । उत्ऽतमे ।
सहस्रऽस्थूणे । आसाते इति ॥ ५ ॥ ७ ॥

ता सम्राजा घृतासुती आदित्या दानुनस्पती ।
सचेते अनवह्वरम् ॥ ६ ॥

ता । सम्ऽराजा । घृतासुती इति घृतऽआसुती । आदित्या । दानुनः । पती इति ।
सचेते इति । अनवऽह्वरम् ॥ ६ ॥

तम्) [अपि च] शुक्रस्य (=दीप्तिमतो) गवाशिरः (=गव्यं पय आशीराश्रपणसाधनं यस्य तस्य) नियुत्वतः (=अश्वयुक्तस्य) [सोमस्य] पिबतम् ॥

भाषायाम्.

४. हे ऋतावृधा (=ऋतावृधौ=सत्यस्य प्रवर्धकौ) मित्रावरुणा (=मित्रावरुणौ), अयं सोमो वां सुतः (=युवयोरर्थमभिषुतो भवति)। इह (=एवं सति) ममेत् हवं श्रुतं (=ममैवाह्वानं शृणुतम्) ॥

५. अनभिद्रुहा (=अनभिद्रुहौ=अभिद्रोहरहितौ=अवैरौ) राजानौ [मित्रावरुणौ] ध्रुवे (=स्थिरे) उत्तमे (=उच्चैस्तमे) सहस्रस्थूणे (=सहस्रस्तम्भे) सदसि (=स्थाने गृहे) आसाते (=उपविशतः) ॥

६. ता (=तौ) सम्राजा (=सम्राजौ=आज्ञयैव सर्वेषां शास्तारौ) घृतासुती (=घृतान्नौ) दानुनस्पती (=दानस्य प्रभू=धनस्य स्वामिनौ) आदित्या (=अदितेः पुत्रौ) अनवह्वरम् (=अकुटिलम्=ऋजुगामिनं यजमानं) सचेते (=सेवेते) ॥

४. हे सत्यवर्धक मित्र आणि वरूण हो, हा सोम तुम्हांकरितां काढिला आहे. तर तुम्ही माझीच हाक ऐका.

4. This soma, o Mitra and Varuṇa who promote the truth, has been extracted for you. Hear you, therefore, only my invocation.

५. अकल्याण न करणारे असे हे दोघे राजे स्थिर, अत्युच्च [आणि] हजार खांबांच्या वाड्यांत बसतात.

5. The two kings, that never do evil, sit in the highest palace [that is] firm [and is] supported on a thousand pillars.

६. ते साम्राज्य-कर्ते, घृत पिणारे, धनाचे स्वामी असे जे आदित्य ते निष्कपट उपासकाच्या उपयोगीं पडतात.

6. They the two sovereigns, to whom clarified butter is offered, the two sons of Aditi, lords of bounty, serve the sincere [worshipper].

नांव आहे. सू. १३५ मं. १ आणि टीप पहा.

हा पहिला मंत्र शांतिसूक्तांत आणि वास्तुशांतींत म्हणण्याची चाल आहे.

३. ‘ अश्ववान् [सोम]’=‘ नियुत्वतः.’ ऋ. ९. ८९. ६ यांतहि सोमाला ‘ नियुत्वान् ’ हें विशेषण दिलें आहे.

५. ‘ दोघे राजे’=‘ राजानौ.’ म्हणजे मित्र आणि वरूण. मित्राला आणि वरूणाला राजे म्हणतात याविषयीं सू. १३७ मं. १ आणि टीप पहा.

‘ हजार खांबांचा वाडा ’ म्हणजे द्युलोकरूप समजावयाचा आहे असें दिसतें.

६. ‘ घृत पिणारे ’=‘ घृतासुती.’ म्हणजे ज्यांला लोक घृताच्या आहुति देऊन भजतात ते.

गोम॑दू षु ना॑सत्याश्वा॑वद्यातमश्विना ।
व॒र्ती रु॑द्रा नृ॒पाय्य॑म् ॥ ७ ॥

गोऽमत् । ऊं॒ इति॑ । सु । ना॒स॒त्या । अश्व॑ऽवत् । या॒त॒म् । अ॒श्वि॒ना । व॒र्तिः । रु॒द्रा । नृ॒ऽपाय्य॑म् ॥ ७ ॥

न यत्परो॒ नान्त॑र आद॒धर्ष॑द्वृषण्वसू ।
दुः॒शंसो॒ मर्त्यो॑ रि॒पुः ॥ ८ ॥

न । यत् । परः॑ । न । अन्त॑रः । आ॒ऽद॒धर्ष॑त् । वृ॒ष॒ण्व॒सू॒ इति॑ वृषण्ऽवसू । दुः॒ऽशंसः॑ । मर्त्यः॑ । रि॒पुः ॥ ८ ॥

ता न॒ आ वो॑ळ्हमश्विना र॒यिं पि॒शङ्ग॑संदृशम् ।
धिष्ण्या॑ वरि॒वो॒विद॑म् ॥ ९ ॥

ता । न॒ः । आ । वो॒ळ्ह॒म् । अ॒श्वि॒ना । र॒यिम् । पि॒शङ्ग॑ऽसंदृशम् । धिष्ण्या॑ । व॒रि॒वः॒ऽविद॑म् ॥ ९ ॥

भाषायाम्.

७. हे नासत्या (=नासत्यौ) रुद्रा (=रुद्रौ=विजयिनौ) अश्विना (=अश्विनौ), नृपाय्यं वर्तिः (=नृभ्यां शूराभ्यां युवाभ्यां पालनीयमस्माकं यज्ञगृहं प्रति) गोमत् उ अश्ववत् (=गोभिः सह अश्वैश्च सह) सु यातं (=सुष्ठु आयातं=शीघ्रमागच्छतम्) ॥

८. हे वृषण्वसू (=वीर्यवन्तौ), यत् (=यं) [रयिं] न परः (=दूरस्थः) नान्तरः (=नापि समीपवर्ती) दुःशंसः (=दुष्टवचनो) मर्त्यो रिपुः आदधर्षत् (=आहर्तुं शक्नुयात्)

९. हे धिष्ण्या (=धिष्ण्यौ=स्तुत्यौ) अश्विना (=अश्विनौ), ता (=तौ युवां =युवां तं) पिशङ्गसंदृशं (=सुवर्णरूपं) वरिवोविदम् (=उत्कर्षस्य लम्भयितारं) रयिं (=धनं) नः आ वोळ्हम् (=अस्मदर्थमानयतम्) ॥

७. हे विजयी अश्वी हो, हे सत्यवंतहो, [तुम्हीं] शूरांनीं रक्षणीय असें जें [आमचें] यज्ञगृह, त्याप्रत गाई आणि घोडे घेऊन तुम्ही सत्वर या.

८. हे प्रबळ अश्वी हो, जें [धन] बाहेरचा अथवा आंतला दुर्वचन मर्त्य शत्रु हिरावून घेऊं शकणार नाहीं,

९. तें सुवर्णसदृश [आणि] उत्कर्षप्रद धन, अहो स्तुत्य अश्वीहो, तुम्ही आम्हांकरितां घेऊन या.

7. O victorious [and] truthful As′vins, come swiftly with cows and horses to the house that deserves to be preserved by [you] heroes.

8. O puissant [As′vins], [that wealth] which neither the external nor the internal mortal enemy of foul language shall rob,

9. That wealth, shining like gold [and] conferring prosperity, do you bring unto us, o praiseworthy As′vins !

---

७. या मंत्रांत ‘ विजयी ’ (=रुद्र) हें एक पद कठिण आहे. ऋग्वेदांत ‘ रुद्र ’ असें अश्वींला बरेच ठिकाणीं म्हटलेलें आहे, ते सर्व मंत्र पाहतां सायणांनीं निरनिराळ्या प्रकारांनीं निर्वाह केला आहे. कोठकोठें रुद्रपुत्र असा अर्थ केला आहे; कोठकोठें स्तुत्य असें म्हणतात; कोठकोठें शत्रूला रडविणारे असा अर्थ करितात. एक निश्चय दिसत नाहीं. अश्वी मरुतांप्रमाणें रुद्राचे पुत्र होत असें प्रसिद्ध नाहीं.

दुसरें पद ‘ वर्तिः ’ हें एक कठिण आहे. सायण केव्हां केव्हां गृह आणि केव्हां केव्हां मार्ग असा अर्थ करितात. या ठिकाणीं गृह हा अर्थ चांगला जुळतो असें आम्हांस वाटतें.

८,९. दोन्हीहि ऋचांचा समन्वय एकत्र केला पाहिजे.

‘ दुर्वचन ’=‘ दुःशंसः ’ म्हणजे देवांविषयीं वाईट बोलणारा, देवनिंदक, देवांची उपासना न करणारा नास्तिक.

इन्द्रो अङ्ग महद्भयमभी षदप चुच्यवत् ।
स हि स्थिरो विचर्षणिः ॥ १० ॥ ८ ॥

इन्द्रः । अङ्ग । महत् । भयम् । अभि । सत् । अप । चुच्यवत् ।
सः । हि । स्थिरः । विऽचर्षणिः ॥ १० ॥ ८ ॥

इन्द्रश्च मृळयाति नो न नः पश्चादघं नशत् ।
भद्रं भवाति नः पुरः ॥ ११ ॥

इन्द्रः । च । मृळयाति । नः । न । नः । पश्चात् । अघम् । नशत् ।
भद्रम् । भवाति । नः । पुरः ॥ ११ ॥

इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् ।
जेता शत्रून्विचर्षणिः ॥ १२ ॥

इन्द्रः । आशाभ्यः । परि । सर्वाभ्यः । अभयम् । करत् ।
जेता । शत्रून् । विऽचर्षणिः ॥ १२ ॥

भाषायाम्.

१०. इन्द्रो अङ्ग (=इन्द्र एव) महत् [तथा] अभि सत् (=अभिभवत्) भयम् अप चुच्यवत् (=अपच्यावयतु)। हि (=यस्मात् कारणात्) स स्थिरः (=अचलो) विचर्षणिः (=विश्वस्य द्रष्टा=विशेषेण प्रज्ञावान्) [भवति]॥

११. इन्द्रश्च (=इन्द्र एव) नो मृळयाति (=अस्मभ्यं मृळयतु=अस्माकं सुखयिता भवतु) [येन] पश्चात् नः अघं न नशत् (=पृष्ठतोस्मान् पापं न प्राप्नुयात्) [अपि च] भद्रं भवाति नः पुरः (=अस्माकं कल्याणं पुरतो भवेत्)॥

१२. शत्रून् जेता (=शत्रूणां जेता) विचर्षणिः (=विश्वस्य द्रष्टा=विशेषेण प्रज्ञावान्) इन्द्रः सर्वाभ्य आशाभ्यः परि (=सर्वासां दिशां सकाशात्) [अस्माकम्] अभयं करत् (=करोतु)॥

परिः पञ्चमीद्योतकः ॥

१०. मोठें [आणि] पराभव करणारें भय इन्द्रच निवारण करो. कारण कीं तो अचल [आणि] प्रज्ञावान् [आहे].

10. May Indra alone remove the great [and] distressing fear. For he [is] unshakable [and] all-wise.

११. इन्द्रच आमचें कल्याण करो; [म्हणजे] मागें आम्हांला पाप शिवणार नाहीं [आणि] पुढें आमचें कल्याण होईल.

11. May Indra alone favour us, so that sin shall not touch us behind [and] good shall attend us before.

१२. शत्रूंला जिंकणारा [आणि] प्रज्ञावान् [असा] इन्द्र सर्व दिशांला अभय करो.

12. May Indra, the conqueror of enemies and all-wise, cause freedom from fear from all directions.

विश्वे॑ देवास॒ आ ग॑त शृणु॒ता म॑ इ॒मं हव॑म् ।
एदं ब॒र्हिर्नि षी॑दत ॥ १३ ॥

विश्वे॑ । दे॒वा॒स॒: । आ । ग॒त॒ । शृ॒णु॒त । मे॒ । इ॒मम् । हव॑म् ।
आ । इ॒दम् । ब॒र्हिः । नि । सी॒द॒त॒ ॥ १३ ॥

ती॒व्रो वो॒ मधु॑माँ अ॒यं शु॒नहो॑त्रेषु मत्स॒रः ।
ए॒तं पि॑बत॒ काम्य॑म् ॥ १४ ॥

ती॒व्रः । व॒: । मधु॑ऽमान् । अ॒यम् । शु॒नऽहो॑त्रेषु । म॒त्स॒रः ।
ए॒तम् । पि॒ब॒त॒ । काम्य॑म् ॥ १४ ॥

इन्द्र॑ज्येष्ठा म॒रुद्ग॑णा॒ देवा॑सः॒ पूष॑रातयः ।
विश्वे॒ मम॑ श्रु॒ता हव॑म् ॥ १५ ॥ ९ ॥

इन्द्र॑ऽज्येष्ठाः । म॒रुत्ऽगणाः । देवा॑सः । पूष॑ऽरातयः ।
विश्वे॑ । मम॑ । श्रु॒त॒ । हव॑म् ॥ १५ ॥ ९ ॥

भाषायाम्.

१३. हे विश्वे देवासः (=विश्वे सर्वे देवाः), [यूयम्] आ गत (=आगच्छत)। मे इमं हवं शृणुत (=ममेदमाह्वानं शृणुत)। इदं बर्हिः आ निषीदत (=आगम्य निषीदत)॥

१४. [हे विश्वे देवाः], अयं तीव्रः (=तीव्रमदो) मधुमान् (=रसयुक्तो) मत्सरः (=मदकरः) [सोमो] वः शुनहोत्रेषु [भवति] (=युष्मदर्थं शुनहोत्राणां गृहे=गृत्समदानां गृहे प्रार्पितो भवति)। काम्यं (=कमनीयम्) एतं पिबत ॥

१५. हे इन्द्रज्येष्ठाः (=इन्द्रः पुरोगामी येषां तादृशा) मरुद्गणाः (=मरुत्समूहरूपाः) पूषरातयः (=पूषा दाता येषां तादृशा) विश्वे देवासः (=हे सर्वे देवाः), [यूयं] मे हवं श्रुत (=ममापह्वानं शृणुत)॥

१३. हे विश्वेदेव हो, तुम्ही या. ही माझी हाक ऐका. येऊन या दर्भांवर बसा.

१४. हे विश्वे देव हो, हा शुनहोत्रांच्या घरीं तुम्हांकरितां तीव्रमद, रसभरित [आणि] मदकारक [सोम] [आहे]. हा कमनीय [सोम] तुम्ही प्या.

१५. इंद्र ज्यांमध्यें ज्येष्ठ आहे, मरुतांचे ज्यांत गण आहेत, पूषा ज्यांमध्यें दाता आहे असे हे विश्वे देव हो, तुम्ही माझी हाक ऐका.

13. Come ye, all gods! Hear this my invocation. come and sit on this grass.

14. This swift, sweet [and] exhilarating [soma] is for you in [the house of] the S′unahotras. Drink this which is worthy of being wished for.

15. Ye all gods, among whom Indra is the greatest, among whom the Maruts form the troops [and] among whom Pûshan is the giver, hear ye my invocation.

---

१४. 'शुनहोत्र.' हें गृत्समदांचें नांव होय असें सायण म्हणतात. सू. २०९ मं. ६ पहा.

अम्बितमे नदीतमे देवितमे सरस्वति ।
अप्रशस्ता इव स्मसि प्रशस्तिमम्ब नस्कृधि ॥ १६ ॥

अम्बिऽतमे । नदीऽतमे । देविऽतमे । सरस्वति ।
अप्रशस्ताःऽइव । स्मसि । प्रऽशस्तिम् । अम्ब । नः । कृधि ॥ १६ ॥

त्वे विश्वा सरस्वति श्रितायूंषि देव्याम् ।
शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः ॥ १७ ॥

त्वे इति । विश्वा । सरस्वति । श्रिता । आयूंषि । देव्याम् ।
शुनऽहोत्रेषु । मत्स्व । प्रऽजाम् । देवि । दिदिड्ढि । नः ॥ १७ ॥

इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति ।
या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति ॥१८॥

इमा । ब्रह्म । सरस्वति । जुषस्व । वाजिनीऽवति ।
या । ते । मन्म । गृत्सऽमदाः । ऋतऽवरि । प्रिया । देवेषु । जुह्वति ॥१८

भाषायाम्.

१६. हे अम्बितमे (=मातॄणां श्रेष्ठे) नदीतमे (=नदीनां मध्ये श्रेष्ठे) हे देवितमे (=देवीनां श्रेष्ठे) सरस्वति, [वयम्] अप्रशस्ता इव स्मसि (=अप्रशस्ता इव स्मः ख्यात्ययोग्या इव भवामः)। [तत्] हे अम्ब, नः प्रशस्तिं (=ख्यातिं) कृधि (=कुरु)॥

१७. हे सरस्वति, विश्वा आयूंषि (=सर्वाण्यायुष्याणि) त्वे देव्यां (=त्वयि देव्यां) श्रिता (=स्थितानि)। [त्वं] शुनहोत्रेषु (=शुनहोत्राणां गृहे) मत्स्व (=सोमपानेन तृप्य)। हे देवि, नः प्रजां दिदिड्ढि (=अस्मभ्यं पुत्रान् देहि)॥

१८. हे वाजिनीवति (=अन्नवति=दत्तान्ने) ऋतावरि (=सत्यवति) सरस्वति, देवेषु प्रिया (=देवानां प्रियाणि) या [ब्रह्म] (=यानि ब्रह्माणि स्तोत्राणि) गृत्समदाः (=अस्मद्रूपा उपासकास्) ते जुह्वति (=त्वदर्थमर्पयन्ति) इमा ब्रह्म (=तानीमानि ब्रह्माणि स्तोत्राणि) जुषस्व (=सेवस्व)॥

१६. हे श्रेष्ठ माते, हे श्रेष्ठ नदी, हे श्रेष्ठ देवी सरस्वती, आम्ही ख्यातीला अयोग्य असल्याप्रमाणें आहों. [तर] हे माते, तूं आमची ख्याति कर.

१७. हे सरस्वती, तुज देवीच्या ठायीं सकळ आयुष्यें राहतात. तूं शुनहोत्रांच्या घरीं आनंद पाव. हे देवी, तूं आम्हांला प्रजा दे.

१८. हे सरस्वती, हे अन्नदायिके, हे पवित्रे, जीं स्तोत्रें देवांला प्रिय अशीं तुला गृत्समद अर्पण करीत आहेत, तीं हीं तूं सेवन कर.

16. O best of mothers, o best of rivers, o best of goddesses Sarasvatî, we are as it were unworthy of being renowned. Give us renown, o mother!

17. All life is in thee the goddess, o Sarasvatî. Be thou gratified in the house of the S'unahotras. Give us children, o goddess!

18. O bounteous [and] holy Sarasvatî, accept thou these hymns which, dear to the gods, the Gṛitsamadas are offering unto thee.

---

१६. सरस्वती ही सरस्वती नांवाची जी नदी तद्रूपच देवता होय. सू. ३ मं. १० आणि टीप पहा.

१७. 'शुनहोत्र.' सू. २३२ मं. १४ आणि टीप पहा.

प्रेतां यज्ञस्य शंभुवा युवामिदा वृणीमहे ।
अग्निं च हव्यवाहनम् ॥ १९ ॥

प्र । इताम् । यज्ञस्य । शम्ऽभुवा । युवाम् । इत् । आ । वृणीमहे ।
अग्निम् । च । हव्यऽवाहनम् ॥ १९ ॥

द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम् ।
यज्ञं देवेषु यच्छताम् ॥ २० ॥

द्यावा । नः । पृथिवी इति । इमम् । सिध्रम् । अद्य । दिविऽस्पृशम् ।
यज्ञम् । देवेषु । यच्छताम् ॥ २० ॥

आ वामुपस्थमद्रुहा देवाः सीदन्तु यज्ञियाः ।
इहाद्य सोमपीतये ॥ २१ ॥ १० ॥

आ । वाम् । उपऽस्थम् । अद्रुहा । देवाः । सीदन्तु । यज्ञियाः ।
इह । अद्य । सोमऽपीतये ॥ २१ ॥ १० ॥

भाषायाम्.

१९. यज्ञस्य शंभुवा (=शंभुवौ फलसंपादके) [युवां द्यावापृथिव्यौ] प्रेताम् (="उत्तरवेदेः पश्चिमभागं प्रति गच्छताम्")। युवानित् (=वामेव) आ वृणीमहे (=प्रार्थयामहे) हव्यवाहनं (=दत्तस्य हविषो वाहकम्) अग्निं च [आवृणीमहे] ॥

२०. द्यावा पृथिवी (=द्यावापृथिव्यौ) सिध्रं (=फलसाधकं) दिविस्पृशं (=देवान् गच्छन्तं) नः (=अस्माकम्) इमं यज्ञम् अद्य देवेषु यच्छतां (=नयताम्) ॥

२१. हे अद्रुहा (=अद्रुहौ=द्रोहवर्जिते) [द्यावापृथिव्यौ], यज्ञिया देवाः (=पूजनार्हा देवा) वाम् उपस्थम् आ सीदन्तु (=आगम्य युवयोः समीपं निषीदन्तु)—अद्य सोमपीतये (=सोमपानाय) इह [निषीदन्तु] ॥

१९. यज्ञातें सफल करणाऱ्या अशा तुम्ही दोघीजणी निघा, या. तुम्हां दोघांसच आम्ही प्रार्थीत आहों, आणि हव्यवाहक अग्नीला [प्रार्थीत आहों].

१९. Come forth, you both, who fructify the sacrifice. We seek you alone, and [we seek] Agni, the carrier of the oblation.

२०. द्यू आणि पृथिवी या आमच्या साधक आणि स्वर्गस्पर्शी यज्ञाला आज देवांप्रत प्रविष्ट करोत.

20. May heaven and earth carry today this our sacrifice, which will attain its end [and] which will ascend to heaven.

२१. हे द्रोह न करणाऱ्या [द्यावापृथिवी हो], पूज्य देव येऊन तुम्हांजवळ बसोत– आज येथें सोमपानासाठीं [बसोत].

21. O beneficent [Heaven and Earth], may the adorable gods come and sit near you—[sit] here today to drink the soma.

---

१९. 'तुम्ही दोघीजणी.' म्हणजे द्यावापृथिवी.

२१. सोळापासून एकवीसपर्यंत सहा ऋचा शांतिसूक्तांत, दुष्टजनन्-शांतींत आणि सरस्वती पाठांत म्हणण्याची चाल आहे.

सूक्तम् ४२-२३३.

गृत्समद ऋषिः । इन्द्रः कपिञ्जलरूपो देवता । त्रिष्टुप् छन्दः ॥

कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम् ।
सुमङ्गलश्च शकुने भवासि मा त्वा का चिदभिभा विश्व्या विदत्
॥ १ ॥

कनिक्रदत् । जनुषम् । प्रऽब्रुवाणः । इयर्ति । वाचम् । अरिताऽइव । नावम् ।
सुऽमङ्गलः । च । शकुने । भवासि । मा । त्वा । का । चित् । अभिऽभा । विश्व्या । विदत् ॥ १ ॥

मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता ।
पित्र्यामनु प्रदिशं कनिक्रदत्सुमङ्गलो भद्रवादी वदेह ॥ २ ॥

मा । त्वा । श्येनः । उत् । वधीत् । मा । सुऽपर्णः । मा । त्वा । विदत् । इषुऽमान् । वीरः । अस्ता ।
पित्र्याम् । अनु । प्रऽदिशम् । कनिक्रदत् । सुऽमङ्गलः । भद्रऽवादी । वद । इह ॥ २ ॥

भाषायाम्.

१. कनिक्रदत् (=पुनःपुनः शब्दायमानः) [कपिञ्जलः पक्षी] जनुषं प्रब्रुवाणः (=जनिष्यमाणं भविष्यमाणम् अर्थं सूचयन्) अरितेव नावं वाचम् इयर्ति (=कर्णधारो नावं यथा प्रेरयति तथा वाचं प्रेरयति)— हे शकुने (=कपिञ्जल), सुमङ्गलश्च भवासि (=सुमङ्गलसूचको भव) [अपि च] काचित् विश्व्या अभिभा (=सर्वदिक्संबन्धी कोप्यभिभवस्) त्वा मा विदत् (=त्वां मा प्रापत्) ॥

वयसाम् अमनोज्ञां वाचं श्रुत्वैतत् सूक्तं जपेत् । सूत्रितं च । वयसाम् अमनोज्ञा वाचः श्रुत्वा कनिक्रदत् जनुषं प्रब्रुवाण इति सूक्तं जपेत् इति । इति सायणभाष्ये ॥

२. [हे शकुने], त्वा (=त्वां) श्येनः [पक्षी] मा उद्वधीत् (=मा हिंसीत्) । सुपर्णः (=गरुडः पक्षी) मा [वधीत्] । इषुमान् (=बाणवान्) अस्ता (=शराणां क्षेप्ता धन्वी) वीरो मा त्वा विदत् (=त्वां मा प्रापत्) । पित्र्यां प्रदिशम् अनु

सूक्त ४२–२३३.

ऋषि–गृत्समद. देवता–कपिञ्जलरूपी इन्द्र. वृत्त–त्रिष्टुभ्.

१. पुनःपुनः ओरडणारा [कपिञ्जल] भविष्य सांगत सांगत, जसा सुकाणु धरणारा नौकेला प्रेरितो त्याप्रमाणें, वाणीला प्रेरितो.–हे पक्ष्या, तूं सुमंगलवाची हो. तुला चोहींकडचें कोणतेंहि अकल्याण स्पर्श न करो.

२. तुला श्येन न मारो, गरुड न मारो, तुला बाणवान् धन्वी वीर न धरो. तूं पितरांच्या दिशेला ओरडून आम्हांसाठीं सुमंगल [आणि] कल्याणवादी असा बोल.

Hymn 42–233.

To *Indra*, as the bird Kapinjala. By *Gṛitsamada.* Metre—*Trishṭubh.*

1. Crying out with force [the bird], proclaiming the future, directs the voice even as the steerer [directs] the ship.—And be thou auspicious, o bird ; may no harm from any quarter ever touch thee.

2. May the hawk never kill thee, may the eagle never [kill thee], may the hero armed with a bow and arrows never take thee. Crying along the quarter of the globe sacred to the fathers, do thou here speak auspiciously and with good luck.

---

१. हें सूक्त विवाहांत नवरा नवरीच्या घरीं लग्नाला जाऊं लागला म्हणजे म्हणत असतात. त्याचें कारण इतकेंच कीं, या पहिल्या ऋचेंत ‘ सुमंगल ’ हा शब्द आला आहे आणि वेदांतील ‘ सुमंगल ’ हा शब्द उच्चारिला असतां नवऱ्याचें आणि नवरीचें कल्याण होईल अशी कल्पना. हें सूक्त ज्याविषयीं आहे तो कपिंजल म्हणजे एक पक्षी होय. बहुतकरून पिंगळा असावा.

‘ वाणीला प्रेरितो ’=‘ वाचम् इयर्ति.’ म्ह० जसें भविष्य सांगावयाचें आहे त्याप्रमाणें त्या दिशेला ओरडत ओरडत जातो. जाण्याचें ठिकाण ज्या दिशेला असेल, त्या दिशेला सुकाणु हाकणारा आपली नाव हाकारितो, त्याप्रमाणें कपिंजल ओरडत ओरडत अमुक एक दिशेला जात असतो, असें तात्पर्य दिसतें.

२. ‘ पितरांच्या दिशेला ’ = ‘ पित्र्याम् अनु प्रदिशम्.’ म्हणजे दक्षिण दि-

अव॑ क्रन्द दक्षिण॒तो गृ॒हाणां॑ सुम॒ङ्गलो॑ भद्र॒वा॒दी श॑कुन्ते ।
मा नः॑ स्ते॒न ई॑शत॒ माघशं॑सो बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑ ॥३॥११

अव॑ । क्र॒न्द॒ । द॒क्षि॒ण॒तः । गृ॒हाणा॑म् । सु॒ऽम॒ङ्गलः॑ । भ॒द्र॒ऽवा॒दी । श॒कु॒न्ते॒ ।
मा । न॒ः । स्ते॒नः । ई॒श॒त॒ । मा । अ॒घऽशं॑सः । बृ॒हत् । व॒दे॒म॒ । वि॒-
दथे॑ । सु॒ऽवीराः॑ ॥ ३ ॥ ११ ॥

कनिक्रदत् (=दक्षिणस्यां दिशि पुनःपुनः शब्दं कुर्वन्) [त्वम्] इह (=अस्म-द्विषये) सुमङ्गलो भद्रवादी वद (=कल्याणमङ्गलो शोभनवादी सन् मङ्गलं सूचय) ॥
श्येनः प्रबलः पक्षिविशेषः । इति सायणः ॥

भाषायाम्.

३. हे शकुन्ते (=कपिञ्जल पक्षिन्), [त्वं] गृहाणां दक्षिणतः सुमङ्गलो भद्र-वादी अव क्रन्द (=गृहतो दक्षिणस्यां दिशि सुमङ्गलं भद्रसूचकं च यथा तथा शब्दं कुरु) । स्तेनो नो मेशत (=तस्करो अस्मान् मेशिष्ट) मा अघशंसः (=अनर्थ-कानां शंसकोपि मेशिष्ट) । [अपि च] सुवीराः (=शोभनवीर्योपेतपुत्रा) [वयं] विदथे बृहद् वदेम (=यज्ञे महत्स्तोत्रं ब्रूयाम) ॥

गृहाणां दक्षिणत इत्यत्र दक्षिणतः शब्दायमानः शकुन्तो मङ्गलसूचको हि इति सायणः ॥

सूक्तम् ४३–२३४.

कपिञ्जलरूप इन्द्रो देवता । गृत्समद ऋषिः । जगती छन्दः । मध्या-तिशक्वरी । अष्टिर्वा ॥

प्र॒द॒क्षि॒णिद॒भि गृ॑णन्ति का॒रवो॒ वयो॒ वद॑न्त ऋतु॒था श॒कुन्त॑यः ।
उ॒भे वाचौ॑ वदति साम॒गा इ॑व गाय॒त्रं च॒ त्रैष्टु॑भं॒ चानु॑ राजति १

प्र॒ऽद॒क्षि॒णित् । अ॒भि । गृ॒ण॒न्ति॒ । का॒रवः॑ । वयः॑ । वद॑न्तः । ऋ॒तु॒ऽ-
था । श॒कुन्त॑यः ।
उ॒भे इति॑ । वाचौ॑ । व॒द॒ति॒ । सा॒म॒गाःऽइ॑व । गा॒य॒त्रम् । च॒ । त्रैस्तु॑भम् ।
च॒ । अनु॑ । रा॒ज॒ति॒ ॥ १ ॥

३. हे कपिंजला, तूं सुमंगल आणि कल्याणवादी असा घराच्या दक्षिण दिशेला ओरड. चोराचा अधिकार आम्हांवर न चालो, दुष्टाचा न [चालो]. [आणि] वीर्यवान् पुत्रपौत्रांसहित आम्हीं यज्ञांत मोठें स्तोत्र गाऊं असें घडो.

3. O Kapinjala, do thou cry auspiciously and with good luck to the south of the house. May the thief never rule us, nor may the wicked man. May we, accompanied by brave sons and grand sons, chant a great hymn in the sacrifice.

शेला. मनुष्य मेल्यावर दक्षिण दिशेला जातो हो समजूत जशी सांप्रत काळीं प्रसिद्ध आहे त्याप्रमाणेंच वेदाच्या वेळींहि ती प्रसिद्ध असे, असें या सूक्तावरून होतें.

सूक्त ४३–२३४.

ऋषि–गृत्समद. देवता–कपिञ्जलरूपी इन्द्र. वृत्त–जगती; पण दुसरी ऋचा **अतिशक्करी** अथवा **अष्टि** वृत्ताची.

१. कपिंजलपक्षी [हेच] स्तोते योग्य काळीं शुभ सूचवून दक्षिण दिशेला गात असतात. [कपिंजल] सामगायकाप्रमाणें दोन्ही वाणी उच्चारितो– तो गायत्र आणि त्रैष्टुभ [हीं वृत्तें] म्हणतो.

HYMN 43–234.

To *Indra* as the *Kapinjala* bird. By *Gṛitsamada*. Metre—*Jagatî*; verse 2 is *Atis'akvarî* or *Ashṭi*.

1. The [Kapinjala] birds [like] poets speaking at proper seasons sing in the south. [That bird] like a singer of *Sâman* speaks both kinds of speech—he exhibits both the Gâyatra and the Traishṭubha metres.

१. 'कपिञ्जल पक्षी हे स्तोत्रकर्त्या कवींप्रमाणें शुभ वचनें गातात. साम म्हणणाऱ्या कवीप्रमाणें कपिञ्जल पक्षी गायत्री आणि त्रिष्टुभ् हीं दोन्ही वृत्तें म्हणत असतो, म्हणजे या दोन्ही वृत्तांत गायल्याप्रमाणें गातो.'

**उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि ।
वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद विश्वतो नः शकुने पुण्यमा वद ॥ २ ॥**

उद्गाताऽइव । शकुने । साम । गायसि । ब्रह्मपुत्रःऽइव । सवनेषु । शंससि ।
वृषाऽइव । वाजी । शिशुऽमतीः । अपिऽइत्य । सर्वतः । नः । शकुने । भद्रम् । आ । वद । विश्वतः । नः । शकुने । पुण्यम् । आ । वद ॥ २

---

१. शकुन्तयो वयः कारवः (=कपिञ्जलाः पक्षिणो नाम स्तोतारः=कपिञ्जलपक्षिरूपाः कवयः) ऋतुथा वदन्तः (=योग्यकाले शुभं सूचयन्तः) प्रदक्षिणित् (=दक्षिणदिशि) अभि गृणन्ति (=अभिवदन्ति)। [कपिञ्जलः] सामगा इव उभे वाचौ वदति । गायत्रं च त्रैष्टुभं च अनुराजति (=गायत्रीवृत्तं त्रिष्टुभं वृत्तं चेत्युभे वाचौ प्रकाशयति) ॥

भाषायाम्.

२. हे शकुने (=कपिञ्जल), उद्गातेव साम (=यथोद्गाता साम गायति तथा) [त्वं] गायसि । ब्रह्मपुत्रः सवनेष्विव (=यथा ब्राह्मणाच्छंसी यज्ञेषु शस्त्राणि शंसति तथा) [त्वं] शंससि (=श्रौतस्वरं करोषि)। शिशुमतीः (=वत्सयुक्ता वडवा) अपीत्य (=अभिगत्य) वृषा वाजीव (=सेचनसमर्थस्तरुणोश्व इव) त्वं हे शकुने (=कपिञ्जल), सर्वतो नो भद्रम् आ वद (=सर्वाभ्यो दिग्भ्योस्मदर्थं कल्याणकरं शब्दं कुरु)— हे शकुने (=कपिञ्जल), विश्वतो नः पुण्यम् आ वद (=अस्मदर्थं कल्याणसूचकं यथा तथा शब्दं कुरु)॥

२. हे पक्ष्या, तूं उद्गात्याप्रमाणें साम गातोस, तूं ब्रह्मपुत्राप्रमाणें यज्ञांत [शस्त्रें] म्हणतोस. तरुण घोडा जसा शिंगरें असलेल्या [वडवांत] मिसळून [ओरडतो] तसा तूं हे पक्ष्या, सर्व दिशांला आम्हांकरितां शुभसूचक बोल– हे पक्ष्या, तूं सकल दिशांला कल्याणसूचक बोल.

2. Thou singest, o bird, a *Sâman* like the Udgâtâ. Thou chantest like the Brahmaputra in sacrifices. Do thou, o bird, cry auspiciously for us in all directions, even as a stallion that goes among mares having foal—cry, o bird, good luck for us on every side.

---

२. 'उद्गाता.' हें एका ऋत्विजाचें नांव आहे. त्याचें काम सामवेदांतील सामें (=सामवेदांतील सूक्तें) म्हणणें हें असे.

'ब्रह्मपुत्र.' हें एका ऋत्विजाचें नांव आहे. सायण म्हणतात ब्राह्मणाच्छंसी आणि ब्रह्मपुत्र हे एकच. ब्राह्मणाच्छंसी या ऋत्विजाचें काम यज्ञांत शस्त्रें म्हणून जे स्तोत्रांचे प्रकार ते म्हणणें हें असे.

'वडवांत मिसळून ओरडतो.' वडवा म्हणजे घोडी. उपमेचा अभिप्राय स्पष्ट नाहीं, आणि विशेषेंकरून शिंगरें असलेल्या (शिशुमतीः) या विशेषणाचें प्रयोजन समजत नाहीं. जिच्याजवळ शिंगरूं उभें आहे तशा घोडीजवळ घोडा गेला तर तो मोठ्या आनंदानें अथवा मोठ्या नादानें ओरडतो असें प्रसिद्ध नाहीं.

आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः ।
यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ॥
॥ ३ ॥ १२ ॥ ४ ॥ २ ॥

आऽवदन् । त्वम् । शकुने । भद्रम् । आ । वद । तूष्णीम् । आसीनः ।
सुऽमतिम् । चिकिद्धि । नः ।
यत् । उत्ऽपतन् । वदसि । कर्करिः । यथा । बृहत् । वदेम । विदथे ।
सुऽवीराः ॥ ३ ॥ १२ ॥ ४ ॥ २ ॥

भाषायाम्.

३. हे शकुने, आवदन् (=शब्दं कुर्वन्) त्वं भद्रम् आ वद (=मङ्गलं वद)। तूष्णीम् आसीनः (=तूष्णीं तिष्ठन्) नः सुमतिम् (=अस्माभिः कृतां स्तुतिं) चिकिद्धि (=बुध्यस्व)। यत् उत्पतन् वदसि (=यदा उत्पतन् शब्दं करोषि तदा) कर्करिर्यथा [वद] (=कर्करिर्नाम वाद्यविशेष इव शब्दं कुरु)। [अपि च] सुवीरा [वयं] विदथे (=यज्ञे) बृहत् [स्तोत्रं] वदेम (=ब्रूयाम)॥

समाप्तं द्वितीयं मण्डलम् ॥

३. हे पक्ष्या, तूं बोलून बोलून कल्याणसूचक बोल. तूं उगीच बसलास तर आमच्या उपासनेकडे लक्ष्य दे. तूं जेव्हां उडतउडत बोलतोस तेव्हां कर्करीप्रमाणें [बोल]. [आणि] शौर्यवान् पुत्रपौत्रांसहित आम्ही यज्ञांत स्तोत्र गाऊं असें कर.

3. Crying and crying do thou, o bird, cry good luck. Sitting silent do thou attend to our hymn. When thou criest flying, cry like a *karkari*. And may we, accompanied by brave sons and grand sons, chant a great [hymn] in the sacrifice.

---

३. 'कर्करीप्रमाणें.' कर्करि हें एका वाद्याचें नांव आहे असें सायण म्हणतात. हें नांव ऋग्वेदांत पुनः आलेलें नसल्यामुळें कोणतें वाद्य हें सांगवत नाहीं.

दुसरें मण्डळ समाप्त.

अथ तृतीयं मण्डलम् ।

सूक्तम् १–२३५.

मण्डलद्रष्टा विश्वामित्र ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

सोम॑स्य मा त॒व॒सं॑ वक्ष्य॑ग्ने वह्निं॑ चकर्थ वि॒द॒थे॒ यज॑ध्यै ।
दे॒वाँ अच्छा॒ दीद्य॑द्यु॒ञ्जे अद्रिं॑ शमा॒ये अ॑ग्ने त॒न्वं॑ जुषस्व ॥ १ ॥

सोम॑स्य । मा॒ । त॒वस॑म् । वक्षि॑ । अ॒ग्ने॒ । वह्नि॑म् । च॒क॒र्थ॒ । वि॒दथे॑ । यज॑ध्यै ।
देवान् । अच्छ॑ । दीद्य॑त् । यु॒ञ्जे । अद्रि॑म् । श॒म्ऽआ॒ये । अ॒ग्ने॒ । त॒न्व॑म् । जु॒ष॒स्व॒ ॥ १ ॥

भाषायाम्.

१. हे अग्ने, सोमस्य तवसं मा वक्षि (=सोमस्य बलं मां प्रापय आनय) । विदथे यजध्यै वह्निं चकर्थ (=यज्ञे यजनं कर्तुं मां हविर्दायिनं यजमानं कृतवानसि) । देवान् अच्छ दीद्यत् अद्रिं युञ्जे (=देवान् उद्दिश्य ग्रावाणं नाम पाषाणं सोमाभिषवणार्थं योजयामि) तन्वं [च] शमाये (=आत्मानं च शाम्यामि=श्रमयामि) । [अतः कारणात्] हे अग्ने, [त्वं] जुषस्व (=दत्तं हविः सेवस्व) ॥

मंडल ३.

BOOK 111.

सूक्त १–२३५

Hymn 1–235.

ऋषि–मण्डलद्रष्टा विश्वामित्र. देवता–अग्नि. वृत्त–त्रिष्टुभ्.

To *Agni*. By *Vis'vâmitra*. Metre—*Trishṭubh*.

१. हे अग्नी, तूं मला सोमाचें बळ घेऊन ये. यज्ञांत मी यजन करावें म्हणून [मला] त्वां यजमान केलें आहे. मी देवांला उद्देशून पाषाण जोडीत आहें [आणि] आपणास श्रमवीत आहें. [तर] हे अग्नी, तूं सेवन कर.

1. Bring unto me, o Agni, the strength of the soma. Thou hast made me a sacrificer that I may perform worship in a sacrifice. Intent on the gods I join the stone-press [and] fatigue myself. Be thou pleased, o Agni!

---

१. येथून तिसऱ्या मंडलास आरंभ होतो. हें मंडल विश्वामित्राचें आहे; म्हणजे यांतील सूक्तें विश्वामित्रानें अथवा त्याच्या वंशांतील ऋषींनीं केलेलीं आहेत अशी समजूत आहे. विश्वामित्र ऋषि पुराणांत, रामायणादिक महाकाव्यांत, महाभारतादिक कथासंग्रहांत, आणि इतर आर्यग्रंथांत आणि साधारण मराठी कथापुस्तकांतहि प्रसिद्ध आहे. विश्वामित्र आणि वसिष्ठ यांचें वैर सर्व लोकांनीं ऐकिलें आहे. आणि विश्वामित्र प्रथम क्षत्रिय असून ब्राह्मणांनीं त्याला ब्रह्मर्षीप्रमाणें न मानिल्यामुळें त्याला क्रोध येऊन, त्याणें हजारो वर्षेपर्यंत तप केलें आणि ब्राह्मण झाला. विश्वामित्र फार क्रोधस्वभावी असे. वसिष्ठानें त्याचे शंभर पुत्र मारिले. रामचंद्र आणि लक्ष्मण हे लहानपणीं विश्वामित्राचे घरीं विद्या संपादण्यासाठीं राहिले होते. इत्यादिक अनेक गोष्टी पुराणादिकांत प्रसिद्ध आहेत. तर असा जो विश्वामित्र त्याची वाणी या सर्व मंडळांत आहे. तेव्हां वस्तुतः विश्वामित्र कसा होता; म्हणजे आतां सांगितलेल्या ग्रंथांत लिहिल्याप्रमाणें होता कीं दुसऱ्याच कांहीं तऱ्हेचा होता हें समजण्याला ह्या मंडलांत उत्तम साधनें आहेत.

‘पाषाण जोडीत आहे’=‘अद्रिं

प्राञ्चं यज्ञं चकृम वर्धतां गीः समिद्भिरग्निं नमसा दुवस्यन् ।
दिवः शशासुर्विदथा कवीनां गृत्साय चित्तवसे गातुमीषुः ॥२॥

प्राञ्चम् । यज्ञम् । चकृम । वर्धताम् । गीः । समित्ऽभिः । अग्निम् । नमसा । दुवस्यन् ।
दिवः । शशासुः । विदथा । कवीनाम् । गृत्साय । चित् । तवसे । गातुम् । ईषुः ॥ २ ॥

मर्यो दधे मेधिरः पूतदक्षो दिवः सुबन्धुर्जनुषा पृथिव्याः ।
अविन्दन्नु दर्शतमप्स्व१न्तर्देवासो अग्निमपसि स्वसॄणाम् ॥ ३ ॥

मर्यः । दधे । मेधिरः । पूतऽदक्षः । दिवः । सुऽबन्धुः । जनुषा । पृथिव्याः ।
अविन्दन् । ऊं इति । दर्शतम् । अप्ऽसु । अन्तः । देवासः । अग्निम् । अपसि । स्वसॄणाम् ॥ ३ ॥

भाषायाम्.

२. [वयं] प्राञ्चं यज्ञं (=प्रकर्षेण गन्तारं यज्ञं कृतवन्तः स्मः) । गीर्वर्धतां (=स्तुतिरेधताम्) । समिद्भिर्नमसा (=हविषा च) अग्निं दुवस्यन् (=अस्मदीयाः परिचरेयुः) । कवीनां विदथा दिवः शशासुः (=मेधाविनो यज्ञान् द्युलोकात् देवा अन्वशिषन्) [अपि च] गृत्साय (=मेधाविने) तवसे (=प्रबलाय) [अग्नये] गातुमीषुः (=मार्गं प्रेरितवन्तः=अग्निर्मार्गं यथा लभते तथाकुर्वन्) ॥

३. मेधिरः (=मेधावी) पूतदक्षः (=शुद्धबलः) [अग्निर्] जनुषा (=जन्मना=जात एव) दिवः पृथिव्याः (=द्यावापृथिव्योः) सुबन्धुः (=शोभनो बन्धुर्) [भवति] । देवा दर्शतं (=दर्शनीयं सुन्दरम्) अग्निम् अप्सु अन्तः (=मेघोदकेषु मध्ये)—स्वसॄणामपसि (=स्वसृभूतानामुदकानां वहनरूपे व्यापारे)— अविन्दन् (=लब्धवन्तः) ॥

२. फलोत्पादक यज्ञ आम्हीं केला आहे. स्तोत्राचा जय असो. समिधांनीं आणि हवीनें [ऋत्विज्] अग्नीची आराधना करोत. स्वर्गांतून कवींच्या यज्ञांला [देव] शिकविते झाले. मेधावी आणि प्रबळ [अग्नी]प्रीत्यर्थ मार्ग करिते झाले.

३. मेधावी, शुद्धबल, उपजतच स्वर्गाचा [आणि] पृथिवीचा सुबंधु [असा जो अग्नि, तो] सुख देतो. देवांला सुंदर अग्नि उदकांच्या ठायीं– भगिनीवृंदाच्या कामांत– मिळाला.

2. We have made a forward sacrifice. May the hymn prosper. May they worship Agni with fuel and oblation. [The gods] have taught the sacrifices of the wise from heaven, [and] promoted a way for wise and mighty [Agni].

3. The wise Agni of pure strength is by birth a good brother of Heaven [and] of Earth. The gods found handsome Agni in the waters—in the work of the sisters.

युञ्जे.' म्हणजे ग्रावे जोडून सोमरस काढीत आहे.

'आपणास श्रमवीत आहे'='तन्वं शमाये.' 'शम्'='श्रम्' थकविणें, यापासून. पदपाठांत शम् आये असा विग्रह आहे, परंतु सायणांनीं 'शम् आये' हा विग्रह मान्य न करून 'शम्' म्हणजे 'श्रम्' असें समजून निर्वाह केला आहे. तेव्हां पदकारांचें मत सायणांनीं न मानिल्याचें हें एक उदाहरण आहे.

---

२. या ऋचेचा उत्तरार्ध जरा संदिग्ध आहे. तथापि भावार्थ असा दिसतो कीं, 'देवांनीं स्वर्गाहून विद्वान् जनांनीं यज्ञ कसा करावा तें शिकविलें, आणि अग्नीला पृथ्वीवर येण्याला आणि येथून परत जाण्याला मार्ग करून दिला.'

३. 'भगिनीवृंदाच्या कामांत'='अपसि स्वसॄणाम्.' म्हणजे बहिणीसारखीं जीं मेघोदकें त्यांच्या प्रवाहांत. वहनरूप कर्म होत असतां त्या प्रवाहांत अग्नि सांपडला असें सांगण्याचा उद्देश आहे.

अवर्धयन्त्सुभगं सप्त यह्वीः श्वेतं जज्ञानमरुषं महित्वा ।
शिशुं न जातमभ्यारुरश्वा देवासो अग्निं जनिमन्वपुष्यन् ॥ ४ ॥

अवर्धयन् । सुऽभगम् । सप्त । यह्वीः । श्वेतम् । जज्ञानम् । अरुषम् । महिऽत्वा ।
शिशुम् । न । जातम् । अभि । आरुः । अश्वाः । देवासः । अग्निम् । जनिमन् । वपुष्यन् ॥ ४ ॥

शुक्रेभिरङ्गै रज आततन्वान् क्रतुं पुनानः कविभिः पवित्रैः ।
शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः ॥५॥१३॥

शुक्रेभिः । अङ्गैः । रजः । आऽततन्वान् । क्रतुम् । पुनानः । कविऽभिः । पविऽत्रैः ।
शोचिः । वसानः । परि । आयुः । अपाम् । श्रियः । मिमीते । बृहतीः । अनूनाः ॥ ५ ॥ १३ ॥

भाषायाम्.

४. सुभगं (=शोभनधनं) श्वेतं (=शुभ्रं) महित्वा (=महत्त्वेन) अरुषम् (=आरोचमानम्) [अग्निं] जज्ञानं (=जायमानं सन्तं) सप्त यह्वीः (=सप्त नद्यः=अन्तरिक्षस्थमेघोदकानि=अन्तरिक्षप्रदेशा) अवर्धयन् (=वृद्धिं प्रापयन्) । जातं शिशुम् अश्वा न [तम्] अभि आरुः (=जातं वत्सं वडवा यथाभिगच्छन्ति तथा तं प्रति जग्मुः) । देवासः (=देवा) अग्निं जनिमन् (=जनिमनि=तस्य जन्मनि सति) वपुष्यन् (=दीप्तिमन्तमकुर्वन्) ॥

५. शुक्रैभिरङ्गैः (=शुक्रैरङ्गैः=शुभ्रैस्तेजोभी) रज आततन्वान् (=अन्तरिक्षं व्याप्नुवन्) क्रतुं पवित्रैः कविभिः पुनानः (=यज्ञं शोधकैः कविभिः प्राज्ञैर्ऋषिभिः शोधयन्) शोचिर्वसानः (=दीप्तिरूपं वस्त्रं परिदधानः) [सः] अपाम् आयुः (=अपसाम् आयुष्यं=कर्मवताम् उपासकानां दीर्घम् आयुष्यं) बृहतीः (=महतीर्) अनूनाः (=संपूर्णाः) श्रियः (=संपदश्च) परि मिमीते (=निर्मिमीते तेभ्यो ददाति) ॥

४. सुधन, तेजस्वी [आणि] मोठेपणानें आरक्त असा [अग्नि] उत्पन्न होतांच त्याला सात नद्या वाढविता झाल्या. घोड्या जशा, जन्मलेल्या शिंग्याकडे धांवत जातात तशा त्या त्याजप्रत धांवल्या. अग्नि जन्मतांच देव त्याला दीप्तिमान् करिते झाले.

५. सुशोभित तेजांनीं आकाशाला भरणारा, यज्ञाला पवित्र मेधावींनीं शुद्ध करणारा, [आणि] तेजोरूप वस्त्र परिधान करणारा असा अग्नि उपासकांला आयुष्य आणि मोठ्या आणि संपूर्ण संपदा दाखवितो.

4. The seven rivers nourished [Agni] [when he was] born, the bounteous, [and] handsome [Agni] shining with [his] greatness. Like mares running to the new-born colt, they ran to him. The gods made Agni brilliant at his birth.

5. Having covered [all] space with bright splendors, purifying the sacrifice by the holy poets, [and] clothing himself in effulgence, [Agni] confers [long] life and great and perfect prosperity.

---

४. 'अग्नि (विजेच्या रूपानें) जेव्हां आकाशांत प्रथम उत्पन्न झाला, तेव्हां मेघोदकरूप ज्या स्त्रिया त्यांनीं त्याला वाढविलें, आणि त्याच्या जन्मकाळीं देवांनीं त्याला दीप्ति दिली.'

'सात नद्या '=' सप्त यह्वीः'. म्हणजे 'सप्त सिन्धवः'. सू. ३५ मं. ८ पहा. अंतरिक्षांत मेघोदकरूपानें असणाऱ्या ज्या आपो-देवी त्या विवक्षित आहेत.

५. 'पवित्र मेधावींनीं शुद्ध करणारा' 'पवित्रैः कविभिः पुनानः'. आम्हीं भाषांतर अक्षरशः केलें आहे, परंतु खरोखर ऋषीचा अभिप्राय काय आहे, तो सांगणें कठीण आहे. सायणाचार्य येथें 'कवि' शब्दाचा अर्थ 'तेज' असा करितात.

'उपासकांला '=' अपाम्.' 'अप्' शब्दाचा अर्थ 'कर्म' अथवा 'आराधना' हा तर वेदांत प्रसिद्ध आहेच; परंतु 'आराधना करणारा उपासक' असा जो अर्थ येथें सायणांप्रमाणें आम्हीं केला आहे, त्याचींहि उदाहरणें केव्हां केव्हां येत असतात.

वव्राजा सीमनदतीरदब्धा दिवो यह्वीरवसाना अनग्नाः ।
सना अत्र युवतयः सयोनीरेकं गर्भं दधिरे सप्त वाणीः ॥ ६ ॥

वव्राज । सीम् । अनदतीः । अदब्धाः । दिवः । यह्वीः । अवसानाः । अनग्नाः ।

सनाः । अत्र । युवतयः । सऽयोनीः । एकम् । गर्भम् । दधिरे । सप्त । वाणीः ॥ ६ ॥

स्तीर्णा अस्य संहतो विश्वरूपा घृतस्य योनौ स्रवथे मधूनाम् ।
अस्थुरत्र धेनवः पिन्वमाना मही दस्मस्य मातरा समीची ॥ ७ ॥

स्तीर्णाः । अस्य । सम्ऽहतः । विश्वऽरूपाः । घृतस्य । योनौ । स्रवथे । मधूनाम् ।

अस्थुः । अत्र । धेनवः । पिन्वमानाः । मही इति । दस्मस्य । मातरा । समीची इति सम्ऽईची ॥ ७ ॥

भाषायाम्.

६. अनदतीः (=अभक्षयन्त्यः) अदब्धाः (=स्वयम् अहिंसिता) अवसाना अनग्नाः (=वस्त्रम् अपरिदधाना अपि अनग्ना) दिवो यह्वीः (=द्युदेवस्य कन्यकाः) [प्रति] वव्राज (=जगाम)। सना युवतयः (=वृद्धा अपि तारुण्योपेताः) सप्त वाणीः (=सप्त नद्यः) सयोनीः (=समानयोनयः=समानं जन्मस्थानम् अन्तरिक्षं यासां तादृशा) [आपो देव्यः] एकं गर्भं दधिरे (=समानम् एकमेव वैद्युताग्निरूपं गर्भं धारयन्ति) ॥

७. मधूनां स्रवथे (=मधुराणामपां स्रवणस्थानभूते) घृतस्य योनौ (=घृतवत्पोषकस्य मेघोदकस्य स्थानभूतेन्तरिक्षे) अस्य (=तस्याग्नेर्) विश्वरूपाः (=सर्ववर्णाः) संहतः (=किरणाः) स्तीर्णाः (=प्रसृता) [भवन्ति] । अत्र (=तत्रान्तरिक्षे) पिन्वमानाः (=पयसा पूर्यमाणाः=पयःपूरिता) धेनवः (=गावः=अब्रूपा) अस्थुः (=तस्य समीपे तस्थुः) । [तथैव] दस्मस्य (=वीरकर्मकारिणस्तस्य=वीरस्य) मही (=महत्यौ) मातरा (=मातापितरौ) समीची (=परस्परं सम्यक्संगते सत्यौ) [तस्थतुः]॥

६. ज्या उपद्रव न करणाऱ्या आणि ज्यांला कोणी उपद्रव केलेला नाहीं अशा ज्या द्युलोकाच्या कन्यका, [कीं ज्या] वस्त्र न नेसतांहि नग्न असत नाहींत, त्यांप्रत तो जातो. ज्या वृद्ध [असतांहि] तरूण [होत] त्या एकाच ठिकाणीं जन्मलेल्या सात नद्या एकच गर्भाला धारण करितात.

७. अंतरिक्षांत–मधुर वृष्टि होण्याच्या स्थलीं–त्याच्या विश्वरूप कांति सर्वत्र पसरल्या. तेथें दुधानें भरलेल्या गाई उभ्या होत्या; [आणि] [त्या] पराक्रमी [अग्नी]-चीं मोठीं मातापितरें [उभीं होतीं].

6. He goes to the daughters of Dyaus who do not eat and are themselves unhurt, that wear no clothes and yet are not naked. The seven rivers, those who are matrons and are yet young, born of the same womb, bear one and the same fœtus.

7. In the firmament, the seat of the rich water, in the place whence the sweet waters drop—his rays of all colours were spread. There the fattening cows stood by. The great parents of the hero [stood] joined each to the other.

---

६. ‘ अंतरिक्षांतील जीं मेघोदकें (=सात नद्या) तीं विजेच्या रूपानें अग्नि अंतरिक्षांत उपजतांच त्याचें लालनपालन करूं लागलीं,’ असा भावार्थ.

७. ‘ अग्नि जेव्हां विद्युद्रूपानें आकाशांत उत्पन्न झाला, तेव्हां त्याजजवळ आपो-देवी सेवा करण्यासाठीं जणुं उभ्या राहिल्या; तशींच त्याचीं मातापितरें अशा ज्या द्यावापृथिवी, त्याहि त्याजजवळ उभ्या राहिल्या’ असा भावार्थ.

‘ अंतरिक्षांत ’=‘ घृतस्य योनौ.’ अक्षरशः ‘ तुपाच्या स्थानांत;’ म्हणजे तुपासारिखें पुष्टिकारक जें मेघोदक तें जेथें उत्पन्न होतें, अशा स्थळीं; अर्थात् अंतरिक्षांत.

बभ्राणः सूनो सहसो व्यद्यौद्दधानः शुक्रा रभसा वपूंषि ।
श्चोतन्ति धारा मधुनो घृतस्य वृषा यत्र वावृधे काव्येन ॥ ८ ॥

बभ्राणः । सूनो इति । सहसः । वि । अद्यौत् । दधानः । शुक्रा । रभसा । वपूंषि ।
श्चोतन्ति । धाराः । मधुनः । घृतस्य । वृषा । यत्र । ववृधे । काव्येन॥८

पितुश्चिदूधर्जनुषा विवेद व्यस्य धारा असृजद्वि धेनाः ।
गुहा चरन्तं सखिभिः शिवेभिर्दिवो यह्वीभिर्न गुहा बभूव ॥ ९ ॥

पितुः । चित् । ऊधः । जनुषा । विवेद । वि । अस्य । धाराः । असृजत् । वि । धेनाः ।
गुहा । चरन्तम् । सखिऽभिः । शिवेभिः । दिवः । यह्वीभिः । न । गुहा । बभूव ॥ ९ ॥

भाषायाम्.

८. हे सहसः सूनो (=बलस्य पुत्र), बभ्राणः (=भ्रियमाणः=भृतः=पुष्टत्वं गमितः सन्) शुक्रा रभसा वपूंषि (=शुक्राणि भास्वराणि रभसानि वेगवन्ति शरीराणि तेजोरूपाणि) दधानः (=धारयन् सन्) वि अद्यौत् (=विविधमितस्ततः सर्वत्र द्योतसे प्रकाशितवान्)। यत्र (=यस्मिन् काले=यदा) वृषा (=वीरोग्निः) काव्येन (=स्तोत्रेण) वावृधे (=प्रवृद्धो भवति) मधुनो घृतस्य (=माधुर्यवतो घृतसदृशस्य मेघोदकस्य) धाराः श्चोतन्ति (=वृष्टयः पतन्ति)॥

९. जनुषा (=जन्मना=जन्मनि जाते सति) पितुश्चित् ऊधः विवेद (=अन्तरिक्षस्य जलप्रदेशं लब्धवान्)। अस्य (=ऊधसः संबन्धिनीर्) धारा धेनाः (=माध्यमिका वाचश्च) वि असृजत् (=अवापातयत्)। शिवेभिः सखिभिः (=कल्याणैर्मित्रैः सह) गुहा चरन्तं (=गूढं यथा तथा स्थितं) [कोपि न वेद=कोपि न जानाति]। दिवो यह्वीभिः (=द्युदेवस्य कन्यकाभिः सह) गुहा न बभूव (=नान्तर्हितश्चरति)॥

८. हे बलाच्या पुत्रा, तुझें जेव्हां पोषण केलें तेव्हां त्वां तेजस्वी [आणि] वेगयुक्त अशा कांति धारण केल्या [आणि] तूं सर्वत्र प्रकाशलास.—[अग्नि] वीर जेव्हां स्तोत्राच्या योगानें प्रबळ होतो तेव्हां मधुर घृताच्या धारा वाहतात.

8. O son of strength, when thou wast nourished thou didst assume bright and impetuous forms, and didst shine far and wide.—When the hero grows mighty through hymns, it rains sweet [and] rich water.

९. तो जन्मतांच त्याणें पित्याची कास शोधून काढिली. त्याणें त्या [कासे]च्या धारा [आणि] आकाशवाणी ह्या खालीं सोडिल्या. कल्याणकारक मित्रांसह अज्ञातवास करीत असतां [अग्नी]ला कोणी शोधून काढूं शकत नाहीं. तो द्यूच्या कन्यकांबरोबर लपून राहत नाहीं.

9. On being born he found the udder of his father. He poured down its streams and the voice of the firmament. Him as he lives concealed with his beneficent friends [no one finds]. He does not live concealed with the daughters of Dyaus.

---

८. 'मेघोदकांनीं अग्नीचा संभाळ करून मोठा करितांच, त्याणें अद्भुत कांति प्रगट केल्या. जेथें अग्नि स्तोत्र ऐकून प्रसन्न होतो तेथें उत्तम पाऊस पडतो.'

९. 'हा मंत्र किंचित् कठिण आहे. तात्पर्य असें दिसतें कीं, ' अग्नि उत्पन्न होतांच अंतरिक्षरूप मातेची कास त्याला सांपडली, आणि त्याणें त्यापासून वृष्टि करविली. अग्नि जेव्हां जन्मल्यापूर्वीं अदृष्ट असतो, तेव्हां तो आपल्या मित्रांसह (वायूंसह) असतां तो कोणाच्याहि दृष्टीस पडत नाहीं. तो जेव्हां जन्मतो आणि आपो देवींबरोबर राहतो तेव्हां तो सर्वांच्या दृष्टीस पडतो.'

पितुश्च गर्भं जनितुश्च बभ्रे पूर्वीरेको अधयत्पीप्यानाः ।
वृष्णे सपत्नी शुचये सबन्धू उभे अस्मै मनुष्ये३ नि पाहि॥१०॥१४

पितुः । च । गर्भम् । जनितुः । च । बभ्रे । पूर्वीः । एकः । अधयत् । पीप्यानाः ।
वृष्णे । सपत्नी इति सऽपत्नी । शुचये । सबन्धू इति सऽबन्धू । उभे इति । अस्मै । मनुष्ये३ इति । नि । पाहि ॥ १० ॥ १४ ॥

उरौ महाँ अनिबाधे ववर्धापो अग्निं यशसः सं हि पूर्वीः ।
ऋतस्य योनावशयद्दमूना जामीनामग्निरपसि स्वसॄणाम् ॥ ११ ॥

उरौ । महान् । अनिऽबाधे । ववर्ध । आपः । अग्निम् । यशसः । सम् । हि । पूर्वीः ।
ऋतस्य । योनौ । अशयत् । दमूनाः । जामीनाम् । अग्निः । अपसि । स्वसॄणाम् ॥ ११ ॥

भाषायाम्.

१०. [अयमग्निः] पितुश्च जनितुश्च गर्भं बभ्रे (=बभार)। एकः [अग्निः] पीप्यानाः पूर्वीः (=पयःपूर्णा बह्वीरपः) अधयत् (=अपिबत्)। [हे अग्ने], सपत्नी (=समानः पतिर्ययोस्ते) सबन्धू (=समानो बन्धुश्च ययोस्ते) मनुष्ये (=मनुष्यहितकारिण्यौ) उभे (=? द्यावापृथिव्यौ) अस्मै (=पुरोवर्तिने) शुचये (=शुद्धाय) वृष्णे (=वीराय) नि पाहि (=नितरां रक्ष) ॥

११. [अग्निः] उरौ अनिबाधे (=विस्तीर्णे संबन्धरहितस्थाने=अन्तरिक्षे) महान् ववर्ध (=महान् यथा भवति तथा ववर्ध=वार्धित्वा महान् बभूव)। पूर्वीः (=पूर्व्यः प्रभूता) यशसः (=अन्नवत्य) आपो हि अग्निं सं [वर्धयामासुः] । दमूनाः (=गृहसंबन्धी=गृहस्थितबन्धुवत्कृपालुर्) अग्निः ऋतस्य योनौ (=उदकस्य जन्मस्थानभूते) स्वसॄणाम् अपसि (=स्वसृभूतानामपां प्रवाहभूते) [अन्तरिक्षे] अशयत् (=शेते स्म) ॥

१०. तो पित्याच्या आणि जनकाच्या गर्भाला धारण करिता झाला. एकटा अग्नि अनेक पुष्ट स्त्रियांचें स्तनपान करिता झाला. ज्यांचा पति एकच आहे आणि ज्यांचा बंधु एकच आहे अशा ज्या मनुष्य-हितकारक दोघीजणी त्यांला [हे अग्नी], तूं या तेजस्वी वीराकरितां संभाळ.

10. He bore the fœtus of the father and also of the progenitor. Himself one, he sucked the many females fat with milk. Preserve thou, [o Agni], for the sake of this bright hero both the females who have a common husband and a common brother, [and] who are beneficent to mankind.

११. [अग्नि] विस्तीर्ण मोकळ्या स्थानीं वाढून मोठा झाला. कारण कीं, अन्नसंपन्न अशा ज्या अनेक आपो-देवी त्या अग्नीला चांगल्या वाढवितात. सुप्रसन्न अग्नि उदकांच्या जन्मस्थानीं [म्हणजे] परस्पर संबद्ध ज्या बहिणी त्यांच्या प्रदेशीं निजून राहिला.

11. Agni grew vast in the expansive space. The numerous rain-waters full of nourishments feed him. The friendly Agni lay asleep in the birth-place of water—in the stream of the allied sisterhood.

---

१०. हा मंत्र कठिण आहे. शब्दशः अर्थ उघड आहे तो भाषांतरांत दिला आहे, पण हा मंत्र अग्नीविषयीं आहे, आणि अग्नि मेघोदकरूप अनेक मातांचें दुध प्यायला आणि अग्नीनें द्यावापृथिवींचें रक्षण करावें असा जरी भावार्थ दिसतो, तरी पित्याचा आणि जनकाचा गर्भ अग्नीनें धारण केला म्हणजे काय ? हें समजत नाहीं.

'ज्यांचा पति एकच आणि बंधु एकच आहे'=' सपत्नी सबन्धू.' याचें तात्पर्य असें दिसतें कीं, अग्नि हाच दोघींचा एकटा बंधु आणि अग्नि हाच दोघींचा एकटा पति.

' वीराकरितां '=' वृष्णे.' म्हणजे यजमानाकरितां, असें दिसतें.

११. ' अग्नि विस्तीर्ण अंतरिक्षांत वाढला. त्याला तेथें उदकांनीं वाढविलें. अग्नीचा पाळणाहि अंतरिक्षांतच असे व त्याला उदकांनींच झोंपा काढल्या.'

अक्रो न ब॒भ्रिः स॑मि॒थे म॒हीनां॑ दि॒दृ॒क्षेय॑ः सू॒नवे॒ भार्ऋ॑जीकः ।
उदु॒स्रिया॒ जनि॑ता॒ यो ज॒जाना॒पां गर्भो॒ नृत॑मो य॒ह्वो अ॒ग्निः ॥१२॥

अ॒क्रः । न । ब॒भ्रिः । स॒म्ऽइ॒थे । म॒हीना॑म् । दि॒दृ॒क्षेय॑ः । सू॒नवे॑ । भाः॑ऽ-
ऋ॑जीकः ।

उत् । उ॒स्रिया॑ः । जनि॑ता । यः । ज॒जान॑ । अ॒पाम् । गर्भ॑ः । नृ॒ऽत॑मः ।
य॒ह्वः । अ॒ग्निः ॥ १२ ॥

अ॒पां गर्भं॑ द॒र्श॒तमोष॑धीनां॒ वना॑ जजान सु॒भगा॒ विरू॑पम् ।
दे॒वास॑श्चि॒न्मन॑सा॒ सं हि ज॒ग्मुः पनि॑ष्ठं जा॒तं त॒वसं॑ दुवस्यन् ॥१३

अ॒पाम् । गर्भ॑म् । द॒र्श॒तम् । ओष॑धीनाम् । वना॑ । ज॒जा॒न । सु॒ऽभगा॑ ।
वि॒ऽरू॑पम् ।

दे॒वास॑ः । चि॒त् । मन॑सा । सम् । हि । ज॒ग्मुः । पनि॑ष्ठम् । जा॒तम् ।
त॒वस॑म् । दु॒व॒स्य॒न् ॥ १३ ॥

भाषायाम्.

१२. दिदृक्षेयः (=सर्वैर्दर्शनीयः=सुन्दरो) भाऋजीकः (=स्वदीप्त्या प्रकाशमानः) [अग्निः] सूनवे (=पुत्रवत्प्रियाय यजमानाय) महीनां समिथे (=सेनानां संगमने=संग्रामे) अक्रो न बभ्रिः (=पराक्रमकारी भर्ता रक्षिता च) [भवति]। योग्निरपां गर्भः (=बालको) नृतमो यह्वः (=शूरतमः पुत्रश्च) [भवति स] जनिता (=तासामपां पिता सन्) उस्रिया उज्जजान (=अप उदपादयत्) ॥

अग्निर्यजमानस्य रक्षको भवति। उदकानां पुत्रः सन्नपि तेषां जनिता भवतीत्युक्तं विरोधयुक्तम् ॥

१३. दर्शतम् (=अभिरामं) विरूपम् अपाम् ओषधीनां [च] गर्भं (=सूनुं) [तं] सुभगा वना (=सुभाग्ययुक्तारणिर्) जजान (=अजनयत्)। जातं [तं] देवासश्चित् (=देवा अपि) मनसा (=स्तोत्रयुक्तया बुद्ध्या) सं जग्मुः (=यौगपद्येन संप्रापुः) पनिष्ठं (=स्तुत्यतमं) तवसं (=प्रवृद्धं) [तं] दुवस्यन् (=पर्यचरंश्च) ॥

१२. दर्शनीय [आणि] दीप्तिमान् [अग्नि] [यजमानरूप] पुत्राला सैन्यांच्या संग्रामांत पराक्रमकारी आणि रक्षण करणारा [होतो]. आपो-[देवीं]चा गर्भ [आणि] अत्यंत शूर पुत्र [असा] जो अग्नि, [तो] पिता [होऊन] उदकांला उत्पन्न करिता झाला.

१३. आपो-[देवीं]चा [आणि] वनस्पतींचा सुंदर बाळ असा जो नानारूप [अग्नि, त्या]ला सुभाग्यवती अरणि जन्म देती झाली. तो उत्पन्न झाला तेव्हां देवहि मनःपूर्वक त्याला जाऊन भेटले. ते अत्यंत स्तुत्य [आणि] प्रबळ अग्नीची उपासना करिते झाले.

12. Agni, handsome [and] resplendent, [becomes] in the conflict of the [hostile] armies brave and protecting for [his] son [the worshipper]. He who [is] the boy [and] the bravest son of the waters produced [the same] waters as a father.

13. The fortunate wooden [Araṇi] gave birth to the beautiful [and] multiform boy of the waters [and] of the plants. Even the gods, when he was born, all gathered to him heartily. They praised him, the most praiseworthy [and] mighty.

१२. 'अग्नि संग्रामांत उपासकाला रक्षितो. तो उदकांचा पुत्र असताहि उदकांचा पिता होतो,' असा भावार्थ.

१३. 'अरणि' म्हणजे लांकडाच्या ज्या दोन तुकड्यांपासून अग्नि उत्पन्न करीत, तीं 'लांकडें.'

बृहन्त इद्भानवो भाऋजीकमग्निं सचन्त विद्युतो न शुक्राः ।
गुहेव वृद्धं सदसि स्वे अन्तरपार ऊर्वे अमृतं दुहानाः ॥ १४ ॥

बृहन्तः । इत् । भानवः । भाःऽऋजीकम् । अग्निम् । सचन्त । विऽद्युतः । न । शुक्राः ।
गुहाऽइव । वृद्धम् । सदसि । स्वे । अन्तः । अपारे । ऊर्वे । अमृतम् । दुहानाः ॥ १४ ॥

ईळे च त्वा यजमानो हविर्भिरीळे सखित्वं सुमतिं निकामः ।
देवैरवो मिमीहि सं जरित्रे रक्षा च नो दम्येभिरनीकैः॥१५॥१९

ईळे । च । त्वा । यजमानः । हविःऽभिः । ईळे । सखिऽत्वम् । सुऽमतिम् । निऽकामः ।
देवैः । अवः । मिमीहि । सम् । जरित्रे । रक्ष । च । नः । दम्येभिः । अनीकैः ॥ १५ ॥ १९ ॥

भाषायाम्.

१४. बृहन्त इद भानवः (=महान्तः किरणाः) शुक्रा विद्युतो न (=दीप्यमाना विद्युत इव) भाऋजीकं (=दीप्तिमन्तम्) अग्निं सचन्त (=असेवन्त)। अपारे ऊर्वे (=अगाधेन्तरिक्षरूपे समुद्रे) अमृतं दुहानाः (=अमृतसदृशम् उदकं क्षरन्तो) [भानवो] गुहेव स्वे सदसि अन्तः वृद्धं (=गुहायामिव स्वकीये गृहे वृद्धिं प्राप्तं तम्) [असेवन्त] ॥

१५. [हे अग्ने], यजमानः (=यजनकर्ता) [अहं] त्वा हविर्भिरीळे (=स्तौमि)। च (=अपि च) निकामः (=नितरां कामयमानोहं) सखित्वं सुमतिं (=तव मित्रत्वं प्रसन्नत्वं च) ईळे (=प्रार्थये)। देवैः [सहस्त्वं] जरित्रे (=स्तोत्रं कुर्वते) अवः सं मिमीहि (=रक्षणं कुरु)। दम्येभिरनीकैः (=उत्कटैस्तेजोभिर्) नो रक्ष च ॥

दम्येभिर्दमनीयैर्नियन्तव्यैः। प्रयत्ननियन्तव्यतयोच्छृङ्खलतोक्ता। इति सम्यक्सायणः॥

१४. देदीप्यमान अग्नीप्रत तेजस्वी विजांप्रमाणें मोठीं तेजें प्राप्त झालीं; अगाध अंतरिक्षांत अमृतदोहन करणारीं [तेजें] गुहेंत [वाढल्या]प्रमाणें स्वकीय गृहीं वाढलेला [जो अग्नि, त्या]प्रत प्राप्त झालीं.

14. Great splendors, like brilliant lightnings, waited upon resplendent Agni; shedding nectar in the limitless firmament: [upon] him who had grown within his own home as within a cave.

१५. [हे अग्नी], मी यजमान तुला हवींनीं प्रार्थितों, मी उत्सुक होत्साता [तुझा] स्नेह [आणि] प्रसाद प्रार्थितों. देवांसह तूं स्तोत्याचें रक्षण कर आणि उत्कट तेजांसह तूं आम्हांला संभाळ.

15. I, the sacrificer, pray thee with oblations, I pray [for thy] friendship [and] favour, I who am solicitous. With the gods give thy protection to the poet, and preserve us with [thy] unmastered splendors.

---

१४. 'अमृत दोहन करणारीं तेजें.'=' अमृतं दुहाना भानवः'. म्हणजे अमृतासारिखें जें मेघोदक, त्याची वृष्टि करणारीं किरणरूप तेजें.

१६. 'देवहीन शत्रु '=' अदेवान् पृतनायून्.' म्हणजे देवांस न भजणारे जे अनार्यजन शत्रु ते कोळी, भिल्ल इत्यादिक.

उपक्षेतारस्तव सुप्रणीतेऽग्ने विश्वानि धन्या दधानाः ।
सुरेतसा श्रवसा तुञ्जमाना अभि ष्याम पृतनायूँरदेवान् ॥ १६ ॥

उपऽक्षेतारः । तव । सुऽप्रनीते । अग्ने । विश्वानि । धन्या । दधानाः ।
सुऽरेतसा । श्रवसा । तुञ्जमानाः । अभि । स्याम । पृतनाऽयून् । अदेवान् ॥ १६ ॥

आ देवानामभवः केतुरग्ने मन्द्रो विश्वानि काव्यानि विद्वान् ।
प्रति मर्ताँ अवासयो दमूना अनु देवान्रथिरो यासि साधन् ॥ १७

आ । देवानाम् । अभवः । केतुः । अग्ने । मन्द्रः । विश्वानि । काव्यानि । विद्वान् ।
प्रति । मर्तान् । अवासयः । दमूनाः । अनु । देवान् । रथिरः । यासि । साधन् ॥ १७ ॥

भाषायाम्.

१६. हे सुप्रणीते अग्ने (=शोभनप्रणयन हे अग्ने), तव उपक्षेतारः (=त्वदेकाश्रया) [वयं] विश्वानि धन्या दधानाः (=सर्वाणि धनानि धारयन्तः सन्तः) [अपि च] सुरेतसा श्रवसा (=प्रवृद्धिकरेणान्नेन) तुञ्जमानाः (=? " हवींषि प्रयच्छन्तः सन्तः") अदेवान् पृतनायून् (=देवरहितान्=देवान् अपूजयतः शत्रून्) अभि स्याम (=अभिभवेम) ॥

१७. हे अग्ने, मन्द्रः (=आह्लादकरो) विश्वानि काव्यानि विद्वान् (=सर्वाणि स्तोत्राणि जानन्) [त्वं] देवानां केतुः आ अभवः (=सर्वत्र देवानां दूतो जायसे)। दमूनाः (=यजमानगृहस्य सुखकरस्) [त्वं] मर्तान् प्रति अवासयः (=मनुष्यान् स्वस्वगृहेषु वासयसि) । रथिरः (=रथी) [त्वं] साधन् (=देवानां हितानि यज्ञरूपाणि कर्माणि साधयन्) अनु देवान् यासि (=देवान् प्रति गच्छसि) ॥

१६. हे सुनायक अग्नी, तुजवर अवलंबून राहणारे [आम्ही] सर्व संपत्ति धारण करणारे होत्साते, पुष्टिकारक अन्नानें हवि देऊं आणि देवहीन शत्रूंचा पराभव करूं असें कर.

16. O Agni of good guidance, may we who depend on thee, becoming possessed of all treasures [and] offering oblations of invigorating food, vanquish the godless enemies.

१७. हे अग्नी, तूं सर्वत्र देवांचा दूत झाला आहेस, आणि आनंदी असा जो तूं तो सर्व स्तोत्रें जाणत असतोस. गृहसुखकारी तूं मर्त्यांला घरोघर वसवितोस आणि रथी असा जो तूं, तो कार्य साधून देवांप्रत जात असतोस.

17. O Agni, thou hast become the herald of the gods, thou the cheerful knower of all hymns. Thou the friend of home makest mortals dwell [in their homes]; thou the charioteer goest to the gods having accomplished [thy errand].

---

१७. 'दूत' =' केतुः.' अक्षरशः पताका अथवा झेंडा धारण करणारा. म्हणजे देवांला हवि पोंहचविण्याकरितां द्युलोकावरून पृथिवीवर आणि पृथिवीवरून द्युलोकीं जाणारा.

'गृहसुखकारी' =' दमूनाः'. म्हणजे ज्या घरीं प्रगट होतो त्या घरांतील मनुष्यांस सुख देणारा.

१८. 'आणि यज्ञाला संपादितो' =' विदथानि साधन्.' म्हणजे अग्नि होत्याचें काम करितो आणि देवांस बोलावून आणून यज्ञ पूर्ण करितो.

नि दुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि साधन् ।
घृतप्रतीक उर्विया व्यद्यौदग्निर्विश्वानि काव्यानि विद्वान् ॥ १८ ॥

नि । दुरोणे । अमृतः । मर्त्यानाम् । राजा । ससाद । विदथानि । साधन् ।
घृतऽप्रतीकः । उर्विया । वि । अद्यौत् । अग्निः । विश्वानि । काव्यानि । विद्वान् ॥ १८ ॥

आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन् ।
अस्मे रयिं बहुलं संतरुत्र सुवाचं भागं यशसं कृधी नः ॥ १९ ॥

आ । नः । गहि । सख्येभिः । शिवेभिः । महान् । महीभिः । ऊतिऽभिः । सरण्यन् ।
अस्मे इति । रयिम् । बहुलम् । सम्ऽतरुत्रम् । सुऽवाचम् । भागम् । यशसम् । कृधि । नः ॥ १९ ॥

भाषायाम्.

१८. मर्त्यानां राजा (=मरणधर्मणां मनुष्याणां राजभूतः) अमृतः (=मरणरहितः) [अग्निर्] दुरोणे (=गृहे) नि ससाद (=निषीदति) विदथानि साधन् (=यज्ञान् साधयति च)। घृतप्रतीकः (=घृतेन संधुक्षितावयवः) अग्निरुर्विया (=विस्तीर्णं यथा तथा) वि अद्यौत् (=विशेषेण प्रकाशते) विश्वानि काव्यानि विद्वान् (=सर्वाणि स्तोत्राणि जानाति च)॥

१९. महान् [त्वं] शिवेभिः सख्येभिरा नो गहि (=कल्याणकरैस्तव सख्यैः सहास्मान् आगच्छ) महीभिरूतिभिः (=महतीभी रक्षाभिः सह) सरण्यन् (=त्वरमाणः सन्) [आगच्छ]। अस्मे (=अस्मभ्यं) बहुलं (=प्रभूतं) संतरुत्रं (=सम्यक् सर्वेभ्य उपद्रवेभ्यः संतारकं) रयिं (=धनं) [कृधि=देहि]—नः (=अस्मभ्यं) सुवाचं (=सुश्लोकं) यशसं (=कीर्त्या संयुक्तं) भागं (=भाग्यं) कृधि (=कुरु=देहि)॥

१८. मर्त्यांचा राजा [असा] अमर [अग्नि] घरांत बसतो आणि यज्ञांला संपादितो. घृतोज्ज्वलिताङ्ग अग्नि विस्तीर्णपणें प्रकाशतो आणि सर्व स्तोत्रें जाणतो.

18. [Agni] the immortal king of the mortals sits down in the house, accomplishing the sacrifices. Agni brightened by clarified butter shines far and wide, and knows all hymns.

१९. [हे अग्नी], महान् असा जो तूं, तो तुझी कल्याणकारक मैत्री [आणि] मोठें पाठबळ घेऊन आम्हांप्रत सत्वर ये. आम्हांला मोठी [आणि] विजय देणारी संपत्ति दे. आम्हांला सुश्लोक [आणि] सत्कीर्तिसंपन्न भाग्य दे.

19. Come thou the great one unto us with [thy] beneficent friendship, [come] quickly with [thy] great help. [Bestow] upon us plentiful and victorious wealth, bestow on us prosperity renowned and celebrated.

एता ते अग्ने जनिमा सनानि प्र पूर्व्याय नूतनानि वोचम् ।
महान्ति वृष्णे सवना कृतेमा जन्मञ्जन्मन् निहितो जातवेदाः॥२०

एता । ते । अग्ने । जनिम । सनानि । प्र । पूर्व्याय । नूतनानि । वोचम् ।
महान्ति । वृष्णे । सवना । कृता । इमा । जन्मन्ऽजन्मन् । निऽहितः । जातऽवेदाः ॥ २० ॥

जन्मञ्जन्मन् निहितो जातवेदा विश्वामित्रेभिरिध्यते अजस्रः ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ २१ ॥

जन्मन्ऽजन्मन् । निऽहितः । जातऽवेदाः । विश्वामित्रेभिः । इध्यते । अजस्रः ।
तस्य । वयम् । सुऽमतौ । यज्ञियस्य । अपि । भद्रे । सौमनसे । स्याम॥२१

भाषायाम्.

२०. हे अग्ने, एता ते सनानि जनिम (=एतानि तव सनातनानि जनिमानि= एतांस्तव प्राचीनान् प्रादुर्भावप्रकारान्) नूतनानि (=अर्वाचीनानि जन्मानि=अर्वाचीनान् प्रादुर्भावप्रकारांश्च) पूर्व्याय (=सनातनस्य तव प्रीत्यर्थं) प्र वोचम् (=उक्तवानस्मि) । वृष्णे (=वीर्यवते तुभ्यम्) इमा महान्ति सवना कृता (=इमानि बृहन्ति सवनानि कृतानि भवन्ति) । जातवेदाः (=भूतजातानां वेदिताग्निर्) जन्मन्जन्मन् (=जन्मनि जन्मनि सर्वेषु मनुष्येषु) निहितः (=स्थापितोस्ति) ॥

जनिमा जन्मानि कर्माणि स्तोत्राणि वा .... ते तुभ्यम् । इति सायणः ॥

२१. जन्मन्जन्मन् निहितः (=सर्वेषु मनुष्येषु स्थापितो) जातवेदाः (=जातानां वेदिताग्निर्) अजस्रः (=अजस्रम् अनवरतं यथा तथा) विश्वामित्रेभिरिध्यते (=विश्वामित्रापत्यैः समिध्यते) । तस्य यज्ञियस्य (=पूजनीयस्याग्नेः) सुमतौ (=अनुग्रहे) अपि भद्रे सौमनसे (=कल्याणकरे सख्ये) [च] वयं स्याम ॥

अपिः सप्तमीद्योतनार्थः । सायणस्तु अपि स्याम । अपि भवेम । प्रार्थनायां लिङ् । इति ॥

२०. हे अग्नी, तुझे हे पुरातन जन्म [आणि] तुज पुरातनाप्रीत्यर्थ [तुझे] नूतन जन्म म्यां गायलें आहेत. [तुज] वीराप्रीत्यर्थ [हीं] मोठीं सवनें केलीं आहेत.— जातवेद [अग्नि] सर्व जनांच्या घरीं स्थापिला आहे.

२१. सर्व लोकांच्या घरीं स्थापिलेला सर्वज्ञ अग्नि विश्वामित्रांनीं नित्य पेटविला जातो. त्या पूजनीय अग्नीच्या कृपेंत आणि कल्याणकारक मैत्रींत आम्ही राहूं असें होओ.

20. I have sung, o Agni, for thee, the primeval one, thy ancient births [and] thy modern [births]. For thee the puissant hero these great somas have been prepared.—All-knowing [Agni] is established among all peoples.

21. All-knowing [Agni], established among all peoples is always kindled by the descendants of Vis'vâmitra. May we be in the favour and in the auspicious friendship of that adorable [Agni].

२०. 'पुरातन जन्म आणि नूतन जन्म'='जनिमा सनानि नूतनानि.' म्हणजे अंतरिक्षांत जी अग्नीची उत्पत्ति सांगितली ती पुरातन, आणि प्रतिगृहीं यजनार्थ नित्य होते ती नूतन.

२१. 'विश्वामित्रांनीं'='विश्वामित्रेभिः' म्हणजे विश्वामित्रकुलोत्पन्न जे आम्ही उपासक त्यांहीं. सायणाचार्य 'विश्वामित्रेभिः' म्हणजे विश्वामित्रेण या एकवचनार्थीं संमानदर्शक बहुवचन आहे, असें म्हणतात.

इमं यज्ञं सहसावन् त्वं नो देवत्रा धेहि सुक्रतो ररांणः ।
प्र यंसि होतर्बृहतीरिषो नोऽग्ने महि द्रविणमा यंजस्व ॥ २२ ॥

इमम् । यज्ञम् । सहसाऽवन् । त्वम् । नः । देवऽत्रा । धेहि । सुक्रतो इति सुऽक्रतो । ररांणः ।
प्र । यंसि । होतः । बृहतीः । इषः । नः । अग्ने । महि । द्रविणम् । आ । यजस्व ॥ २२ ॥

इळांमग्ने पुरुदंसं सनिं गोः शंश्वत्तमं हवंमानाय साध ।
स्यान्नंः सूनुस्तनंयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥२३॥१६॥

इळांम् । अग्ने । पुरुऽदंसंम् । सनिम् । गोः । शश्वत्ऽतमम् । हवंमानाय । साध ।
स्यात् । नः । सूनुः । तनंयः । विजाऽवां । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ २३ ॥ १६ ॥

भाषायाम्.

२२. हे सहसावन् (=सहस्वन् बलवन्), हे सुक्रतो (=शोभनप्रज्ञ), ररांणः (=दानशीलस्) त्वम् इमं नो यज्ञं देवत्रा धेहि (=देवेषु निधेहि) । हे होतः, बृहतीरिषः (=प्रभूतान्यन्नानि) नः प्र यंसि (=अस्मभ्यं प्रयच्छ) । हे अग्ने, महि द्रविणं (=प्रभूतं धनम्) [अस्मभ्यम्] आ यजस्व (=यजनेन द्वारानय=प्रयच्छ) ॥

२३. हे अग्ने, हवमानाय (=स्तुवते मह्यं) शश्वत्तमं (=चिरकालं यथा तथा) पुरुदंसं (=प्रभूतवीरकर्माणं=प्रभूतवीरकर्मणां कारयित्रीम्) इळां (=भूमिं) गोः सनिं [च] (=गवां लाभं च) साध (=साधय) । नः सूनुस्तनयः (=अस्माकं पुत्रः पौत्रश्च) विजावा स्यात् (=पुत्रपौत्रादिरूपेण स्वयं विजायत इति तथोक्तः) स्यात् (=भवतु) । हे अग्ने, सा ते सुमतिः (=तव सा प्रसिद्धा सुबुद्धिरनुग्रहात्मिका) अस्मे भूतु (=अस्माकं भवतु) ॥

२२. हे बलवान्, हे सुप्रज्ञ [अग्नी], उदार असा जो तूं, तो ह्या आमच्या यज्ञाला देवांप्रत प्रविष्ट कर. हे होत्या, तूं आम्हांला मोठीं अन्नें दे. हे अग्नी, तूं मोठें धन दे.

२३. हे अग्नी, तुझा धांवा करणाऱ्याला तूं बहुत पराक्रम करविणारी भूमि आणि गुरांची समृद्धि हीं सदैव प्राप्त करून दे. आमचे पुत्रपौत्र संतान वाढविणारे होओत. हे अग्नी, तुझी जी कृपा ती आम्हांला प्राप्त होओ.

22. O mighty [and] wise Agni, do thou who art bounteous carry this our sacrifice among the gods. O invoker, give us great foods. O Agni, give us great wealth.

23. O Agni, ever and ever do thou procure for thy worshipper land full of many valorous deeds and an affluence of cows. May our sons and grandsons be prolific. O Agni, may that thy favour be ours.

---

२३. 'बहु पराक्रम करणारी भूमि '= 'पुरूदंसम्.' म्हणजे जी भूमि (देश) मिळाल्यापासून पुष्कळ पराक्रम करण्याचें धैर्य येईल अशी भूमि. अशा प्रकारची प्रार्थना करीत करीतच प्राचीन आर्यलोक या सुपीक देशाप्रत पावले. पण आतां त्यांच्यानें तींत कांहीं पराक्रम मात्र करवत नाहींत.

सूक्तम् २-२३६.

विश्वामित्र ऋषिः । वैश्वानरोऽग्निर्देवता । जगती छन्दः ॥

वैश्वानराय धिषणामृतावृधे घृतं न पूतमग्नये जनामसि ।
द्विता होतारं मनुषश्च वाघतो धिया रथं न कुलिशः समृण्वति ॥ १

वैश्वानराय । धिषणाम् । ऋतऽवृधे । घृतम् । न । पूतम् । अग्नये । जनामसि ।
द्विता । होतारम् । मनुषः । च । वाघतः । धिया । रथम् । न । कुलिशः । सम् । ऋण्वति ॥ १ ॥

स रोचयज्जनुषा रोदसी उभे स मात्रोरभवत्पुत्र ईड्यः ।
हव्यवाळग्निरजरश्चनोहितो दूळभो विशामतिथिर्विभावसुः ॥ २ ॥

सः । रोचयत् । जनुषा । रोदसी इति । उभे इति । सः । मात्रोः । अभवत् । पुत्रः । ईड्यः ।
हव्यऽवाट् । अग्निः । अजरः । चनःऽहितः । दुःऽदभः । विशाम् । अतिथिः । विभाऽवसुः ॥ २ ॥

भाषायाम्.

१. ऋतावृधे (=यज्ञलक्षणस्य सत्यस्य वर्धयित्रे) वैश्वानरायाग्नये (=वैश्वानरनाम्ने तस्मै) घृतं न पूतं धिषणां जनामसि (=शुद्धं घृतमिव स्तुतिम् उत्पादयामः) । रथं न कुलिशः सम् ऋण्वति (=कुठारो रथं यथा संस्करोति तथा) द्विता होतारं (=द्विविधमाह्वातारम् अग्निं) मनुषश्च वाघतः (=यजमाना ऋत्विजश्च) धिया [सम् ऋण्वति] (=स्तुत्यादिरूपेण कर्मणा संस्कुर्वन्ति) ॥

स्तुत्यादिरूपस्य कर्मणः करणात् प्राक् अग्निः केवलकाष्ठवद् असंस्कृतो भवति तादृशात् कर्मणोनन्तरं तु कुठारेण संस्कृतरथवत् सुसंस्कृतो भवतीति भावः ॥

वैश्वानरशब्दो यास्केन व्याख्यातः । वैश्वानरः कस्माद्विश्वान्नरान्नयति विश्व एनं नरा नयन्तीति वा । अपि वा विश्वानर एव स्यात् प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरस्तस्यैषा भवति । नि० ७.२१ । इति सायणः ॥

द्विता द्विधा गार्हपत्याहवनीयरूपाभ्यां युक्तं होतारं देवानामाह्वातारम् । इति भाष्यम् ॥

सूक्त २–२३६.

ऋषि–विश्वामित्र. देवता–वैश्वानर अग्नि. वृत्त– जगती.

१. सत्यवर्धक अग्नीप्रीत्यर्थ आम्ही शुद्ध घृताप्रमाणें स्तुति निर्माण करितों. दोन प्रकारचा होता असा जो अग्नि त्याला, यजमान आणि ऋत्विज् हे, कुठार रथाला घडवितो त्याप्रमाणें, कर्मानें [घडवितात].

२. तो जन्मतांच उभयलोकांस प्रकाशमान करिता झाला. तो [जगताचीं] मातापितरें अशा ज्या [द्यावापृथिवी] त्यांचा स्तुत्य पुत्र झाला. [जो] अग्नि हवि वाहून नेणारा, अजर, अन्नदायक, अहिंसित आणि देदीप्यमान असा जनांचा अतिथि [होय].

HYMN 2–236.

To *Vais'vânara Agni*. By *Vis'vâmitra*. Metre *Jagatî*.

1. We prepare for Vais'vânara Agni, the promoter of the truth, a hymn like well-strained clarified butter. Worshippers and priests [prepare] with [their] rites the double invoker, even as an axe prepares a chariot.

2. By his birth he illuminated the two worlds. He became the praiseworthy son of the parents [of the universe];—Agni, [who is] the carrier of the oblation, ever young, the giver of food, indestructible [and] the resplendent guest of the people.

---

१. हें सूक्त वैश्वानर अग्नीविषयीं आहे वैश्वानर अग्नि म्हणजे कोण याविषयीं सू. ५९ मं १ आणि त्याजवरील टीप पहा.

भावार्थ.–‘ शुद्ध तूप तयार करून अग्नीला अर्पण केलें म्हणजे जसा अग्नि प्रादुर्भूत होऊन प्रज्वलित होतो, त्याप्रमाणें जी स्तुति ऐकून तो प्रादुर्भूत आणि प्रज्वलित होईल, अशी स्तुति आम्ही रचितों. कारण अग्नीला जें होतृत्व येतें तें स्तुत्यादिक कर्म यजमानांनीं आणि ऋत्विजांनीं केल्यावरच येतें; त्यापूर्वी तो कुऱ्हाडीनें न तासलेल्या एकाद्या लांकडाच्या तुकड्याप्रमाणें असतो.’

२. ‘ अहिंसित ’ = ‘ दूळभः ’ म्ह० ज्याचा कोणीहि नाश करूं शकत नाहीं असा.

क्रत्वा दक्षस्य तरुषो विधर्मणि देवासो अग्निं जनयन्त चित्तिभिः ।
रुरुचानं भानुना ज्योतिषा महामत्यं न वाजं सनिष्यन्नुप ब्रुवे ॥३॥

क्रत्वा । दक्षस्य । तरुषः । विऽधर्मणि । देवासः । अग्निम् । जनयन्त । चित्तिऽभिः ।
रुरुचानम् । भानुना । ज्योतिषा । महाम् । अत्यम् । न । वाजम् । सनिष्यन् । उप । ब्रुवे ॥ ३ ॥

आ मन्द्रस्य सनिष्यन्तो वरेण्यं वृणीमहे अह्रयं वाजमृग्मियम् ।
रातिं भृगूणामुशिजं कविक्रतुमग्निं राजन्तं दिव्येन शोचिषा ॥४॥

आ । मन्द्रस्य । सनिष्यन्तः । वरेण्यम् । वृणीमहे । अह्रयम् । वाजम् । ऋग्मियम् ।
रातिम् । भृगूणाम् । उशिजम् । कविऽक्रतुम् । अग्निम् । राजन्तम् । दिव्येन । शोचिषा ॥ ४ ॥

---

२. स जनुषा (=जन्मना=जातमात्र एव) उभे रोदसी (=द्यावापृथिव्यावुभे) रोचयत् (=अरोचयत्=प्रकाशमाने अकरोत्) । स मात्रोः (=जगतः पितृभूतयोर्द्यावापृथिव्योर्) ईड्यः (=स्तुत्यः) पुत्रोभवत् [यः] अग्निः हव्यवाट् (=हव्यवाहकः) अजरः (=नित्यतरुणश्) चनोहितः (=अन्नं यजमाने निहितं येन तादृशो) दूळभः (=हिंसितुमशक्यो) विशां (=जनानां) विभावसुरतिथिः (=दीप्यमानोतिथिर्) [भवति] ॥

भाषायाम्.

३. तरुषो दक्षस्य (=शत्रुजितो बलस्य) क्रत्वा (=कर्मणा) [तथा] चित्तिभिः (=कर्मभिर्) देवासः (=देवा) अग्निं विधर्मणि (=अन्तरिक्षे) जनयन्त (=अजनयन्) । भानुना ज्योतिषा रुरुचानं (=दीप्यमानेन तेजसा अतिशयेन प्रकाशमानं) महां (=महान्तम् अग्निं) वाजं सनिष्यन् अत्यं न (=धनं लब्धुम् इच्छन् भारसहमश्वमिव) उप ब्रुवे (=उपेत्य स्तौमि) ॥

अन्नलाभाय अन्नस्यानेतारम् अश्वमिव अग्निं नियोजयामीत्यर्थः ॥

४. मन्द्रस्य (=आह्लादकरस्याग्नेर्) वरेण्यं (=वरणीयं श्रेष्ठम्) अह्रयम् (=अलज्जावहम्) ऋग्मियं (=प्रशस्यं) वाजम् (=अन्नं) सनिष्यन्तः (=लब्धुमि-

३. विजयी बळाच्या पराक्रमें-करून [आणि] कर्माच्या योगें-करून देव अग्नीला अंतरिक्षांत निर्माण करिते झाले. चकचकीत तेजानें प्रकाशणारा असा जो महा अग्नि त्याप्रत अन्नाची इच्छा करणारा मी वेगवान् अश्वाला [सेविल्या]प्रमाणें सेवितों.

3. The gods created Agni in the sky by the force of their victorious strength and by their deeds. I, desirous of food, propitiate the great Agni glowing with brilliant light, even as [I would propitiate] a swift horse.

४. आह्लादकारक [अग्नी]चें श्रेष्ठ, [आणि] लज्जा न आणणारें [आणि] स्तुत्य [असें] धन वांछिणारे आम्ही भृगूंचा दाता, मायाळू, कविप्रज्ञ, [आणि] दिव्य तेजानें प्रकाशणारा [असा जो] अग्नि [त्या]ला भजतों.

4. Desirous of obtaining the excellent, proud [and] praiseworthy wealth of cheerful [Agni], we adore Agni the patron of the Bhrigus, loving, possessed of the intelligence of a poet [and] shining with the splendor of heaven.

---

३. पहिल्या अर्धाचा असाहि अर्थ होऊं शकेल कीं, ‘देदीप्यमान उपासकांनीं (देवाः) यज्ञांत (विधर्मणि) उपासना कर्मांच्या योगेंकरून (चित्तिभिः) अग्नीला निर्माण केलें.’

‘अश्वाला’ इ०. अन्न आणावयाचें असलें म्हणजे जसा वेगवान् घोडा तयार करितात, कीं जो जाऊन तें लवकर घेऊन येईल, त्याप्रमाणें अग्नीची प्रार्थना मी करीत आहें. कारण तो घोड्याप्रमाणें अन्नादिक धन सत्वर वाहून आणणारा आहे.

४. ‘भृगु.’ सू. ५८ मं. ६ आणि टीपा पहा.

‘कविप्रज्ञ’=‘कविक्रतुम्.’ म्हणजे कवीप्रमाणें ज्याची प्रज्ञा आहे तो.

अग्निं सुम्नाय दधिरे पुरो जना वाजश्रवसमिह वृक्तबर्हिषः ।
यतस्रुचः सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिमपसाम् ५॥१७॥

अग्निम् । सुम्नाय । दधिरे । पुरः । जनाः । वाजऽश्रवसम् । इह । वृक्तऽबर्हिषः ।
यतऽस्रुचः । सुऽरुचम् । विश्वऽदेव्यम् । रुद्रम् । यज्ञानाम् । साधत्ऽइष्टिम् । अपसाम् ॥ ५ ॥ १७ ॥

पावकशोचे तव हि क्षयं परि होतर्यज्ञेषु वृक्तबर्हिषो नरः ।
अग्ने दुव इच्छमानास आप्यमुपासते द्रविणं धेहि तेभ्यः ॥ ६ ॥

पावकऽशोचे । तव । हि । क्षयम् । परि । होतः । यज्ञेषु । वृक्तऽबर्हिषः । नरः ।
अग्ने । दुवः । इच्छमानासः । आप्यम् । उप । आसते । द्रविणम् । धेहि । तेभ्यः ॥ ६ ॥

च्छन्तो) [वयं] भृगूणां रातिम् (=एतन्नामकानामृषीणामभिलषितार्थप्रदातारम्) उशिजं (=कामयमानं) कविक्रतुं (=कवेरिव क्रतुः प्रज्ञा यस्य तं) दिव्यस्य शोचिषा राजन्तं (=दिवि भवेन तेजसा शोभमानम्) [अग्निं] वृणीमहे (=संभजामहे) ॥

भाषायाम्.

५. पुरः (=पुरा काले) वृक्तबर्हिषो जनाः (=स्तीर्णबर्हिष ऋत्विग्जना) वाजश्रवसम् (=अन्नविषयकीर्तिमन्तम्) अग्निम् इह [लोके] सुम्नाय दधिरे (=सुखप्राप्तये स्थापितवन्तः) । यतस्रुचः (=हविर्दानाय प्रयतस्रुच ऋत्विजः) सुरुचं (=शोभनदीप्तिमन्तं) विश्वदेव्यं (=सर्वेभ्यो देवेभ्यो हितं) रुद्रं (=महान्तम्) अपसां यज्ञानां (=कर्मवतां यज्ञकर्तॄणामुपासकानां) साधदिष्टिं (=साधितयज्ञम्) [अग्निं दधिरे] ॥

६. हे पावकशोचे (=शोधकदीप्तिमन्) होतः, वृक्तबर्हिषो नरः (=स्तीर्णबर्हिषो मनुष्या=ऋत्विजो) यज्ञेषु तव क्षयं परि [उपासते] (=तव निवासस्थानं यागगृहं परिवेष्टयन्ति)—हे अग्ने, दुवः आप्यम् इच्छमानासः (=धनं स्नेहं च तव वाञ्छन्तस्ते) उप आसते (=समीपमुपविशन्ति=तव स्थानं सेवन्ते) । तेभ्यो द्रविणं धेहि (=धनं देहि) ॥

५. धनप्रख्यात अग्नीला ऋत्विज् लोक पूर्वी येथें सुखासाठीं स्थापिते झाले. पळीनें हवि देणारे [ऋत्विज्] सुतेजस्क [आणि] सर्व देवांचा मित्र, महान्, [आणि] यजन करणाऱ्या सेवकांचा यज्ञ पुरा करणारा जो अग्नि त्याला [स्थापिते झाले].

5. For happiness the priests, having spread the grass, established here of yore Agni famous for his wealth—[the priests] with ladles stretched forth [established Agni] who has excellent brightness, who is the friend of all the gods, the great accomplisher of the sacrifice of the pious worshippers.

६. हे शोधक दीप्तिमान् होत्या, दर्भ आंथरणारे जन यज्ञांमध्यें तुझ्या घरासभोंतालीं— हे अग्नी, [तुझें] धन [आणि तुझें] मित्रत्व वांछिणारे [जन] [तुझ्या घरासभोंतालीं] बसतात. त्यांला तूं धन दे.

6. O thou of purifying brightness, o invoker, the men having spread the grass [surround] in sacrifices thy home,—wishing for [thy] gift [and] friendship, o Agni, they surround [thy home]. Give wealth unto them.

---

५. अग्नीची पूजा प्रथम या लोकीं कशी प्रवृत्त झाली त्याविषयीं येथें सांगितलें आहे.

यांत ‘ यज्ञ ’ शब्दाचा जो ‘ यज्ञिय ’ (यज्ञ करणारा) असा अर्थ सायणांनीं केला आहे तो ‘ यज्ञ ’ शब्द ‘ अपसाम् ’ याच्या संबंधानें आणि अन्वयानें अपरपर्याय असा आल्यामुळें उघड होतो. यज्ञ शब्दाचा हा अर्थ पाश्चात्त्य विद्वान् मान्य करीत नाहींत पण या आणि यासारिख्या दुसऱ्या मंत्रांवरून तो उघड दिसतो.

६. ‘ दर्भ आंथरणारे जन ’ = ‘ वृक्तबर्हिषो नरः’ म्हणजे यज्ञ करणारे जन; यजमान, ऋत्विज इत्यादि सेवक.

अग्नीचें ‘ घर ’ म्हणजे यज्ञगृह, जेथें अग्नि पेटत असतो तें.

आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन् ।
सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ॥७॥

आ । रोदसी इति । अपृणत् । आ । स्वः । महत् । जातम् । यत् । एनम् । अपसः । अधारयन् ।
सः । अध्वराय । परि । नीयते । कविः । अत्यः । न । वाजऽसातये । चनःऽहितः ॥ ७ ॥

नमस्यत हव्यदातिं स्वध्वरं दुवस्यत दम्यं जातवेदसम् ।
रथीर्ऋतस्य बृहतो विचर्षणिरग्निर्देवानामभवत्पुरोहितः ॥ ८ ॥

नमस्यत । हव्यऽदातिम् । सुऽअध्वरम् । दुवस्यत । दम्यम् । जातऽवेदसम् ।
रथीः । ऋतस्य । बृहतः । विऽचर्षणिः । अग्निः । देवानाम् । अभवत् । पुरःऽहितः ॥ ८ ॥

भाषायाम्.

७. यद् (=यदा) जातम् एनं (=जातमात्रमग्निम्) अपसः (=कर्मवन्तो यजमाना) अधारयन् (=अस्थापयन्) [तदा स] रोदसी आ अपृणत् (=द्यावापृथिव्यौ तेजसापूरयत्) । महत् स्वः आ [अपृणत्] (=महदन्तरिक्षमपूरयत्) । कविः (=क्रान्तदर्शी) चनोहितः (=यजमानगृहे निहितान्नः) स वाजसातये (=अन्नलाभाय=अन्नमानेतुम्) अत्यो न (=भारसहोश्व इव) अध्वराय परि नीयते (=यज्ञार्थं नीयते) ॥

८. [हे ऋत्विजः], हव्यदातिं (=हविषो दातारं) स्वध्वरं (=शोभनस्याध्वरस्य कर्तारम्) [अग्निं] नमस्यत (=पूजयत) । दम्यं (=दमेभ्यो गृहेभ्यो हितं) जातवेदसं (=जातानां वेदितारं सर्वज्ञं) [तं] दुवस्यत (=परिचरत) । बृहतः (=महत) ऋतस्य (=यज्ञस्य) रथीः (=नेता) विचर्षणिः (=विशेषेण द्रष्टा) अग्निर्देवानां पुरोहितोभवत् ॥

७. जेव्हां कर्मकारी [उपासक जन] अग्नि उपजतांच त्याला स्थापिते झाले, तेव्हां तो द्यावापृथिवींला व्यापिता झाला, [आणि] महा अन्तरिक्षाला [व्यापिता झाला]. तो प्रज्ञावान् [आणि] अन्नदायक [अग्नि] अश्वाला अन्नासाठीं [नेल्या]प्रमाणें अध्वरासाठीं इकडे तिकडे नेला जातो.

7. He filled heaven and earth, he filled the great firmament, when [as he was] born the worshippers established him [on the altar]. That wise [and] beneficent one is carried about for the sacrifice even as a horse for carrying food.

८. हविर्दायक, [आणि] चांगला यज्ञ करणारा [जो अग्नि त्या]ला पूजा. घराचें बरें करणारा [जो] सर्वज्ञ [अग्नि त्या]ला तुम्ही भजा. महा यज्ञाचा वाहक [असा जो] महाप्रज्ञ अग्नि [तो] देवांचा पुरोहित झाला आहे.

8. Adore [Agni] the giver of oblation [and] the performer of good sacrifices. Worship [Agni] the friend of the home, the knower of all creatures. Agni, the carrier of the great sacrifice, [and] possessed of great, knowledge, has become the priest of the gods.

---

७. 'अग्नि उत्पन्न झाला आणि त्याला उपासकांनीं स्थापन करितांच त्यानें आपल्या तेजानें द्यावापृथिवींला आणि अंतरिक्षाला भरून टाकिलें,' असा भावार्थ. उत्तरार्धाचें तात्पर्य असें कीं, अन्न घेऊन यावयाचें असलें म्हणजे ज्याप्रमाणें ओझें वाहण्यास समर्थ अशा घोड्याला नेतात त्याप्रमाणें यज्ञ संपादनार्थ अग्नीला एका वेदीवरून दुसऱ्या वेदीवर नेतात. म्हणजे तेथें अग्नीला नेऊन त्याच्या द्वारें यज्ञ पूर्ण झाला म्हणजे तो पाहिजे तितकें अन्न प्राप्त करून देतो.

८. 'महा यज्ञाचा वाहक' = 'ऋतस्य बृहतो रथीः.' म्हणजे मोठमोठ्या यज्ञांत दिलेलें हवि देवांप्रत घेऊन जाणारा.

'घराचें बरें करणारा' = 'दम्यम्.' म्हणजे सर्व घरांत राहून घरांतील मनुष्यांला सुख देणारा; 'घरगुती,' 'गृहमित्र.'

तिस्रो यह्वस्य समिधः परिज्मनोऽग्नेरपुनन्नुशिजो अमृत्यवः ।
तासामेकामदधुर्मर्त्ये भुजमु लोकमु द्वे उप जामिमीयतुः ॥ ९ ॥

तिस्रः । यह्वस्य । सम्ऽइधः । परिऽज्मनः । अग्नेः । अपुनन् । उशिजः । अमृत्यवः ।
तासाम् । एकाम् । अदधुः । मर्त्ये । भुजम् । ऊं इति । लोकम् । ऊं इति । द्वे इति । उप । जामिम् । ईयतुः ॥ ९ ॥

विशां कविं विश्पतिं मानुषीरिषः सं सीमकृण्वन्त्स्वधितिं न तेजसे ।
स उद्वतो निवतो याति वेविषत्स गर्भमेषु भुवनेषु दीधरत् ॥ १० ॥ १८

विशाम् । कविम् । विश्पतिम् । मानुषीः । इषः । सम् । सीम् । अकृण्वन् । स्वऽधितिम् । न । तेजसे ।
सः । उत्ऽवतः । निऽवतः । याति । वेविषत् । सः । गर्भम् । एषु । भुवनेषु । दीधरत् ॥ १० ॥ १८ ॥

भाषायाम्.

९. यह्वस्य (=महतः) परिज्मनः (=परितो गन्तुः सर्वजगद्व्यापिनः) अग्नेस्तिस्रः समिधः (="प्रकाशिकाः पार्थिववैद्युतसूर्यरूपास्तिस्रस्तन्वः") उशिजः (=कामयमानानुपासकान्) अपुनन् (=अशोधयन्) । तासाम् एकां भुजं (=लोकानां पालयित्रीं सतीं) मर्त्ये (=मृत्युलोके पृथिवीरूपे) अदधुः (=निदधुरस्थापयन्) । [शिष्टे] द्वे जामिम् उ लोकम् उप ईयतुः (=मर्त्यलोकस्य बन्धुभूतम् अपरं लोकम् अन्तरिक्षलक्षणं जग्मतुः) ॥

अथवा तिस्रः समिध आघारसमिधौ द्वे अनुयाजसमिच्चैकेति । तासां समिधामेकामनूयाजसमिधं मर्त्य इह लोके भोगहेतुमनूयाजपर्यन्तमदधुः । धारयन्ति । प्रजा वा अनूयाज इति प्रजात्वेनानूयाजानां संस्तवात् तदाश्रयत्वाच्चानूयाजसमिधः । इतरे द्वे समिधौ अन्तरिक्षे दिव्यभोगहेतू उपेयतुः । उपगच्छतः । त्रीन्परिधींस्तिस्रः समिध इति हि निगमः । इति सायणः ॥

" उ इति पादपूरणः ॥ "

१०. कविं विशां विश्पतिं (=मेधाविनं मनुष्याणां राजानं) सीं (=तम् अग्नि·) मानुषीरिषः (=मानुष्य इषः=मनुष्यसंबन्धीन्यन्नानि) स्वधितिं न तेजसे सम् अकृ-

९. महान् [आणि] परिव्यापी अग्नीच्या [ज्या] तीन अमर प्रकाशमान तनू त्या भक्तिमान् उपासकांला पावन करित्या झाल्या. त्यांतून एक पालन करणारी जी तिला मृत्युलोकीं स्थापिते झाले. [दुसऱ्या] दोघी [मृत्युलोकाचा] बंधु [जो दुसरा] लोक त्याप्रत गेल्या.

9. The three immortal bright forms of the great and pervading Agni purified the loving [worshippers]. One of them [that is] liberal they established on mortal earth. The other two went to the sister world.

१०. जनांच्या त्या जनपतीला, तरवारीला धारेसाठीं तीक्ष्ण [केल्या]प्रमाणें, मानवी अन्नें तीक्ष्ण करितीं झालीं. तो उंच प्रदेशांमधून [आणि] नीच प्रदेशांमधून व्यापीत व्यापीत जातो. तो या भुवनाच्या पोटीं गर्भ धारण करवो.

10. Him, the wise king of the people, human nourishments did whet like a sword for sharpness. He goes over heights and depths filling [all]. May he impregnate these creatures.

---

९. ‘ त्रैलोक्यभर ज्याची गति असा जो अग्नि, त्याच्या तीन विभूति आहेत; त्या ह्या कीं पृथिवीवर विस्तवाच्या रूपानें प्रसिद्ध आहे ती एक, अन्तरिक्षांत विजेच्या रूपानें दृष्टीस पडते ती दुसरी, आणि द्युलोकांत सूर्यरूपानें दृष्टीस पडते ती तिसरी. यांतून एक विभूति उपासक लोकांनीं पृथिवीवर स्थापिली आणि दुसऱ्या दोन विभूति आकाशांत जाऊन राहिल्या. ’

‘ पावन करित्या झाल्या ’ म्हणजे प्राचीन काळापासून करीत आल्या आहेत.

१०. ‘ तीक्ष्ण करितीं झालीं ’ = ‘ सम् अकृण्वन्. ’ म्हणजे प्रबळ करितीं झालीं. अग्नि मूळचा प्रबळ तर खराच, पण उपासक जनांनीं त्याला हविरन्नें दिलीं तेव्हां तो पाजळलेली तरवार जशी शत्रूला कापिते त्याप्रमाणें शत्रूला कापून टाकण्यास समर्थ झाला आहे.

‘ भुवनाच्या पोटीं गर्भ धारण करवो ’ = ‘ एषु भुवनेषु गर्भं दीधरत्. ’ म्ह० हीं जीं या पृथिवीवरील भूतें त्यांच्या पोटीं गर्भ राहील असें करो.

स जिन्वते जठरेषु प्रजज्ञिवान्वृषा चित्रेषु नानदन्न सिंहः ।
वैश्वानरः पृथुपाजा अमर्त्यो वसु रत्ना दयमानो वि दाशुषे ॥ ११ ॥
सः । जिन्वते । जठरेषु । प्रजज्ञिऽवान् । वृषा । चित्रेषु । नानदत् । न । सिंहः ।
वैश्वानरः । पृथुऽपाजाः । अमर्त्यः । वसु । रत्ना । दयमानः । वि । दाशुषे ॥ ११ ॥
वैश्वानरः प्रत्नथा नाकमारुहद्दिवस्पृष्ठं भन्दमानः सुमन्मभिः ।
स पूर्ववज्जनयञ्जन्तवे धनं समानमज्मं पर्येति जागृविः ॥ १२ ॥
वैश्वानरः । प्रत्नऽथा । नाकम् । आ । अरुहत् । दिवः । पृष्ठम् । भन्दमानः । सुमन्मऽभिः ।
सः । पूर्वऽवत् । जनयन् । जन्तवे । धनम् । समानम् । अज्मम् । परि । एति । जागृविः ॥ १२ ॥

ण्वन् (=तैक्ष्ण्यार्थम् असिं यथा संस्कुर्वन्ति तथा समकुर्वन्) । स उद्वतो निवतो वेविषत् याति (=उच्छ्रायवतो नीचैर्भाववतश्च प्रदेशान् अतिशयेन व्याप्नुवन् गच्छति)। स एषु भुवनेषु गर्भं दीधरत् (=एतानि भुवनानि भूतजातानि यथा गर्भं धारयन्ति तथा करोतु) ॥

स एषु भुवनेषु गर्भमरण्या दीधरत् अधारयत् । इति सायणः ॥

भाषायाम्.

११. प्रजज्ञिवान् (=प्रकर्षेण ज्ञातवान्) वृषा (=वीरः) स चित्रेषु जठरेषु (=विचित्रेषु नानारूपेषूदरेषु) नानदत् सिंहो न (=अत्यर्थं शब्दं कुर्वन् सिंह इव) जिन्वते (=वर्धते)। पृथुपाजाः (=विस्तीर्णतेजा) अमर्त्यो दाशुषे वसु रत्ना वि दयमानः (=हविर्दत्तवते यजमानाय धनानि रत्नानि च प्रयच्छन्) वैश्वानरो [जठरेषु जिन्वते] ॥

१२. वैश्वानरः सुमन्मभिर्भन्दमानः (=प्रशस्तैः स्तोतृभिः स्तूयमानः सन्) दिवः पृष्ठं नाकं (=द्युलोकस्य पृष्ठभूतं स्वर्गं) प्रत्नथा (=चिरंतनः कश्चिदिव) आ अरुहत् (=आरुहत्)। जागृविः (=जागरूकः) स पूर्ववत् जन्तवे धनं जनयन् (=पूर्वेभ्य ऋषिभ्य इव धनमुत्पादयन् सन्) समानम् अज्मं परि एति (=सर्वेषां देवानां साधारणं मार्गम् आकाशलक्षणं सूर्यरूपेण परिगच्छति) ॥

११. तो प्रज्ञावान् वीर विचित्र उदरांत, महानाद करणाऱ्या सिंहाप्रमाणें, वृद्धिंगत होतो. विस्तीर्ण तेजोयुक्त असा मृत्युरहित वैश्वानर जो हविर्दात्या यजमानाला पुष्कळ धन [आणि] संपत्ति देतो [तो वृद्धिंगत होतो.]

११. He the wise hero grows in the various stomachs even as the roaring lion,—Vais'vânara of far-stretching splendor [and] immortal,conferring wealth and riches on the sacrificer [grows in the various stomachs].

१२. वैश्वानर [उत्पन्न होतांच] तो सत्कवींनीं स्तविला होत्साता, [एकादा] वृद्धासारिखा द्युलोकाचें पृष्ठ जो स्वर्ग त्यावर चढला. तो जागरूक [वैश्वानर] प्राचीन लोकांसाठीं जसें [धन मिळवून देत असे त्या]प्रमाणें जनासाठीं धन मिळवून देत देत [सर्वदेव]साधारण मार्गानें परिभ्रमण करितो.

12. Vais'vânara, praised by the great poets,ascended heaven the summit of the sky, like an old man. He the watchful one, creating wealth for the creatures as for ancient beings, goes round the common course.

---

१२. ' [सर्वदेव]साधारण मार्ग '= 'समानम् अज्मम्.' म्हणजे ज्या मार्गानें वरुण, अग्नी, उषा इत्यादिक सर्व देव प्रातःकाळीं उगवून पश्चिमेकडे भ्रमण करितात त्या मार्गानें.

ऋतावानं यज्ञियं विप्रमुक्थ्य१मा यं दधे मातरिश्वा दिवि क्षयम् ।
तं चित्रयामं हरिकेशमीमहे सुदीतिमग्निं सुविताय नव्यसे ॥१३॥

ऋतऽवानम् । यज्ञियम् । विप्रम् । उक्थ्यम् । आ । यम् । दधे । मातरिश्वा । दिवि । क्षयम् ।

तम् । चित्रऽयामम् । हरिऽकेशम् । ईमहे । सुऽदीतिम् । अग्निम् । सुविताय । नव्यसे ॥ १३ ॥

शुचिं न यामन्निषिरं स्वर्दृशं केतुं दिवो रोचनस्थामुषर्बुधम् ।
अग्निं मूर्धानं दिवो अप्रतिष्कुतं तमीमहे नमसा वाजिनं बृहत् १४

शुचिम् । न । यामन् । इषिरम् । स्वःऽदृशम् । केतुम् । दिवः । रोचनऽस्थाम् । उषःऽबुधम् ।

अग्निम् । मूर्धानम् । दिवः । अप्रतिऽस्कुतम् । तम् । ईमहे । नमसा । वाजिनम् । बृहत् ॥ १४ ॥

भाषायाम्.

१३. ऋतावानं (=सत्यवन्तं) यज्ञियं (=पूज्यं) विप्रं (=मेधाविनम्) उक्थ्यं (=प्रशस्यं) दिवि क्षयं (=द्युलोके निवसन्तं) यम् [अग्निं] मातरिश्वा आ दधे (=मातरिश्वा नाम देवः स्वर्गादाहृत्य पृथिव्यां स्थापितवान्) तं चित्रयामं (=नानाविधगमनं) हरिकेशं (=पिङ्गलार्चिषं) सुदीतिं (=शोभनदीप्तिमन्तम्) अग्निं नव्यसे सुविताय (=नवतराय धनाय) [वयम्] ईमहे (=याचामहे) ॥

१४. शुचिं (=शुद्धं) यामन् (=यामनि=यज्ञे) इषिरं (=गमनवन्तं) स्वर्दृशं (=सूर्यसदृशं) दिवः केतुं (=द्युलोकस्य ध्वजं) रोचनस्थां (=रोचमाने द्युलोकस्योपरितने प्रदेशे तिष्ठन्तम्) उषर्बुधम् (=उषसि प्रबुध्यमानं) दिवो मूर्धानं (=द्युलोकस्य शिरोभूतम्) अप्रतिष्कुतम् (=अप्रतिहतं) वाजिनं (=प्रबलं) तम् अग्निं बृहत् नमसा (=बृहता स्तोत्रेण) ईमहे (=याचामहे) ॥

१३. ज्या सत्यवान्, पूज्य, मेधावी, स्तुत्य आणि द्युलोकनिवासी [अग्नी]ला मातरिश्वा [पृथिवीवर] स्थापिता झाला, त्या चित्रगामी, पिंगलकेशी [आणि] उत्तमतेजस्वी अग्नीला आम्ही अत्यंत नूतन धनासाठीं प्रार्थितों.

१४. पवित्र आणि यज्ञांत चपल, आणि सूर्याप्रमाणें दीप्तिमान्, द्युलोकाचा ध्वज, द्युलोकांतील देदीप्यमान प्रदेशीं असणारा, प्रभातकाळीं जागृत होणारा, द्युलोकाचा माथा, अप्रतिहत [आणि] प्रबळ असा जो अग्नि, त्याला मोठें स्तोत्र म्हणून आम्ही प्रार्थितों.

13. We pray for the newest wealth that Agni of the veriegated path, of tawny hair, [and] excellent brightness, full of truth, worthy of worship, wise, praiseworthy and residing in heaven, whom Mâtaris'vâ established [on earth].

14. Pure, and energetic in the sacrifice, resembling the sun, the banner of heaven, placed on the brilliant regions of the sky, awaking in the early morning, the pinnacle of heaven, irresistible [and] mighty—we entreat that Agni with a great hymn.

---

१३. 'मातरिश्वा.' सू. ६१ मं. १ आणि त्याजवरील टिपा पहा.

१४. या मंत्रांत बहुतकरून सगळे शब्द अग्नीचे विशेषणवाचक आहेत.

'द्युलोकाचा ध्वज' = 'केतुं दिवः' म्हणजे द्युलोकांत सूर्यादिकांचीं जीं अनेक तेजें त्यांतें दाखविणारा, त्यांचा सूचक.

'द्युलोकांतील देदीप्यमान प्रदेशीं असणारा' = 'रोचनस्थाम्' म्हणजे सूर्यरूपानें द्युलोकाच्या अत्यंत उंच प्रदेशीं फिरणारा.

'प्रभात काळीं जागृत होणारा' = 'उषर्बुधम्.' म्हणजे याचें आह्वान करण्यासाठीं प्रातःकाळीं सगळे लोक ज्याला पेटवितात असा.

'द्युलोकाचा माथा' = 'दिवो मूर्धानम्.' म्हणजे द्युलोकांतील जीं अनेक तेजें त्यामध्यें श्रेष्ठतेजोभूत असा.

मन्द्रं होतारं शुचिमद्वयाविनं दमूनसमुक्थ्यं विश्वचर्षणिम् ।
रथं न चित्रं वपुषाय दर्शतं मनुर्हितं सदमिद्राय ईमहे ॥१५॥१९

मन्द्रम् । होतारम् । शुचिम् । अद्वयाविनम् । दमूनसम् । उक्थ्यम् ।
विश्वऽचर्षणिम् ।
रथम् । न । चित्रम् । वपुषाय । दर्शतम् । मनुःऽहितम् । सदम् । इत् ।
रायः । ईमहे ॥ १५ ॥ १९ ॥

भाषायाम्.

१५. मन्द्रम् (=आह्लादकरं प्रियं) शुचिं (=शुद्धम्) अद्वयाविनम् (=अकुटिलं) दमूनसं (=दमेभ्यो गृहेभ्यो हितम्) उक्थ्यं (=प्रशस्यं) विश्वचर्षणिं (=विश्वस्य द्रष्टारम्) [एतादृशं] होतारं रथं न चित्रं (=रथवन्नानावर्णं) वपुषाय दर्शतं (=रूपार्थे दर्शनीयं सुन्दररूपं) मनुर्हितं (=मनुष्येभ्यः कल्याणम् [अग्निं] सदम् इत् राय ईमहे (=सदैव धनानि याचामहे) ॥

सूक्तम् ३–२३७.

विश्वामित्र ऋषिः । वैश्वानरोऽग्निर्देवता । जगती छन्दः ॥

वैश्वानराय पृथुपाजसे विपो रत्ना विधन्त धरुणेषु गातवे ।
अग्निर्हि देवाँ अमृतो दुवस्यत्यथा धर्माणि सनता न दूदुषत् ॥१

वैश्वानराय । पृथुऽपाजसे । विपः । रत्ना । विधन्त । धरुणेषु । गातवे ।
अग्निः । हि । देवान् । अमृतः । दुवस्यति । अथ । धर्माणि । सनता ।
न । दूदुषत् ॥ १ ॥

भाषायाम्.

१. पृथुपाजसे (=बहुतेजसे) वैश्वानराय धरुणेषु गातुं (=यज्ञेषु गायनाय) विपः (=विपश्चितो) रत्ना विधन्त (=रत्नानि अविधन्त=स्तोत्राणि परिचरन्ति कुर्वन्ति) । हि (=यस्मात्कारणात्) अमृतः (=मरणरहितः) अग्निर्देवान् दुवसति (=हविषां प्रदानेन परिचरति) । अथ (=अत एव) धर्माणि (=यज्ञकरणादीन् धर्मान्) [कोपि] सनता न दूदुषत् (=सातत्येन न=कदापि न नाशयितुं शक्नुयात्) ॥

१५. प्रिय, शुद्ध, निष्कपट, मायाळू, स्तुत्य आणि विश्वदर्शी होता, रथाप्रमाणें अनेक वर्णांचा, रूपानें सुंदर, आणि मनुष्यहितकारी असा जो अग्नि त्याजपाशीं आम्ही सदैव संपत्ति याचितों.

15. We always pray for wealth [Agni] the dear, pure, sincere, kind, praiseworthy and all-seeing invoker, many-coloured like a chariot, handsome in his body, and beneficent to mankind.

सूक्त ३–२३७.

ऋषि–विश्वामित्र. देवता–वैश्वानर अग्नि. वृत्त–जगती.

१. विस्तीर्णतेजोयुक्त जो वैश्वानर, त्याजप्रीत्यर्थ विद्वान् लोक यज्ञांत गाण्याकरितां स्तोत्रें रचितात. कारण अमर अग्नि देवांची उपासना करितो. म्हणूनच कोणी कधींहि धर्मांचा नाश करूं शकणार नाहीं.

Hymn 3–237.

To *Agni Vais'vânara.* By *Vis'vâmitra.* Metre—*Jagatî.*

1. For Vais'vânara shining far and wide wise men prepare hymns to sing [them] in sacrifices. For immortal Agni worships the gods. Hence no one shall ever destroy the ordinances.

---

१. 'कधींहि...... नाहीं'= 'सनता न.' सनता ही 'सनत्' शब्दाची तृतीया आहे.

अन्तर्दूतो रोदसी दस्म ईयते होता निषत्तो मनुषः पुरोहितः ।
क्षयं बृहन्तं परि भूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः ॥ २ ॥

अन्तः । दूतः । रोदसी इति । दस्मः । ईयते । होता । निऽसत्तः । मनुषः । पुरःऽहितः ।
क्षयम् । बृहन्तम् । परि । भूषति । द्युऽभिः । देवेभिः । अग्निः । इषितः । धियाऽवसुः ॥ २ ॥

केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं महयन्त चित्तिभिः ।
अपांसि यस्मिन्नधि संदधुर्गिरस्तस्मिन्त्सुम्नानि यजमान आ चके ॥ ३ ॥

केतुम् । यज्ञानाम् । विदथस्य । साधनम् । विप्रासः । अग्निम् । महयन्त । चित्तिऽभिः ।
अपांसि । यस्मिन् । अधि । सम्ऽदधुः । गिरः । तस्मिन् । सुम्नानि । यजमानः । आ । चके ॥ ३ ॥

भाषायाम्.

२. [देवानां] दूतः [सन्] दस्मः (=पराक्रमकारी) [अग्नी] रोदसी अन्तः (=द्वयोर्लोकयोर्मध्ये) ईयते (=गच्छति) । मनुषः (=यजमानस्य) होता पुरोहितः (=आह्वानकारी पुरोहितः सन्) निषत्तः (=निषण्णो भवति यज्ञगृहे) । देवेभिरिषितः (=देवैः प्रेषितो) धियावसुः (=धीमानग्निर्द्युभिः=तेजोभिर्) बृहन्तं क्षयं (=महान्तं स्वकीयं गृहं यागमण्डपरूपं) परि भूषति (=अलंकुरुते) ॥

३. यज्ञानां केतुं (=प्रज्ञापकं ध्वजं) विदथस्य साधनम् (=उपासनायाः साधनभूतम्) अग्निं विप्रासः (=विप्रा विपश्चितश्) चित्तिभिः (=कर्मभिर्) महयन्त (=पूजयन्ति) । यस्मिन् [अग्नावधि] गिरः (=स्तोतारः) अपांसि संदधुः (=संदधते) यजमानस्तस्मिन् सुम्नानि (=सुखानि) आ चके (=कामयते) ॥

२. [देवांचा] दूत [होऊन] पराक्रमी [अग्नि] द्युलोक आणि पृथिवी यांमध्यें फिरतो; मनुष्याचा होता [आणि] पुरोहित [होऊन] तो [यज्ञगृहीं] बसतो. देवांनीं पाठविलेला मेधावी अग्नि [आपलें] मोठें घर प्रकाशांनीं अलंकृत करितो.

३. यज्ञांचा ध्वज [आणि] उपासनेचें साधन असा जो अग्नि त्याला विद्वान् लोक कर्मांनीं पूजितात. स्तवनकर्ते उपासकजन ज्याचे ठायीं [सर्व] कर्में अर्पण करितात, त्या [अग्नी]च्या ठायीं यजमान सुखांची वांछा करितो.

2. [As the divine] messenger the victorious hero passes through the two worlds. [As] man's invoker [and] priest he sits down. Wise Agni sent by the gods adorns [his] great home with effulgence.

3. Banner of sacrifices [and] the means of worship, the wise worship Agni with [their] works. The sacrificer hopes for comforts in him in whom the prayerful direct their works.

---

२. '[आपलें] मोठें घर' = 'बृहन्तं क्षयम्.' म्हणजे यज्ञगृह जें तेंच.

३. अग्नीच्या द्वारें उपासना होत असे म्हणून त्याला उपासनेचें साधन असें म्हटलें आहे. यज्ञांचा ध्वज म्हणजे जेथें जेथें यज्ञ होतो तेथें तेथें अग्नि नाहीं असें होणें नाहीं.

पिता यज्ञानामसुरो विपश्चितां विमानमग्निर्वयुनं च वाघताम् ।
आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भन्दते धामभिः कविः ॥४

पिता । यज्ञानाम् । असुरः । विपःऽचिताम् । विऽमानम् । अग्निः ।
वयुनम् । च । वाघताम् ।
आ । विवेश । रोदसी इति । भूरिऽवर्पसा । पुरुऽप्रियः । भन्दते ।
धामऽभिः । कविः ॥ ४ ॥

चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदम् ।
विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः ५।२०

चन्द्रम् । अग्निम् । चन्द्रऽरथम् । हरिऽव्रतम् । वैश्वानरम् । अप्सुऽस-
दम् । स्वःऽविदम् ।
विऽगाहम् । तूर्णिम् । तविषीभिः । आऽवृतम् । भूर्णिम् । देवासः ।
इह । सुऽश्रियम् । दधुः ॥ ५ ॥ २० ॥

भाषायाम्.

४. यज्ञानां (=यज्ञियानां यजनकर्तॄणां) पिता विपश्चितामसुरः (=विदुषां सहायो) वाघतां विमानं वयुनं च (=ऋत्विजां कर्मसाधनं ज्ञानसाधनं च) [एतादृशः] अग्निर् भूरिवर्पसा (=नानाविधरूपे) रोदसी (=द्यावापृथिव्यौ) आ विवेश (=प्रविशति) । पुरुप्रियः (=बहुभिरिष्टः) कविः (=मेधावी) [स] धामभिर्भन्दते (=कर्मभिः स्तूयते सेव्यते) ॥

५. चन्द्रम् (=आह्लादकरं) चन्द्ररथम् (=आह्लादको रथो यस्य तं) हरिव्रतं (=? " पिङ्गलवर्णम् ") अप्सुसदम् (=उदकेषु अन्तरिक्षे विद्युद्रूपेण सीदन्तं) स्वर्विदं (=स्वर्गस्य लम्भयितारं दातारं) विगाहं (=सर्वत्र व्याप्तं) तूर्णिं (=शीघ्रगामिनं) तविषीभिरावृतं (=बलैरावेष्टितं) भूर्णिं (=वेगवन्तं) सुश्रियं)=शोभनदीप्तिं) वैश्वानरम् [अग्निं] देवासः (=देवा) इह (=अस्मिन्मृत्युलोके) दधुः (=स्थापितवन्तः) ॥

४. यजकांचा पिता, विद्वानांचा सहाय, ऋत्विजांचें कर्मसाधन आणि ज्ञानसाधन [असा जो] अग्नि, [त्या]नें नानारूप द्यावापृथिवींस व्यापून टाकिलें आहे. बहुप्रिय [आणि] प्रज्ञावान् अग्नि कर्मांच्या योगानें स्तविला जातो.

५. आल्हादकारक ज्याचा रथ, पिवळा ज्याचा वर्ण, उदकांत ज्याचा वास असा जो स्वर्गदायी आल्हादकारक [आणि] सर्वव्यापी, क्षिप्रगामी, बलवेष्टित, वेगवान्, [आणि] सुश्री [अग्नि] वैश्वानर, त्याला देव या लोकीं स्थापिते झाले.

4. Father of the sacrificers, ally of the poets, source of action and of knowledge to the priests, Agni has pervaded earth and heaven of many forms. Dear to many, learned Agni is worshipped with works.

5. The gods have established in this world [Agni] Vais'vânara of glittering [colour], who has a glittering chariot, who is tawny-coloured, whose seat is in [the celestial] waters, who is the giver of heaven, [who is] deep, [and] quick, who is waited upon by powers, [and] [who is] impetuous [and] full of great glory.

---

५. 'उदकांत.' म्हणजे 'अंतरिक्षांत.'

अग्निर्देवेभिर्मनुषश्च जन्तुभिस्तन्वानो यज्ञं पुरुपेशसं धिया ।
रथीरन्तरीयते साधदिष्टिभिर्जीरो दमूना अभिशस्तिचातनः ॥६॥

अग्निः । देवेभिः । मनुषः । च । जन्तुऽभिः । तन्वानः । यज्ञम् । पुरुऽपेशसम् । धिया ।
रथीः । अन्तः । ईयते । साधदिष्टिऽभिः । जीरः । दमूनाः । अभिशस्तिऽचातनः ॥ ६ ॥

अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः ।
वयांसि जिन्व बृहतश्च जागृव उशिग्देवानामसि सुक्रतुर्विपाम् ॥७

अग्ने । जरस्व । सुऽअपत्ये । आयुनि । ऊर्जा । पिन्वस्व । सम् । इषः । दिदीहि । नः ।
वयांसि । जिन्व । बृहतः । च । जागृवे । उशिक् । देवानाम् । असि । सुऽक्रतुः । विपाम् ॥ ७ ॥

भाषायाम्.

६. देवेभिर्मनुषश्च जन्तुभिः (=देवैः साकं मनुर्जातस्यापत्यैः=मानवैश्च साकं) पुरुपेशसं (=नानारूपं) यज्ञं धिया (=प्रज्ञया) तन्वानः (=कुर्वन्) जीरः (=क्षिप्रकारी) दमूनाः (= गृहेभ्यो हितः=कृपालुः) अभिशस्तिचातनः (=यज्ञविघ्नकारिणां नाशयिता) [एतादृशः] अग्निः साधदिष्टिभिः (=साधितयज्ञैर्देवैः) [सहितो] रथीः (=तेषां नायकः सन्) अन्तरीयते (=द्यावापृथिव्योर्मध्ये गच्छति) ॥

७. हे अग्ने, [त्वं] स्वपत्ये (=शोभनापत्ययुक्ते) आयुनि (=आयुषि विषये =तादृशमायुर्दातुं) जरस्व (=स्तुतो भव=स्तुतः सन् सुसंतानयुक्तमायुर्देहि)। ऊर्जा (=हविरन्नेन) पिन्वस्व (=सिच्यस्व=पुष्टो भव)। इषो नः सं दिदीहि (=अस्मभ्यमन्नादिसंपदः संदीप्यस्व=वयं संपदो यथा लभेमहि तथा त्वं दीप्यस्व)। च (=अपि च) हे जागृवे (=सदैव जागरूक), बृहतो [यजमानस्य] (=तदर्थं) वयांसि जिन्व (=अन्नानि देहि)। [त्वं] देवानाम् उशिक् (=देवान् कामयमानो) विपां [च] सुक्रतुः (=विदुषां च सुष्ठुकर्ता फलदाता) असि ॥

६. देवांसहित आणि मानवांसहित नानारूप यज्ञाला [आपल्या] प्रज्ञेनें संपादणारा, क्षिप्रगामी, दयाळू [आणि] यज्ञविघ्नकारी शत्रूंचा नाशक असा अग्नि यज्ञसाधक [देवां]सह [त्यांचा] नायक [होत्साता] द्यावापृथिवींमधून फिरतो.

६. Agni who learnedly performs the multiform sacrifice in company with the gods and with the sons of man, who is impetuous, kind, [and] a destroyer of the reviling infidels, passes through heaven and earth at the head of [the gods] who fulfil the sacrifice.

७. हे अग्नी, तूं सुसंतानयुक्त आयुष्य [देण्या]विषयीं स्तविला जा. तूं हविरन्नानें पुष्ट हो. [आणि] चांगला प्रकाशून आम्हांला अन्नसंपत्ति दे. आणि हे जागरूक [अग्नी], मोठ्या [यजमाना]ला अन्नें दे. तूं देवांवर प्रीति करणारा [आणि] विद्वान् [मनुष्यां]चा फलदाता आहेस.

7. Be thou praised, o Agni, in respect of [long] life accompanied by good progeny. Be thou nourished with sacrificial food. [And] do thou shine wealth unto us. And give food to the great [sacrificer], o ever-wakeful [Agni]. Thou art a lover of the gods and a patron of the learned.

---

६. ‘अग्नि देवांस घेऊन येतो आणि मनुष्यांचा यज्ञ सिद्धीस नेऊन त्या त्या देवांसहित पुनः फिरत फिरत द्यावापृथिवींमधून जातो,’ असा भावार्थ.

विश्पतिं यह्वमतिथिं नरः सदा यन्तारं धीनामुशिजं च वाघताम् ।
अध्वराणां चेतनं जातवेदसं प्र शंसन्ति नमसा जूतिभिर्वृधे ॥८॥

विश्पतिम् । यह्वम् । अतिथिम् । नरः । सदा । यन्तारम् । धीनाम् । उशिजम् । च । वाघताम् ।
अध्वराणाम् । चेतनम् । जातऽवेदसम् । प्र । शंसन्ति । नमसा । जूतिऽभिः । वृधे ॥ ८ ॥

विभावा देवः सुरणः परि क्षितीरग्निर्बभूव शवसा सुमद्रथः ।
तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः॥९॥

विभाऽवा । देवः । सुऽरणः । परि । क्षितीः । अग्निः । बभूव । शवसा । सुमत्ऽरथः ।
तस्य । व्रतानि । भूरिऽपोषिणः । वयम् । उप । भूषेम । दमे । आ । सुवृक्तिऽभिः ॥ ९ ॥

भाषायाम्.

८. विश्पतिं (=विशां पतिं राजानं) यह्वं (=महान्तम्) अतिथिं धीनां यन्तारं (=स्तुतीनां नियामकं) वाघतां चोशिजम् (=उपासकानां कामयितारम्) अध्वराणां चेतनं (=यज्ञानां प्रज्ञापकं) जातवेदसं (=जातानां वेदितारं सर्वज्ञम्) [अग्निं] वृधे (=स्वकीयाभिवृद्धये) नरः (=मनुष्या) नमसा जूतिभिः (=नमस्कारेण स्तोत्रैश्च) प्र शंसन्ति (=प्रकर्षेण स्तुवन्ति) ॥

९. विभावा (=दीप्तिमान्) देवः (=द्योतमानः) सुरणः (=अतिशयेन कमनीयः) सुमद्रथः (=शोभनरथः) अग्निः शवसा (=बलेन) क्षितीः (=लोकान्) परि बभूव (=परिवेष्टयति)। भूरिपोषिणः (=बहूनां पोषयितुस्) तस्य व्रतानि (=चरितानि) दमे (=गृहे) सुवृक्तिभिः (=शोभनैः स्तोत्रैः) उप भूषेम (=प्रकाशयेम)॥

८. महान्, राजा, अतिथि, स्तुतींचा नियामक, आणि उपासकांवर प्रीति करणारा, यज्ञांचा प्रकाशक, [आणि] सर्वज्ञ असा जो अग्नि त्याला मनुष्यें, [आपल्या] अभिवृद्धीसाठीं नमस्कारानें [आणि] स्तुतींनीं सदैव स्तवितात.

९. दीप्तिमान्, देदीप्यमान, अत्यंत रमणीय, [आणि] सुरथ [असा जो] अग्नि [तो] लोकांला वेष्टून राहतो. त्या बहुपोषक अग्नीचीं चरितें आम्ही [आपल्या] घरीं चांगल्या स्तोत्रांनीं प्रसिद्ध करूं.

8. Men for prosperity ever praise with obeisance and hymns [Agni] the great king of men, the guest, the controller of hymns and the lover of worshippers, the light of sacrifices, who knows all beings.

9. Brilliant, divine, comely, [and] having a beautiful chariot, Agni has surrounded the world with [his] strength. Let us with good hymns proclaim in the house the deeds of that great giver of nourishments.

८. 'स्तुतींनीं'=' जूतिभिः'. 'जूति' शब्दाचा मूळ अर्थ प्रेरणा असा आहे. या ठिकाणीं मोठ्यानें प्रेरिलेल्या म्हणजे उच्चारिलेल्या ज्या स्तुति त्या, असा अर्थ विवक्षित दिसतो.

वैश्वानर तव धामान्या चक्रे येभिः स्वर्विदभवो विचक्षण ।
जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूरसि त्मना १०.

वैश्वानर । तव । धामानि । आ । चक्रे । येभिः । स्वः॒ऽवित् । अ-
भवः । विऽचक्षण ।
जातः । आ । अपृणः । भुवनानि । रोदसी इति । अग्ने । ता । विश्वा ।
परिऽभूः । असि । त्मना ॥ १० ॥

वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः ।
उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा ॥११॥२१॥

वैश्वानरस्य । दंसनाभ्यः । बृहत् । अरिणात् । एकः । सुऽअपस्यया ।
कविः ।
उभा । पितरा । महयन् । अजायत । अग्निः । द्यावापृथिवी इति ।
भूरिऽरेतसा ॥ ११ ॥ २१ ॥

भाषायाम्.

१०. हे वैश्वानर, हे विचक्षण (=सर्वदर्शिन्), येभिः स्वर्विद् अभवः (=यै-स्तेजोभिः स्वर्गस्य दाताभवस्) [तानि] तव धामानि (=तेजांसि) आ चक्रे (=अ-भिष्टौमि) । जातः (=जातमात्रो) भुवनानि रोदसी (=सर्वाणि भूतजातानि द्या-वापृथिव्यौ च) आ अपृणः (=आपूरयः) । हे अग्ने, ता विश्वा (=तानि विश्वानि भुवनानि तत्सर्वं जगत्) त्मना परि भूरसि (=तस्य सर्वस्य जगतः परिग्रहीता र-क्षिता भवसि) ॥

११. वैश्वानरस्य दंसनाभ्यः (=पराक्रमवतीभ्यः क्रियाभ्यः सकाशात्) बृहत् (=कार्यं जायते) । कविः (=मेधावी) [स] एकः (=एक एव) स्वपस्यया (=सुष्ठु-चतुरतया) अरिणात् (=धनं ददाति) । अग्निः उभा पितरा (=उभौ जगतः पि-तरौ) भूरिरेतसा द्यावापृथिवी (=बहुरेतस्कौ द्यावापृथिव्यौ) महयन् (=पूजयन्= तयोः पूजयिता) अजायत ॥

१०. हे वैश्वानरा, हे प्राज्ञा, तूं ज्या [तेजांच्या योगा]नें स्वर्गदायी झाला आहेस तीं तुझीं तेजें मी स्तवितों. तूं उत्पन्न होतांच सकल भुवनांला आणि द्यावापृथिवींला भरून टाकिता झालास. हे अग्नी, तीं सर्व भुवनें तूं एकटा पोशितोस.

१०. O all-seeing Vais'vânara, I praise thy splendors with which thou hast become the giver of heaven. So soon as born thou didst fill all creation, [fill] earth and heaven. Thou art the protector, o Agni, of that universe.

११. वैश्वानराच्या पराक्रमांनीं मोठें [कार्य होतें]. मेधावी [वैश्वानर] एकटा आपल्या चातुर्यानें [धन] देत असतो. बहुरेतस्क जे उभय आईबाप द्यू आणि पृथिवी, त्यांचा मान राखणारा असा अग्नि उत्पन्न झाला.

11. Much [is achieved] by the exploits of Vais'vânara. [That] wise [one] alone gives with his great skill. Agni was born to honour both the prolific parents, heaven and earth.

११. 'बहुरेतस्क उभय आईबाप' =' भूरिरेतसा उभा पितरा.' म्हणजे ज्यांपासून असंख्य प्राण्यांची उत्पत्ति होते असे जे जगताचे आईबाप पृथिवी आणि द्यू, ते.

सूक्तम् ४–२३८.

आप्रीसूक्तमिदम् । सू. १८८ ।

विश्वामित्र ऋषिः । त्रिष्टुभ् छन्दः ॥

समित्समित्सुमना बोध्यस्मे शुचाशुचा सुमतिं रासि वस्वः ।
आ देव देवान्यजथाय वक्षि सखा सखीन्त्सुमना यक्ष्यग्ने ॥ १ ॥

समित्ऽसमित् । सुऽमनाः । बोधि । अस्मे इति । शुचाऽशुचा । सुऽमतिम् । रासि । वस्वः ।

आ । देव । देवान् । यजथाय । वक्षि । सखा । सखीन् । सुऽमनाः । यक्षि । अग्ने ॥ १ ॥

यं देवासस्त्रिरहन्नायजन्ते दिवेदिवे वरुणो मित्रो अग्निः ।
सेमं यज्ञं मधुमन्तं कृधी नस्तनूनपाद्घृतयोनिं विधन्तम् ॥ २ ॥

यम् । देवासः । त्रिः । अहन् । आऽयजन्ते । दिवेऽदिवे । वरुणः । मित्रः । अग्निः ।

सः । इमम् । यज्ञम् । मधुऽमन्तम् । कृधि । नः । तनूऽनपात् । घृतऽयोनिम् । विधन्तम् ॥ २ ॥

भाषायाम्.

१. समित्समित् (=अत्यर्थं समिद्धस्त्वम्) अस्मै सुमना बोधि (=अस्मभ्यम् अनुकूलमनस्को भव) । शुचाशुचा (=अत्यन्ततेजसा) वस्वः सुमतिं रासि (=धनविषयकम् अनुग्रहं प्रयच्छ कुरु) । हे देव, देवान् यजथाय (=यज्ञाय) आ वक्षि (=आवह) । हे अग्ने, सुमनाः (=अनुकूलमनस्कस्त्वं) सखा (=मित्रभूतः सन्) सखीन् (=मित्रभूतान् देवान्) यक्षि (=यजस्व=पूजय) ॥

२. हे तनूनपात्, यं [यज्ञं] दिवेदिवे (=प्रतिदिनं) त्रिरहन् (=अहनि त्रिवारं) वरुणो मित्रोग्निश् [चेत्येते] देवासः (=देवा) आजयन्ते (=तन्वते) स [त्वं] (=यस्मात्ते देवास्तथा कुर्वन्ति अतः कारणात्) विधन्तं (=परिचरन्तं त्वां पूजयन्तम्) इमं नो यज्ञं मधुमन्तं घृतयोनिं [च] कृधि (=मधुयुक्तं घृतोदरं च कुरु=माधुर्यपुष्ट्युपेतमेघोदकपरिणामं कुरु) ॥

अस्य नो यज्ञस्य मधुरं घनवत्पोषकं च मेघोदकमेव फलं भवत्विति भावः ॥

सूक्त ४–२३८.

ऋषि–विश्वामित्र. वृत्त–त्रिष्टुभ्.

हें आप्री सूक्त आहे त्यामुळें आप्री सूक्तांतील ज्या क्रमानें ज्या देवता प्रति ऋचेंत यावयाच्या त्या यांत आहेत.

१. **चांगला पेटलेला** असा तूं आम्हांला अनुकूळ हो. तूं आपल्या अत्यंत प्रकाशानें धनाविषयीं कृपा कर. हे देवा, तूं यज्ञासाठीं देवांस घेऊन ये. हे अग्नी, सखा असा जो तूं तो अनुकूळ [होऊन] सख्यांला पूज.

२. ज्या [यज्ञा]ला वरुण, मित्र, [आणि] अग्नि [हे] देव नित्य दिवसास तीन वेळ संपादितात, त्या आमच्या या पूजक यज्ञाला, हे **तनूनपात्**, तूं मधुयुक्त [आणि] घृतपूर्ण कर.

Hymn 4–238.

This is an *Âprî* hymn. For Devatâ see hymn 188. By *Vis'vâmitra.* Metre—*Trishṭubh.*

1. *Kindled* and *kindled,* do thou become favourable unto us. With thy exceeding splendor give us a favour of wealth. Bring, o god, the gods hither to the sacrifice. Favouring do thou, o Agni, a friend sacrifice to the friends.

2. O *Tanûnapât*, crown with sweetness [and] clarified butter this our sacrifice, which the gods Varuṇa, Mitra, [and] Agni accomplish daily three times a day, and which is full of reverence.

---

१. सू. १८८ मं. १ पहा.

'सख्यांला'=' सखीन्.' म्हणजे अग्नीचे मित्र जे देव त्यांला.

२. 'ज्या या यज्ञाची पूर्णता प्रतिदिवशीं तीनदा वरुण, मित्र आणि अग्नि हे देव करितात त्या यज्ञाला, हे तनूनपात्, तूं पूर्ण कर; आणि त्यापासून मधुर आणि पुष्टिकारक असें मेघोदक आम्हांस प्राप्त करून दे' असा भावार्थ.

सू. १८८ मं. २ पहा.

प्र दीधितिर्विश्ववारा जिगाति होतारमिळः प्रथमं यजध्यै ।
अच्छा नमोभिर्वृषभं वन्दध्यै स देवान्यक्षदिषितो यजीयान् ॥३॥

प्र । दीधितिः । विश्वऽवारा । जिगाति । होतारम् । इळः । प्रथमम् । यजध्यै ।

अच्छ । नमःऽभि । वृषभम् । वन्दध्यै । सः । देवान् । यक्षत् । इषितः । यजीयान् ॥ ३ ॥

ऊर्ध्वो वां गातुरध्वरे अकार्यूर्ध्वा शोचींषि प्रस्थिता रजांसि ।
दिवो वा नाभा न्यसादि होता स्तृणीमहि देवव्यचा वि बर्हिः॥४॥

ऊर्ध्वः । वाम् । गातुः । अध्वरे । अकारि । ऊर्ध्वा । शोचींषि । प्रऽस्थिता । रजांसि ।

दिवः । वा । नाभा । नि । असादि । होता । स्तृणीमहि । देवऽव्यचाः । वि । बर्हिः ॥ ४ ॥

भाषायाम्.

३. विश्ववारा (=सर्वैर्वरणीया=सर्वप्रिया) दीधितिः (=स्तुतिः) प्रथमं होतारम् (=आदिं होतारम्) इळो यजध्यै (=हवींषि प्रार्पयितुं) [तं प्रति] प्र जिगाति (=प्रकर्षेण गच्छतु)—वृषभं वन्दध्यै (=वीरं तं वन्दितुं) नमोभिः (=नमस्कारैर्) अच्छ [प्र जिगातु] (=तं प्रति गच्छतु)। इषितः (=अस्माभिः प्रेषितो) यजीयान् (=यष्टृतमः=यजनकर्मणि कुशलतमः) स देवान् यक्षत् (=पूजयतु)॥

४. [हे अग्ने], अध्वरे (=अस्मिन्यज्ञे) वां गातुः (=तव मार्ग) ऊर्ध्वः अकारि (=उन्नतः क्रियते=आकाशं प्रति गन्तुं प्रवृत्तः)। [तव] शोचींषि (=तव तेजांसि) ऊर्ध्वा (=ऊर्ध्वानि=ऊर्ध्वगतिकानि भूत्वा) रजांसि प्रस्थिता (=आकाशप्रदेशान् प्रति प्रस्थितानि)।—होता (=अग्निलक्षणो) दिवो नाभा (=द्युलोकस्य नाभौ मध्यप्रदेशे) न्यसादि (=निषीदति)। [अतः करणात्] देवव्यचा बर्हिः (=देवव्यचो बर्हिर्देवैर्व्याप्तं बर्हिर्) वि स्तृणीमहि (=विशेषेण स्तृणीमः)॥

३. आदि होत्याला अन्न अर्पण करण्याकरितां विश्वकाम्य स्तुति त्याजप्रत जाओ. त्या वीराला वंदण्यासाठीं नमस्कारांनीं त्याप्रत जाओ. आम्हीं पाठविलेला असा तो उत्तम यजक देवांला भजो.

४. या यज्ञांमध्यें तुझा मार्ग वर झाला आहे. [आणि तुझीं] तेजें आकाशाकडे निघालीं [आहेत]. द्युलोकाच्या मध्य भागीं होता बसला आहे. देवांला ठाव देणारे दर्भ आपण पसरूं या.

3. May the *praise* dear to all run to the primeval invoker to offer him oblations—[run] towards the hero for to adore [him]. May he, sent [by us] [and] most skilful in sacrificing, worship the gods.

4. Thy path is turned upwards in this sacrifice, [thy] effulgence has started upwards into the sky. The invoker has sat down in the navel of heaven. Let us spread the *kus'a-grass* that gives a seat to the gods.

---

३. ही ऋचा इळामक अग्नीविषयीं आहे. यांत इळा हा शब्द आहे त्यावरून समजावयाचें. सू. १८८ मं. ३ पहा.

४. ही ऋचा दर्भाविषयीं आहे. सू. १८८ मं. ४ पहा.

'अग्नि प्रदीप्त झाला आहे व त्याच्या ज्वाळा आकाशाकडे धांवत आहेत. यास्तव आतां देवयजनासाठीं आपण दर्भ आंथरूं'.

'तुझासा'=वाम्. हें व्यत्ययानें द्विवचन झालें आहें असें समजलें पाहिजे. उत्तरार्धाच्या आरंभीं दुसरा शब्द 'वा' आहे, त्याप्रमाणेंच हा पूर्वार्धातील 'वाम्'हि 'वा'च असावा असें नसेल काय ?

'द्युलोकाच्या मध्य भागीं'='दिवोनाभा' म्हणजे यज्ञमंडपाच्या मध्य भागीं असा अर्थ सायण करितात. स्वर्गींचा देव अग्नि यज्ञमंडपांत प्रादुर्भूत झाला त्यामुळें यज्ञमंडपालाच द्युलोक हें नांव दिलें आहे असें असेल.

सप्त होत्राणि मनसा वृणाना इन्वन्तो विश्वं प्रति यन्नृतेन ।
नृपेशसो विदथेषु प्र जाता अभी३मं यज्ञं वि चरन्त पूर्वीः॥५॥२२॥

सप्त । होत्राणि । मनसा । वृणानाः । इन्वन्तः । विश्वम् । प्रति । यन् । ऋतेन ।
नृऽपेशसः । विदथेषु । प्र । जाताः । अभि । इमम् । यज्ञम् । वि । चरन्त । पूर्वीः ॥ ५ ॥ २२ ॥

आ भन्दमाने उषसा उपाके उत स्मयेते तन्वा३ विरूपे ।
यथा नो मित्रो वरुणो जुजोषदिन्द्रो मरुत्वाँ उत वा महोभिः॥६॥

आ । भन्दमाने इति । उषसौ । उपाके इति । उत । स्मयेते इति । तन्वा । विरूपे इति विऽरूपे ।
यथा । नः । मित्रः । वरुणः । जुजोषत् । इन्द्रः । मरुत्वान् । उत । वा । महःऽभिः ॥ ६ ॥

भाषायाम्.

५. मनसा वृणानाः (=स्तोत्रेण प्रार्थ्यमाना) [देवा] विश्वं (=सकलं जगद्) ऋतेन (=सत्यभूतेन मेघोदकेन) इन्वन्तः (=प्रीणयन्तः सन्तः) सप्त होत्राणि प्रति यन् (=होतुः सप्त कर्माणि प्रति आगच्छन्तु) । नृपेशसः (=नररूपा) विदथेषु जाताः (=यज्ञेषु प्रादुर्भूताः) पूर्वीः (=पूर्व्यो बह्व्यो) [द्वारो देव्यः] इमं यज्ञम् अभि वि चरन्त (=अभिचरन्तु आगच्छन्तु) ॥

६. उपाके (=परस्परं संगते) तन्वा विरूपे (=आकारेण परस्परं भिन्ने) उषसौ (=नक्तोषसौ) भन्दमाने (=स्तूयमाने सत्यौ) आ[गच्छताम्] यथा मित्रः वरुणः उत वा (=अपि च) मरुत्वान् इन्द्रः (=मरुद्युक्त इन्द्रो) नः (=अस्मान्) महोभिर्जुजोषत् (=तेजोभिः सेवेत=अनुगृह्णीयात्) ॥

५. स्तोत्रानें प्रार्थिलेले [असे देव] सकळ जगताला उदकानें आनंदवीत होत्साच्या एकामागून एक सात कर्मांप्रत येओत. यज्ञांमध्यें उत्पन्न झालेल्या ज्या नराकार पुष्कळ [द्वारो देवी] त्या या यज्ञाप्रत येओत.

६. एकमेकांला लागलेल्या आणि भिन्न भिन्न आकाराच्या अशा ज्या उषा आणि रात्र, त्या स्तविल्या होत्सात्या येओत आणि हंसोत, कीं जेणेंकरून मित्र, वरुण आणि मरुतांसहित इंद्र आपल्या तेजांनिशीं आम्हांवर अनुग्रह करतील.

5. May [the gods], waited upon by the hymn, come to the seven works of the invoker, and delight the world with the holy water. May the numerous *Doors* of human form, born in the sacrifices, come to this sacrifice.

6. May the *Night* and the *Dawn*, united each to the other and each differing as to features, [come] hither and smile, being praised; so that Mitra, Varuṇa and Indra at the head of the Maruts, may favour us with their splendors.

---

५. हा मंत्र द्वारो देवींविषयीं आहे. सू. १८८ मं. ५ पहा.

'उदकानें'='ऋतेन'. 'ऋत' शब्दाचा अर्थ उदक असा फार संभवतो म्हणून आम्हीं. सू. १०५ मं. १२ यावर सांगितलेंच आहे तें पहा.

'सात कर्मांप्रत'=सप्त होत्राणि. व षट्कर्त्यांचीं सात कर्में असें सायण म्हणतात.

६. सू. १८८ मं. ६ पहा.

दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥ ७ ॥

दैव्या । होतारा । प्रथमा । नि । ऋञ्जे । सप्त । पृक्षासः । स्वधया । मदन्ति ।
ऋतम् । शंसन्तः । ऋतम् । इत् । ते । आहुः । अनु । व्रतम् । व्रतऽपाः । दीध्यानाः ॥ ७ ॥

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदन्तु ॥ ८ ॥

आ । भारती । भारतीभिः । सऽजोषाः । इळा । देवैः । मनुष्येभिः । अग्निः ।
सरस्वती । सारस्वतेभिः । अर्वाक् । तिस्रः । देवीः । बर्हिः । आ । इदम् । सदन्तु ॥ ८ ॥

भाषायाम्.

७. दैव्या (=दिव्यौ) प्रथमा (=प्रथमावादिभूतौ) होतारा (=देवानामाह्वातारौ) नि ऋञ्जे (= प्रसाधयामि=प्रसादयामि) । ऋतं शंसन्तः (=सत्यभूतं मेघोदकमाशंसमानाः) सप्त पृक्षासः (=ऋत्विजो) व्रतमनु व्रतपाः (=व्रतं कर्मानुसृत्य व्रतरक्षिणः कर्मणो रक्षितारो) दीध्यानाः (=ध्यानरताः सन्तस्) ते ऋतमित् आहुः (=अग्निरेव सत्यमिति वदन्ति) ॥

८. भारतीभिः (=? "भरतस्य सूर्यस्य संबन्धिनीभिः") सजोषाः (=संगता) भारती [नाम देवी] देवैर्मनुष्येभिः (=देवैर्मानवैश्च) [संगता] इळा [नाम देवी] सारस्वतैः (=? सरस्वतीसंबन्धिभिः) [संगता] सरस्वती [नाम देवी] [इति] तिस्रो देवीः (=देव्यः) आ[गत्य] अग्निश् [च] अर्वाग् आ[गत्य] इदं बर्हिः (=अस्मिन् बर्हिषि) सदन्तु (=निषीदन्तु) ॥

७. **दोन दिव्य** आदि **होत्यां**ला मी आळवितों. सत्य[रूप उदका]ची याचना करणारे सात ऋत्विज् [त्यांला] हविरन्नानें आनंदवीत आहेत. कर्माला अनु[सरून] कर्माचें रक्षण करणारे [आणि] ध्यानी [असे] ते [ऋत्विज्] [अग्नीला]च सत्य म्हणतात.

८. भारतींसहित **भारती**, देव आणि मनुष्य यांसहित **इळा**, [आणि] सारस्वतांसहित **सरस्वती** [ह्या] तीन देवी [आणि] अग्नि [हे] येऊन या दर्भांवर बसोत.

7. I propitiate the two primeval *divine invokers*. The seven priests, praying for the holy [water], delight [them] with oblation. Preserving the law according to the law, and full of contemplation, they say [Agni] [is] Holiness.

8. May the three goddesses *Bhâratî* accompanied by the Bhâratîs, *Iḷâ* by the gods [and] the men, [and] *Sarasvatî* by the Sârasvatas, [as also] Agni, come and sit on this *Kus'a-grass*.

---

७. ही ऋचा दोघे जे 'दिव्य होते' म्हणून आप्रीसूक्तांत प्रसिद्ध असतात, त्यांविषयीं आहे. सू. १८८ मं. ७ पहा.

तात्पर्यः—' दोघां दिव्य होत्यांला आमचे ऋत्विज् हविरन्न अर्पण करित आहेत. ते अग्नीलाच सत्य म्हणतात. अग्नीशिवाय दुसरें सत्य म्हणून कांहीं नाहीं असें समजतात'.

तथापि ' ऋत ' शब्दाचे वेगवेगळे अर्थ एकाच ऋचेंत असल्यामुळें स्पष्ट अर्थ समजत नाहीं. आणि सात ऋत्विज् कोण कोण समजावयाचे तेंहि किंचित् संदिग्ध आहे.

८. भारती, इळा, सरस्वती या तीन ' देवीं 'विषयीं ही ऋचा आहे. सू. १८८ मं ८ पहा.

या ऋचेंत ज्या पुष्कळ भारती आणि सारस्वत सांगितले ते कोण असतील तें समजत नाहीं. सरस्वतीचे जे [पुत्र] ते सारस्वत. परंतु ते कोण? कदाचित् जी सरस्वती या मंत्रांत सांगितली तिचे पुत्र असावेत. त्याप्रमाणेंच ' भारतीभिः' म्हणजे भारती देवी जी कोण या ऋचेंत सांगितलेली, तिच्या कन्या असाव्यात, असें दिसतें.

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥ ९ ॥

तत् । नः । तुरीपम् । अध । पोषयित्नु । देव । त्वष्टः । वि । रराणः । स्यस्वेति स्यस्व ।

यतः । वीरः । कर्मण्यः । सुऽदक्षः । युक्तऽग्रावा । जायते । देवऽकामः ॥ ९ ॥

वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति ।
सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥१०॥

वनस्पते । अव । सृज । उप । देवान् । अग्निः । हविः । शमिता । सूदयाति ।

सः । इत् । ऊं इति । होता । सत्यऽतरः । यजाति । यथा । देवानाम् । जनिमानि । वेद ॥ १० ॥

भाषायाम्.

९. अध (=अधुना) देव (=दीप्तिमन्) हे त्वष्टः, यतः (=यतः सकाशात्) कर्मण्यः (=कर्मकुशलः) सुदक्षः (=शोभनबलो) युक्तग्रावा (=ग्राव्णोर्योजयिता =ग्रावभिः सोममभिषूय देवप्रीत्यर्थं यज्ञस्य कर्ता) देवकामः (=देवान् कामयमानो) वीरः (=पुत्रो) जायते (=उत्पद्यते) तत् (=तादृशं) पोषयित्नु (=पोषकं) तुरीपं (=रेतो) नः (=अस्मभ्यं) [त्वं] रराणः (=रममाणः प्रसन्नः सन्) स्यस्व (=मोचय=पातय) ॥

१०. हे वनस्पते (=वनस्पतिविकार यूप), [त्वं] देवान् अव उप सृज (="समीपे कुरु") । शमिता (=हविषः संस्कर्ता) अग्निर्हविः सूदयाति (=संस्करोतु)। स इत् उ सत्यतरो होता (=अपि च स एवातिशयेन सत्यो देवानामाह्वाता) यजाति (=देवान् यजतु) । यथा (=यस्मात् कारणात्) [स] देवानां जनिमानि वेद (=देवानां जातानि देवप्रकारान् जानाति) ॥

९. हे दीप्तिमान् त्वष्ट्या, तूं प्रसन्न [होऊन] आम्हांपासून असें उत्कर्षकारक बीज पाड, कीं त्यापासून पराक्रमी, प्रबळ, ग्रावे जोडणारा, [आणि] देवांवर प्रीति करणारा असा शूर पुत्र जन्मेल.

9. And, o resplendent *Tvashṭâ*, pleased do thou let fall from us that prosperous seed from which may be born a hero, brave, powerful, sacrificing [and] godloving.

१०. हे **वनस्पती**, तूं देवांला घेऊन ये. शमिता अग्नि हवि शिजवो. तोच अत्यंत सत्य होता यजन करो, कारण कीं तो देवजनांला जाणतो.

10. O *Lord of the forest*, do thou bring the gods near. May Agni the preparer cook the oblation. May that very invoker, most truthful, conduct the sacrifice, as he knows the race of the gods.

---

९. सू. १८८ मं ९. पहा. त्वष्टा देव बीजापासून प्रजोत्पत्ति मनुष्यांचे आंगीं करितो याविषयीं सू. १४२ मं. १० आणि त्याजवरील टीप पहा.

'ग्रावे जोडणारा'='युक्तग्रावा'. म्हणजे सोमरस काढण्याचे जे पाषाण ते जोडून सोमरस काढील आणि देवांचें यजन करील असा.

दुष्ट जननशांतींत (म्हणजे चांगल्या मुहूर्तावर जन्म न झालें तर जी शांति करितात त्यांत) हा मंत्र म्हणत असतात. परंतु जन्म होण्याच्या पूर्वीं गर्भ राहण्याच्या अगोदर या मंत्राचा उपयोग. गर्भ राहून जन्म झाल्यावर हा मंत्र म्हणण्यांत कांहीं अर्थ दिसत नाहीं.

१०. सू. १८८ मं. १० पहा. हा मंत्र यूप जो खांब, कीं ज्याला बळी द्यावयाचा पशु बांधीत त्याविषयीं आहे. त्याला वनस्पति म्हणजे लांकडांचा राजा असें येथें म्हटलें आहे.

आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः ।
बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥
॥ ११ ॥ २३ ॥

आ । याहि । अग्ने । सम्ऽइधानः । अर्वाङ् । इन्द्रेण । देवैः । सऽरथम् । तुरेभिः ।

बर्हिः । नः । आस्ताम् । अदितिः । सुऽपुत्रा । स्वाहा । देवाः । अमृताः । मादयन्ताम् ॥ ११ ॥ २३ ॥

भाषायाम्.

११. हे अग्ने, समिधानः (=समिध्यमानः सन्) इन्द्रेण तुरेभिः (=त्वरमाणैर्) देवैः सरथं (=समानरथं यथा तथा) अर्वाग् आ याहि (=अत्रायाहि)। सुपुत्रा (=शोभनाः पुत्रा यस्याः सा) अदितिर्नो बर्हिरास्ताम् (=अस्माकं बर्हिष्युपविशतु)। अमृताः (=अमरा) देवाः स्वाहा (=स्वाहाकारेण) मादयन्तां (=तृप्यन्तु)॥

सूक्तम् ५–२३९.

विश्वामित्र ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

प्रत्यग्निरुषसश्चेकितानोऽबोधि विप्रः पदवीः कवीनाम् ।
पृथुपाजा देवयद्भिः समिद्धोऽप द्वारा तमसो वह्निरावः ॥ १ ॥

प्रति । अग्निः । उषसः । चेकितानः । अबोधि । विप्रः । पदऽवीः । कवीनाम् ।

पृथुऽपाजाः । देवयत्ऽभिः । सम्ऽइद्धः । अप । द्वारा । तमसः । वह्निः । आवरित्यावः ॥ १ ॥

भाषायाम्.

१. उषसश्चेकितानः (=जानन्) विप्रः (=मेधावी) कवीनां पदवीः (=नायकः) अग्निः प्रत्यबोधि (=प्रतिबुध्यते)। पृथुपाजाः (=दूरप्रसारि पाजस्तेजो यस्य स) देवयद्भिः समिद्धः (=देवकामैः सम्यग्दीप्तो) वह्निः (=हविषां वाहकोग्निस्) तमसो द्वारा (=अन्धतमसस्य द्वाराणि) अपावः (=अपावृणोत्)॥

११. हे अग्नी, तूं पेटविलेला होत्साता, इंद्रासहित [आणि] वेगवान् देवांसहित एका रथावर बसून इकडे ये. चांगल्या पुत्रांची माता अशी जी अदिति ती आमच्या दर्भांवर बसो. अमर देव स्वाहा [शब्दा]नें तृप्त होओत.

11. Being kindled, o Agni, come thou hither in the same chariot with Indra and with the quickly traversing gods. May Aditi, the mother of good sons, sit on our kus'a-grass. May the immortal gods be gratified with the exclamation *Svâhâ*.

११. ही ऋचा 'स्वाहा' या उद्गाराविषयीं आहे. सू. १८८ मं. ११पहा.

सूक्त ५–२३९.

ऋषि–विश्वामित्र. देवता–अग्नि. वृत्त–त्रिष्टुभ्.

१. उषांला जाणणारा [आणि] कवींचा नायक असा जो मेधावी अग्नि तो पुनः जागा झाला आहे. विस्तीर्णतेजोवान् वह्नि देवकामी जनांनीं पेटविला होत्साता अंधकाराचीं द्वारें उघडून टाकिता झाला आहे.

Hymn 5–239.

To *Agni*. By *Vis'vâmitra*. Metre —*Trishṭubh*.

1. Agni, who observes the dawns, [who is] the wise leader of the poets, has waked again. The carrier [of oblation] whose splendor reaches far, [being] kindled by those who love the gods, has broke open the doors of darkness.

१. 'उषांला जाणणारा'='उषसश्चेकितानः.' म्ह० उषांला पाहणारा; अर्थात् उषेचा उदय होण्याच्या अगोदर जागा होणारा.

प्रेद॒ग्निर्वा॑वृधे॒ स्तोमे॑भिर्गी॒र्भिः स्तो॑तॄ॒णां न॑म॒स्य॑ उ॒क्थैः ।
पू॒र्वीर्ऋ॒तस्य॑ सं॒दृश॑श्चका॒नः सं दू॒तो अ॑द्यौदु॒षसो॑ वि॒रोके ॥ २ ॥

प्र । इत् । ऊं॒ इति॑ । अ॒ग्निः । व॒वृ॒धे॒ । स्तोमे॑भिः । गी॒ःऽभिः । स्तो॒तॄ॒णाम् । न॒म॒स्यः॑ । उ॒क्थैः ।
पू॒र्वीः । ऋ॒तस्य॑ । स॒म्ऽदृशः॑ । च॒का॒नः । सम् । दू॒तः । अ॒द्यौ॒त् । उ॒षसः॑ । वि॒ऽरो॒के ॥ २ ॥

अधा॑य्य॒ग्निर्मानु॑षीषु वि॒क्ष्व१॒॑पां गर्भो॑ मि॒त्र ऋ॒तेन॒ साध॑न् ।
आ ह॑र्य॒तो य॑ज॒तः सान्व॑स्था॒दभू॑दु॒ विप्रो॒ हव्यो॑ मती॒नाम् ॥ ३ ॥

अधा॑यि । अ॒ग्निः । मानु॑षीषु । वि॒क्षु । अ॒पाम् । गर्भः॑ । मि॒त्रः । ऋ॒तेन॑ । साध॑न् ।
आ । ह॒र्य॒तः । य॒ज॒तः । सानु॑ । अ॒स्था॒त् । अभू॑त् । ऊं॒ इति॑ । विप्रः॑ । हव्यः॑ । म॒ती॒नाम् ॥ ३ ॥

भाषायाम्.

२. नमस्यः (=पूज्यः) अग्निः स्तोतॄणां स्तोमेभिः (=स्तोत्रैर्) गीर्भिः (=वाग्भिर्) उक्थैः (=शस्त्रैर्नाम स्तोत्रोच्चारप्रकारैः) प्र इत् उ ववृधे (=प्रकर्षेणैव वृद्धिं प्राप्तोस्ति) । ऋतस्य (=सत्यभूतस्य सूर्यस्य) पूर्वीः संदृशः (=बह्वीः शोभाश्) चकानः (=कामयमानः) [स] दूतः उषसो विरोके (=विरोचने प्रातःकाले) सम् अद्यौत् (=सम्यक् प्रकाशितवान्) ॥

३. अपां गर्भः (=मेघोदकानां सूनुर्) मित्रः (=सखा) ऋतेन साधन् (=सत्यभूतेन यज्ञेन मनोरथान् साधयन्) अग्निर्मानुषीषु विक्षु (=मनुसंबन्धिनीषु प्रजासु =अस्मिन्मनुष्यलोके) अधायि (=स्थापितोस्ति) । हर्यतः (=स्पृहणीयो) यजतः (=पूज्यः) [स] सानु आ अस्थात् (=आगत्य "उच्छ्रितं धिष्ण्यम् उत्तरवेद्याख्यम्" अध्यतिष्ठत्) । विप्रः (=मेधावी) मतीनां (=स्तोतॄणां) हव्योभूत् उ (=स्तुत्योभूत्) ॥

२. पूजनीय अग्नि स्तोत्यांच्या स्तोत्रांनीं, वाणींनीं, आणि शस्त्रांनीं फार वाढला आहे. सत्य[रूप आदित्या]च्या अनेक शोभांची वांछा करून [जो] दूत उषेच्या प्रभातेबरोबर लकलकीत प्रकाशला आहे.

३. उदकांचा बाळ, मित्र, आणि सत्य[मय यज्ञा]नें कार्यसिद्धि करणारा असा जो अग्नि तो मनुष्यलोकीं स्थापिला आहे. तो कमनीय [आणि] पूज्य [अग्नि] येऊन शिखरावर बसला आहे. मेधावी [अग्नि] स्तोत्यांनीं आळविण्यास योग्य झाला आहे.

2. Adorable Agni has grown mighty through the hymns, the songs, and the encomiums of the praisers. Desirous of the many beauties of the holy [sun], the [celestial] messenger has burst into splendor at the break of dawn.

3. Agni the offspring of the [celestial] waters, the friend, accomplishing [his end] through the holy sacrifice, has been established among the human races. Handsome [and] adorable, [Agni] has come and mounted the pinnacle. Wise Agni has become worthy of being invoked by the poets.

---

२. 'शस्त्रांनीं वाढला आहे'='उक्थैः प्र वव्रृधे.' 'शस्त्र' म्ह० कितीएक सूक्तें मिळून एकत्र म्हणण्यासाठीं केलेला जो समूह तो.

३. 'शिखरावर बसला आहे' ='सानु अस्थात्.' म्हणजे उत्तर वेदी या नांवाची अग्नि पेटविण्याची जी उंच जागा असते ती येथें विवक्षित आहे असें सायण म्हणतात. तें खरें असेल.

मित्रो अग्निर्भवति यत्समिद्धो मित्रो होता वरुणो जातवेदाः ।
मित्रो अध्वर्युरिषिरो दमूना मित्रः सिन्धूनामुत पर्वतानाम् ॥ ४ ॥

मित्रः । अग्निः । भवति । यत् । सम्ऽइद्धः । मित्रः । होता । वरुणः । जातऽवेदाः ।
मित्रः । अध्वर्युः । इषिरः । दमूनाः । मित्रः । सिन्धूनाम् । उत । पर्वतानाम् ॥ ४ ॥

पाति प्रियं रिपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य ।
पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ५॥२४

पाति । प्रियम् । रिपः । अग्रम् । पदम् । वेः । पाति । यह्वः । चरणम् । सूर्यस्य ।
पाति । नाभा । सप्तऽशीर्षाणम् । अग्निः । पाति । देवानाम् । उपऽमादम् । ऋष्वः ॥ ५ ॥ २४ ॥

भाषायाम्.

४. अग्निः समिद्धः (=सम्यग्दीप्तः सन्) मित्रः (=सूर्यो) भवति । [स] मित्रो होता वरुणो जातवेदाश् [च] [भवति] । [स] मित्रः अध्वर्युः इषिरः (=वायुर्) दमूनाः (=गृहेभ्यः सुखकारी एतन्नामकोग्निर्) [भवति] । [स] सिन्धूनाम् उत पर्वतानां मित्रः (=नदीनां पर्वतानां च) मित्रः (=सखा) [भवति] ॥

५. [अग्निः] प्रियं (=स्वप्रीतिकरम्) अग्रं (=श्रेष्ठं) वेः पदम् (=अग्निलक्षणस्य पक्षिणः स्थानं वेदिरूपं) रिपः (=शत्रोः सकाशात्) पाति (=रक्षति) । यह्वः (=महान्) [स] सूर्यस्य चरणं (=संचारस्थानं द्युलोकं) पाति । अग्निर्नाभा (=नाभौ मध्यमस्थाने=अन्तरिक्षे) सप्तशीर्षाणं (=सप्तशिरस्कं=? “ मरुद्गणं ”) पाति । ऋष्वः (=श्रेष्ठोग्निर्) देवानामुपमादं (=हर्षकारकं यज्ञं) पाति ॥

४. जेंव्हां अग्नि प्रदीप्त [होतो] [तेंव्हां] [तो] मित्र होतो. [अग्नि] मित्र, होता, वरुण [आणि] जातवेद [होतो]. तो मित्र, अध्वर्यु, वायु, [आणि] दमूना [होतो]. [तो] सिंधूंचा आणि पर्वतांचा मित्र [होतो].

५. तो पक्ष्याचें जें श्रेष्ठ प्रिय स्थान त्याला शत्रूपासून रक्षितो. महान् [अग्नि] सूर्याचें संचारस्थान रक्षितो. अग्नि मध्यस्थानीं सात शिरें ज्यास आहेत त्याला रक्षितो. सुंदर [अग्नि] देवांच्या यज्ञाला रक्षितो.

4. Agni when kindled becomes Mitra, [becomes] Mitra, Hotâ, Varuṇa, [and] Jâtavedas. [He becomes] Mitra, Adhvaryu, Vâyu, [and] Damûnas. [He becomes] the friend of the rivers and of the mountains.

5. He protects from the enemy the beloved high seat of the Bird. Great [Agni] protects the sphere of the sun. Agni protects in the centre him who has seven heads. Supreme [Agni] protects that which delights the gods.

---

४. अग्नीचें सर्वात्मकस्वरूप यांत वर्णिलें आहे, असें सायण म्हणतात. त्याप्रमाणें तात्पर्य असें कीं, ‘अग्नि हाच मित्र, वरुण, होता, जातवेद, अध्वर्यु, वायु, दमूना होय. आणि तोच नद्यांचा आणि पर्वतांचा मित्र होय.’ तसेंच दिसतें खरें; पण त्याला अडचण इतकीच कीं ‘मित्र’ शब्द चारहि चरणांत आला आहे, आणि त्यांतून चवथ्या चरणांत त्याचा अर्थ, ‘स्नेही’ ‘सखा’ असा करावा लागतो.

५. ‘पक्ष्याचें स्थान’=‘पदं वेः’ म्हणजे ‘वेदी.’ अग्निरूप पक्षी ज्यांत बसतो तें स्थान म्हणजे वेदि, असें वेदांत प्रसिद्ध आहे.

‘सात शिरें ज्यास आहेत त्याला’=‘सप्तशीर्षाणम्.’ म्हणजे कोण घ्यावयाचा तें सांगवत नाहीं. सायण मरुद्गण असें म्हणतात.

ऋभुश्चक्र ईड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान् ।
ससस्य चर्म घृतवत्पदं वेस्तदिदग्नी रक्षत्यप्रयुच्छन् ॥ ६ ॥

ऋभुः । चक्रे । ईड्यम् । चारु । नाम । विश्वानि । देवः । वयुनानि । विद्वान् ।
ससस्य । चर्म । घृतऽवत् । पदम् । वेः । तत् । इत् । अग्निः । रक्षति । अप्रऽयुच्छन् ॥ ६ ॥

आ योनिमग्निर्घृतवन्तमस्थात्पृथुप्रगाणमुशन्तमुशानः ।
दीद्यानः शुचिर्ऋष्वः पावकः पुनःपुनर्मातरा नव्यसी कः ॥ ७ ॥

आ । योनिम् । अग्निः । घृतऽवन्तम् । अस्थात् । पृथुऽप्रगानम् । उशन्तम् । उशानः ।
दीद्यानः । शुचिः । ऋष्वः । पावकः । पुनःऽपुनः । मातरा । नव्यसी इति । करिति कः ॥ ७ ॥

भाषायाम्.

६. ऋभुः (=महान्) देवः (=दीप्तिमान्) [अग्निर्] विश्वानि वयुनानि (=सर्वाणि कर्माणि) विद्वान् (=जानन्) [स्वकीयं] नाम ईड्यं (=स्तुत्यं) चारु (=कमनीयं=प्रियं च) चक्रे। वेः पदं (=वेः पदे=अग्निलक्षणस्य पक्षिणः स्थाने वेद्यां) ससस्य (=स्वपतोऽग्नेश्) चर्म (=भस्मरूपं) घृतवत् (=दीप्तिमद्) [भवति]। अग्निः अप्रयुच्छन् (=अप्रमाद्यन्=प्रमादरहितं यथा तथा) तदित् (=तदेव) रक्षति ॥

अज्वलतोप्यग्नेर्भस्म दीप्तिमद्भाति तच्च स वेद्यां भृशं रक्षतीत्यर्थः ॥

७. अग्निर्घृतवन्तं (=दीप्तिमन्तं) योनिं (=स्वस्थानं वेदिरूपम्) आ अस्थात् (=आरुह्याध्यतिष्ठत्)। उशानः (=कामयमानोऽग्निः) पृथुप्रगानं (=विस्तीर्णप्रवेशम्) उशन्तं (=कामयमानं) [योनिम्] [आस्थात्]। दीद्यानः (=द्योतमानः) शुचिः (=शुद्ध) ऋष्वः (=श्रेष्ठः) पावको मातरा (=मातापितरौ=अरण्यौ) पुनःपुनर्नव्यसी (=नवीयसौ=तरुणतरे) कः (=अकः करोति) ॥

६. महान् [जो] देव [अग्नि] [तो] सकल कर्में जाणणारा होत्साता [आपलें] नांव स्तुत्य [आणि] प्रिय करिता झाला आहे. पक्ष्याचे स्थानीं निद्रित असतांहि त्याचें चर्म लखलखीत असतें. तें अग्नि जपून संभाळितो.

७. अग्नि देदीप्यमान आसनावर चढला आहे. विस्तीर्ण प्रिय [आसना]वर प्रेमानें [चढला आहे]. देदीप्यमान, शुद्ध, [आणि] महान् [असा जो] पावक, [तो] [आपल्या] आईबापांस पुनःपुनः तरुण करितो.

6. The great god [Agni] knowing all holy works, has made [his] name praiseworthy [and] dear. The skin of him even when sleeping [on] the seat of the Bird is brilliant. Agni protects that with care.

7. Agni has ascended [his] brilliant seat. Lovingly he [has ascended] [his] wide [and] loving seat. Resplendent, pure [and] high, Pâvaka makes [his] parents young again and again.

---

६. 'अग्नि वेदीवर विझाला आणि केवळ भस्म राहिलें तरी तें भस्म तेजस्वी दिसतें. त्याचें वेदीवर तो संभाळून रक्षण करितो' असें दुसऱ्या पादाचें तात्पर्य.

यांत 'पदं वेः' हें 'पदे वेः' या अर्थीं घ्यावें लागतें इतकी अडचण आहे.

७. जीं दोन लांकडें एकमेकांवर घांसून अग्नि पाडीत त्याचें नांव 'अरणि;' त्यांस अग्नीचीं आईबापें असें म्हणण्याची चाल आहे. त्यांतून अग्नीचा जन्म झाला तरी तीं म्हातारीं होत नाहींत. व अग्नि त्यांतून निघून वेदिरूप स्थानावर मोठ्या प्रीतीनें बसतो असें तात्पर्य.

सद्यो जात ओषधीभिर्ववक्षे यदी वर्धन्ति प्रस्वो घृतेन ।
आप इव प्रवता शुम्भमाना उरुष्यदग्निः पित्रोरुपस्थे ॥ ८ ॥
सद्यः । जातः । ओषधीभिः । ववक्षे । यदि । वर्धन्ति । प्रऽस्वः । घृतेन ।
आपःऽइव । प्रऽवता । शुम्भमानाः । उरुष्यत् । अग्निः । पित्रोः । उपऽस्थे ॥ ८ ॥
उदु ष्टुतः समिधा यह्वो अद्यौद्वर्ष्मन्दिवो अधि नाभा पृथिव्याः ।
मित्रो अग्निरीड्यो मातरिश्वा दूतो वक्षद्यजथाय देवान् ॥ ९ ॥
उत् । ऊं इति । स्तुतः । सम्ऽइधा । यह्वः । अद्यौत् । वर्ष्मन् । दिवः । अधि । नाभा । पृथिव्याः ।
मित्रः । अग्निः । ईड्यः । मातरिश्वा । आ । दूतः । वक्षत् । यजथाय । देवान् ॥ ९ ॥

भाषायाम्.

८. जातः (=जातमात्रः) सद्यः (=क्षिप्रम्) ओषधीभिर्ववक्षे (=समिद्भिर्वर्धते) । यदि (=यस्मात्कारणात्) प्रस्वः (=ओषध्यस्) [तं] घृतेन वर्धन्ति (=स्वान्तर्भूतेन रसेन वर्धयन्ति) । प्रवता शुम्भमाना आप इव (=प्रवणेन मार्गेण सशोभं यथा तथा गच्छन्त्य आप इव) अग्निः पित्रोरुपस्थे (=मातापित्रोरुत्सङ्गे तिष्ठन्) [अस्मान्] उरुष्यत् (=रक्षतु) ॥

९. यह्वः (=महान्) [अग्निः] स्तुतः [सन्] समिधा (=तेजसा) उत् उ अद्यौत् (=उत्तरं द्योतमानोभूत्)— पृथिव्या अधि नाभा (=पृथिव्या नाभौ=उत्तरवेदिरूपे पृथिवीमध्यप्रदेशे) दिवो वर्ष्मन् (=आ दिवो वर्ष्मण) [उत् अद्यौत्] । मित्रः (=सर्वेषां सखिभूत) ईड्यो दूतः (=स्तुत्यो दूतभूतः) अग्निर्मातरिश्वा (=मातरिश्वनामाग्निर्) देवान् यजथाय (=यज्ञाय) आ वक्षत् (=आवहतु) ॥

अस्माभिः संदीपितः स्तुतश्च सन् यस्मादग्निर्द्युलोकपर्यन्तं प्रकाशते अतो द्युलोकाद्देवान् अत्र यज्ञ आनयत्वित्यभिप्रायः ॥

८. अग्नि उपजतांच समिधांनीं वाढतो. कारण समिधा घृतानें [त्याला] वाढवितात. उतरणीनें [वाहणाऱ्या] शोभायमान उदकांप्रमाणें अग्नि मातापितरांच्या मांडीवर [आम्हांला] रक्षो.

९. महान् अग्नि स्तविला होत्साता तेजानें प्रकाशमान झाला आहे– पृथिवीच्या मध्यस्थानावरून द्युलोकाच्या उंचीपर्यंत [प्रकाशमान झाला आहे]. मैत्री करणारा, [आणि] स्तुत्य मातरिश्वा अग्नि दूत देवांला यज्ञासाठीं येथें आणो.

8. As soon as born he grows by the sticks, for the sticks nourish him with fat. Like waters shining on a slope, may Agni protect [us] on the lap of his parents.

9. Being praised great Agni has shone up by his effulgence—[has shone up] on the navel of earth into the height of heaven. May Agni Mâtaris'vâ, the friendly and praiseworthy messenger, bring the gods for the sacrifice.

---

८. ‘ अरणींतून अग्नि उत्पन्न होतांच तो समिधांनीं वाढतो. अरणीरूप मातापितरांच्या मांडीवरून तो उतरणीवरून धांवणाऱ्या उदकांप्रमाणें बाहेर येऊन आम्हांस रक्षो.’

परंतु या ऋचेचा उत्तरार्ध किंचित् दुर्बोध आहे. कारण कीं. ‘ पित्रोरुपस्थे ’ या सप्तमी ऐवजीं ‘ पित्रोरुपस्थात्’ असें असावयाचें होतें, आणि ‘ वाहणाऱ्या’ या अर्थाचें पद ‘आप इव प्रवता ’ याजबरोबर पाहिजे होतें. पाश्चात्य विद्वान् ‘ पित्रोरुपस्थे उरुष्यत् ’ याचा अर्थ ‘ आईबापांच्या मांडीवर (आकाशांत ?) पसरो ’ असा करितात.

९. ‘खाण्यासाठीं समिधा देत आहों व बळ येण्यासाठीं स्तुति करीत आहों, यामुळें हा अग्नि वेदीपासून स्वर्गापर्यंत पेटत आहे; तर तो स्वर्गापासून देवांला येथें आणो.’

मातरिश्वा हें अग्नीचें विशेषण आहे. सू. ९६ मं. ४ आणि टीप पहा.

उदस्तम्भीत्समिधा नाकमृष्वो३ऽग्निर्भवन्नुत्तमो रोचनानाम् ।
यदी भृगुभ्यः परि मातरिश्वा गुहा सन्तं हव्यवाहं समीधे ॥१०॥

उत् । अस्तम्भीत् । सम्ऽइधा । नाकम् । ऋष्वः । अग्निः । भवन् । उत्ऽतमः । रोचनानाम् ।
यदि । भृगुऽभ्यः । परि । मातरिश्वा । गुहा । सन्तम् । हव्यऽवाहम् । सम्ऽईधे ॥ १० ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥११॥२५॥

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ११ ॥ २५ ॥

भाषायाम्.

१०. यदि (=यदा) मातरिश्वा [नाम कश्चिद्] हव्यवाहं (=हविषां वोढारम्) [अग्निं] गुहा सन्तम् (=अन्तर्हितं वर्तमानं) भृगुभ्यः परि (=भृगूणां सकाशाद्) [आनीय] सम् ईधे (=समदीपयत्) तदानीम् ऋष्वः (=महान्) अग्नी रोचनानाम् उत्तमो भवन् (=सर्वेषां तेजसां मध्य उच्चैस्तमो भवन्) समिधा (=तेजसा) नाकम् उदस्तम्भीत् (=स्वर्गम् उदस्तभ्नात्) ॥

भृगुभ्यः आदित्यस्य रश्मिभ्य इति सायणः । स्यात् तथा ॥

११. हे अग्ने, हवमानाय (=स्तुवते मह्यं) शश्वत्तमं (=चिरकालं यथा तथा) पुरुदंसं (=प्रभूतवीरकर्माणं=प्रभूतवीरकर्मणां कारयित्रीम्) इळां (=भूमिं) गोः सनिं [च] (=गवां लाभं च) साध (=साधय) । नः सूनुस्तनयः (=अस्माकं पुत्रः पौत्रश्च) विजावा स्यात् (=पुत्रपौत्रादिरूपेण स्वयं विजायत इति तथोक्तः) स्यात् (=भवतु) । हे अग्ने, सा ते सुमतिः (=तव सा प्रसिद्धा सुबुद्धिरनुग्रहात्मिका) अस्मे भूतु (=अस्माकं भवतु) ॥

१०. जेव्हां मातरिश्वा गुप्त असलेल्या हविर्वाहकाला भृगूंपासून आणून पेटविता झाला, तेव्हां महान् अग्नि आपल्या कान्तीनें [सर्व] तेजांमध्यें अति उंच होऊन स्वर्गाला अंतराळीं स्तब्ध करिता झाला.

११. हे अग्नी, तुझा धांवा करणाऱ्याला तूं बहु पराक्रम करविणारी भूमि आणि गुरांची समृद्धि हीं सदैव प्राप्त करून दे. आमचे पुत्रपौत्र संतान वाढविणारे होओत. हे अग्नी, तुझी जी कृपा ती आम्हांला प्राप्त होओ.

10. Becoming the highest of all resplendent things, great Agni supported heaven through his effulgence, when Mâtaris'vâ kindled the carrier of oblation from the Bhṛigus as he lay [there] in hiding.

11. O Agni, ever and ever do thou procure for thy worshipper land full of many valorous deeds and an affluence of cows. May our sons and grandsons be prolific. O Agni, may that thy favour be ours.

---

१०. या मंत्रांत मातरिश्वा म्हणजे ज्या देवानें अग्नीला पृथिवीवर प्रथम आणिलें तो देव समजावयाचा आहे, तो कोण होय याविषयीं सू. ३१ मं. ३ आणि टीप पहा.

‘ भृगूंपासून ’ ‘ भृगुभ्यः परि.’ म्ह० सूर्यकिरणांपासून, असें सायण म्हणतात; तसें असेल. मातरिश्वा या देवाविषयीं जें पूर्वीं आम्हीं लिहिलें आहे तें पहा.

‘ गुप्त असलेल्या ’=‘ गुहा सन्तम्.’ म्हणजे अग्नि भृगूंमध्यें (सूर्यकिरणांमध्यें) लपून राहिला होता, तेथून त्याला मातरिश्व्यानें शोधून आणिलें.

सूक्तम् ६–२४०.

विश्वामित्र ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देवयन्तः ।
दक्षिणावाड्वाजिनी प्राच्येति हविर्भरन्त्यग्नये घृताची ॥ १ ॥

प्र । कारवः । मनना । वच्यमानाः । देवद्रीचीम् । नयत । देवऽयन्तः । दक्षिणाऽवाट् । वाजिनी । प्राची । एति । हविः । भरन्ती । अग्नये । घृताची ॥ १ ॥

आ रोदसी अपृणा जायमान उत प्र रिक्था अध नु प्रयज्यो ।
दिवश्चिदग्ने महिना पृथिव्या वच्यन्तां ते वह्नयः सप्तजिह्वाः ॥२॥

आ । रोदसी इति । अपृणाः । जायमानः । उत । प्र । रिक्थाः । अध । नु । प्रयज्यो इति प्रऽयज्यो ।
दिवः । चित् । अग्ने । महिना । पृथिव्याः । वच्यन्ताम् । ते । वह्नयः । सप्तऽजिह्वाः ॥ २ ॥

भाषायाम्.

१. हे कारवः (=स्तोतारः), देवयन्तः (=देवान् कामयमाना यूयं) वच्यमानाः (=धावन्तः सन्तः=अतिशयेन ससंभ्रमं यथा तथा) देवद्रीचीं (=देवान् प्रति गच्छन्तीं) [स्रुचं] प्र नयत (=हविरर्पणाय प्रधारयत) । वाजिनी (=अन्नवती) घृताची (=घृतेनोक्ता) अग्नये हविर्भरन्ती [स्रुक्] प्राची दक्षिणावाट् एति (=प्रागग्रा सती दक्षिणां दिशम् उह्यमाना गच्छति) ॥

२. जायमानः (=जातमात्र एव) [त्वं] रोदसी (=द्यावापृथिव्यौ) आ अपृणाः (=आपूरयः) उत (=अपि च) हे प्रयज्यो (=यष्टव्य), अध नु प्र रिक्थाः (=ताभ्यां प्रकृष्टतरोऽभवः) । हे अग्ने, महिना (=तव महिम्ना) दिवः पृथिव्याश्चित् [प्ररिक्थाः] (=द्यावापृथिवीभ्यां प्रकृष्टतरोभवः) । ते (=तव) सप्तजिह्वाः (=सप्तजिह्वोपेता) वह्नयः (=वाहा) वच्यन्तां (=गच्छन्तु त्वां गृहीत्वात्रागच्छन्तु)॥

सूक्त ६–२४०.

ऋषि–विश्वामित्र. देवता–अग्नि. वृत्त–त्रिष्टुभ्.

१. हे स्तोते हो, देवकामी जे तुम्ही ते ससंभ्रम होत्साते देवांकडे धांवणाऱ्या पळीला स्तोत्रासहित पुढें करा. अन्नवती, घृतयुक्त, अग्नीसाठीं हवि वाहणारी पळी पूर्वेकडे तोंड करून दक्षिणेकडे जाओ.

२. तूं जन्मतांच द्यावापृथिवींस भरून टाकिता झालास. आणि हे पूजनीय [अग्नी], तूं [त्यांहून] मोठा झालास. हे अग्नी, तूं [आपल्या] मोठेपणानें द्युलोक आणि पृथिवी यांहून [मोठा झालास]. तुझे जे सप्तजिह्व वाह ते येओत.

Hymn 6–240.

To *Agni*. By *Vis'vâmitra*. Metre–*Trishṭubh*.

1. O priests, do ye, who long for the gods, actively hold forth with a hymn the ladle that will run to the gods. Rich, containing clarified butter, [and] bearing food for Agni, let it go towards the south with its end towards the east.

2. When born thou didst fill earth and heaven and didst, o adorable one, even surpass [them]–[didst surpass], o Agni, heaven and earth by [thy] greatness. Let thy horses of seven tongues come forth.

---

१. ‘ पूर्वेकडे तोंड करून दक्षिणेकडे जाते ’=‘ दक्षिणावाट् प्राची एति.’ हा अर्थ सायणांप्रमाणें आम्हीं केला आहे. हवि देण्याच्या प्रकारास अनुलक्षून यांतील वचन आहे.

२. ‘ अग्नि उत्पन्न होतांच त्याणें आपल्या मोठेपणानें पृथिवी आणि द्युलोक यांस भरून टाकिलें आणि त्यापेक्षांहि मोठा झाला. तर हे अग्नी, तुझे घोडे तुला घेऊन येओत.’

‘ सप्तजिह्व वाह ’=‘ सप्तजिह्वा वह्नयः.’ अग्नीचे घोडे सात जिह्वांचे आहेत असें दुसरे ठिकाणीं फार प्रसिद्ध नाहीं. सायण सप्तजिह्व याचा येथें ‘ सप्तजिह्वात्मक ऋत्विक् ’ म्हणजे अग्नीच्या ज्या सात जिभा (ज्वाळा) तेच सात ऋत्विज् असा अर्थ करितात, आणि ‘ वच्यन्ताम् ’ याचा अर्थच करीत नाहींत, पण बहुतकरून ‘ बोलोत ’ असा त्याविषयीं त्यांचा विवक्षित अर्थ दिसतो.

द्यौश्च॑ त्वा पृथि॒वी य॒ज्ञिया॑सो॒ नि होता॑रं सादयन्ते॒ दमा॑य ।
यदी॑ वि॒शो मानु॑षीर्दे॒व॒यन्ती॒ः प्रय॑स्वती॒रीळ॑ते शु॒क्रम॒र्चिः ॥ ३ ॥

द्यौः । च॒ । त्वा॒ । पृ॒थि॒वी । य॒ज्ञिया॑सः । नि । होता॑रम् । सा॒द॒य॒न्ते॒ । दमा॑य ।

यदि॑ । विशः॑ । मानु॑षीः । दे॒व॒ऽयन्तीः॑ । प्रय॑स्वतीः । ईळ॑ते । शु॒क्रम् । अ॒र्चिः ॥ ३ ॥

म॒हान्त्स॒धस्थे॑ ध्रु॒व आ निष॑त्तो॒ऽन्तर्द्यावा॑ माहि॑ने॒ हर्य॑माणः ।
आस्क्रे॑ स॒पत्नी॑ अ॒जरे॒ अमृ॑क्ते स॒ब॒र्दुघे॑ उरुगा॒यस्य॑ धे॒नू ॥ ४ ॥

म॒हान् । स॒ध॒ऽस्थे॑ । ध्रु॒वः । आ । नि॒ऽस॑त्तः । अ॒न्तः । द्यावा॑ । माहि॑ने॒ इति॑ । हर्य॑माणः ।

आस्क्रे॒ इति॑ । स॒पत्नी॒ इति॑ स॒ऽपत्नी॑ । अ॒जरे॒ इति॑ । अमृ॑क्ते॒ इति॑ । स॒ब॒र्दुघे॒ इति॑ स॒बः॒ऽदुघे॑ । उ॒रु॒ऽगा॒यस्य॑ । धे॒नू इति॑ ॥ ४ ॥

भाषायाम्.

३. द्यौश्च पृथिवी [च] (=द्यावापृथिव्यौ) यज्ञियासः (=पूजनीया देवाश्च दमाय (=गृहाय) त्वा (=त्वां) होतारं (=देवानामाह्वातारं) नि सादयन्ते (=स्थापयन्ति स्म) । यदि (=यत्र गृहे) मानुषीर्विशः (=मनुष्यप्रजाः) देवयन्तीः (=देवान् कामयमानाः) प्रयस्वतीः (=प्रयस्वत्यः=हविरन्नयुक्ताः सत्यः) शुक्रम् अर्चिः (=तेजस्विनीं दीप्तिम्) ईळते (=स्तुवन्ति) ॥

४. महान् हर्यमाणः (=कामयमानः) [स] सधस्थे आ (=स्वकीये स्थाने) अन्तर्माहिने द्यावा (=महत्योर्द्यावापृथिव्योर्मध्ये च) ध्रुवो निषत्तः (=अचलः सन् निषण्णो भवति=अचलं यथा तथा निषीदति) । आस्क्रे (=शत्रूणामास्कन्दनशीले =शत्रुजिते) अजरे (=सदा युवत्यौ) अमृक्ते (=केनाप्यहिंसिते) सबर्दुघे (=अमृतदोग्ध्र्यौ) सपत्नी (=सपत्न्यौ=समानपतिके) [द्यावापृथिव्यौ] उरुगायस्य (=पृथुगमनस्याग्नेर्) धेनू (=धात्र्यौ) [भवतः] ॥

सपत्नी समान एकः सूर्यः पतिर्ययोस्ते इति सायणः ॥

३. द्यू आणि पृथिवी [आणि] पूज्य [देव] ह्यांनीं तुला गृहाकरितां होता करून स्थापिलें आहे. आणि तेथें देवकामी मनुष्यलोक हविरन्न घेऊन तुझ्या लखलखीत दीप्तीला स्तवितात.

४. महान् असा जो अग्नि तो मोठ्या प्रीतीनें निरंतर आपल्या घरीं [आणि] महा द्यावापृथिवींच्या मध्यें बसून राहातो. आक्रमणशील, अजर, अविनाशी [आणि] अमृताचा पान्हा सोडणाऱ्या ज्या दोघी सवती त्या दीर्घगामी अग्नीच्या दाया होत.

3. Heaven and earth and the adorable [gods] established thee [as] an invoker for the house, where the human races, longing for the gods, with sacrificial food with them, praise thy brilliant flame.

4. Loving [Agni] who is great sits eternal in his home and in the two great worlds. The two rival wives, victorious [and] ever young [and] indestructible [and] yielders of nectar, are the nurses of the long-striding one.

---

३. ‘ अग्नीला देवांनीं मनुष्यांच्या घरीं होता म्हणून नेमिलें आहे. तेथें (घरीं) मनुष्यें त्याला हवि अर्पण करून पूजितात.’

४. ‘ अग्नीला दूध पाजणाऱ्या दाया म्हटल्या म्हणजे द्यावापृथिवी होत.’

‘ आपल्या घरीं ’=‘ सधस्थे.’ म्हणजे यज्ञमंडपांत असा अर्थ आहे.

‘ दोघी सवती ’=‘ सपत्नी.’ म्हणजे द्यावापृथिवीच समजावयाच्या.

‘ दीर्घगामी ’=‘ उरुगायस्य.’ म्हणजे जिकडेतिकडे जाणारा, मोठ्या वेगानें जाणारा.

व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततन्थ ।
त्वं दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनाम् ॥५॥२६॥

व्रता । ते । अग्ने । महतः । महानि । तव । क्रत्वा । रोदसी इति । आ । ततन्थ ।

त्वम् । दूतः । अभवः । जायमानः । त्वम् । नेता । वृषभ । चर्षणीनाम् ॥ ५ ॥ २६ ॥

ऋतस्य वा केशिना योग्याभिर्घृतस्नुवा रोहिता धुरि धिष्व ।
अथा वह देवान्देव विश्वान्त्स्वध्वरा कृणुहि जातवेदः ॥ ६ ॥

ऋतस्य । वा । केशिना । योग्याभिः । घृतऽस्नुवा । रोहिता । धुरि । धिष्व ।

अथ । आ । वह । देवान् । देव । विश्वान् । सुऽअध्वरा । कृणुहि । जातऽवेदः ॥ ६ ॥

भाषायाम्.

५. हे अग्ने, महतस्तव व्रता (=व्रतानि चरितानि) महानि (=महान्ति) [सन्ति] । तव क्रत्वा (=क्रतुना=प्रज्ञया) [त्वं] रोदसी (=द्यावापृथिव्यौ) आ ततन्थ (=विस्तृतवानसि)। त्वं जायमानः (=जातमात्र एव) दूतोभवः। हे वृषभ (=वीर), त्वं चर्षणीनां (=मनुष्याणां) नेता (=नायको) [भवसि] ॥

६. केशिना (=केशिनौ प्रशस्तकेशवन्तौ) घृतस्नुवा (=घृतं क्षरन्तौ) रोहिता (=रोहितावश्वौ) योग्याभिः (=रज्जुभिर्) ऋतस्य धुरि (=सत्यरूपस्य यज्ञस्य धुरि) धिष्व (=धेहि)। अथ (=अपि च) हे देव, विश्वान् देवान् आ वह (=आनय)। [अपि च] हे जातवेदः, [अस्माकं कर्माणि] स्वध्वरा (=स्वध्वराणि हिंसारहितानि) कृणुहि (=कुरु) ॥

५. हे अग्नी, महान् जो तूं त्या तुझीं चरितें महान् [होत]. तूं आपल्या पराक्रमानें द्यावापृथिवींस पसरिता झालास. तूं उत्पन्न होतांच दूत झालास. हे वीरा, तूं जनांचा नायक [आहेस].

६. सुंदर अयाळ असलेले, घृतस्रावी [आणि] आरक्त रंगाचे जे तुझे घोडे त्यांस दोऱ्यांनीं सत्याच्या धुरेला जोड. आणि हे देवा, तूं सर्व देवांला इकडे आण. हे सर्वज्ञा, तूं [आमचीं] यजनें निर्विघ्नपणें तडीस ने.

5. Great are thy deeds, o Agni, thou who art great. Thou didst expand the two worlds by thy wisdom. [So soon as] born thou didst become the messenger. Thou [art], o hero, the leader of the people.

6. Harness with strings to the yoke of Truth the two tawny horses, shaggy [and] dropping clarified butter. And bring all the gods, o god! Make, o all-knowing [Agni], our rites free from obstruction.

---

५. 'चरितें.' म्हणजे द्यावापृथिवींस पसरून ठेविलें इत्यादिक जीं तीं.

६. 'सत्याच्या धुरेला'='ऋतस्य धुरि.' म्हणजे सत्यरूप यज्ञ; तोच रथ अग्नीला घेऊन मनुष्यलोकाहून देवलोकीं जातो, आणि तेथून अग्नीला घेऊन पुनः पृथिवीवर येतो. त्याच्या धुरेला, असा अर्थ.

दिवश्चिदा ते रुचयन्त रोका उषो विभातीरनु भासि पूर्वीः ।
अपो यदग्न उशधग्वनेषु होतुर्मन्द्रस्य पनयन्त देवाः ॥ ७ ॥

दिवः । चित् । आ । ते । रुचयन्त । रोकाः । उषः । विऽभातीः । अनु । भासि । पूर्वीः ।
अपः । यत् । अग्ने । उशधक् । वनेषु । होतुः । मन्द्रस्य । पनयन्त । देवाः ॥ ७ ॥

उरौ वा ये अन्तरिक्षे मदन्ति दिवो वा ये रोचने सन्ति देवाः ।
ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः ॥८॥

उरौ । वा । ये । अन्तरिक्षे । मदन्ति । दिवः । वा । ये । रोचने । सन्ति । देवाः ।
ऊमाः । वा । ये । सुऽहवासः । यजत्राः । आऽयेमिरे । रथ्यः । अग्ने । अश्वाः ॥ ८ ॥

भाषायाम्.

७. हे अग्ने, यद् (=यदा) वनेषु (=अरण्येषु) अप उशधक् (=उदकान्यतिशयेन दहन्) [वर्तसे] [अपि च] मन्द्रस्य (=स्तुत्यस्य) होतुस् [तव] [रोकान्=दीप्तीर्] देवाः पनयन्त (=पनयन्ति=स्तुवन्ति) [तदा] ते रोकास् (=तव दीप्तयो) दिवश्चिदा (=द्युलोकपर्यन्तमपि) रुचयन्त (=आरोचन्ते) [अपि च] पूर्वीः (=प्रभूता) विभातीः (=प्रकाशवतीर्) उषसः अनुभासि ॥

८. उरौ (=विस्तीर्णे) अन्तरिक्षे वा ये [देवा] मदन्ति (=हृष्यन्ति) ये वा देवा दिवो रोचने (=द्युलोकस्य प्रकाशमाने प्रदेशे) सन्ति ये वा ऊमाः (=संरक्षणकर्तारः "ऊमसंज्ञकाः पितरः") सुहवासः (=शोभनाह्वाना) यजत्राः (=पूजनीयाः),— । हे अग्ने, रथ्यः (=रथसंबन्धिनस्) [तव] अश्वा आयेमिरे (=अत्रागमनाय रथे बध्यन्ते=युज्यन्ते),—

७. हे अग्नी, तूं जेव्हां अरण्यांत उदकें अगदी जाळून टाकणारा असा [असतोस], [आणि] [जेव्हां] तुज वर्णनीय होत्याच्या [दीप्ति] देव स्तवितात, तेव्हां तुझ्या दीप्ति द्युलोकापर्यंतहि प्रकाशतात, [आणि] तूं अनेक प्रकाशमान उषांच्या पाठोपाठ प्रकाशतोस.

७. Even up to heaven do thy rays shine, [and] thou shinest after numerous brilliant Ushases, when thou art, o Agni, a great burner of the waters in the forest, [and] when the gods praise the [rays of the] praiseworthy invoker.

८. जे [देव] विस्तीर्ण अंतरिक्षांत आनंद पावतात, अथवा जे देव द्युलोकाच्या प्रकाशपूर्ण प्रदेशांत आहेत, अथवा जे संरक्षण करणारे, सुलभाह्वान [आणि] पूज्य [देव] [आहेत],— हे अग्नी, रथाला जोडावयाचे घोडे जोडिले आहेत—,

8. Those [gods] that delight in the wide firmament, or who exist in the brilliant regions of heaven, or who [are] protectors, easily invoked [and] adorable—[thy] chariot horses, o Agni, are fastend—,

---

७. हा मंत्र जरा कठिण आहे. अक्षरार्थ बराच सोपा आहे, तरी कवीचा भावार्थ काय असेल तो स्पष्ट समजत नाहीं. 'तूं प्रतिदिनीं उषःकाळीं जागृत होतोस आणि तुझे किरण आकाशापर्यंत पोंहचतात, आणि तूं होता चांगला आहेस' असें साधारण तात्पर्य दिसतें; पण चारहि पादांचा अन्वय चांगला जुळत नाहीं.

तीस 'देवे' म्हणून जे मंत्रपुष्पांजलि देतांना म्हणतात त्यांत हा मंत्र म्हणण्याची चाल आहे. सू. १८५ मं. ९ आणि टीप पहा.

८. अंतरिक्ष, द्युलोक आणि पृथिवी यांजवरील सर्व देवांस रथाला घोडे जोडून घेऊन येण्याविषयीं यांत प्रार्थना आहे.

या मंत्रांतील 'देव' शब्दाचा अन्वय पुढच्या मंत्रांत घेतला पाहिजे.

ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः ।
पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमा वह मादयस्व ॥ ९ ॥

आ । एभिः । अग्ने । सऽरथम् । याहि । अर्वाङ् । नानाऽरथम् । वा । विऽभवः । हि । अश्वाः ।
पत्नीऽवतः । त्रिंशतम् । त्रीन् । च । देवान् । अनुऽस्वधम् । आ । वह । मादयस्व ॥ ९ ॥

स होता यस्य रोदसी चिदुर्वी यज्ञंयज्ञमभि वृधे गृणीतः ।
प्राची अध्वरेव तस्थतुः सुमेके ऋतावरी ऋतजातस्य सत्ये ॥ १० ॥

सः । होता । यस्य । रोदसी इति । चित् । उर्वी इति । यज्ञम्ऽयज्ञम् । अभि । वृधे । गृणीतः ।
प्राची इति । अध्वराऽइव । तस्थतुः । सुमेके इति सुऽमेके । ऋतवरी इत्यृतऽवरी । ऋतऽजातस्य । सत्ये इति ॥ १० ॥

भाषायाम्.

९. एभिः (=तैर्देवैः सह) हे अग्ने, सरथम् अर्वाङ् आ याहि (=एकमेव रथमधिष्ठाय अत्रागच्छ) नानारथं वा (=विभिन्नान् वा रथान् अधिष्ठाय) [आयाहि]। हि (=यस्मात् कारणात्) [तव] अश्वा विभवः (=प्रभवो) [भवन्ति] पत्नीवतः (=पत्नीयुक्तान्) त्रिंशतं त्रींश्च देवान् अनुष्वधं (=हविरन्नमुद्दिश्य) आ वह (=आनय)। [अपि च] मादयस्व (=सोमेन हर्षं प्रापुहि)॥

१०. [अग्निः] स होता (=तादृशो होता) [भवति] यस्य यज्ञंयज्ञं (=सर्वं यज्ञम्) उर्वी (=उर्व्यौ=विस्तीर्णे) रोदसी चित् (=द्यावापृथिव्यावपि) वृधे अभि गृणीतः (=अभिवृद्धये प्रशंसतः=समीचीनो यज्ञोयमिति प्रशंसां कृत्वा तं यज्ञमभिवृद्धं सफलं कुरुतः)। सुमेके (=सुरूपे) ऋतावरी (=सत्यवत्यौ) सत्ये (=सत्यस्वरूपे) [द्यावापृथिव्यौ] ऋतजातस्य (=सत्यजातस्य सत्यरूपाय यज्ञायोद्भूतस्य) अध्वरेव (=यज्ञाविव) प्राची (=अनुकूले) तस्थतुः (=तिष्ठतः)॥

उत्तरार्धे स्थितोपमा दुर्बोधा ॥

रोदसीपदेनात्र द्यावापृथिवीगता देवा बोद्धव्या भवन्ति ॥

९. त्यांसहित हे अग्नी, तूं एकाच रथांत बसून ये अथवा तुम्ही वेगवेगळ्या रथांत बसून [या]. कारण [तुझे] घोडे शक्तिमान् [आहेत]. तूं तीस आणि तीन देवांला त्यांच्या पत्नींसहित हविरन्नासाठीं घेऊन ये आणि आनंद पाव.

9. with those come, o Agni, hither in a common chariot or in separate chariots. For strong [are] [thy] horses. Bring to the oblation the thirty and three gods with their wives [and] be exhilarated.

१०. [अग्नि] असला होता [आहे] कीं विस्तीर्ण द्यावापृथिवीहि त्याच्या प्रत्येक यज्ञाची प्रशंसा करून अभिवृद्धि करितात. सुरूप, धर्ममय आणि सत्य अशा ज्या द्यावापृथिवी त्या सत्यजात [अग्नी]ला अध्वरांप्रमाणें अनुकूल [होऊन] उभ्या राहतात.

10. [Agni] is such a minister that even vast Heaven and Earth commend and prosper all his sacrifices. The beautiful, righteous [and] truthful [Heaven and Earth] stand favourable to the Truth-born like two sacrifices.

---

९. ‘ तीस आणि तीन देव ’ म्हणजे तेहतीस देव. सू. ३४ मं. ११ आणि टीप पहा.

१०. ‘ द्यावापृथिवी ’ प्रशंसा करितात म्हणजे द्यावापृथिवींत राहणारे जे जे म्हणून देव आहेत ते प्रशंसा करितात असें समजावयाचें आहे.

‘ अध्वरांप्रमाणें अनुकूळ होऊन उभ्या राहतात ’ हें ‘ अध्वरेव प्राची तस्थतुः ’ याचें भाषांतर सायणानुसार केलें आहे. पण त्या उपमेचा भावार्थ समजत नाहीं. मंत्राचा आम्हीं अक्षरशः अर्थ दिला आहे.

इळांमग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवंमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥
॥ ११ ॥ २७ ॥ ८ ॥

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हव-
नाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते ।
मतिः । भूतु । अस्मे इति ॥ ११ ॥ २७ ॥ ८ ॥ २ ॥

समाप्तोयं द्वितीयोष्टकः ।

भाषायाम्.

११. हे अग्ने, हवमानाय (=स्तुवते मह्यं) शश्वत्तमं (=चिरकालं यथा त
पुरुदंसं (=प्रभूतवीरकर्माणं=प्रभूतवीरकर्मणां कारयित्रीम्) इळां (=भूमिं)
सनिं [च] (=गवां लाभं च) साध (=साधय) । नः सूनुस्तनयः (=अस
पुत्रः पौत्रश्च) विजावा स्यात् (=पुत्रपौत्रादिरूपेण स्वयं विजायत इति तथो
स्यात् (=भवतु) । हे अग्ने, सा ते सुमतिः (=सा तव प्रसिद्धा सुबुद्धिरनुग्रहा
का) अस्मे भूतु (=अस्माकं भवतु)॥

। समाप्तेयं द्वितीयाष्टकस्य व्याख्या ।